मुकुन्दकोषस्थ—

लिङ्गानुशासनवर्गः

•

प्रणेता—

मुकुन्द शर्मा

•

स च—

भारत-शासनशिक्षामन्त्रालयदत्तद्रव्यसाहाय्येन प्रकाशितः ।

Supplied free of cost.
By the Govt. of India.
Ministry of Education
(Special officer for Samskrita)
[signature]
principal
29.6.63.

मुकुन्दकोषस्थ—

लिङ्गानुशासनवर्गः

LIṀGĀNUŚĀSANAVARGAḤ

श्रीमद्गढ़वालदेशान्तर्गतदेवप्रयागसमीपवर्तिखण्डग्रामनिवासिना श्रीमत्पण्डित-रघुवरदत्ततनुजनुषा मुकुन्दशर्मणा विरचितो लिङ्गानुशासनवर्गः ।

स च—

निजनिर्मितया विमलाख्यया संस्कृत-व्याख्यया संस्कृतटिप्पण्या च समलङ्कृतः ।

(BY MUKUND SHARMA)

WITH THE FINANCIAL ASSISTANCE OF THE MINISTRY OF EDUCATION, GOVERNMENT OF INDIA

प्रथमावृत्तिः १००० | शकाब्दाः १८८४ खिष्टाब्दाः १९६२

प्रकाशक :—
मुकुन्द शर्मा
मुकुन्दाश्रम,
ज्योतिस्तत्त्वकार्यालय,
पोस्ट ऑफिस—अमोल,
गढ़वाल, उत्तर प्रदेश।

मुद्रक :—
शान्तिलाल जैन
श्री जैनेन्द्र प्रेस,
बंगलो रोड, जवाहरनगर,
दिल्ली-६

मूल्यम् १२) रु०

प्राप्तिस्थानम्—

मुकुन्द शर्मा
C/o आचार्य पं० चक्रधर जोशी,
श्री लक्ष्मीधर विद्या मन्दिर,
पोस्ट ऑफिस देवप्रयाग,
गढ़वाल, उत्तर प्रदेश।

मुकुन्द शर्मा
मुकुन्दाश्रम,
ज्योतिस्तत्व कार्यालय,
पोस्ट ऑफिस अमोल,
गढ़वाल, उत्तर प्रदेश।

भूमिका

काचन जातिः किमपि राष्ट्रं वा यथा यथोन्नतिपथमारोहति तथा तथास्या अस्य वा वाङ्मयमप्युन्नमते। वाङ्मयवृद्धौ तद्भाषाशब्दानामपि वृद्धिर्नैसर्गिकी। नवनवार्थेषूदीयमानेषु नवनवास्तद्वाचकाः शब्दा अपि उदयन्ते। इत्थं क्रमेण शब्दसागरे परिवर्धमाने तदवगाहन-सौकर्याय कोषा अप्याविर्भवन्ति। अतिपुरातने वैदिके काले निघण्टुनामानः शब्दकोषा आसन्। इमे कोषा एकदेशिनः केवलं वैदिकानेव शब्दान् समगृह्णन्, न पुनर् लौकिकानपि। तदनु क्रमेण लौकिकभाषाशब्दसंग्राहका अपि कोषाः निरमीयन्त, इयं तदानीन्तनी लौकिकभाषा देवभाषा आसीत्, यां वयमिदानीं 'संस्कृतम्' इत्याचक्ष्महे।

इमे संस्कृतभाषाशब्दकोषा अर्थानां वर्गान् प्रकल्प्य तत्क्रमेणैव पद्येषु व्यरच्यन्त, न पुनराधु-निकशैल्या अर्थवर्गप्रक्लृप्तिमकृत्वा उदर्थश्शृङ्खलम् अकारादिवर्णक्रममाश्रित्य। वर्गक्रमेण निर्मि-तेषु कोशेषु एकार्थवाचकाः शब्दा एकत्रोपलभ्यन्ते, तेन लेखकैः प्रसङ्गोपयोगिशब्दानां विचयः साधु शीघ्रं च कर्तुं शक्यते, वर्णमात्रक्रमेण प्रणीतेषु कोषेषु तु समानार्थानां शब्दानां यत्र तत्र विकीर्णत्वाद् एकत्रानुपलम्भात् तथा कर्तुं न पार्यते। शीघ्रं शब्दार्थमात्रजिज्ञासाशान्तये तु वर्ण-क्रमेणैव रचिताः कोशा उपयोगिन इति निर्विवादम्।

अद्यत्वे वर्गक्रमेण ग्रथिता अमर-केशव-यादव-हलायुध-त्रिकाण्डशेषादयः त्रिंशत्पञ्चत्रिंशाः संस्कृतशब्दकोशा उपलभ्यन्ते, ते सर्वेऽपि लघुकायाः सन्ति। व्याडिर्नाम कश्चित् प्राचीनो विद्वान् लक्षश्लोकात्मकं संस्कृतभाषाकोशं निर्ममे—इति श्रूयते, परं न स इदानीमुपलभ्यते। पातञ्जले महाभाष्ये चर्चितः संग्रहनामको व्याकरणग्रन्थोऽपि व्याडिनैव कृत इति शब्दशास्त्रविदो विद्वांस आहुः, सोऽपि च ग्रन्थो लक्षश्लोकात्मक एव, न चाद्यत्वे समुपलभ्यते। लक्षसंख्याप्रियाविमौ कोशकार-संग्रहकारावुभावपि व्याडी किमेकैव व्यक्तिः ? उत द्वे व्यक्ती ? इति न निश्चित्य वक्तुं शक्नुमः।

अलमनया अप्रकृतचिन्तया, प्रकृतमनुसरामः। अमर-विश्वादयः कोशा अत्यल्पशब्दधनाः न कवीनाक्रष्टुं क्षमाः, शब्दकल्पद्रुमादयो बृहत्कायाः कोषा अपि वर्गक्रमेणाप्रणीतत्वाद् न कवीन् न वा लेखकान् आकर्षन्ति—इति कञ्चन विपुलशब्दराशिसंग्राहकं पद्यात्मकं वर्गक्रमवन्तं कोषं विरचयितुमनसः, ज्योतिर्विदां मूर्धन्याः, नैकेषां लघीयसां महीयसां च ज्योतिर्ग्रन्थानां प्रणेतारः, गढवालमण्डलान्तर्गत–सुरतरङ्गिणीतीरविराजितखण्डग्रामवास्तव्याः, द्विजकुलजेगीयमानयश-श्चक्रवालबडेथवालवंशविभूषकाः, श्रीमुकुन्दपादारविन्दमधुव्रताः, विद्वद्गणगीतमहिमानः श्री मुकुन्दरामशर्माणः त्रिशद्वर्षाण्यविरतं परिश्रम्य अद्य यावदुपलब्धान् सर्वान् कोशान् निपुणमधीत्य बृहद्वपुषं मुकुन्दकोषं विरचितवन्तः।

अस्य महाकोषस्य भागद्वयं वर्तते—पर्यायभागश्च अनेकार्थभागश्चेति । तत्र पर्यायभागे पञ्चाधिकशतं (१०५) वर्गाः सन्ति, अनेकार्थभागे च द्वौ वर्गौ वैद्यकानेकार्थवर्गः, साहित्यानेकार्थवर्गश्चेति । इत्थं सप्ताधिकशत(१०७)वर्गात्मकोऽयं महानभिधानसंग्रहोऽद्य यावत् प्रकाशितान् सर्वानप्यभिधानसंग्रहान् अतिशेते ।

अस्य महाग्रन्थस्य केवलमेकः पञ्चाधिकशततमोऽयं (१०५ वां) लिङ्गानुशासनवर्गः भारत-शासन (भारत-सरकार) साहाय्येन प्रकाशितः पाठकानां हस्तयोर्वर्तते । आशास्यते भारत-शासनमस्यावशिष्टान् अशेषानपि भागान् प्रकाशयितुं साहाय्यं वितरिष्यति ।

अस्मिन् लिङ्गानुशासनवर्गे हेमचन्द्राचार्यादिविरचितानि लिङ्गानुशासनानि संकलय्य ग्रन्थकृता स्वकृतया विमलाख्यया व्याख्यया सोदाहरणं व्याख्यातानि ।

ग्रन्थकर्तुर्विद्वद्वरस्यास्य कोशाध्ययनमत्यन्तप्रियम् । स्वयमेवायमाह—'मुकुन्दस्य प्रतिज्ञे द्वे कोषं गङ्गां च न त्यजेत्' इति । एतेनैव पाठका एतदनुमातुं शक्नुवन्ति यदेतन्महाकोशप्रणयने ग्रन्थकृता कियन्मनोयोगेन कियत् परिश्रान्तं भवेदिति । एतेन कोशेन संस्कृतभाषायाः तदुपनिबद्धस्य वाङ्मयस्य च श्रीवृद्धिर्भविष्यतीत्यसंशयं वचः । अन्ते च प्रार्थ्यते—

मुकुन्द इव लोकेऽयं मुकुन्दविदुदीरितः ।
मुकुन्दकोषः सततं जायतां विदुषां मुदे ॥

परमेश्वरानन्दः
महामहोपाध्यायः, विद्याभास्करः
केन्द्र-संस्कृत-मण्डलस्य भूतपूर्व-सदस्यः

कार्तिक कृ. ५मी, बुधवार,
संवत् २०१९ वि०, इन्द्रप्रस्थ।

॥ श्री ॥

आभार-प्रदर्शनम्

एतस्य लिङ्गानुशासनवर्गस्य प्रकाशनं भारतशासनदत्तद्रव्यसाहाय्येनैव शक्यसंभवमभूदिति भारतशासनं प्रति सविनयं कृतज्ञतामात्मनः प्रकाशयामः ।

विद्यानुरागिणः, प्राचीनभारतीयसंस्कृतौ द्रढीयसीं श्रद्धां दधाना विनयमूर्तयो भूतपूर्वराष्ट्रपतयः श्रीराजेन्द्रप्रसादमहाभागाः, वाग्मिनां धुरि कीर्तनीयाः, अगण्यगुणग्रामाः, सांप्रतं भारतराष्ट्रपतिभद्रासनं विभूषयन्तः श्रीराधाकृष्णमहाभागाः, भारतस्य प्रधानमन्त्रिणः श्रीजवाहरलाल महोदयाः, भूतपूर्वगृहमन्त्रिणः स्वर्गीयश्रीगोविन्दवल्लभपन्तमहोदयाः, वर्तमानगृहमन्त्रिणः श्री लालबहादुरशास्त्रिणः, वित्तमन्त्रिणः श्रीमुरारजी देसाई महाभागाः, शिक्षामन्त्रिणः श्रीकालूलाल श्रीमालिनोमहाभागाः, योजनामन्त्रिणः श्रीगुलजारीलालनन्दामहाभागाः, गृहसचिवश्रीबलवन्तनागेश दातारमहोदयाः, शिक्षासचिवालये संयुक्तसचिवास्पदमलङ्कुर्वन्तः श्रीरमाप्रसन्ननायकमहाभागाः, तत्रैवोपसचिवपदे श्रीमदभिमन्युकुमार जैन महोदयाः, उत्तर-प्रदेशप्रशासनस्य वर्तमान मुख्यमन्त्रिणः श्रीचन्द्रभानुगुप्त महाभागाः, भूतपूर्वमुख्यमन्त्रिणः श्रीसम्पूर्णानन्द महाभागाः, डाक्टर सिद्धेश्वरवर्ममहाभागाः, लोकसभासदस्याः श्रीभक्तदर्शन महोदयाः, संस्कृत-भाषासंबन्धे भूतपूर्वविशेषाधिकारिणः श्रीसरस्वतीप्रसाद चतुर्वेदिनः, तत्रैव वर्तमानविशेषाधिकारिणः श्री डाक्टर रामकरणशर्म महाभागाः, पद्मभूषणोपाधिसमलङ्कृता ज्योतिर्विच्चक्रचूडामणयः श्रीसूर्यनारायणव्यासमहोदयाः, दैवज्ञशिरोमणय आचार्यचक्रधरजोशीमहाभागाः, श्रीनारायणस्वामिनो महात्मानः, श्रीकिशोरीलालशर्माणो महोदयाः, श्रीहरदेव शर्माणो ज्योतिषाचार्यमहोदयाः, कविवर्यः श्रीबालकृष्णभट्ट महोदया दर्शनकेशरिणः, श्रीवृन्दावन ध्यानी महोदयाश्च एतद्ग्रन्थप्रकाशनकर्मणि स्वसहानुभूति–सत्सम्मत्यादिप्रदानेन अस्मान् बलवदुपकृतवन्त इति तेषामपि धन्यवादपुरस्सरं वयमाभारिणः स्मः ।

श्रीश्रीधरप्रसादशास्त्रिणापि एतत् पुस्तकप्रूफसंशोधनादिकर्मणि अस्माकं साहाय्यं प्रतिपन्नमिति सोपि महाभागोऽस्माभिः सादरमभिनन्द्यते धन्यवादैश्च पुरस्क्रियते। अन्ते च महामहोपाध्यायविरुदभाजः, केन्द्र-संस्कृत-मण्डलस्य भूतपूर्वसदस्यान् श्रीपरमेश्वरानन्दशास्त्रिमहाभागान् प्रत्यपि वयं कृतज्ञतां वहामः, यैर्ग्रन्थमिममधीत्यास्य भूमिकालेखनक्लेशः सहर्षं सोढः ।

मुकुन्द आश्रम
गढ़वाल (उत्तर प्रदेश)
कार्तिक कृ. पञ्चमी, संवत् २०१९

विदुषां वशंवदो विनीतः
ग्रन्थ-प्रणेता
मुकुन्दः

विषयानुक्रमणिका

मुकुन्दकोषः

अस्य

लिङ्गानुशासनवर्गः ।

श्री नन्दनन्दनाय नमः ।

प्रणम्य शिरसा नन्दनन्दनांध्रिसरोरुहम् ।
लिङ्गानुशासनं रम्यं कुर्वेऽहं लिङ्गविन्मुदे ।।

अथास्मिन्कोशे जाति–गुण–यदृच्छाशब्दाः सन्ति । तत्र वनौषधिसम्बन्धिषु वृक्षादिवर्गेषु सङ्गीतवर्गे च व्युत्पत्तिरहिता यदृच्छा—(प्राकृत) शब्दा बहवः सन्ति । अतस्तद्ग्रहणनिर्दोषत्वं प्राह नरहरिः—(राजनिर्घण्टावभिधानचूडामणीत्यपरपर्य्याये पृ० १ श्लो० ६, ७, ८)

"किरातगोपालकतापसाद्या वनेचरास्तत्कुशलास्तथाऽन्ये ।
विदन्ति नानाविधभेषजानां प्रमाणवर्णाऽऽकृतिनामजातीः ।।
तेभ्यः सकाशादुपलभ्य वैद्यः पश्चाच्च शास्त्रेषु विमृश्य बुद्ध्या ।
विकल्पयेद्द्रव्यरसप्रभावा-न्विपाकवीर्य्याणि तथा प्रयोगात् ।।
प्रायो जनाः सन्ति वनेचरास्ते गोपादयः प्राकृतनामसञ्ज्ञाः ।
प्रयोजनार्था वचनप्रवृत्तिर्यस्मात्ततः प्राकृतमित्यदोषः ।।" इति ।।

किरात इति । तेभ्य इति । प्राय इति च । एषां विवृतिः सुगमा ।

ननु पाणिनि—कात्यायनप्रभृतिकृतानि लिङ्गानुशासनानि सन्ति किमनेनेत्युच्यते दुर्गसिंहेन—(दुर्गसिंहकृते लिङ्गानुशासने पृ० १ श्लो० २)

"स्त्रीपुन्नपुंसकानि स्वार्थैः सिद्धानि लोकतो यानि ।
तानि त्यक्त्वाऽऽर्य्याभिः क्रमशो वक्ष्येऽवशिष्टानि ।।" इति ।।

स्त्रीति। सिद्धशब्दोऽत्र प्रसिद्धवचनः। अन्यत्सुगमम्। यादवोऽप्याह–(वैजयन्त्यां पृ० २८९ श्लो०१)

"नाम्नां पूर्वमिहोक्तानामनुक्तानां च कृत्स्नशः ।
सामान्यैर्लक्षणैःकैश्चित् क्रियते लिङ्गसंग्रहः ।।" इति ।।

नाम्नामिति । अस्य व्याख्या तु सुगमा ।

इह विशेषमाहामरसिंहः—(अमरकोषे नामलिङ्गानुशासनेत्यपरपर्य्याये पृ० ४४९ श्लो० १।।)

"सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहे लिङ्गं सङ्कीर्णवदिहोन्नयेत् ।।

अस्य व्याख्या—

सलिङ्गेति । सलिङ्गशास्त्रैः—लिङ्गविधानसहितानि यानि सूत्राणि (शास्त्राणि) 'स्त्रियांक्ति'–न्नादीनि तैः सहितैः सन्नादिप्रत्ययजैश्चिकीर्षा–लोलूया–पुत्रकाम्यादिशब्दैः, कृज्जैः श्वपाक-भूति-इष्टि-कृति-स्मृति-प्रभृतिशब्दैः, तद्धितप्रत्ययजैरणाद्यन्तैः औपगव–औपगवी–गार्ग्य–गार्ग्यादिशब्दैः, समासजैरदन्तोत्तरपदो द्विगुरित्यादिनोक्तैः सञ्ज्ञापरिभाषबदरामलकादिशब्दैः, बाहुल्येन पूर्वमनुक्तैः शब्दैश्चायं संग्रहः क्रियत इति शेषः। अस्मिन् लिङ्गानुशासनवर्गे संङ्कीर्णवत् प्रागुक्तसङ्कीर्णवर्गसमानं प्रकृति–प्रत्यय–क्रियाविशेषणैर्लिङ्गं पुंलिङ्गादिकमुन्नयेदूहेत्। (सु० व्या०)

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।।" इति ।।

अस्य व्याख्या—

लिङ्गेति। लिङ्गस्य पुंलिङ्गप्रभृतेः शेषोऽवशिष्टं तस्य विधिर्विधानं व्यापी व्याप्नोति स्वविषयस्य व्यापको भवति। उत्सर्गत्वात्। विशेषैरिहोक्तैः पूर्वोक्तैश्च यदि विशेषविधिभिर्बाधितः स्यात्तर्ह्येव व्यापी। अर्थादपवादविषयमपहाय सर्वत्र प्रवर्त्तत इत्यर्थः। अनेनास्य लिङ्गविशेषविधेरुत्सर्गभूतस्य शब्दादिवर्गा अपवादा ज्ञेयाः। तत्र पूर्वोक्तानां विशेषाणां द्विरुक्तिदोषभयान्न पुनरत्र विधानम् इति। (सु० व्या०)

तथा च यादवः—(वै० पृ० २८९ श्लो० २)

"अबाधिते विशेषोक्त्या भवेत्सामान्यलक्षणम् ।" इति ।

अबाधित इति । अस्य व्याख्या तु पूर्ववद् बोध्या।

अथेह शब्दस्य सलिङ्गोऽलिङ्गश्चेत्येतौ द्वौ भेदावाह—युगपादण्डाधिनाथः—(नानार्थ-रत्नमालायां पृ० २ पं० ५)

"अमी सलिङ्गनिर्लिङ्गभेदाद् द्वेधा भवन्ति हि ।" इति।

अमीति। अस्य विवृतिः सुगमा ।

तत्राऽऽदौ स एव सलिङ्गशब्दानां सप्तविधत्वं प्राह—(ना० र० मा० पृ० २ पं० ६,७)

"सलिङ्गाः सप्तधाऽऽवृत्या स्त्रियां पुंसि नपुंसके ।
स्त्रीपुंसयोः क्लीबपुंसोः स्त्रीनपुंसकयोस्त्रिषु ।।" इति ।।

अस्य व्याख्या—

सलिङ्गा इति । सलिङ्गा लिङ्गसहिताः शब्दाः सप्तधाऽऽवृत्त्या सप्तविधा भवन्ति तद्यथा—(१) स्त्रियाम् = स्त्रीलिङ्गः (२) पुंसि = पुंलिङ्गः (३) नपुंसके = क्लीबलिङ्गः (४) स्त्रीपुंसयोः = योषिन्नरलिङ्गः (५) क्लीबपुंसोः = षण्डपुंलिङ्गः (६) स्त्रीनपुंसकयोः = योषाक्लीबलिङ्गः (७) त्रिषु = त्रिलिङ्गश्चेति सलिङ्गशब्दानां सप्तभेदाः स्युः।

यादवस्तु सलिङ्गशब्दानामष्टविधत्वमाचष्टे—(वै० पृ० १ श्लो० २, ३)

"प्रकाश्याष्टविधं लिङ्गं निर्लिङ्गं वचनानि च ।
स्त्रीपुन्नपुंसकं लिङ्गं सङ्कीर्णं तच्च पञ्चधा ।।
नृस्त्री नृषण्डः षण्डस्त्री त्रिलिङ्गं वाच्यलिङ्गकम् ।" इति ।

अस्य व्याख्या—

प्रकाश्येति। (१) स्त्रीलिङ्गः (२) पुंलिङ्गः (३) नपुंसकलिङ्गः (४) पुंस्त्रीलिङ्गः (५) नरक्लीबलिङ्गः (६) क्लीबयोषिल्लिङ्गः (७) त्रिलिङ्गम् = पुंस्त्रीक्लीबलिङ्गः (८) वाच्य-लिङ्गोऽभिधेयलिङ्गश्चेत्येते सलिङ्गशब्दानामष्टभेदाः स्युरित्यर्थः ।

अथादौ क-ट-णादिवर्णोपान्तान् साद्यन्तान्, इमन्नादिप्रत्ययान्तांश्च पुंलिङ्गवाचक-शब्दानाह हेमचन्द्राचार्यः—(अभिधानसंग्रहे लिङ्गानुशासने पृ० १ श्लो ०१)

पुंलिङ्गं क–ट–ण–थ–प–भ–म–य–र–ष–स–स्वन्त,–
मिमन–लौ, कि,–श्तिब्, । न–नङौ, घ–घञौ, दः कि–
भावे रवो,–ऽकर्त्तरि च कः स्यात् ।।१।।" इति ।

अस्य व्याख्या—

पुंलिङ्ग[1]मिति। अत्र वक्ष्यमाणं विशेषविधानमन्तरा पुंलिङ्गः स्यादित्यन्वयः। अका[2]रान्तेषु शब्देषु को[3]पधा आनक–स्फटिक–शुक–वराटका–ङ्क–शोक–लोका–कादयः। टो[4]पधा बिट–कर-हाट–कुट–घट–करट–पट–सरटादयः। णो[5]पधा गुण–क्षण–काण–शाण–किरण–पाषाण–गुणादयः। थो[6]पधा रोमन्थ–वेपथु–निशीथो–पस्थ–स्वयथु–नाथ–सार्थ–रथ–शपथादयः। पो[7]पधा दर्प–कल्प–बाष्प–सर्प–शूर्प–कूप–यूप–सूप–कलापादयः। भो[8]पधा–दर्भ–निकुम्भ–स्तम्भ–कौस्तुभ–शलभ–कुम्भ–सरभ–गर्दभादयः। मो[9]पधा–गोधूम–डिण्डिम–धूम–सोम–होम–व्याम–गुल्म–ग्रामादयः। यो[10]पधा लय–तण्डुलीय–विनया–पनय–प्रणय–व्यया–ऽऽय–तन्तुवाय–संख्यादयः। रो[11]पधाः कङ्कर–कुटर–झर्झर–सीकर–सीर–श्वशुरा–ऽङ्कुर–समीरादयः। षो[12]पधाः–शिरीष–घोष–माष–तुष–तोष–पोष–रोषौ–प–प्लोष–प्लक्ष–यक्ष–वाताक्ष–गवाक्ष–जिनाक्ष–यानाक्षादयः। सो[13]पधाः कूर्पास–हंस–कुत्स–सर्जरस–रस–हास–पनसादयः। सकारान्ताः पुरुदंशो–दमुन–श्चन्द्रमो–ऽङ्गिरो–ऽनेह–उशनो–वेधः प्रभृतयः। नकारा[14]न्ताः कृष्णवर्त्म–प्रतिदिव–मघव–वृष–उक्ष–प्लीह–ग्राव–सुपर्वादयः। उकारा[15]न्तास्तर्कु–धातु–वायु–जायु–मेरु–जन्तु–पीलु–सेतु–गोमायु–पायुप्रभृतयः। अन्तान्ताः सीमन्त–पर्य्यन्त–दिष्टान्त–सिद्धान्तादयः।

---

(१) पाणिनीयेऽपि '(पुमान्)' अधिकारोऽयम्। (सि॰ कौ॰ पृ॰ ३९८ सू॰ ३५) (२) तत्रैव—'(प्राग्रश्मेरकारान्तः)' '(रश्मिर्दिवसाभिधानम्)' इति वक्ष्यति। प्रागेतस्मादकारान्त इत्यधिक्रियते॥ (सि॰ कौ॰ पृ॰ ३९९ सू॰ ५९। (३) (कोपधः)॥ कोपधोऽकारान्तः पुंसि स्यात्। स्तवकः=गुच्छकः। कल्कः=घृत–तैलादिशेषः। सि॰ कौ॰ पृ॰ ३९९ सू॰ ६०। (४) [टोपधः]॥ टोपधोऽकारान्तः पुंसि स्यात्। घटः=कुम्भः। पटः=शोभनवस्त्रम्। सि॰ कौ॰ पृ॰ ३९९ सू॰ ६३। (५) (णोपधः)॥ णोपधोऽकारान्तः पुंसि स्यात्। गुणः=मौर्वी। गणः=रुद्रानुचरः। पाषाणः=प्रस्तरः। सि॰ कौ॰ पृ॰ ४०० सू॰ ६६। (६) (थोपधः)॥ अदन्तः पुंसि। रथः=स्यन्दनः। वेपथुः=वेपनम्। सि॰ कौ॰ पृ॰ ४०० सू॰ ६९। (६अ) (नोपधः)॥ अदन्तः पुंसि। इनः=सूर्य्यः। फेनः=समुद्रफेनः। सि॰ कौ॰ पृ॰ ४०० सू॰ ७३। (७) (पोपधः)॥ यूपः=यज्ञस्तंभः। दीपः=वर्तिस्थज्वलदग्निशिखा। सर्पः=अहिः। सि॰ कौ॰ पृ॰ ४०० सू॰ ७६। (८) (भोपधः)॥ अदन्तः पुंसि। स्तंभः=स्थूणा। कुंभः=कलसः। सि॰ कौ॰ पृ॰ ४०० सू॰ ७९। (९) (मोपधः)॥ अदन्तः पुंसि। सोमः=चन्द्रमाः। भीमः=द्वितीयपाण्डवः। सि॰ कौ॰ पृ॰ ४०० सू॰ ८२। (१०) (योपधः)॥ अदन्तः पुंसि। समयः=कालः। हयः=घोटकः। सि॰ कौ॰ पृ॰ ४०० सू॰ ८५। (११) (रोपधः)॥ अदन्तः पुंसि। क्षुरः=लोमच्छेदनद्रव्यम्। अङ्कुरः=अभिनवोद्भिद्। सि॰ कौ॰ पृ॰ ४०० सू॰ ८८। (१२) (षोपधः)॥ अदन्तः पुंसि। वृषः=बलीवर्दः। वृक्षः=द्रुमः। सि॰ कौ॰ पृ॰ ४०० सू॰ ९२। (१३) (सोपधः) अदन्तः पुंसि। वत्सः=सक्तकरिः। वायसः=काकः। महानसः=पाकस्थानम्। सि॰ कौ॰ पृ॰ ४०१ सू॰ ९५। (१४) (नान्तः)॥ नान्तः पुंसि। राजा=नृपः। तक्षा=वर्द्धकिः। सि॰ कौ॰ पृ॰ ३९९ सू॰ ४८ (१५) ('उकारान्तः')॥ अयं पुंसि स्यात्। प्रभुः ईश्वरः, स्वामी वा। इक्षुः=मधुतृणम्, गुडतृणम्। सि॰

इमन्प्रत्ययान्ताः--पृथोर्भावः =प्रथिमा। मृदोर्भावः=म्रदिमा। महतः कर्म भावो वा= महिमा। चण्डस्य कर्म भावो वाचण्डिमा। दृढस्य भावः=द्रढिमा, इत्यादयः। अल्[१६] (अच्[१७]) (अच्) प्रत्ययान्ताः--कर-गर-लव-प्लव-स्तव-नय-प्रभव-नियम-चय-जयादयः। कि (इक्) प्रत्ययान्ताः-पनिप्रभृतयः। ति (श्ति) प् प्रत्ययान्ताः पचति-भवति-गदति-गच्छति-करोत्यादयः। नप्रत्ययान्ताः स्वप्न-यत्नादयः। मतान्तरे स्वप्नस्तु नन्[१]प्रत्ययान्तः। नङ्[२] (ञ्) प्रत्ययान्ताः प्रश्न-विश्न-यत्न-यज्ञादयः। घप्र[३]त्ययान्ता दन्तच्छद-निगम-प्रच्छदो-रुच्छदादयः। घञ्[४]प्रत्ययान्ताः पाद-रोग-राग-पाक-स्पर्शौ-क प्रासाद[५]-प्रास[६]-ऽऽम्नाय-वेद[७]-प्रपा[८]त-प्रस्तार-लोभ-त्याग-दाय-वेश-धाय-भाव-माघादयः। दा (घु) संज्ञकाद्विहितकिप्र[९]त्ययान्ता आधि-व्याधि-शरधि-विधि-निधि-प्रधि-जलध्यु-दध्यादयः। भावार्थक-खप्रत्ययान्ता आशितं भवा-दयः। कर्त्तृभिन्नार्थक-(घञार्थकः) कप्रत्ययान्ता आखू[१०]त्थ-प्रस्थ शलभोत्थ-विघ्नप्रभृतयः।' इति॥

इह किञ्चिद्विशेषमाहामरः—(अम० लिं० पृ० ४५३ श्लो० १४, १५)

"क-ष-ण-भ-म-रोपान्ता यद्यदन्ता अमी अथ।
प-थ-न-य-स-टोपान्ता गोत्राख्या-श्चरणाह्वयाः॥
नाम्न्य-कर्त्तरि, भावे च घञ-ज-ब्-नङ्-ण-घा-थुचः।
ल्युः कर्त्तरी,-मनिज्भावे, को, घोः किः प्रादितोऽन्यतः॥" इति॥

अनयोर्व्याख्या—

कषणेति। ककारादिषड्वर्णोपधा अमी एते अबाधिता यदि चेददन्ता अकारान्तास्तर्हि

कौ० पृ० ३९९। सू० ५१। "हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे—" इति मेदिनी। "करेणुरिभ्यां स्त्री नेभे" इत्यमरः। एवं जातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च। "लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः" इति। एवमन्यत्रापि। (१६) (घञबन्तः)॥ करः=हस्तः। गरः=विषम्। सि० कौ० पृ० ३९८ सू० ३६। (१७) (घाजन्तश्च) चयः=समूहः। जयः=विजयः। सि०कौ०पृ०३९८सू० ३७।

(१) पाणिनीयेऽपि। (स्वपोनन्)॥ स्वप्नः=निद्रा। (सि० कौ० पृ० ३३६ पं० १) (२)(नङन्तः)॥ नङ्प्रत्ययान्तः पुंसि स्यात्। यज्ञः=यागः। यत्नः=प्रयत्नः। उद्योगश्च। (सि० कौ० पृ० ३९८ सू० ३९। (३) (घान्तः)॥ विस्तरः=विस्तारः। गोचरः=इन्द्रियार्थः। सि० कौ० पृ०)॥ (४) (घञन्तः)। पाकः =परिणतिः। त्यागः=दानम्। (५) प्रासादः=प्रसीदन्त्यस्मिन्मनाँसि। (६) प्रासः=प्रास्यते इति। (७) वेदः =विदन्त्यनेन। (८)प्रपातः=प्रपतत्यस्मात्। (९) (क्यन्तो घुः)॥ किप्रत्ययान्तो घुः पुंसि स्यात्। आधिः=मनःपीड़ा। निधिः=सेशेवधिः। उदधिः=समुद्रः। क्यन्तःकिम्। दानम्। घुःकिम्। जक्षिः—बीजम्। सि० कौ० पृ० ३९८ सू० ४१। (६) (कप्रत्ययान्तः)॥ (१०) आखूत्थः=आखूनामुत्थानम्। सि० कौ० पृ०२८९ पं० २९

नरि भवन्ति। एषामुदाहरणानि प्रागेवोक्तानि पत्रेति। पकारादिवर्णषट्कोपधा यद्यबाधितास्तदा पुंसि स्युः। नोपधाः फेन–ब्रध्ना–पघने–न–भानु–जनादयः। शेषवर्णाना-मुदाहरणानि प्रागुक्तानि मकुटस्तुप कारादिवर्णषट्कोपान्तेषु अदन्ता अकारान्ता' इति न सम्ब-ध्यते, अथादित्वात् –इत्याह। गोमायु–जायु–पाय्वादीनुदाहरति च। गोत्रेति। गोत्रं वंशस्तस्मि-न्नाख्या संज्ञा येषां ते गोत्राख्या ऋषिसंज्ञकाः गोत्रस्य प्रथमपुरुषाः ये प्रवराध्यायोक्ताः येऽपीतरे अपत्यप्रत्ययं विहाय गोत्रवाचित्वेन लोके प्रसिद्धास्ते नरि भवन्ति। यथा। भरद्वाजः गोत्रमस्मा-कम्। एवं गौतम–वशिष्ठ–कश्यप–वत्सा–त्रिप्रभृतयः। क्षीरस्वामी तु 'अपत्यप्रत्ययान्ताः' इति व्याख्यत्। तन्न। 'अपत्यप्रत्ययान्तः' इत्यनेन द्विरुक्तिप्रसङ्गात्। चरणेति। चरणानां श्रुति-शाखानां आह्वया अभिधानानि नरि भवन्ति। यथा। कलापः कठः, बह्वृच इत्यादि। नाम्नीति। णप्रत्ययो यथा। न्यादनम्=न्याद, आहारः। अवश्यायः=नीहारः। ल्युरिति। कर्त्तरि नन्द्या-दिभ्यो विहितोल्युः पुंसि स्यात्। नन्दयतीति नन्दनः=पुत्रः। इन्द्रोद्यानम्। सुखदायकः। रमते इति रमणः=पतिः। कामदेवः। मधुं सूदयतीति मधुसूदनः=विष्णुः। संज्ञायामिदम्। असंज्ञायां तु 'कृतः कर्त्तर्य्यसंज्ञायाम्' इति सिद्धम्। यस्तु औणादिकः कर्त्तरि व्युत्पद्यतेऽभियुक्तै (स्वामिमुकुटादिभिः) स्तस्य वाच्य (अभिधेय) लिङ्गतैव—भरिमा=पृथ्वी। वरिमा= तपस्वी। स्तरिमा=शय्या। इहान्यत्सर्वं प्राग्वज्ज्ञेयम्।

दुर्गोऽपि किञ्चिद्विशेषमाह—(दु० लिं० पृ० १९ श्लो० ३८, ३९)

"... ... ... किना दाश्च।
भावे को णो ऽथुरलो घघञावुक्तौ सहेम्ना नञ्॥
प्राग्वंश क–ष–ण–भ–म–र–प–थ–स–ट–न–योपधक-
वोपधमदन्तम्। क्षत्रियवचनो नाभिश्चेत्पुँलिङ्गा इति समाप्ताः॥" इति।

अनयोर्व्याख्या—

किनेति। किना किप्रत्ययेन युक्तो घुसंज्ञकः (दाः) (च) भावेऽर्थे कप्रत्ययः (च) णप्रत्ययश्च अथुप्रत्ययश्च अलप्रत्ययेन सह नृलिङ्गा भवन्ति। घप्रत्ययघञ्प्रत्ययौ च इमन् प्रत्ययेन सह नञ् प्रत्ययश्चैतेऽपि नृलिङ्गा भवन्ति। एषामुदाहरणानि प्रागेवोक्तानि। प्राग्वंश इति। प्राग्वंशश्च कादिद्वादशवर्णोपधकश्च वोपधश्चेति समाहारो द्वन्द्वः। अत् अन्तो यस्य तद् अद-न्तम्। प्राग्वंशशब्दः (च) ककारादिद्वादशवर्णोपधं च शब्दरूपं क्षत्रियवचनो नाभिश्च यदि भवति तदैते नृलिङ्गाः स्युः। प्राग्वंश=यज्ञगृहम्।

तथा च प्रयोगः—

"पत्युः प्राग्वंशवासिनः" इति काव्ये (दु० लिं० टिप्पण्यां पृ० १९ पं० २७)

वोपधा उद्याव—वासवादयः । परन्त्वयमपाणिनीयः । नाभिः=क्षत्रियः । प्राण्यङ्गं तु नाभिरियम् । इदन्तत्वात् । अन्यत्सर्वं पूर्ववज्ज्ञेयम् ।

तथा च यादवः—(वै० पृ० १३ श्लो० ९ तः १४ या०) ।

"अदन्ताः पुंस्यु–पान्ता–श्चे–त्क–णौ भ–र–म–टा–स्त–थौ ।
ष–सौ च सान्ता ये च स्यु–रुदन्ताः प्राशयो नरः ।

अदन्ता इति । पाठोऽयमपाणिनीयः । अत्र पाठान्तरम्—(मत्कृतमिदम्)

अदन्ताः पुंस्यु–पान्ता–श्चे–त्क–णौ भ–र–म–टाः प–थौ ।
ष–सौ न–यौ सान्ता य उदन्ताः प्रायशो नरः ॥

अस्य व्याख्या—

अदन्ता इति । अदन्ताः ककारादिद्वादशवर्णा उपान्ताश्चेत्तर्हि पुंसि पुंलिङ्गे स्युः । ककारादीनामुपधास्तु प्राग्वद् बोध्याः । ये सान्ताः सकारान्ता उदन्ता उकारान्ताः शब्दाश्च ते सर्वे प्रायशो बहुधा नरः पुमांसः पुंलिङ्गवाचका इत्यर्थः यथा । सान्ताः कंस–मास–दास–चास-प्रभृतयः । उदन्ताः शम्भु–भानु–विधु–धातुप्रभृतयः ।

इदन्तेष्व–रति–र्वर्मि–र्वर्णि–र्वाहि–र्ग्रहिः प्रहिः ।
स्तम्भिः कपिः सनी रालि–रर्दनि–र्वमतिर्नरः ॥

अस्य व्याख्या—

इदन्तेष्विति । इदन्तेषु इकारान्तेषु अरत्यादयो द्वादशशब्दा नरः पुमांसः स्युः पुंलिङ्ग-वाचका इत्यर्थः । अरतिः=क्रुद् । वर्मिः=मत्स्यविशेषः । वर्णिः=वलिः । वाहिः= । ग्रहिः= । प्रहिः=कूपः । स्तम्भिः=(भिः) समुद्रः । कपिः=वानरः । सनिः= दानम् । पूजा च । रालिः=युद्धम् । अर्दनिः=अग्निः । वमतिः=वान्तिः ।

अङ्याबन्ताश्च वृक्षार्थाः प्रायो रोहित्तरत्तथा ।
शैलनामाह्वयाः सर्वे गोत्राख्याश्चरणाह्वयाः ॥

अस्य व्याख्या—

अङ्येति । ङीबन्ताश्च आबन्ताश्च ते ङ्याबन्ता न ङ्याबन्ता अङ्याबन्ताः । ङ्याबन्तवर्जिता इत्यर्थः । ङ्याबन्तरहिता वृक्षार्था वृक्षार्थवाचका ये शब्दाः ते प्रायो बहुधा पुंलिङ्गा भवन्ति ।

यथा। तरु–शाखि–पादपप्रभृतयः। रोहित्–तरत्, शैलनामाह्वयाः, गोत्राख्याः, चरणाह्वयाश्च एते सर्वे पुमांसो भवन्ति। रोहित्=हरिणविशेषः। तरत्=कारण्डपक्षी। शैलनामाह्वयाः=पर्वत-संज्ञकाः। यथा। अद्रि–गिरि–अग–नगप्रभृतयः। गोत्रचरणाख्यशब्दाः प्रागुक्तवद् बोध्याः।

कन्यन्ता राजतक्षाद्या, ऋदोरपि करादयः,।
इक्श्तिपोः शासिशास्त्याद्याः, स्युरेरचि जयादयः,॥
अवश्यायादयो णान्ता, घान्ता दन्तच्छदादयः,।
प्रध्याद्याः प्रादितो घोः कौ स्यु,–र्वमथ्वादयोऽथुचि,॥
प्रश्नाद्या नङि, पाकाद्या घञि, ल्यौ नन्दनादयः,।
प्रथिमाद्या इमनिचि, कुणप् पीलुकुणादयः॥" इति।

एषाँ व्याख्या—

कन्यन्ता इति। कन्यन्ताः कनिप्रत्ययान्ता राजा=नरेन्द्रः (नृपः)। तक्षा=वर्द्धकिः (त्वष्टा)। सुपर्वा=देवता इत्याद्याः। ऋद ऋकारान्तात् अपि अप्प्रत्यये करः=हस्तः (पाणिः) इत्यादयः। इजन्ता इक्प्रत्ययान्ताः शासिः= । श्तिबन्ताः श्तिप्प्रत्ययान्ताः शास्तिः= शासनम्। दण्डश्च। इत्यादयः। कुणबन्ताः कुणप्प्रत्ययान्ताः पीलुकुणः=पीलूनां पाकः। तस्य पाकमूल इत्यादिना कुणप्प्रत्ययः। खदिरकुणः=खदिराणां पाकः। इत्यादयः। शेषं प्रागवत्।

अमरोऽप्यन्यान् पुंलिङ्गवाचकाञ्छ्रीवेष्टादिशब्दानाह—(अम० लिं० पृ० ४५३ श्लो० १३, १४)

"श्रीवेष्टाद्याश्च निर्यासा असनन्ता अबाधिताः।
कशेरु–जतु–वस्तूनि हित्वा तु–रुविरामकाः॥

अस्य व्याख्या—

श्रीति। श्रीवेष्टादयो ये निर्यासास्तरुद्रवास्ते नरि भवन्ति। श्रीवेष्टः (श्रीपिष्टः), सरलः, द्रवः, श्रीवासः, वृकधूपः, गुग्गुलुः, सिह्लक इत्यादयः। अबाधिता असन्ता अन्नन्ताश्च नरि भवन्ति। उदाहरणं तु प्रागवत्। अबाधिता इति किम्। इदं=अवस्था। जलौकसः=जन्तु-विशेषः। अप्सरसः=स्वर्वेश्याः। सुमनसः=देवाः। इदं लोम=रोम। साम=वेदविशेषः। वर्म=कवचम्। कशेर्विति। कशेरु–जतु–वस्तूनि हित्वाऽपहाय तुरुविरामकाः तुशब्दान्ताश्च

पाणिनीयेऽपि—(१) (रुत्वन्तः)॥ मेरुः=हेमाद्रिः। सेतुः=जलबन्धः सञ्चरः। (सि० कौ० पृ० ३९९ सू० ५६)

रुशब्दान्ताश्च पुंसि स्युः। यथा हेतुः = कारणम्। सेतुः = जलबन्धः, सञ्चरः। "पुल" इति भाषायाम्। धातुः = शब्दयोनिः। श्लेष्मादिः। मन्तुः = अपराधः। तन्तुः = सूत्रम्। इत्यादयः। कुरुः = देशविशेषः। चन्द्रवंशीयराजविशेषो वा। मेरुः = सुरालयः। किशारुः = धान्याग्रभागः। त्सरुः = खड्गादिमुष्टिः। इत्यादिः। कशेर्वाद्युपलक्षणं दारुश्मश्रुप्रभृतीनाम्। तत्र कशेरु = अस्थि-विशेषः। तृणविशेषो वा। जतु = लाक्षा। वस्तु = द्रव्यम्। पदार्थश्च।

द्वन्द्वेऽश्ववडवावश्ववडवानसमाहृते।
कान्तः सूर्य्येन्दुपर्यायपूर्वोऽयःपूर्वकोऽपि च॥" इति॥

अस्य व्याख्या—

द्वन्द्व इति। असमाहृते समाहाररहिते द्वन्द्वे द्वन्द्वसमासेऽश्ववडवौ नरि। अश्वश्च वडवा च अश्ववडवौ। एवमश्ववडवान्। अश्ववडवैरित्यादिप्रयोगः। असमाहारे किम्। अश्ववडव-मिति क्लीबम्। कान्त इति। यदि कान्तशब्दो रविचन्द्रपर्यायपूर्वकस्तर्हि नरि स्यात्। यथा—सूर्यकान्तः, अर्ककान्तः। चन्द्रकान्तः, इन्दुकान्तः, सोमकान्तः। यदि कान्तोऽयोवाचकपूर्वक-स्तदापि नरि। अयस्कान्तः, लोहकान्तः।

तथा च हेमः—(अ० सं० लिं० पृ० १ श्लो० ६)

"कान्तश्चन्द्रार्कनामाऽयः परो यानार्थतो युगः।
यश्च स्यादसमाहारे द्वन्द्वोऽश्ववडवाविति॥२॥" इति।

अस्य व्याख्या—

कान्त इति। अत्र चन्द्रकान्तादयः प्राग्वत्। यानार्थतः परश्चेद्युगशब्दः स्यात्तर्हि पुंलिङ्गे भवति। यथा—यानयुगः = रथहलप्रभृत्यङ्गम्। "जुआ" इति भाषायाम्। अश्वश्च वडवा च। 'पूर्ववदश्ववडवौ' इति परवल्लिङ्गतापवादः। यादवस्तु किञ्चिद्विशेषमाह—(वै० पृ० २९३ श्लो० ५१)

द्वन्द्वस्तत्पुरुषोऽप्यन्त्यलिङ्गोश्ववडवौ नरि।
तथैवोक्षवशौ" इति॥

अस्य व्याख्या—

द्वन्द्व इति। द्वन्द्वस्तत्पुरुषोऽप्यन्त्यलिङ्गो ('परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' सू० २।४।२६) अश्ववडवौ तु नरि पुंसि। तथैवोक्षवशौ। उक्षा च वशा चोक्षवशौ। उक्षा = बलीवर्दः। वशा = वन्ध्यगौः।

अथेदानीमन्यान् सभेदान् हस्तादीन् पुंलिङ्गवाचकशब्दानाह हेमचन्द्रः—(अभि० सं० लिं० पृ० १ श्लो० २, ३)

हस्त[1]–स्तनौ–ष्ठ–नख–दन्त–कपोल–गुल्फ–
केशा–ऽध्व–गुच्छ–दिवस[2]–र्त्तु–पतद्ग्रहाणाम् ।
निर्यास–नाक–रस–कण्ठ–कुठार–कोष्ठ–
हैमा–ऽरि–वर्ष–विष–बोल–रथा–ऽशनीनाम् ॥३॥
श्वेत–प्लवाऽऽत्म–गुरुजा–ऽसि–कफा–ऽभ्र–पङ्क–
मन्थ–त्विषां जलधि–शेवधि–देहभाजाम् ।
मान[3]–द्रुमा–ऽद्रि–विषया–ऽऽशुग–शोण–मास–
धान्या–ऽध्वरा–ऽग्नि–मरुतां[4] सभिदां तु नाम ॥४॥

अनयोर्व्याख्या—

हस्तेति । श्वेतेति च । सभेदानां हस्तादीनां निर्यासादीनां श्वेतादीनां जलध्यादीनां मानादीनां च नाम पर्य्यायः पुंलिङ्गं स्यादित्यन्वयः । तत्र हस्तः=पाणिः, शय इत्यादयः । करिकरः । सप्रकोष्ठकरश्च । स्तनः=कुचः, पयोधरः । ओष्ठः=दन्तच्छदः, अधरः । नखः=कररुहः, करजः, पुनर्भवः । 'नखरोऽस्त्रियाम्' इति बाधः । दन्तः=दशनः, रदः, रदनः । दन्तभेदः=जम्भः । कपोलः=गण्डः, करटः । गुल्फः—घुटः(नि) स्तोदः, पादग्रन्थिः । केशः—कचः, मूर्धजः । अध्वा—मार्गः, पन्थाः । गुच्छः—हारभेदः । 'स्याद् गुच्छः स्तवके स्तम्बे हारभेदकलापयोः ।' इति मेदिनीकोशो नानार्थशब्दकोशोऽपरपर्यायः (पृ० २९ श्लो० ३ ।) दिवसः—घस्रः', वासरः । 'दिनाहनी वा तु क्लीबे दिवसवासरौ ।' इति बाधः । ऋतुः=हेमन्तादयः । 'ऋतुर्दर्षादिषट्सु च । आर्तवे भासि च पुमान्' इति (मेदिनी पृ० ५४ श्लो० ६) पतद्ग्रहः=सनिष्ठीवताम्बुलादिचवर्णनिक्षेपपात्रम्, निष्ठीवनपात्रम् । "पीकदानी" इति भाषायाम् । निर्यासोऽयं प्राग्वत् । नाकः=स्वर्गः, त्रिदिव इत्यादिः । द्योदिवौ द्वे स्त्रियां, क्लीबे त्रिविष्टपमिति बाधकं बलवत्तरं, तद्विना पुंस्त्वम् । रसनाम रसाः श्रृङ्गारादयस्तन्नाम । 'रसो गन्धरसे जले । श्रृङ्गारादौ विषे वीर्य्ये तिक्तादौ द्रवरागयोः ।' इति–(मेदिनी पृ० १७० श्लो० ९) । कण्ठः=गलः । 'कण्ठो

पाणिनीयेऽपि— (१) (हस्तकुन्तान्तव्रातवातदूतधूर्त्तसूतचूतमुहूर्त्ताः) ॥ एते पुंसि । हस्तः=पाणिः । कुन्तः=प्रासः, भल्लः । अन्तः=नाशः । व्रातः=संघः । वातः=वायुः । दूतः=सन्देशहरः । धूर्त्तः=धूस्तूरः । सूतः=सारथिः । चूतः=आम्रः । मुहूर्त्तः=द्वादशक्षणात्मकः कालः । अमरस्तु "मुहूर्त्तो द्वादशाऽस्त्रियाम्" इत्याह । सि० कौ० पृ० ४०१ सू० ११० । (२) (रश्मिदिवसाभिधानानि) ॥ एतानि पुंसि स्युः । रश्मिः=किरणः । दिवसः=घस्रः इत्यादि । सि० कौ० पृ० ४०१ सू० ९९ । (३) (मानाभिधानानि) ॥ एतानि पुंसि स्युः । कुडवः=धान्यमानभेदः, मुष्टिचतुष्टयम् । प्रस्थः=चतुष्कुडवरूपो धान्यमानभेदः । सि० कौ० पृ० ४०१ सू० १०२ । (४) (मरुद्गरुत्तरदृत्विजः) ॥ एते पुंसि स्युः । मरुत्=देवः । गरुत=पक्षः । तरद्=कारण्डवपक्षी । ऋत्विक्=याजकः । सि० कौ० पृ० ४०१ सू० १०७ ।

ध्वनौ सन्निधाने ग्रीवायां मदनद्रुमे ॥' इति–(अनेकार्थसंग्रहे पृ० १० श्लो० १०४)। **कुठारः** = परशुः। 'कुठारः परशौ मतः।' इति (शब्दरत्नसमन्वये राजकोशेत्यपरपर्याये पृ०२६८ पं०१) कोष्ठ =कुसूलः। 'कोष्ठ कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च।' इति–(मे० पृ० ३९ श्लो० ४)। हैमः = काण्डतिक्तः। 'किराततिक्तौ हैमश्च काण्डतिक्तः किरातकः।' इति (अभि० सं० लि० टिप्पण्यां पृ० १ पं० २२)। अरिः = शत्रुः, अरातिः। भेदाः = आततायादिः। वर्षः = द्वादशमासात्मकः कालः, सँव्वत्सरः, वत्सरः, अब्दः। जम्बुद्वीपः। जम्बुद्वीपांशभेदश्च। भेदाः—ऋतुः, मासः, पक्षः। दिनतिथ्यादौ बाधः। **विषः** = क्ष्वेडः, गरः। 'विषं जलेऽतिविषायां स्त्रियां क्ष्वेडे तु न स्त्रियाम्।' इति––(मे० पृ० १६७ श्लो० २५)। अमरस्तु क्ष्वेडभेदानेव पुंस्याह–क्ष्वेडभेदा इति। क्ष्वेडभेदा विषभेदा विषविशेषाः पुंस्त्वे स्युः। सौराष्ट्रिकः, शौक्लिकेयः, ब्रह्मपुत्रः। अत्र गरलं विषं पुंसि क्लीबे च काकोलं इत्यादिः बाधितम्। बोलः = गन्धरसः। 'बोलगन्धरसप्राणपिण्डगोपरसाः समाः।' इति–(अम० पृ० ३३६ श्लो० १०४)। रथः = स्यन्दनः। 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च।' इति–(मे० पृ० ७२ श्लो० १२) अशनिः = वज्रम्। श्वेतः = कपर्दस्तन्नाम। प्लवः = कपिः, भेकः, भेलश्च। 'प्लवः प्लक्षे प्लुतौ भेके चण्डाले कुलके कपौ। क्रमनिम्नमहीभागे भेलके जलवायसे ॥' इति–(अनेकार्थतिलके पृ० २२ श्लो० १७९)। आत्मा = जीवः, अन्तर्भोक्ता। शरीरमित्यादयः। गुरुजः = कचः। अश्वत्थामा च। 'कचः शुष्कव्रणे बन्धे केशे व्रणेऽपि च। कुष्ठे गुरोः सुते' इति–(नानार्थमञ्जर्यां पृ० १८ पं० १७)। असिः = खड्गः। मण्डलाग्रः। भेदाः–– नन्दकः, चन्द्रहासः। 'कटित्रम्' इत्यादिश्च बाधः। कफः = श्लेष्मा। अभ्रः = मेघः। अमरस्त्वभ्रशब्दं क्लीबमाह––'अभ्रं मेघो वारिवाहः' इति। घनः, जलद इत्यादयः पुंसि। भेदाः–– पुष्करावर्तकादयः। अभ्रस्य तु अभ्रं मेघ इति क्लीबपाठो बाधकः। मूलपाठे तु 'कफाब्दः' इति सुपाठः। पङ्कः = कर्दमः, निषद्वर त्यादयः। 'पङ्कोऽस्त्री कर्दमे पापे' इति—(मे० पृ० ३ श्लो० २९)। मन्थः = मन्थानः, साक्तवः, दिवाकरश्च। 'मन्थौ साक्तवमन्थानौ' इति–– (नानार्थरत्नमालायां पृ० ३२ पं० ५)। त्विट् = व्यवसायः। 'त्विट् शोभायां जिगीषायां व्यवसाये रुचौ गिरि।' इति––(अ० सं० पृ० २ श्लो० १७)। जलधिः = समुद्रः, सागरः, अब्धिः। भेदाः––क्षीरोदः, लवणोदः। शेवधिः = निधिः। भेदाः––पद्मशंखादयः। देहभाक् = जन्तुः, जीवः, प्राणी। भेदाः—मर्त्यः, हस्ती, महिषः, गौरित्यादयः। मानः = प्रस्थादयः। द्रुमः = वृक्षः, शाखी। भेदाः––प्लक्षः, वट, आम्र इत्यादयः। अत्रापि क्वचिद्रूपभेदादिना "पाटलाशिंशिपादौ" अपवाद (बाधः) उक्तः। अद्रिः = पर्वतः, गिरिरित्यादयः। भेदाः––मेरुः, हिमवान्, सह्यः। 'गन्धमादनम्' अपवादः। विषयः = जनपदः, देशः, गोचरश्च। 'विषयो गोचरे देशे तथा जनपदेऽपि च।' इति––(मे० पृ० १२० श्लो० १०६)। आशुगः = बाणः, सायकः, शरः, विशिख इत्यादयः। भेदाः––नाराचः, काण्डः, भल्लः। 'इषुर्द्वयोः' अपवादः। शोणः = नदविशेषः। भेदाः– सिन्धुः, भैरवः, दामोदरः, ब्रह्मपुत्र इत्यादयः। मासः = पक्षद्वयात्मकः कालः। भेदा.––पक्षः,

घसृः । धान्यम्=व्रीहिः । भेदाः---शालिः, कलमः, सुगन्धिकः, षष्टिकः, नीवारः, तिलः, माषः, श्यामाकः, मुद्गः, मसूर इत्यादयः । विषभेदवद् धान्यभेदा अपि पुंसि स्युः । धान्यशब्दस्तु नपुंसकलिङ्गवाचकः । अध्वरः=यज्ञः, यागः, मखः, क्रतुः । तद्भेदाः---उष्णा-तिरात्रा-ग्निष्टोमा-श्वमेधाः । इष्ट्यादेर्बाधितत्त्वं वक्ष्यति । अग्निः=वह्निः, कृशानुः, पावकः, अनल इत्यादयः । 'अपित्तम्' अपवादः । तद्भेदाः---गार्हपत्यः, आहवनीयः, दक्षिणाग्निरित्यादयः । मरुत्=देवः, सुरः, अमरः, निर्जर इत्यादयः । 'दैवतानि' 'देवता' इत्यपवादः । तद्भेदाः--तुषिताः, साध्याः, आभास्वराः इन्द्रः, शक्रः, मरुत्वान्, मघवा । सूरः, सूर्यः, अर्य्यमा, आदित्यः । देवानुचराः--हाहाः, हूहूः, तुम्बरुः, नारदः, मातलिः । विष्णोरनुचराः---जय-विजयप्रभृतयः । रुद्रानुचराः--नन्दिकेश्वरादयः ।

तथा चामरः-(अ० ना० पृ० ४५३ श्लो० ११, १२)

"पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः[१] ।
स्वर्ग-यागा[२]-ऽद्रि-मेघाऽब्धि-द्रु-काला-ऽसि-शरा-ऽरयः ॥
कर-गण्डो-ष्ठ-दो-र्दन्त-कण्ठ-केश-नख-स्तनाः ॥" इति ॥

अस्य व्याख्या—

पुंस्त्व इति । करेति च । भेदास्तुषितसाध्यादयः । अनुचराः सुनन्दादयः तैः सहिताः सुरासुराः देवदैत्याः पर्यायैः सह पुंसि । असुराः=दैत्याः, दानवाः, दैतेया इत्यादयः । तद्भेदाः— बलिः, नमुचिः, जम्भ इत्यादयः । तदनुचराः—कूष्माण्डः, मुण्डः, कुम्भाण्ड इत्यादयः । स्वर्गादय एकोनविंशतिः सभेदाः सपर्यायाश्च नरि भवन्ति । करः=राजग्राह्यो भागः । 'करो वर्षोपले पाणौ शुण्डायां किरणे बलौ ।' इति--(ना० र० पृ० ४५ पं० १९), रश्मिः, पाणिश्च । मरीच्यादीनां तु बाधः । गण्डः=कटः । खड्गी च । दोः=प्रवेष्टः । भुजादेः 'द्वयोः' इति बाधः । अन्यत्सर्वं प्रागुक्तवत् ।

दुर्गसिंहोऽपि—(दु० लिं० पृ० १७ श्लो० ३६, ३७, ३८)

"स्वर्ग-दिन-मान-सँवत्सर-नर-यज्ञ-कुच-केश-मास-र्त्तु ।
अरि-गिरि-जलद-जलधि-विष-सुर-ऽसुरा-ऽस्या-ऽऽत्म-भुज-भुजङ्गा ॥

पाणिनीयेऽपि-- (१) (देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि) ॥ एतानि पुंसि स्युः । देवाः=सुराः । असुराः=दैत्याः । आत्मा=क्षेत्रज्ञः । स्वर्गः=नाकः । गिरिः=पर्वतः । समुद्रः=अब्धिः । नखः=कररुहः । केशः=शिरोरुहः । दन्तः=दशनः । स्तनः=कुचः । भुजः=दोः । कण्ठः= गलः । खड्गः=करवालः । शरः=मार्गणः । पङ्कः=कर्दमः—इत्यादिः । (सि० कौ० पृ० ३९९ सू० ४३ ।)

पाणिनीयेऽपि—(२) (ऋतुपुरुषकपोलगुल्फमेघाभिधाभिधानानि) ॥ एतानि पुंसिस्युः । क्रतुः= अध्वरः । पुरुषः=नरः । कपोलः=गण्डः । गुल्फः=प्रपदः । मेघः=नीरदः—इत्यादिः । (सि० कौ० पृ० ३९९ सू० ४९) ।

शर–नखर–कपोलक–दन्त–पङ्क–गुल्फौ–ष्ठ–कण्ठ–रश्म्य–निलाः ।
एषां सञ्ज्ञा धान्यान्युक्तो नाडीव्रणः पण्डः ······ ॥
असवो दारा लाजा बह्वर्था बल्वजाः ··· ।" इति ।

अनयोः सार्द्धद्वयपद्ययोर्व्याख्या—

स्वर्गेति । शरेति । असव इति च । एषां स्वर्गादीनां पर्यायाः सभेदाः सानुचरा धान्यानि व्रीहयश्च नाडीव्रणः पण्डश्चैते नरि स्युः । नरः = मर्त्यः, मानवः, मनुष्यः, मानुष इत्यादयः । भुजङ्गः = सर्पः, पन्नगः, फणी, अहिरित्यादयः । रश्मिः = किरणः, उस्रः, मयूख इत्यादयः । 'मरीचिः' 'दीधिति'श्चेति बाधः । अनिलः = वायुः, वातः, पवन इत्यादयः । नाडीव्रणः = व्रणविशेषः पुन्नपुंसकत्वाद् व्रणस्य वचनम् । पण्डः = नपुंसकम् । अस्वादयो नृलिङ्गा बहुवचनान्ता नित्यं स्युः । असवः = प्राणाः । दाराः = भार्या । मतान्तरे तु टाबन्तोऽप्ययं शब्दः । 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः ॥' इति व्याडिशुभाङ्कौ— इति विष्णुदत्तः । (अमरस्य नामचन्द्रिकाख्यायां व्याख्यायां पृ० ११२ पं० १३) । लाजा = भृष्टधान्यविशेषः । बल्वजाः = तृणविशेषः । अङ्गाः, वङ्गाः, कलिङ्गा इत्यादयस्तु लोकत एव सिद्धाः । अन्यत्प्राग्वत् ।

अथेदानीं पूर्वाह्णादिशब्दानां पुंलिङ्गतामाहामरः—(अम० ना० लिं० पृ० ४५३ श्लो० १२) ।

"अह्णाहान्ताः क्ष्वेडभेदा रात्रान्ताः प्रागसंख्यकाः ॥" इति ।

अस्य व्याख्या—

अह्णेति । अह्णश्च अहश्च अन्ते एषां ते नरि भवन्ति । परवल्लिङ्गापवादोऽयम् । अह्नः पूर्वम् –पूर्वाह्णः । अह्नः अपरम्––अपराह्णः । अह्नः मध्यम्–मध्याह्नः । एवं पराह्णः, सायाह्नः, अत्यह्नः, सर्वाह्णः, संख्याताह्न इत्यादयः । द्वे अहनी समाहृते द्व्यहः । त्रीणि अहानि समाहृतानि त्र्यहः । अथवा द्वयोरह्नोः समाहारो द्व्य : । त्रयाणामह्नानां समाहारो त्र्यहः । एवमेकाहः, सप्ताहः, उत्तमाहः, परमाहः, संख्याताह इत्यादयः । अत्र 'स नपुंसकम्' इत्यस्यापवादः । क्ष्वेडभेदास्तु प्राग्वद् बोध्याः रात्रान्ता इति । समासान्तस्यैकदेशानुकरणम् । एवमुत्तरत्रापि । रात्रोऽन्तो येषां ते चेत्प्राक् असंख्यावाचकशब्दवर्जितास्तदा नरि भवन्ति । परवल्लिङ्गताऽपवादोऽयम् । अहश्च रात्रिश्च अहोरात्रः । एवं सर्वरात्रः, पूर्वरात्रः, अपररात्रः, मध्यरात्रः, अर्द्धरात्रः, चिररात्रः, पुण्यरात्रः, दीर्घरात्रः, वर्षरात्रः, संख्यातरात्रः, अतिरात्रः, गणरात्र इत्यादयः । 'प्रागसंख्यकाः' इति किम् । पञ्चानां रात्रीणां समाहारः 'पञ्चरात्रम्' । द्वयोः रात्र्योः समाहारः 'द्विरात्रम् । एका चासौ रात्रिश्च 'एकरात्रम्' । त्रयाणां रात्रीणां समाहारः 'त्रिरात्रम्' । एवं अहोरात्रम् । द्विरात्रम् । गणरात्रम् । पुण्यरात्रस्यार्धर्चादिपाठात् क्लीबत्वं च ।

अथेदानीं बर्हादीनां शब्दानां पुंस्त्वमाह हेमः—(अभि० सं० लिं० पृ० १ श्लो० ४, ५)

बर्होऽच्छदे,ऽहिर्वप्रे, व्रीह्यग्न्योर्हायनबर्हिषौ, ।
मस्तु सक्तौ, स्फटिकेऽच्छो, नीलमित्रौ मणीनयोः, ॥५॥
कोणेऽस्र,–श्चषके कोश,–स्तल–तालचपेटयोः, ।
अनातोद्ये घनो, भूम्नि दा'रप्राणासुबल्वजाः, ॥६॥ इति ।

अनयोर्व्याख्या—

बर्ह इति। कोण इति च। अच्छदे बर्हः, क्रमेण व्रीह्यग्न्योः हायनबर्हिषौ, सक्तौ मस्तु, स्फटिके अच्छः, क्रमेण मणीनयोः नीलमित्रौ, कोणेऽस्रः, चषके कोशः, तालचपेटयोस्तलः, अनातोद्ये घनश्चैते बर्हादयः शब्दा उक्तार्थे पुंसि भवन्ति । दारादयस्तु भूम्नि बहुवचन एव नरि स्युः। बर्हः = परिवारः, परिजनः = पोष्यवर्गः । मयूरपिच्छं च । 'बर्हस्तु प्रचलाककलापकौ ।' इति यादवः—(वै० पृ० २९ श्लो० ३९) बर्हं पिच्छे दलेऽस्त्रियाम् । इति मेदिनी च (नानार्थशब्दकोशे पृ० १७५ श्लो० ६) । एवं वप्रेवप्रार्थे अहिः = सर्पः। व्रीहग्न्योः व्रीहिः = शालिः। अग्निः = वह्निः । तदर्थे क्रमेण हायनबर्हिषौ । तत्र हायनः = व्रीहिः । बर्हिः = अग्निः । सक्तौ भृष्टयवादिचूर्णे मस्तुः = दधिभवमण्डम्, दधिजलम् । स्फटिके मणिविशेषे अच्छः = निर्मलम् । मणीनयोः मणिः = अश्मजातिः, रत्नम् । इनः = सूर्यः । तदर्थे क्रमेण नीलमित्रौ । तत्र नीलः = निधिप्रभेदः । मित्रः = सूर्यः । कोणे = गृहैकभागे अस्रः । चषके सुरापानपात्रे कोशः । तालचपेटयोः ताले = वृक्षविशेषे । चपेटे = विस्तृताङ्गुलिपाणौ । तदर्थे तलः । अनातोधे आतोधरहितेऽर्थे घनः = मेघः । शेषं प्राग्वत् । स एव इतः परं स्वरान्त—व्यञ्जनान्तक्रमेण शब्दानुदाहरिष्यन्ते, तत्र ककारोपान्त्याकारान्ता उदाह्रियन्ते—

"वाकोत्तरा नक्तकरल्लकाङ्काः" । इति

अस्य व्याख्या—

वाकेति । वाको वाकशब्द उत्तरा अन्ते येषां ते नृलिङ्गा भवन्ति । यथा । अनुवाकः = शास्त्रम्, अप्रगीतऋग्जातम् । शंयुवाकः = शुभान्वितवचनम्, सकल्याणवचनम् । सूक्तवाकः = इदं द्यावापृथिवीभद्रमभूदित्यादिको वैदिकमंत्रः । मंत्रमात्रम् । सुभाषितम् । नक्तकः = कपर्दम्, लक्तकः इति । रल्लकः = कम्बलः । अङ्कः = रूपकभेदः । एकादिरेखा । अङ्कचिह्नं चेत्यादयः ।

अमरोऽपि—(अम० ना० लिं० पृ० ४५४ श्लो० १७) ।

पाणिनीयेऽपि—(१) (दाराक्षतलाजासूनां बहुत्वं च) ॥ दाराः = स्त्री । अक्षताः = अखण्डतण्डुलाः । लाजाः = भृष्टधान्यम् । असवः = प्राणाः । (सि० कौ० पृ० ४०१ सू १०५ ।)

"वटकश्चानुवाकश्च रल्लकश्च कुडङ्गकः ।" इति

अस्य व्याख्या—

वटक इति । वटकः = पिष्टकभेदः, मासपिष्टविकारः, 'वरा' इति लोके । अनुवाकः = वेदावयवः, ऋग्यजुः समूहः । कुडङ्गकः = वृक्षलतागहनम् । 'कुडङ्गको ना छदिः पिटम्' इति बोपालितः—(अम० लिं० सुधाख्याव्याख्यायां पृ० ४५४ पं० १२) । 'वृक्ष-लतागृहम्' इति क्षीरस्वामी । 'कुटङ्गकः' इति क्वचित्पाठः ।

अथेदानीं खान्तशब्दानाह हेमः—(अभि० सं० लिं० पृ० १ श्लो० ७)

"न्युङ्खोत्तरा ।" इति

न्युङ्खेति । न्युंखो न्युंखशब्द उत्तरा अन्ते येषां ते पुंसि स्युः । उदाहरणं तु कोशान्तरतोऽवगम्यम् ।

अमरोऽपि—(अम० ना० लिं० पृ० ४५४ श्लो० १७)

"पुङ्खो न्यूङ्खः ।" इति

पुङ्ख इति । पुङ्खः = काण्डमूलम्, बाणावयवः । न्यूङ्खः = सामवेदे निपातित ओङ्कारः । सम्यङ् मनोज्ञश्च । "न्युंखः" इति ह्रस्वोकारोऽपि । 'न्युङ्खः सम्यङ् मनोज्ञे च साम्नः षट्-प्रवणेऽपि च ।' इति—(मे० पृ० २० श्लो० २)

अथाधुना गान्तघान्तशब्दानाह हेमः—(अभि० सं० लिं० पृ० १ श्लो० ७, ८)

"... ... ...सङ्ग–तरङ्ग–रङ्गाः ।

पराग–पूगौ–सृग–मस्तुलुङ्ग–

कुडङ्ग–कालिङ्ग–तमङ्ग–मङ्गाः ॥७॥" इति

अस्य व्याख्या—

सङ्गेति । सङ्गः = सङ्गमः, मेलनम् । तरङ्गः = कल्लोलः । रङ्गः = रागः । नृत्यम् । नृत्यस्थानम् । रणभूमिश्च । परागः = सुमनोरजः, सुमनोरेणुः । 'परागः कौसुमे (सुमनौ) रेणौ धूलिस्नानीयोरपि ॥ गिरिप्रभेदे विख्यातावुपरागे च चन्दने ।' इति—(मे० पृ० २४ श्लो० ४०, ४१) पूगः = क्रमुकः, संघातश्च । 'पूगस्तु क्रमुके वृन्दे' इति—(मे० पृ २० श्लो० १०) सृगः = भिन्दिपालः । मस्तुलुङ्ग = मस्तकस्य घृताकारस्नेहः, मस्तिष्कम् । कुडङ्गः = निकुञ्जः । 'कुडङ्गोऽस्त्री निकुञ्जोऽस्त्री कुञ्जो वृक्षवृतान्तरे ।' इति यादवः—(वै० पृ० ४१ श्लो० १०) । कालिङ्गः = भूमिकर्कारुः, दन्तावलः, सर्पश्च । 'कालिङ्गो भूमिकर्कारौ दन्तावलभुजङ्गयोः ।' इति—(मे० पृ० २४ श्लो० ३२) । तमङ्गः = इन्द्रकोशः । मङ्गः = धर्म्मः । नौशिरश्च ।

"वेग–समुद्गा–वपाङ्ग–वर्गौ–घा–र्घाः ।" इति

अस्य व्याख्या—

वेगः = जवः । प्रवाहश्च । 'वेगो जवे प्रवाहे च महाकालफलेऽपि च ।' (मे० पृ० २३ श्लो० २४) । समुद्गः = सम्पुटकः । अपाङ्गः = नेत्रप्रान्तः, चक्षुरन्ताः । वर्गः = समूहः । ओघः = समूहः । अर्घः = मूल्यम् । पूजाविशेषश्च ।

अमरोऽपि—(अम० ना० लिं० पृ० ४५४ श्लो० १७)

"समुद्गश्च ।" इति

अस्य व्याख्या—

समुद्ग इति । समुद्ग इत्यस्य व्याख्या प्रागुक्ता ।

अथ साम्प्रतं चान्तादीन् छान्तान्तान् पुंलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० २ श्लो० ८)

"मञ्च–सपुच्छ–पिच्छ–गुच्छाः ।" इति

अस्य व्याख्या—

मञ्चेति । मञ्चः = काष्ठमयाधारविशेषः, पर्य्यङ्कः । 'भवेन्मञ्चस्तु पर्य्यङ्के' इति—(शब्दरत्नसमन्वये पृ० ७१ पं० १५) । पुच्छः = पश्चात्प्रदेशः । पिच्छः = मयूरकलापः । गुच्छः = हारभेदः । कलापश्च । 'स्याद्गुच्छस्तवके स्तम्बे हारभेदकलापयोः ।' इति—(मे० पृ० २९ श्लो० ३ ।)

अथ सम्प्रति जान्तादीन्नान्तान्तान् पुंलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० २ श्लो० ८, ९, १०, ११) ।

वाजौ–ज–किलिञ्ज–पुञ्ज[१]–मुञ्जा,
अवट–पट्ट–हठ–प्रकोष्ठ–कोष्ठाः ॥८॥
अङ्गुष्ठ–गण्डौ लगुड–प्रगण्ड–
करण्ड–कूष्माण्ड–गुडाः शिखण्डः ।
वरण्ड–रुण्डौ च पिचण्ड,–नाडी[२]–
व्रणौ गुण–भ्रूण–मलवत–कुन्तौ ॥९॥
पोतः पिष्टातः पृषत–श्चोत्पात–त्राता–वर्थ–कपर्दौ ।
बुद्बुद–गद–मगदो मकरन्दो जनपद–गन्ध–स्कन्ध–मगाधः ॥१०॥

पाणिनीयेऽपि—(१) (ध्वजगजमुञ्जपुञ्जाः) ॥ एते पुंसि स्युः । ध्वजः = शौण्डिकः । गजः = हस्ती । मुञ्जः = स्थूलदर्भः । पुञ्जः = राशिः । सि० कौ० पृ० ४०१ सू० १०९ । (२) (नाड्यपजनोपपदानि व्रणाङ्ग-पदानि) ॥ यथासंख्यं नाड्युपपदानि व्रणादीनि पुंसि स्युः । नाडीव्रणः = सदागलद्व्रणः । अपाङ्गः = नेत्रान्तः । जनपदः = देशः । सि० कौ० पृ० ४०१ सू० १०६ ।

अर्ध–सुदर्शन–देवन–मल्ला–भिजन–जनाः परिघातन–फेनौ। ' इति ।

एषां व्याख्या—

वाजेति । वाजः = वेगः । निःस्वनः । पक्षश्च । 'वाजो निःस्वनपक्षयोः। वेगे पुमानथ क्लीबे घृतयज्ञान्नवारिषु ।' इति—(मे० पृ० ३० श्लो० १५, १६) । ओजः = विषमसंख्या 'ओजे नौजः समः पादे' इति भरतादय इति—(शब्दार्थचिन्तामणौ पृ० ४४२ स्तम्भे २ पंक्तौ ४) । किलिञ्जः = कटः, वीरणादिकटः । पुञ्जः = वृन्दम्, धान्याद्युच्छ्रितवृन्दम्, राशिः । मुञ्जः = शरेषिका, तृणविशेषः, स्थूलदर्भः । अवटः = गर्तः कूपो वा । पट्टः = काष्ठादिविरचित आसनविशेषः । हठः = योगविशेषः । बलात्कारश्च । प्रकोष्ठः = मणिबन्धकूर्पयोरन्तरम् । यूपकक्षान्तरम् । भुजश्च । कोष्ठः = कुसूलः । आश्रयश्च । अङ्गुष्ठः = अङ्गुलिविशेषः, वृद्धाङ्गुलिः । गण्ड. = कपोलः । रोगविशेषः । प्राणिविशेषश्च । प्राणिवचनस्य तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात् । लगुडः = वंशादिदण्डः । लोहमयप्रहरणं च । प्रगण्डः = कूर्परोपरिकक्षपर्य्यन्तभागः, भुजमध्योपरिभागः । करण्डः = वंशादिकृतभाण्डभेदः । कूष्माण्डः = कर्कारुः । गणान्तरम् । भ्रूणान्तरं च । गुडः = इक्षुविकारः । शिखण्डः = चूडा, मयूरकलापः । वरण्डः = मुखरोगः । शरादिसंघातविशेषश्च । रुण्डः = कबन्धः । 'रुण्डोऽशिराः कबन्धोऽस्त्री' इति यादवः—(वै० पृ० १२२ श्लो० २१६) । पिचण्डः = उदरम् । पशोरवयवश्च । 'पिचिण्ड' इत्यपि । 'पिचण्ड उदरे पशोरवयवे पुमान्, ।' इति––(मे० पृ० ४२ श्लो० ३२) । नाडीव्रणः = सदागलद्व्रणः । पुन्नपुंसकत्वाद् व्रणस्य वचनम् । ''नाडीस्रवः'' इति ''नासूर'' इति च लोके। गुणः = धनुषो मौर्वी । रज्जुमात्रम् । ज्ञानविनयादयश्च । 'मौर्व्यां द्रव्याश्रिते सत्त्वशौर्य्यसत्त्वादिके गुणः ।' इति—(अम० ना० लिं० पृ० ४०५ श्लोक ४७) । 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इद्रिये । त्यागे शौर्य्यादिसत्त्वादिसन्ध्याद्यावृत्तिरज्जुषु । शुक्लादावपि वटयां च' इति (मे० पृ० ४५ श्लोक १०) । भ्रूणः = स्त्रीगर्भः । नौकारूपं यानम् । डिम्भः, बालश्च । 'भ्रूणः स्त्रीगर्भडिम्भयोः ।' इति—(मे० पृ० ४६ श्लोक २३) । अलक्तः = लाक्षारसः । लाक्षा च । 'यावो द्रुमामयोऽलक्तो लाक्षा रक्ता जतु क्रिमिः ॥' इति यादवः—(वै० पृ० १७१ श्लोक १५३)। कुन्तः = आयुधविशेषः, प्रास. । ''भाला'' इति लोके । 'प्रासस्तु कुन्तः' इति (अम० ना० लिं० पृ० २९५ श्लोक ९३) । पोतः = शिशुः । 'पोतः शिशौ वहित्रे च गृहस्थाने च वाससि' इति—(मे० पृ० ५६ श्लोक ३८) । पिष्टातः = पटवासकः, धूलिगुच्छकः, वस्त्रादिवासनार्थमेकीकृतं गन्धद्रव्यचूर्णम् । ''अवीर'' इति । ''बुक्का'' इति च लोके । 'पिष्टातो धूलिगुच्छकः' इति पुरुषोत्तमदेवः—(त्रिकाण्डशेषे पृ० २९३ श्लो० ४४) । 'पिष्टातः पटवासकः' इत्यमरश्च—(अम० ना० लिं० पृ० २५० श्लो० १३९) । पृषतः = पृषाकमृगः, चित्रमृगः । 'पृषतश्चन्द्रबिन्दुः स्याद्धरिणात्किञ्चिदल्पकः ।' इतिग्रन्थान्तरेपि

इति (शब्दार्थचिन्तामणौ पृ० २०९ स्तम्भे १ पंक्तौ ३०)। उत्पातः = उपद्रवः,अजन्यम्। 'विदुर-जन्यमुत्पातम्' इति पुरुषोत्तमदेवः—(हारावल्याम् पृ० ४०६ श्लोक २१०)। व्रातः = समूहः। अर्थः[1] = धनादिः। विषयः। अर्थना। कारणम्। वस्तु च। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु। मोक्षकारणयोश्च' इति—(ना० मं० पृ० ४० पं० २३)। कपर्दः = वराटकः। शिवस्य जटाजूटश्च। 'कपर्दः पार्वतीनाथजटाजूटे वराटके।' इति महीपः—(अने० तिल० पृ०४६ श्लो० ८०)। बुद्बुदः = जलविकारः, जलादिसंस्थानविशेषः, जलस्फोटः,वर्तुलाकारो जलविकारः। "बुलबुला" इति लोके। गर्भस्थावयवविशेषः। चार्चिक्यम्, स्थासकश्च। 'स्थासको बुद्बुदो भवेत्।' इति पुरुषोत्तमदेवः—(हारावल्यां पृ० ४०४ श्लो० १६५)। गदः = रोगः। कृष्णभ्राता च। 'गदो रोग-हरिभ्रात्रोः, इति—(नाना० र० पृ० ३३ पं० १८)। अगदः = औषधम्। मकरन्दः = पुष्प-रसः। गणकविशेषश्च। जनपदः = देशः, नीवृत्। जनश्च। "जानपद" इत्यपि। 'भवेज्जनपदो जानपदोऽपि जनदेशयोः।' इति—(मे० पृ० ७८ श्लो० ४८)। गन्धः = गुणविशेषः, आमोदः। गन्धकश्च। 'गन्धः प्रतिवेश्यामोदलेशसम्बन्धगन्धके।' इति—(मे० पृ० ७९ श्लोक ५)। स्कन्धः = अंसदेशः। अगाधः = अतलस्पर्शः। 'अगाधमतलस्पर्शे त्रिषु, क्लीबे त्वयं बिले।' इति—(नाना० र० पृ०८७ पंक्तौ १७)। अर्धः = असमभागः, खण्डः, भित्तम्। 'अर्द्धः खण्डे बुधैर्दृष्टमर्द्धं मान-समांशयोः।' इति—(अने० ति० पृ० ७ श्लो० १७)। सुदर्शनः = हरेश्चक्रम्। मेरुः। वंशश्च। देवनः = पाशकः। 'देवनोऽक्षेतु पुंसि स्यात्' इति—(मे० पृ० ८८ श्लो० ७६)। अह्नादेशान्ताः पूर्वाह्णप्रभृतयः। अह्नःपूर्वम्—पूर्वाह्णः' इति प्राग्वत्। अभिजनः = कुलम्। ख्यातिः। जन्मभूमिः। कुलध्वजश्च। 'कुले त्वभिजनो जन्मभूमौ च' इति यादवः—(वै०पृ० २६६ श्लो० १२)। 'जन्मभूमा-वभिजनो विख्यातावन्वये च सः।' इति च--(नाना० र० मा० पृ० १२० पं० ६)। जनः = लोकः। जगद्भेदः। पृथग्जनश्च। 'जनो लोके जगद्भेदे पृथग्जने।' इति–(अने० तिल० पृ० १७ श्लो०१२०) 'जनो जनपदे प्रोक्तः' इति हलायुधः–(अभिधानरत्नमालायाम् पृ० श्लो०)। परिघातनः = परिघः, लोहबद्धलगुडः। लोहबद्धयष्टिश्च। फेनः = जलविकारः, समुद्रफेनः। तरलद्रव्योपर्युत्थितबुद्बुदा-कारवस्तु। "झाग" इति लोके। ब्रध्नश्च।

अमरोऽपि—(अम० ना० लिं० पृ० ४५४ श्लो० १७, १८, १९)

... . . . विट-पट्ट–धटाः खटः॥
कोट्टा–ऽरघट्टः–हट्टाश्च पिण्ड–गोण्ड–पिचण्डवत्।
गडुः करडो लगुडो वरण्डश्च किणो घुणः॥

---

(१) पाणिनीये पि–(सीरार्थौदनाः पुंसि)॥ सीरः=हलम्। अर्थः=द्रव्यम्। ओदनः=अन्नम्। सि० कौ० पृ० ४०२ सू० १३९।

दृति–सीमन्त–हरितो रोमन्थो–द्गीथ–बुद्बुदाः ।
कासमर्दोऽर्बुदः कुंदः फेनः' इति ।

एषां व्याख्या

विटेति । कोट्टेति । दृतीति च । विटः = धूर्त्तः । 'विटः स्याल्लवणे षिङ्गे मूषके खदिरे गिरौ ।'इति—(ना० र० पृ० १९ पं० ७) । घटः = तुला । 'घटो दिव्ये तुलायां स्याद्, घटी चीरे च वाससि ।' इति—(मे० पृ० ३४ श्लो० १८) । 'परीक्षार्थतुलायां च घटः सूरिभिरिष्यते ।' इति—(विश्वप्रकाशे पृ० ३८ श्लोक २६) । खटः = अन्धकूपादयः । 'खटोऽन्धकूपककयोः प्रहारान्तरटङ्कयोः ।' इति—मे० पृ० ३४ श्लोक ९) । 'खटः श्लेष्मण्यन्धकूपे प्रहारान्तरटङ्कयोः, ।।' इति पुरुषोत्तमदेवश्च—(हा० व० पृ० ४०७ श्लोक २२९) । कोट्टः = दुर्गपुरम् । अरघट्टः = कूपभेदः । अरैश्चक्रावयवसदृशैः काष्ठविशेषैर्घट्यते रच्यते सोऽरघट्टः । "राहट" इति प्रसिद्ध इत्यन्ये । कस्यचिन्मते टकारान्तेष्वपि 'भट्टग्राम' इति न्यायेन रेफान्तोऽपि 'कोट्टार' इति त्र्यक्षरो निबद्धः । 'कोट्टारो नागरे कूपे पुष्करण्याश्च पाटके ।' इति—(मे० पृ० १३३ श्लोक १४४) । एवं रभसेऽपि । पुरुषोत्तमदेवेन हारावल्यां पाठन्तरमुक्तम् । 'कोट्टारो नागरे कूपे पुष्करण्यां च पाटके ।' इति—(हा० व० पृ० ४०७ श्लोक २३१) । घट्टः = घाट इति प्रसिद्धः । हट्टः = क्रयविक्रयस्थानम् । 'हट्टस्तु पण्यभूः ।' इति यादवः—(वै० पृ० १६१ श्लोक ३५)। पिण्डः = मृदादिसंघातः । 'पिण्डो वृत्ते तनौ गुडे ।' इति—(वै० पृ० २१६ श्लोक ३१)। गोण्डः = नाभिः, पामरजातिश्च । 'गोण्डः पामरजातौ च, वृद्धनाभौ च तद्वति ।' इति—(मे० पृ० ४१ श्लोकः ११) । 'गोण्डः पामरजातौ च वृद्धनाभौ च सम्मतः ।' इति रुद्रः—(अमरस्यामरविवेकटीकायां पृ० ३६४ पं०१२) । पिचण्डवद् गड्वादयोऽपि पुंसि स्युरितिवता निर्दिश्यते । गडुः = गलगण्डः । पृष्ठगुडः । कुब्जश्च । 'कुब्जे पृष्ठगुडे गडुः ।' इति शाश्वतः—(अनेकार्थसमुच्चये पृष्ठे ६३ श्लोकः ७१७) । किणः = व्रणजचिह्नम्, मासग्रन्थिभेदः । घुणः, ओसनभेदश्च । 'किणो रूढं व्रणस्थाने' इति—(वै० पृ० १२२ श्लोक २१७) । 'एकाङ्गुष्ठग्रहात्किणः ।' इति च यादवः—(वै०पृ० १०१ श्लोक २२१)। 'व्रणचिह्ने घुणे किणः' इति—(हा० व० पृ० ४०८ श्लोक २५४) । घुणः = काष्ठकृमिः । कुटजगन्धश्च । 'घुणः कृमिः काष्ठभवा' इति—(वै० पृ० १५१ श्लोक ३६) । 'कुटजे घुणः' इति च—(वै० पृ० २०० श्लोक ४९) 'घुणः स्यात्काष्ठवेधके ।' इति रत्नकोषः—(अम० सुधा० पृ० ४५५ पं० ३३) । दृति = चर्म्मपुटकः । मत्स्यश्च । 'दृतिश्चर्म्मपुटे मत्स्ये ना' इति—(मे० पृ० ५५ श्लोक २६)। हरित्=पालाशवर्णः । दिक् । तृणभेदः । अश्वविशेषश्च । 'हरिद्दिशि हयान्तरे । तृणभेदे भवेद्वर्णे' इति—(अने० नि० पृ० ३७ श्लोक २५२) । रोमन्थः = पशूनां चर्वितचर्वणम् । 'रोमन्थनं तु रोमन्थरोमोर्णोर्णास्तुकोऽपि च ।' इति यादवः–(वै० पृ० ७१ श्लोक ७४) ।

उद्गीथः = सामभेदः । 'उद्गीथः प्रवणः सामवेदध्वनिः' इत्यरुणः—(अम० सुधा० पृष्ठे ४५५ पंक्तौ १३) । कासमर्दः = गुल्मभेदः । अर्बुदः = शतकोटयः । पर्वतश्च । 'अर्बुदः पर्वते मांसे संख्यायां मामकीलके ।' इति—(अने० नि० पृष्ठ ३९ श्लोकः ७) । अर्दनिरिति पाठे अर्दनिः = अग्निः । कुन्दः = शिल्पभाण्डम् । निधिभेदः । मुकुन्दश्च । 'कुन्दं माध्ये च, कुन्दो ना निधिभेदमुरद्विषोः ।' इति—(ना० र० पृष्ठ ३३ पं० १९) । 'पुष्पे क्लीबं, भ्रमौ कुन्दः' इति पुरुषोत्तमदेवश्च—(त्रि० शे० पृ० ३४४ श्लोक २०५) । शेषशब्दानां व्याख्यानं तु प्राग्वत् ।

अथेदानीं पान्तादीन् रान्तान्तान् पुंलिङ्ग-वाचकशब्दानाह हेमः—(अभि० सं० हेम० लिं० पृ० २ श्लोकः ११, १२) ।

पूपा—ऽपूपौ सूप—कलापौ रेफः शोफ—स्तम्ब—नितम्बाः ॥ ११ ॥
शम्बा—ऽम्बौ पाञ्चजन्य—तिष्यौ पुष्यः सिचय—निकाय्य—रा'त्र —वृत्राः ।
मंत्रा—ऽमित्रौः[२]—कटप्रू—पुण्ड्रा—ऽऽराः, इति ।

अस्य सार्द्धपद्यस्य व्याख्या—

पूपेति । शम्बेति च । पूपः = अपूपः, पिष्टकः । "पूआ" इति लोके । 'पूपस्तु पिष्टकोऽपूपः' इति—(वै० पृ० १६४ श्लो० ७२) । अपूपः = पिष्टकः । गोधूमश्च । सूपः = दाली । व्यञ्जनम् । भाण्डम् । सूदश्च । 'सूपो व्यञ्जनभेदे च सूपकारे च सूपवत् ।' इति—(ना० र० पृ० ३७ पं० ३) । कलापः = समूहः । बर्हः । काञ्ची च । 'कलापः संहतौ बर्हे काञ्चीतूणीरयोरपि ।' इति शाश्वतः—अने० स० पृ० २० श्लोक २१६) । रेफः = रवर्णः, अक्षरविशेषः, यवर्गस्य द्वितीयाक्षरम् । पापम् । रागश्च । 'रेफो वर्णे च पुंसि, स्यात्कुत्सिते पुनरन्यवत् ।' इति—(मे०पृ० १०४ श्लोक २) । शोफः = शोथः, श्वयथुः । 'शोफ ओषधिभेदे स्याद्रुक्कृते त्वग्विवर्द्धने ।' इति हैमः—(अने० सं० पृ०२६ श्लो० ३०६) । स्तम्बः = व्रीह्यादीनां प्रकाण्डविशेषः । नितम्बः = कटिप्रदेशः । शम्बः—= पविः । अम्बः = सरकादीनां प्रकाण्डविशेषः । पाञ्चजन्यः = श्रीकृष्णस्य शंखः । अग्निश्च । पुष्पः = तिष्यः । तिष्यः = नक्षत्रविशेषः । सिचयः = वस्त्रम् । जीर्णवस्त्रं च । निकाय्यः = गृहम् । कृतसमासान्तरात्रशब्दान्तः पूर्वरात्रप्रभृतयः । वृत्रः = असुरविशेषः । मंत्रः=ऋगादिलक्षणः । अमित्रः = शत्रुः । कटप्रूः = महादेवः । विद्याधरश्च । 'कटप्रूः पुंसि राक्षसे । विद्याधरे महादेवे तथा स्याद-

पाणिनीयेऽपि—(१) (रात्राह्नाहाः पुंसि) ॥ एते पुंसि स्युः । पूर्वरात्रः । अपररात्रः । पूर्वाह्णः । अपराह्णः । एकाहः । सप्ताहः । उत्तमाहः । सि० कौ० पृ० ४०२ सू १३१ (२) (भृत्रामित्रच्छात्रपुत्रमंत्रवृत्रमेढ्रोष्ट्रा पुंसि) ॥ एते पुंसि स्युः । भृत्रः = दासः । न मित्रम् अमित्रः = शत्रुः । "तस्य मित्राण्यमित्रास्ते" इति माघः । "स्यातामममित्रौ मित्रे च" इति च । छात्रः = शिष्यः । पुत्रः = आत्मजः । मंत्रः = ऋगादिलक्षणः । वृत्रः = असुरविशेषः । मेढ्रः = शिश्नः । उष्ट्रः = करभः । सि० कौ० पृ० ४०३ सू० १५७ ।

क्षदेवने ।' इति––(मे० पृ० १४१ श्लोक १९९) । पुण्ड्रः = इक्षुभेदः । देशभेदश्च । 'पुण्ड्रो देशे- क्षुतिलकं भेदे क्रिम्यतिमुक्तयोः ।' इति––(ना० र० पृ ४६० पं० १९)। आरः = भौमग्रहः । शनि- ग्रहश्च।' कुजारमङ्गलाङ्गाराः' इति––(वै०पृ०१९ श्लोक ३१) । 'आरस्तु भूसुते ।' इति–– (ना० र० पृ० ४८ पं० १४)। 'आरा चर्म्मप्रभेदिन्यां, पुंसि भौमे शनैश्चरे ।' इति च––(मे० पृ० १२३ श्लोक ७) ।

अमरोऽपि––(अम० ना० लिं० पृ० ४५५ श्लोक १९, २०)

. . . . : . . स्तूपौ सपूपकौ ॥
आतपः क्षत्रिये नाभिः कणप–क्षुर–केदराः ।
पूर–क्षुरप्र–चुक्राश्च, इति ।

एतयोर्व्याख्या––

स्तूपाविति । आतप इति च । स्तूपः = वायुः । रणः । मृदादिकूटः, राशिकृतमृत्तिकादिः । उच्छ्रायः, समुच्छ्रायश्च । 'स्तूपा वायुरणोच्छ्रायाः' इति––(वै० पृ० २१९ श्लोक ६७) । पूपकः = "पूआ" इति लोके । क्षीरस्वामी तु 'यूप' शब्दं पठति । यूपः = यज्ञस्तम्भः । 'यूपोऽस्त्री संस्कृत- स्तम्भः' इति––(वै०पृ०९१ श्लो० १०३) । आतपः = सूर्यालोकः । नाभिशब्दस्तु प्रागुक्तः । कणपः = प्रासविशेषः । क्वचित् 'कुणपः' इति पाठः । कुणपः=शवभेदः । 'कुणपः पूतिगन्धौ शवेऽपि च ।' इति––(मे० पृ० १०३ श्लोक २०) । क्षुरः = वपनशस्त्रम् । 'क्षुरस्तुच्छेदनद्रव्ये गोक्षुरे कोकिलाक्षके ।' इति––(ना० र० पृ० ४६ पं० ३) । केदरः = क्षेत्रम् । संव्यवहारपदार्थश्च । 'वृक्षभेदः' इत्यन्ये । 'केदारः केदरः क्षेत्रम्' इति––(वै० पृ० १२४ श्लोक १७) । पूरः = जल- प्रवाहः । 'पूरः स्यादम्भसां वृद्धौ व्रणसंशुद्धिखाद्ययोः ।' इति––(अने० सं० पृ० ३६ श्लोक ४५२) । क्षुरप्रः = बाणभेदः । मुकुटस्तु 'खुरप्रः' इति कवर्गद्वितीयादि पठति । यथा–'दशाननक्षिप्रखुरप्र- खंडितः क्वचिद्गतार्धो हिमदीधितिर्यथा' इति हरविलासः––इति च लिखति (अम० सु० व्या० टिप्पण्यां पृ० ४५६ पं० ३१) । चुक्रः = शाकभेदः । 'चुक्रस्त्वम्लेऽम्लवेतसे ।' इति––(अने० सं० पृ० ३५ श्लोकः ४३२) ।

अथाधुना लान्तादीन् हान्तान्तान् पुंलिङ्गवाचकशब्दानाह हेमः––(अभि० सं० लिं० पृ० २ श्लोक १२, १३, १४, १५)

. . .कल्लोलौ–ल्लौ च खल्ल–तल्लौ ॥१२॥
कण्डोल–पोटगल–पुद्गल–काल–बाला

वेलो गलो जगल–हिङ्गुल–गोल–फालाः ।
स्याद्देवलो बहुल–तण्डुल–पत्रपाल–
वातूल–ताल–जडुलाः सृमलो निचोलः ॥१३॥
कामल–कुद्दाला–ऽवयव–स्वाः
शिव–रौरव–यावाः–शिवि–दावौ ।
माधव–पणवा–ऽऽदीनव–हाव–
ध्रुव–कोटीशां–ऽशाः स्पश–वंशौ ॥१४॥
कुशो–ड्डीश–पुरोडाश–वृष –कुल्मास–निष्कुहाः ।
अह–निर्यूह–कलहाः, इति ।

एषां व्याख्या

कल्लोलेति। कण्डोलेति । कामलेति। कुशेति च। कल्लोलः = हर्षः । उल्लोलः, महातरङ्गः । "बड़ी लहर" इति लोके । 'कल्लोलस्तु भवेद्धर्षे तथा वारिमहोर्मिषु ।' इति—(श० र० स० पृ० ३०३ पं० ८) । 'कल्लोलः पुंसि हर्षे स्यादुल्लोलो वैरिणोरपि ।' इति च–(मे० पृ० १५० श्लो० ७३) । ओल्लः = सूरणः । खल्लः = गर्तः । चातकश्च । 'खल्लो वस्त्रप्रभेदे स्याद् गर्ते चर्म्मणि चातके ।' इति—(मे० पृ० १४६ श्लो० १२) । तल्लः = जलाधारान्तरम् । 'तल्लस्तु जलाधारान्तरे पुमान् ।' इति—(मे० पृ० १४६ श्लो० २२)। कण्डोलः = पिटः, नलादिरचितभाण्डम् । "पेटी" इति । "पिटार" इति च लोके । उष्ट्रः । गोणीप्रभेदश्च । पोटगलः = नलः । काशः । मत्स्यश्च । 'अथ पोटगलः पुंसि नले च काशमत्स्ययोः ।' इति—(मे० पृ० १५६ श्लो० १५७) । पुद्गल = आत्मा । 'पुद्गलः सुन्दराकारे त्रिषु, पुंस्यात्मदेहयोः ।' इति—(मे० पृ० १५३ श्लो० ११६) । कालः = समयः, दिष्टः । यमश्च । बालः = बालकः, शिशुः । वेलः = आम्रः । 'आम्रे कामाङ्ग–माकन्दौ चूतो वेलोऽङ्गनाप्रियः ।' इति—(वै० पृ० ४७ श्लो० २५) । गलः = कण्ठः । जगलः = मोदकः । पिष्टमद्यम् । कितवश्च । 'जगलः पिष्टमद्ये स्यात्कितवे मोदकेऽपि च ।' इति—(ना० र० पृ० १०३ पं० १९) । हिङ्गुलः = रागद्रव्यभेदः ।'हिङ्गुलो वर्णकद्रव्ये ना, भण्टाक्यां तु हिङ्गुली ।' इति—(मे० पृ० १५५ श्लो० १४६) । गोलः = वर्तुलपिण्डः । गन्धरसश्च । 'बोलो गोलः शशः पिण्डः प्राणो गन्धरसो रसः ।' इति—(वै० पृ० ४२ श्लो० १५) । फालः = महादेवः । बलदेवश्च । 'फालः पुंसि महादेवे कालिन्दीभेदनेऽपि च, ।' इति—(मे० पृ० १४७ श्लो० ३४) ।

पाणिनीयेऽपि– (१) (वंशांशपुरोडाशाः) एते पुंसि स्युः । वंशः = वेणुः । अंशः = भागः । पुरोडाशः = हविर्भेदः । "पुरोडाशभुजामिष्टाम्" इति माघः । सि० कौ० पृ० ४०१ सू० ११२

देवलः = देवाजीवः । 'देवाजीवस्तु देवलः।' इति—(वै० पृ० ८३ श्लो० ११) । बहुलः = अग्निः । कृष्णपक्षश्च । 'पुंस्यग्नौ कृष्णपक्षे च।' इति—(मे० पृ० १५३ श्लो० ११८) । तण्डुलः = विडङ्गः । धान्यादिनिकरः । धान्यादिसारश्च । ''चाउर'' इति । ''चाँवल'' इति च लोके । 'तण्डुलः स्याद्विडङ्गे च धान्यादिनिकरे पुमान्।' इति—(मे० पृ० १५२ श्लो० ९६) । पत्रपालः = आयता छुरिका । वातूलः = वातसमूहः । तालः = वृक्षविशेषः । जडुलः = जटुलः, पिप्लुः, देहस्थं, कृष्णलक्ष्म । ''लस्सन'' इति लोके । सृमलः = गवयविशेषः । सृमरः = मृगविशेषः । यस्य नीलवालैः कान्ताकचसाहाय्यं क्रियते स च महिषाकृतिर्भवति । निचोलः = प्रच्छदपटः । ''पिछौड़ा'' इति लोके । 'निचोलः प्रच्छदपटः' इति—(अम० ना० लिं० पृ० २४३ श्लो० ११६) ।' 'निचोलं तु नपुंसकम्,। इति रभसः—(अम० सु० व्या० पृ० २४३ पं० १५) । कामलः = मरुदेशः । वसन्तश्च । कामलो रोगभेदे वा ना, ना मरुवसन्तयोः।' इति—(मे० पृ० १५० श्लो० ७३) । कुद्दालः = भूमिदारणम्, युगपत्रकं च । 'कुद्दालः स्यात्पुमान् भूमिदारणे युगपत्रके।' इति—(मे० पृ० १५० श्लो० ८१) । अवयवः = अङ्गम् । 'अंशस्त्ववयवो भाग एकदेशः कलेति च।' इति—(वै० पृ० १७७ श्लो० ५५) । स्वः = आत्मा । ज्ञातिश्च । 'स्वः स्यात्पुंस्यात्मनि ज्ञातौ, त्रिष्वात्मीये, ऽस्त्रियां धने।' इति—(मे० पृ० १५७ श्लो० २) । 'ज्ञातावात्मनि चात्मीये धने स्वाख्या, प्रवर्तते ॥' इति महाक्षपणकश्च—(अनेकार्थध्वनिमञ्जर्य्याम् पृ० १४ श्लो० ११६) । शिवः = महादेवः । रौरवः = नरकविशेषः । यावः=लाक्षा । 'यावो द्रुमामयोऽलक्तो लाक्षा रक्ता जतु क्रिमिः।' इति—(वै० पृ० १७१ श्लो० १५३) । शिविः = नृपविशेषः । भूर्जश्च । दावः = वनाग्निः । वनं च । माधवः = विष्णुः । वैशाख-मासश्च । पणवः = वाद्यविशेषः, मर्द्दलः, गायनपटहः । ''ढोलकी'' इति । ''करताल'' इति च लोके । गजस्कन्धश्च । 'समौ पणवमर्दलौ' इति—(वै० पृ० १४६ श्लो० १३४) । 'गजस्कन्धेऽपि पणवः' इति च—(वै० पृ०२४३ श्लो ५२) । आदीनवः = परिक्लेशः, क्लेशः, दोषः । दुरन्तश्च । 'आदीनवः पुमान् दोषे परिक्लेशदुरन्तयोः।' इति—(मे० पृ० १६१ श्लो० ५७) । हावः = विभ्रमः; विलासचेष्टा । क्रन्दनं च । 'हावो विलासचेष्टायाम्' इति—(वि० को० पृ० श्लो०) । 'हावो क्रन्दनविभ्रमौ।' इति महाक्षपणकश्च—(अने० ध्व० मं० पृ० २३ श्लो० १९८) । ध्रुवः = उत्तानपादपुत्रः । केषांचिन्नक्षत्राणां संज्ञाविशेषः । विष्कम्भादियोगेषु द्वादशो योगः । निश्चयश्च । 'ध्रुवौ नक्षत्र-निश्चयौ।' इति च—(अने० ध्व० मं० पृ० २५ श्लो० २०९) । 'ध्रुवः कीले शिवे शङ्कौ वंशे योगे वसौ मुनौ । निश्चिते निश्चले तर्के नक्षत्रे शाश्वते वटे । स्रुचि मौर्व्यां तालभेदेऽस्त्रियाम्' इति च—(ना० मं० पृ० ८२ श्लो २३ तः) । कोटीशः = लोष्टभेदनम् । ''हेंगा'' इति लोके । अंशः = भागः, राशेस्त्रिंशत्प्रमितो भागः । वस्तुन एकदेशः । विभाजनं च । 'अंशो विभाजने प्रोक्त एकदेशेऽपि वस्तुनः।' इति—(अने० सं० पृ० ४४ श्लो० ५५५) । स्पशः = चारः । 'स्पशश्चारे निगदितः' इति—(श० र० स० पृ० ३२६ श्लो० १६) ।

वंशः = वृक्षविशेषः, वेणुः। मेरुः। पृष्ठास्थि। कुलम्, अन्वयः। नासादण्डश्च। 'मेरौ वृक्ष-विशेषे च वंशशब्दस्तु कार्मुके। करिपृष्ठे कुले वेणौ वंशाख्या कविभिः स्मृता।' इति—(अने० ध्व० मं० पृ० १५/२० श्लो० १२१/१६६)। 'वंशो वेणौ कुलेऽपि च।' इति—(हा० व० पृ ४०८ श्लो० ७८) 'वंशः पृष्ठास्थिन गेहोर्ध्वकाष्ठे वेणौ गणे कुले। नासादण्डे, च' इति च—(नाना० मं० पृ० ८५ पं० ८)। कुशः = दर्भः। 'कुशो दर्भः, इति—(अने०समु०पृ० ३० श्लो० ३३७)। श्रीरामचन्द्र-पुत्रश्च। तथा च प्रयोगः—'सनिवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्।' इति कालिदासः—(रघुवंशे पञ्चदशसर्गे श्लो० ९७)। उड्डीशः = शिवः। ग्रन्थभेदश्च। 'उड्डीशो ग्रन्थभेदे स्या-दुड्डीशश्चण्डिकापतौ।' इति—(मे० पृ० १६३ श्लो० १७)। पुरोडासः = पिष्टपिण्डविशेषः, पिष्टकचमसी। हविर्भेदः। हुतशेषे च।'पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च। हुतशेषे, च' इति—(मे० पृ० १६५ श्लो० ३८)। वृषः = बलीवर्दः। राशिविशेषश्च। कुल्मासः = यावकः। काञ्जिकं च। 'कुल्माषं काञ्जिके, यावके पुमान्,।' इति—(मे० पृ० १६८ श्लो० ३४)। 'कुल्माषः' इत्यपि। निष्कुहः = कोटरः, वृक्षस्थितगह्वरम्, वृक्षरन्ध्रम्। अह इति सप्ताह-नवाहै-कादशाहःप्रभृतयः। निर्यूहः = वृक्षनिर्यासः। आपीडश्च। 'द्वार्य्यापीडे क्वाथरसे निर्यूहो नागदन्तके॥' इति—(अम० ना० लिं० पृ० ४३९ श्लो० २३६ एवं वै० पृ० २४२ श्लो० ३८)। निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके।' इति—(वि० प्र० पृ० १८१ श्लो० १८)। 'निर्यासः खपुरो लशः' इति—(वै० पृ० ४५ श्लो० ११)। निर्यासः क्वाथरसः। 'निर्यासेऽपि कषायोऽस्त्री' इति—(अम० ना० लिं० पृ० ४२३ श्लो० १५३)। 'क्वाथः कषायो निर्यूहः' इति—(वै० पृ० १८४ श्लो० ९४१। एवं माधवकरोप्याह—(पर्य्यायरत्नमालायां पृ० ३९ पं० २५)। कलहः = कलिः। 'कलहं युधि, राढे ना खड्गकोषे च भण्डने।' इति—(मे० पृ० १७६ श्लो० १६)।

अमरोऽपि—(अम० ना० लिं० पृ ४५५ श्लो० २०, २१)।

……………गोल–हिंगुल–पुद्गला ॥
वेताल–भल्ल–मल्लाश्च पुरोडाशोऽपि पट्टिशः।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥, इति।

एतयो व्याख्या—

गोलेति। वेतालेति च। वेतालः = शिवद्वारपालः। शिवगणाधिपविशेषः। भूताधिष्ठित-शवश्च। भल्लः = ऋक्षः। "रीछ" इति लोके। 'भल्लः स्यात्पुंसि भल्लूकः' इति—(मे० पृ० १४८ श्लोक ४२)। मल्लः = बाहुयुद्धकुशलः। 'नियुद्धकुशलो मल्लस्तद्वृत्तिस्तत्परायणः।' इति सुजानन्दनाथः—(शब्दार्थचिन्तामणौ पृ० ५४३ पं० २२)। पट्टिशः = अस्त्रभेदः। पट्टिस इति दन्त्यसान्त्य इति मुकुटः। रभसः = हर्षः। 'रभसो हर्षवेगयोः। इति—(वि० प्र० पृ० १७५

श्लोकः १४) । सकटाहः कटाहसहितः कटाहशब्दश्च पुंसीत्यर्थः । कटाहः = वटकादिपाकपात्रम् । 'कटाहो घृततैलादिपाकपात्रेऽपि कर्परे । कटाहः कूर्म्मपृष्ठे च सूपे च महिषीशिशौ ।' इति—(वि० पृ० १८० श्लोकः १६) 'कटाहः कूर्म्मकर्परे । द्वीपस्य च प्रभेदे च' इति—(मे० पृ० १७६ श्लोकः १५) । शेषशब्दव्याख्या प्रागुक्ता ।

अथेह दुर्गसिंहस्तु क्रमरहितान् पुंलिङ्गवाचकान् काफादिशब्दानाह—(दुर्ग० लिं० शा० पृ० १२, १३, १४, १५, १६, १७ श्लोक २६, २७, २८, २९, ३०, ३१, ३२, ३३, ३४, ३५ ।)

कफ–पुंख–नग–श्लोकाः शङ्ख–मृदङ्गौ च शङ्कुना–ऽपाङ्गः ।
यान–युग–पतङ्ग–कटाहैः सह मञ्चो–टज–तरङ्गाः ॥

एषां व्याख्या—

कफेति । एते कफादयः, शंखादी, मञ्चादयः शब्दाश्च शङ्कुनायानयुगपतङ्गकटाहैश्च सह नृलिङ्गा भवन्ति । कफः = श्लेष्मा । नगः = वृक्षः । पर्वतश्च । श्लोकः = एकाक्षरादिपादच्छन्दः । कोपधत्वात्पुंस्त्वं सिद्धम् । वृत्ताख्यत्वात्स्त्रीनपुंसकनिवृत्त्यर्थम् । इह वचनम् । यशोवचनस्तु श्लोकशब्दः पुंलिङ्गः कोपधत्वादेव । शङ्खः = निधिविशेषः । 'निधिर्ना, शेवधिर्भेदाः पद्मशंखादयो निधेः ।' इति—(अम० ना० लिं० पृ० २९ श्लोकः ७१) मृदङ्गः = मुरजः । 'मृदङ्गा मुरजाः' इति—(अम० ना० लिं० पृ० ७३ श्लोकः ५) । शङ्कुः = संख्याविशेषः । शतादिकत्वात् अस्य नपुंसकत्वं प्राप्तम् । कीलार्थस्य उदन्तत्वात्पुंस्त्वं सिद्धम् । यानेति । यात्यनेन इति यानम् = शकटम्, रथश्च । तस्य युगो यानयुगः यानद्वयमित्यर्थः । युगानि कालमानविशेषाः । तानि च क्रमवर्तीनि । तत्साधर्म्याद् ये क्रमवर्तिनः पितृपुत्रप्रपुत्रप्रतिपुत्रादिरूपाः पुरुषास्तेऽपि युगानि । पुरुषा एव युगानि पुरुषयुगानि चत्वारः क्रमगताः पुरुषा इत्यर्थः । अन्यत्र तु युगम् = युग्मम्, युगलम्, कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगं चैतानि चत्वारि नपुंसके स्युः । इति—(दुर्गलिङ्गानुशासनवृत्तौ पृ० १३ पं० ४) । पतङ्गः = शलभः, सूर्यश्च । 'पतङ्गौ पक्षिसूर्यौ च' इति—(अम० ना० लिं० पृ० ४०० श्लोकः २०) । उटजः = तापसपर्णकुटी । 'पर्णशालोटजोऽस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ११८ श्लोकः ६) । शेषशब्दानां व्याख्या प्रागुक्ता ।

वर्गः पूग–लवङ्गौ गच्छः कच्छौ–घ–पथि–मथि च वृषलः ।
ध्वनि–मुरजौ वृजि–मुञ्जा–वङ्कौठ–कुठौ हठा–ऽङ्गुष्ठौ ॥

पाणिनीयेऽपि—(१) (शङ्कुः पुंसि) असौ पुंसि स्यात् । शङ्कुः = कीलः । (सि० कौ० पृ० ४०३ सू० १४८) ।

अस्य व्याख्या—

वर्ग इति । एते वर्गादयोऽङ्गुष्ठान्ताः शब्दाः पुंसि स्युः । कच्छश्च ओघश्च पन्थाश्च मन्थाश्च इति समाहारो द्वन्द्वः । लवङ्गः=ओषधिविशेषः, देवकुसुमं च । 'लवङ्गं देवकुसुमं श्रीसञ्ज्ञम्' इति–(अम० ना० लिं० पृ० २४५ श्लो० १२५)। गच्छः=अभिमतसंख्यापर्य्यवसानम् । 'तन्मूले तु पुमान् हेतुर्गच्छो वाञ्छितराशयः ।' इति—(वै० पृ० १८९ श्लो० ३७)। कच्छः=पार्श्वम्, नौकाङ्गम्, अनूपदेशश्च । 'अनूपदेशे कच्छः स्यान्नौकाङ्गे तुन्तकद्रुमे ।' इति–(श० र० स० पृ० ७४ पं० ११) । पन्थाः=मार्गः । मन्थाः=खजकः । वृषलः=शूद्रः । लोपधत्वान्नपुंसकं प्राप्तम् । ध्वनिः =शब्दः । मुरजः=मृदङ्गः । बृजयः=जनपदविशेषः । एष बहुवचनान्तश्च । अङ्कोठश्च कुठश्च स्वरादेः अकारान्तस्य प्रायेण पूर्वो निपातो दृश्यते । अङ्कोठः=वृक्षविशेषः । "आँकडा" इति लोके । 'अङ्कोठो वामनोऽङ्कोलः' इति माधवकरः— (पर्य्यायरत्नमालायाम् पृ० २९ पं० १३) । कुठः=वृक्षः । 'तरुः शाखी कुठः कुजः' इति—(वै० पृ० ४५ श्लोकः ५) । 'कुटः' इत्यपि । 'कुजः क्षितिरुहोंऽघ्रिपः शिखरिपादपौ विष्टरः कुटस्तरुरनोकहःकुरुहभूरुहद्रुद्रमाः ।' इति—(रा० नि० पृ० ३२५ श्लो० १७) । प्रपञ्चार्थौ एतौ बिल्वादित्वात्पुंस्त्वं सिद्धम् । शेषं प्राग्वत् ।

कोष्ठ–पुरोडाश–कमठ–गुड–लगुड–व्रात–गण्ड–गोण्डा–ऽर्घाः[१] ।
पिण्ड–शिखण्ड–पिचण्डा वण्ड–करण्डौ वरण्डश्च ॥

अस्य व्याख्या—

कोष्ठेति । एते कोष्ठादयो वरण्डान्ताः शब्दा नृलिङ्गा भवन्ति । कमठः=भिक्षाभाजनम् । कच्छपश्च । "कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम् ।' इति—(मे० पृ ३९ श्लोकः १२) । कूर्माभिधायिनस्तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात् । वण्डः=दुश्चर्म । शेषं प्राग्वत् ।

वृष्णिः षण्डः[२] षण्ढो मुहूर्त्त–विट्–पुञ्ज–रै–हरिद्–गरुतः ।
प्लुत–दृति–गञ्ज–कृतान्ता वमत्य–तिथि–सारथि[३]–ग्रन्थि ॥

पाणिनीयेऽपि–(१) (अर्घपथिमथ्यृभुक्षि स्तम्बनितम्बपूगाः) ॥ एते पुंसि स्युः । अर्घः=मूल्यम् । पूजाविधिश्च । पन्थाः=मार्गः । मन्थाः=मन्थानदण्डः । ऋभुक्षाः=इन्द्रः । स्तम्बः=गुल्मः । नितम्बः=स्त्रियः पश्चात्कटितम् । पूगः=गुवाकः । सि० कौ० पृ० ४०१ सू० ११४ ।

पाणिनीयेऽपि–(२) (षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः) ॥ एते पुंसि स्युः । षण्डः =वृषभः । मण्ड =एरण्डवृक्षः । करण्डः=वंशादिरचितो भाण्डविशेषः । भरण्डः=स्वामी । वृषश्च । वरण्डः =अन्तर्वेदिः । समहश्च । तुण्डः=आननम् । गण्ड.=कपोलः । मुण्डः=दैत्यविशेषः । पाषण्डः=बौद्धक्षपणकादिः । शिखण्डः=मयूरपिच्छः । सि० कौ० पृ० ४०१ सू० ११३ ।

(३) (सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः) ॥ एते पुंसि स्युः । सारथिः=सूतः । अतिथिः=कुशपुत्रः

अस्य व्याख्या—

वृष्णिरिति । एते वृष्ण्यादयो ग्रन्थ्यन्ताः शब्दाः पुंसि स्युः । वृष्णिः = कुलविशेषः । मेषवाचिनस्तु परत्वात्स्त्रीपुंस्त्वम् । षण्डः = संघातः । षण्ढः = नपुंसकम् । मुहूर्त्तः = घटिकाद्वयम् । 'ते तु मुहूर्त्ता द्वादशास्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ४७ श्लोकः ११) । विट् = वैश्यः, नरश्च । विष्ठावाचिनस्तु स्त्रीलिङ्गत्वं प्रयोगतो भाषायां दृश्यते । पुञ्जः = राशिः । 'पुञ्जराशी तूत्करः कूटमस्त्रियाम् ।' इति—(अम० ना० लि० पृ० २०२ श्लो० ४२) । राः = द्रव्यम्, स्वर्णं च । 'राः स्वर्णवित्तयोः' । इति—(श० र० स० पृ० २५० पं० ३) । गरुत् सुवर्णम्, पक्षश्च । प्लुतः = स्वरविशेषः । यस्तु प्लवनक्रियानिमित्तः प्लुतशब्दस्तस्य वाच्यलिङ्गता । गञ्जः = भाण्डागारः । कृतान्तः = यमः । 'कृतान्तो यमुनाभ्राता' इति—(अम० ना० लिं० पृ० २४ श्लोकः ५८) । अतिथिः = अभ्यागतः । सारथिः = रथवाहः । ग्रन्थिः = रज्वादिवेष्टितगाढबन्धः । शेषं प्रागवत् ।

कुन्ता–न्त–बलीवर्दा शब्दा–ऽर्थौ ह्रद[1]–जनपद–मगधाश्च ।
मकरन्द–कुन्द–कन्दाः सबुद्बुदाः कासमर्देन ॥

अस्य व्याख्या—

कुन्तेति । बुद्बुदेन सहिताः सबुद्बुदाः कुन्तादयः शब्दाः कासमर्देन सहैते पुंलिङ्गाः स्युः । अन्तः = मृत्युः, अवसानं च । 'अन्तोऽध्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके ।' इति—(वै० पृ० २३० श्लो० ५) । बलीवर्दः = अनड्वान् । शब्दः = ध्वनिः । अक्षरं च । 'शब्दोऽक्षरे यशोगीत्योर्वाक्ये खे श्रवणे ध्वनौ ।' इति—(अने० सं० पृ० २० श्लो० २३८) । ह्रदः = जलाधारविशेषः । अगाधजलकूपश्च । 'तत्रागाधजलो ह्रदः ।' इति—(अम० ना० लिं० पृ० १०३ श्लो० २५) । मगधाः = जनपदविशेषः । रूढितश्च बहुवचनान्तोऽयम् । कन्दः = मूलविशेषः । मेघश्च । 'मूले कन्दः किले कन्दः कन्दो वारिद उच्यते ।' इति—(अने० ध्व० मं० पृ० १९ श्लोकः १६०) । शेषं प्रागवत् ।

कपि–कवि–कितव–दव–कलह–दावा–वंशां–ऽश–राशि–सत्त्वाश्च ।
अर्दन्य–ऽहीन–रेफा कृमि–तिमि–पृष्ठ्यास्तथा सीरः ॥

बस्तिः= नाभेरधोभागः । पाणिः= हस्तः । अञ्जलिः =हस्तसम्पुटः । सि० कौ० पृ० ४०१ सू० ११६ ।

(१) (ह्रदकन्दकुन्दबुद्बुदशब्दाः) ॥ एते पुंसि स्युः । ह्रदः= अगाधजलम् । कन्दः =मेघः । कुन्दः =अच्युतः, निधिविशेषश्च । बुद्बुदः =वर्तुलाकारो जलविकारः । शब्दः = अक्षरसमूहः । ध्वनिश्च । सि० कौ० पृ० ४०१ सू० ११३ ।

अस्य व्याख्या—

कपीति । एते कप्यादयः सीरान्ताः शब्दाः पुंसि भवन्ति । कपिः = मर्कटः । विष्णुश्च । 'कपिर्ना सिह्लके शाखामृगे च मधुसूदने ॥' इति—(मे० पृ० १०२ श्लो० २) । कविः = काव्यकृत् । शुक्रश्च । 'खलीने स्त्री कविः पुंसि काव्यकृच्छुक्रसूरिषु ।' इति—(त्रि० शे० पृ० ३७५ श्लोकः ४१४) । कितवः = द्यूतकारः । धत्तूरश्च । 'कितवो मत्तधूर्त्तयोः ॥ कनकाह्वयवृक्षे च पेचके कितवो मतः ।' इति—(श० र० स० पृ० ३१९ पं०११) । दवः = वनाग्निः । वनं च । 'दवो दावश्च गदितौ वनाग्निवनयोरपि ।' इति—(श० र० स० पृ० ३१६ पं० ७) । राशिः = पुञ्जः । मेषादिविशेषश्च । 'राशिपुञ्जोत्करा नरि ।' इति—(वै० पृ० १८६ श्लोकः ३) । सत्त्वः = प्राणी । द्रव्यवचनस्य गुणवचनस्य च नपुंसकत्वमेव दृश्यते । द्रव्यम् । सत्त्वरजस्तमश्च । 'सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वे व्यवसायाऽसुचित्तेष्वस्त्री तु जन्तुषु ॥' इति—(मे० पृ० १५९ श्लोकः २८) । अर्दनिः = अग्निः । अश्ववृत्तेस्तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात् । अहीनः = क्रतुविशेषः । सवनैस्त्रिभिरेकाहास्तैरावृत्तैरहर्गणाः । ते दीक्षितैः कृताः सत्राण्यहीना याजकैः कृताः । अहीना द्वादशाहात्प्राक् सत्राण्यूर्ध्वं स तु द्वयः ॥ सर्वेऽमी यज्ञक्रतवस्त एवैन्द्राः प्रजागमाः ।' इति—(वै० पृ० ९० श्लोकः ८४, ८५, ८६) । कृमिः = जन्तुविशेषः । वर्णसङ्करजातिविशेषश्च । 'ऊर्णनाभस्तन्तुनाभः कृमिर्मर्कटकोऽपि च ।' इति—(वै० पृ० १५० श्लोकः ३४)। तिमिः = मत्स्यविशेषः । 'मीनो वैसारिणस्तिमिः ।' इति—(वै० पृ० १५१ श्लोकः ४१) । पृष्ठचः = क्रतुविशेष. । वृषभविशेषः । घोटकविशेषश्च । 'स्थूरी पृष्ठचः पृष्ठवाह्यः' इति—(वै० पृ० ६९ श्लोकः ५६) । सीरः = हलम् । सूर्यश्च । 'सीरोऽर्कहलयोः पुंसि' इति—(श० र० स० पृ० २६२ पं० ५) । शेषं प्राग्वत् ।

अम्ब–स्तम्बौ पुत्र–च्छात्रा–ऽमित्रा वृत्र–मंत्रौ च ।
पञ्चाल–पीलु–पिप्पल–गुग्गुल–हिङ्गुल–कुलालाश्च ।

अस्य व्याख्या—

अम्बेति । एते अम्बादयः कुलालान्ताः शब्दाः नरि स्युः । पुत्रः = आत्मजः, सुतः । 'पुत्रस्तु तनयः सूनुरात्मजो नन्दनोऽङ्गजः ।' इति—(वै० पृ० १७६ श्लो० ३९) । 'योनिसम्बन्धवाचिन्यः पुत्राद्याः पुंगिरो नरि ।' इति च—(वै० पृ० २९३ श्लो० ४३) । पुत्रीति नदादित्वात् । छात्रः शिष्यः । 'छात्रः शिष्ये निगदितः' इति—(श० र० स० पृ० २५४ श्लोकः १२) । पञ्चालाः = जनपदविशेषः । बहुवचनान्तोऽयं रूढितः । वर्णवृत्तप्रभेदश्च । पीलुः = वृक्षविशेषः । फलवचनस्य तु नपुंसकत्वं परत्वात् । हस्तौ च । 'पीलुर्वृक्षे, फले पीलु, परमाणौ गजे च ना ॥ पीलुस्तालाऽ-

स्थिखण्डे च काण्डपादपभेदयोः ।' इति--(श० र० स० पृ० २९८ पं० १४, १५) । पिप्पलः =वृक्षविशेषः, चलदलः । पक्षिप्रभेदः । वस्त्रच्छेदनविशेषश्च । वृक्षवाचिनस्तु स्त्रीत्वमपि । पिप्पलीति नदादित्वात् । फले स्त्रीत्वमेव-अर्धपिप्पलीति । 'पिप्पलः स्याच्चलदले, भक्तसिक्थे तु पिप्पलम् ॥ तथैव सलिले, वस्त्रच्छेदे पुंसि निरंशुके । तथा पक्षिप्रभेदेऽपि, कणायां पिप्पली मता ॥' इति--(श० र० स० पृ० ३०७ पं० १४, १५, १६) । गुग्गुलुः=स्वनाम्ना प्रसिद्धो वृक्षविशेषस्य निर्यासः, कुम्भः, उलूखलकः, पुरः, रक्तशिग्रुश्च । कुलालः=कुम्भकारः । तद्भाण्डं च । 'कुलालः ककुभे कुम्भकारे चाप्यञ्जनान्तरे ।' इति--(श० र० स० पृ० ३०४ पं० ९) । शेषं प्राग्वत् ।

तण्डुल–मञ्जुल–काला मौलि–तरल–पाश–पुद्गल–कुशूलाः ।
रालि–रनिल–कील–पटोल–केलि–तूला–ऽनलै–स्तालः ॥

अस्य व्याख्या—

तण्डुलेति । एते तण्डुलादयः कुशूलान्ताः शब्दा रालिः तालश्च, अनिलप्रभृतिभिरनलान्तैः सह च नृलिङ्गाः स्युः । तण्डुलः=धान्यसारः । मञ्जुलः=जलरङ्कुः, दात्यूहपक्षी । 'मञ्जुलं च जलाञ्चले । रम्ये कुञ्जे, मञ्जुलस्तु दात्यूहे' इति--(अने० सं० पृ० १०४ श्लोकः ७१२-१३)। 'मञ्जुलो मधुरे कुञ्जे जलरङ्कौ (ङ्के) जलाञ्चले ।' इति च--(हा० व० पृ० ४०८ श्लोकः २५२) । मौलिः=कङ्केलिवृक्षः, अशोकद्रुमः । 'मौलिः कङ्केलिवृक्षेऽपि' इति--(त्रि० शे० पृ० ३७४ श्लोकः ४०६) । 'मौलिः किरीटे धम्मिले, चूडायामनपुंसकम् । अशोकपादपे पुंसि' इति । नाऽशोकाद्रौ, स्त्रियां भूसौ' इति पाठान्तरम्--(मे० पृ० १४८ श्लोकः ४६, ४७) । किरीटं च । 'किरीटे मौलिरक्लीबे चूडासंयतकेशयोः ।' इति रभसः--इति--(अम० सु० व्या० पृ० ४३० पं० २५) । 'चूडा किरीटं केशाश्च संयतामौलयस्त्रयः ।' चूडा शिखा । किरीटं मुकुटम् । संयता बद्धा ये च केशास्ते त्रयो मौलयः । त्रय इति मौलेः पुंस्त्वरसूचनायोक्तम् ।' (इति च--अम० ना० लिं० पृ० ४३० श्लोकः १९३) ।' तरलः=हारमध्यगतो मणिः । 'तरलो हाररत्ने च चञ्चले चोज्ज्वलेऽपि च ।' इति केशवः--(कल्पद्रौ पृ० श्लोक) । 'तरलश्चञ्चले खङ्गे (षिद्गे) हारमध्यमणावपि ।' इति च--(वि० प्र० पृ० १५३ श्लो० ५८) । पाशः=बन्धनम् । कुशूलः =धान्याधारविशेषः । अनिलः=वातः । कीलः=शङ्कुः । पटोलः=औषधिविशेषः, कर्कच्छदः, तिक्तकः । "परवर" इति । 'पलवल' इति च लोके । केलिः=परिहासः । तूलः=पिचुः । "रुई" इति लोके । 'अथ पिचुस्तूलः' इति–(अम० ना० लिं० पृ० ३३७ श्लोकः १०६)। 'पुंलिङ्गस्तु पिचौ तूलः क्लीबं स्याद् ब्रह्मदारुणि ।' इति रुद्रः--इति--(अम० सु० व्या० पृ० १४३ पं० ५) । उन्मानं च । अनलः=अग्निः । शेषं प्राग्वत् ।

अञ्जलि–शैवल–कम्बल–पल्लव–वातूल–सृमल–कलि–बलयः ।
बिल्वादयोऽपि तरव, स्त्रियां मताः शिशपाद्यास्तु ॥

अस्य व्याख्या—

अञ्जलीति। एतेऽञ्जल्यादयो बलयन्ताः शब्दा बिल्वादयस्तरवोऽपि पुंलिङ्गाः स्युः। अञ्जलिः=करसम्पुटः। कुडवश्च। 'अञ्जलिः कुडवे पुंसि हस्तसम्पुटकेऽपि च।' इति--(श० र० स० पृ० ३०१ पं० ११)। शैवलः=जलतृणविशेषः। 'शैवलं पद्मकाष्ठे स्यात्, शैवालेऽपि पुनानयम्।' इति—(मे० पृ० १५५ श्लोकः १४१)। कम्बलः=गोगलचर्म। प्रावरणविशेषस्य तु स्त्रीत्वमपि कम्बलीति। नदादित्वादि। नागराजश्च। 'कम्बलो नागराजे स्यात्सास्नाप्रावारयोः क्रमौ। कम्बलश्चोत्तरासङ्गे कम्बलं सलिले मतम्।' इति—(वि० प्र० पृ० १५५ श्लोकः ७५)। 'इन्द्रियं कम्बलं प्रोक्तं कम्बलो रोमजः पटः। कम्बलन्तु गवां सास्ना कम्बले कम्बलं विदुः॥' इति—(अने० ध्व० मं० पृ० ५ श्लोकः ३६)। पल्लवः=किशलयम्। नपुंसकमपि केचित्। 'पल्लवः किसलये बले। विटप विस्तरेऽलक्तरागे शृङ्गारषिद्गयोः।' इति--(अने० सं० पृ० १०६ श्लोकः ७४१, ७४२)।' 'व्याडिस्तु पुंसि क्लीबे च' इति--(अम० सु० व्या० पृ० १३२ पं० ३४)। वातूलः=वातसमूहः। 'वातूलः पुंसि वात्यायामपि, वातासहे त्रिषु।' इति--(अम० ना० लिं० पृ० ४३१ श्लोकः १९६)। 'वातूलो वातुलोऽपि स्यात्' इति द्विरूपकोषाद् ह्रस्वमध्योऽपि' इति--(अम० सु० व्या० पृ० ४०१ पं० ३३) 'वातिलो वातूलोऽपि स्याद्वातूलः प्रमतस्तथा।' इति--(द्विरूपकोषे पृ० ४१२ श्लोकः २७)। कलिः=युद्धम्, कलहः। युगम् च। 'कलिः स्त्री कलिकायां, ना शराजिकलहे युगे॥' इति--(मे० पृ० १४५ श्लोकः ६) 'कलिः कलहकालयोः।' इति--(अने० ध्व० मं० पृ० २५ श्लोकः २०४)। बलिः=करः, राजदेयभागः। असुरविशेषश्च। 'बलिः पूजोपहारः स्याद्बलिर्दैत्यो बलिः करः। बलिर्जराश्लथं चर्म जठरावयवो बलिः॥' इति --(अने० समु० पृ० ३ श्लो० १८)। 'बलिः स्त्रीमध्यभागोर्मिर्वलिर्वर्ष्मजराकृतिः। बलिः पूजोपहारः स्याद्बलिर्दैतेयसत्तमः॥' इति—(अने० ध्व० मं० पृ० ४ श्लोकः ३१)। बिल्वः, धवः,

पाणिनीये—(१) (पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्र पुंखा)। एते पुंसि स्युः। पल्लवः=शाखायाः पर्वपत्रादिसंघातः। "पर्वपत्रादिसंघाते शाखायाः पल्लवो मतः।" इति कोशान्तरम्। वेश्यापतिश्च। पल्वलः=वेशन्तः, अल्पसरः। "वाचस्पतौ तु–वेशन्तः पल्वलोऽस्त्री" इति। कफः=शरीरस्थधातुविशेषः, श्लेष्मा। रेफः=रवर्णः। रागश्च। कटाहः=कूर्मकर्परः। निर्व्यूहः=निर्यासः। मठः=छात्रादिनिलयः। मणिः=रत्नम्, अश्मजातिः। तरङ्गः=ऊर्मिः। तुरङ्गः=अश्वः। गन्धः=गन्धकः। लेशश्च। स्कन्धः=देहावयवविशेषः, अंसः। मृदङ्गः=वाद्यविशेषः, मुरजः। सङ्गः=सङ्गमः, मेलनम्। समुद्रः=सागरः। पुंखः=बाणमूलम्। मंगलाचारः। श्येनश्च। सि० कौ० पृ० ४०१ सू० ११५।

अशोकः, पुन्नागः, अर्जुनः मातुलिङ्गः, लकुचः, पारिजातक इत्यादयो बिल्वाद्याः । शिंशपाद्यास्तु वृक्षविशेषाः स्त्रियां योषिती, मता ज्ञेयाः स्त्रीलिङ्गा इत्यर्थः । शिंशपाद्याः—शिंशपा, पाटला, शमी इत्यादयः । प्रयोगतः अङ्कोठस्य वृक्षस्य च वृक्षत्वात्पुंलिङ्गं सिद्धम् । फलार्थः पाठः प्रपञ्चार्थ इत्येके । शेषं प्राग्वत् ।

पाप्मा–ऽश्मा श्लेष्मा–ऽऽत्मा वणिगू–ष्मा स्कन्ध–गन्ध–गर्मुच्च ।
अनन्त–मसन्त–मुदन्तं शम्ब–नितम्बौ च कुक्ष्यं–ऽह्री ॥

अस्य व्याख्या––

पाप्मेति । पाप्मादयः शब्दाः अनन्तासन्तोदन्ताः शब्दाः शम्बादयः अंह्यन्ताः शब्दाश्चैते पुंसि भवन्ति । उभयत्रापि समाहारो द्वन्द्वः । पाप्मा = पापम् । 'अस्त्री पङ्कं, पुमान् पाप्मा' इति —(अम० ना० लिं० पृ० ५१ श्लोकः २३) । अश्मा = शिला । 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।' इति––(अम० ना० लिं० पृ० १२४ श्लोकः ४) । श्लेष्मा = कफः । वणिक् = वाणिजः । राशिविशेषश्च । ऊष्मा = सन्तापः । वर्णविशेषः । ऋतुविशेषश्च । 'ग्रीष्मोष्णवाष्पा ऊष्माणः इति––(वै० पृ० २१४ श्लोकः ९) । 'ऊष्माणः शषसाः सहाः ।' इति––(वै० पृ० ८६ श्लोकः ३६) । 'शुचिरुष्णागमः पातम उष्ण ऊष्मा ।' इति च––(वै० पृ० २४ श्लो० ८८) । गर्मुत् = सुवर्णम् । कुक्षिः = जठरम् । अंह्रिः = पादः । 'अंहो रंहो द्रुहिणः संहर्षांह्री च घश्रुतयः' इति––(अम० सु० व्या० पृ० २२७ स्तं० १ पं० २) । शेषं प्राग्वत् ।

अथेदानीं क्षान्तेकारान्तोकारान्तव्यञ्जनान्तान् पुंलिङ्गवाचकशब्दानाह हेमः––(अभि० सं० लिं० पृ० २ श्लोकः १५, १६, १७) ।

... .पक्ष–राशि–वराश्यृ–र्षिः ॥१५॥
दुन्दुभि–र्वमति–वृष्णि–पाण्य–ऽवि–
ज्ञांति–रालि–कलयो–ऽञ्जलि–घृणिः ।

पाणिनीयेऽपि—(१) (ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः) ॥ एते पुंसि स्युः । ऋषिः = मंत्रद्रष्टा । राशिः = पुञ्जः । दृतिः = चर्मपुटः । ग्रन्थिः = रुग्भेदः । क्रिमिः = सूक्ष्मजन्तुः । ध्वनिः = शब्दमात्रम् । बलिः = राजग्राह्यो भागः । कौलिः = । मौलिः = अशोकपादपः । रविः = सूर्यः । कविः = शुक्रः । कपिः = वानरः । मुनिः = वाचंयमः । सि० कौ० पृ० ४०१ सू० १०८) । (२) (उभावन्यत्र पुंसि) ॥ दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः । दुन्दुभिः = वाद्यविशेषः । असुरो वा । नाभिः = क्षत्रियः । सि० कौ० पृ० ३९७ सू० १६ । (३) (वह्निवृष्ण्यग्नयः पुंसि) ॥ एते पुंसि स्युः । वह्निः = चित्रकारव्यौषधिः । वृष्णिः = यादवः । अग्निः = वह्निः । सि० कौ० पृ० ३९७ सू० ७ ।

अग्नि–वह्नि–क्रमयो–ऽह्नि–दीदिवि–

ग्रन्थि–कुक्षि–दृतयोऽर्दनि–ध्वनिः ॥१६॥

गिरिः शिशु–जायु–कर्ष्वो हाहा हूहूश्च नग्रहू–र्गर्मुत् ।

पाद–ऽश्माना–त्मा पाप्म–स्थेमो–ष्म–यक्ष्माणः ॥१७॥ इति ।

एषां व्याख्या

पक्षेति । दुन्दुभिरिति गिरीति च । पक्षः = मासार्द्धः । सखा । सहायश्च । 'पक्षो वर्गे ग्रहे पिच्छे पार्श्वे पक्षमविरोधयोः । केशात्परश्चये चुल्लीरन्ध्रे साध्यसहाययोः । मासार्द्धे' इति—(अने० ति० पृ० २३ श्लो० १८२) । वराशिः = स्थूलशाटकः । 'वराशिः स्थूलशाटकः ।' इति—(अम० ना० लिं० पृ० २४३ श्लो० ११६) । ऋषिः = वेदः । वसिष्ठादिः । दीधितिश्च । 'ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्, ।' इति—(मे० पृ० १६६ श्लोकः ६)। 'ऋषिस्तु वेदे भृग्वादौ ज्ञानवृद्धे दिगम्बरे ।' इति च—(वै० पृ० २१४ श्लो० ९) । दुन्दुभि = वाद्यविशेषः । वसुदेवश्च । 'द्वन्द्वे दुन्दुभिरक्षे च दुन्दुभिः स्यात्तथाऽऽनकः ।' इति—(अने० ध्व० मं० पृ० १९ श्लोकः १६१)। 'इष्यते दुन्दुभिर्भेर्य्यामक्षे बिन्दुत्रिकद्वये ।' इति च–(अने० समु० पृ० २९ श्लो० ३२७) । यल्लक्ष्यम्—''दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हरिता'' इति—(दुर्गसिंहलिंगानुशासनविवृतौ पृ० ५ पं० १४) । ''केनास्मिन् सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्' इति—वेणीसंहारे १, २२ इति च—(दुर्ग० विवृ० पृ० ५ पं० १६) पाणिः = अङ्गविशेषः, हस्तः । 'करे पाणिर्निगद्यते ।' इति—(श० र० स० पृ० १०६ पं० ११) । अविः = मेषः । मेषराशिः । वायुः । प्राकारश्च । 'अविर्भूपुष्पवत्योः स्त्री, वायुप्रकाराभास्सु ना ।' इति—(वै० पृ० ३३० श्लो० ४) । ज्ञातिः = सगोत्रः । तातश्च । 'ज्ञातिस्तातसगोत्रयोः ।' इति—(मे० पृ० ५५ श्लो० २०) । घृणिः = रश्मिः । 'घृणिः रश्मौ प्रकीर्त्यते ।' इति—(श० र० स० पृ० १०५ पं० २) । अग्निः = अनलः । वह्निः = भल्लातकः । चित्रकारव्यौषधि :। निम्बूकः । अग्निश्च । 'वह्निर्वैश्वानरो घासिः' इति—(वै० पृ० १० श्लो० १४) । दीदिविः = बृहस्पतिः । 'दीदिविर्ना धिषणेऽन्ने तदस्त्रियाम् ।' इति—(मे० पृ० १६० श्लो० ३७) । ग्रन्थिः = बन्धः । रुग्भेदः । पर्व । ग्रन्थिपर्णश्च । 'ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः ।' इति—(मे० पृ० ७२ श्लो० ६) । गिरिः = पर्वतः । नेत्रामयविशेषश्च । 'गिरिर्गीर्णौ गिरियके क्रीडागण्डकशैलयोः । नेत्रामयविशेषे, च पूज्ये तु गिरिरन्यवत् ।' इति—(श० र० स० पृ० २५२ पं० १९) । शिशुः = बालकः । जायुः = औषधम् । 'जायुः पुंस्यगदस्तंत्रं भैषज्यौषधभेषजम् ।' इति—(वै० पृ० १८४ श्लो० १४१) । कर्षूः = करीषाग्निः । 'कर्षूः पुमान् करीषाग्नौ, स्त्रियां कुल्येष्टिखातयोः ।' इति—(मे० पृ० १६६ श्लो० ९) । हाहाः = गन्धर्वविशेषः, देवगायकः, देवगायनः । बाहुलकाड्डाप्रत्यये

तु (हाहाः) व्युत्पन्नोऽधातुश्च । हाहाशब्दस्य रूपं तु हाहाः, हाहौ, हाहाः, (प्र०) । हाहाम्, हाहौ, हाहान् (द्वि०) । हाहा, हाहाभ्यामित्यादिः । एवं डूप्रत्यये हूहूरपि बोध्यः । हाहाः सान्तोऽपि 'गन्धर्वो वीतहाहसोः' इति संसारावर्त्तात् । 'गन्धर्वो हाहसि प्रोक्तः' इति रत्न (धरणि) कोषाच्च। भोजस्तु हहाहुहुशब्दयोरव्ययत्वमाह । 'हहाः' इत्यादिह्रस्वः । 'हुहुः' इत्युभयह्रस्वश्च । 'हंसो हहा-हुहू च द्वौ वृत्रगश्च तुम्बुरुः' इति शब्दार्णवात् । 'गीतमाधुर्य्यसम्पन्नौ विख्यातौ च हहाहुहू' इति व्यासोक्तेश्च' इति—(अम० सु० व्या० पृ० २२ पं० ३४ तः) । नग्नहूः = नानाद्रव्यकृतं सुराबीजम्, किण्वम् । 'नग्नहूर्ना, मद्यबीजं किण्वम्' इति—(वै० पृ० १४० पं० ६) । पादः = चरणः । रश्मिः । तुर्य्यांशश्च । 'पादो बुध्ने तुरीयांशे शैले प्रत्यन्तपर्वते । चरणे च मयूखे च' इति—(मे० पृ० ७५ श्लो० ९, १०) । 'पादा रश्म्यंघ्रितुर्य्यांशाः' इति च (अम० ना० लिं० पृ० ४१२ श्लो० ८९) । स्थेमा = स्थैर्य्यम्, स्थिरस्य भावः । यक्ष्मा = रोगविशेषः रोगराट्, क्षयः । 'क्षयः शोषश्च यक्ष्मा च' इति—(अम० ना० लिं० पृ० २१९ श्लो० ५१) । यादवस्त्वदन्त इत्याह —'यक्ष्मा यक्ष्मः क्षयः शोषः' इति—(वै० पृ० १८३ श्लो० १२४) । वाग्भटस्त्वस्य सलक्षणपर्य्यायानाह—'अनेकरोगानुगतो बहुरोगपुरःसरः । राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥' इति—(वाग्भटे पृ० श्लो०) । कान्तादिक्रमरहितान् पुंलिङ्गवाचकशब्दानाह पुरुषोत्तमदेवोऽपि—(त्रि० शे० पृ० ३८६, ३८७ श्लो० २, ३, ४, ५) ।

पुंस्त्वे हाहा हूहू–र्ग्रन्थिः पाणिः कलि–र्दृति–र्मौलिः ।
अञ्जलि–रंघ्रिः कुक्षि–र्लविक–लोको–त्तरा–ऽऽसङ्गाः ॥
अवट–व्रात–सङ्केत–पोत–गर्त्त–गरु–च्छदाः ।
श्लोष्मो–ष्म–पाप–यक्ष्मा-ऽश्मा–ऽऽत्मानो वातायनः स्तनः ॥
फेना–ऽभिजन–कलाप–निकाय्या–ऽऽहारो–च्चारो–पल–कल्लोलाः ।
फाल–चषाल–कील–नल–तण्डुल–शैवल–खल–विभव–प्रभवाश्च ॥
अनो–ऽप–जन–नाडीभ्यो युग–मङ्गं–पदं व्रणम् ।
अनक्षे दुन्दुभि–रथ बहुत्वे–ऽप्यसवो गृहाः ॥
सक्तवो बल्वजा लाजा दाराः प्राणा दशा इति ।' इति ।

एषां व्याख्या—

पुंस्त्व इति । अवटेति । फेनेति । अन इति । सक्तव इति च । एते हाहादयो दुन्दुभ्यन्ताः शब्दाः पुंसि स्युः । असुप्रभृतयो दशान्ता शब्दास्तु बहुत्वे भूम्नि पुंसि स्युः । ग्रन्थिः = ग्रन्थिपर्णः । वस्त्रादिबन्धः । "गाँठ" इति लोके । वंशादिसन्धिः, पर्व । रुग्भेदश्च । 'ग्रन्थिस्तु

ग्रन्थिपर्णे ना बन्धे रुग्भेदपर्वणोः ।' इति—(मे० पृ० ७२ श्लो० ६)। तथा च प्रयोगः—'ग्रन्थग्रन्थिरिह क्वचित् ।' इति नैषधम्—इति-(त्रि० शे० व्या० पृ० ३८६ पं० ३१)।' अंघ्रिः = चरणः । 'अघ्रिर्ना पादमूलयोः ।' इति—(मे० १२३ श्लो० ६)। लावकः = पक्षिभेदः । 'पक्षिभेदे लावकः स्यात्तथा लवनकर्त्तरि ।' इति--(श० र० स० पृ० २६ पं० १०)। लोकोत्तरः = लोकातीतः, अत्युत्तमः । आसङ्गः = अभिनिवेशः, परिष्वङ्गश्च । सङ्केतः = स्वाभिप्रायव्यञ्जकचेष्टाविशेषः, मनोगतभावव्यञ्जनाय कृतो हस्तादिचालनरूपो व्यापारः । सम्पर्कक्रिया । परिज्ञप्ति-परिभाषा-शैली-समया-काराश्च । 'सम्पर्कक्रिया तु संङ्केतः ।' इति । 'समये च सपिण्डने सङ्केतः' इति चाजयः (अजय कोषे पृ० श्लोकः)। गर्त्तः = त्रिगर्त्तभेदः, त्रिगर्त्तदेशांशः । अवटः, भूमिच्छिद्रम् । "गड्ढा" इति लोके । कुकुन्दरम्, नितम्बस्थकूपश्च । 'गर्तावटौ भुवि श्वभ्रे' इति--(अम० ना० लिं० पृ० ८७ श्लोकः २)। 'गर्तस्त्रिगर्तभेदेस्यादवटे च कुकुन्दरे ।' इति च (मे० पृ० ५४ श्लो० १३)। छदः = पत्रम् । पक्षिणां पक्षश्च। 'छदः पलाशे गरुति ग्रन्थिपर्णतमालयोः ।' इति-(मे० पृ० ७४ श्लो० ५)। पापः = बिभीतकः । 'दैत्यः पापस्तुषः कल्पः' इति-(वै० पृ० ५९ श्लो० १७५)। वातायनः = गवाक्षः, जालकः । कपिश्च । 'गवाक्षो जालके कपौ ।' इति-(ना० मं० पृ० ९५ पं० १) आहारः = द्रव्यमात्रस्य गलाधःकरणरूपं भोजनम् । आहरणम् । हारश्च । 'आहारः स्यादहारणे हारे प्रोक्तश्च भोजने ।' इति-(श० र० स० पृ० २६५ पं० २०)। उच्चारः = उच्चारणम् । विष्ठा च । 'उच्चारं स्यादुच्चरणे तथा मलविसर्जने ।' इति-(श० र० स० पृ० २६५ पं० २०)। उपलः = प्रस्तरः । शर्करा । रत्नं च । 'उपलः प्रस्तरे रत्ने, शर्करायां मतोपला ।' इति-(वि० प्र० पृ० १५३ श्लो० ५५)। चषालः = यूपकटकः । यज्ञसमाप्तिसूचकं पशुबन्धनाद्यर्थं यज्ञभूमौ यत्काष्ठमारोप्यते स यूपः, तस्य शिरसि वलयाकृतिर्डमरुकाकृतिर्वा यः काष्ठविकारः स चषालः । यूपमूले विहितलोहवलयश्च । 'कटकेऽस्य (यूपस्य) चषालोऽस्त्री' इति-(वै० पृ० ९१ श्लो० १०५)। नलः = तृणभेदः । नृपभेदः । सँव्वत्सरविशेषश्च । 'नलस्तु तृणभेदेऽब्दे कपीन्द्रे भूपतावपि ।' इति-(ना० मं० पृ० ९२ पं० १८)। खलः = नीचः । दुर्जनश्च । 'खलो नीचे दुर्जने च' इति-(ना० मं० पृ० ७७ पं० १०) विभवः = सँव्वत्सरभेदः । धनम् । वृतिश्च । 'विभवोऽब्दे धने वृतौ ।' इति--(ना० मं० पृ० ८४ पं० ४)। प्रभवः = जन्महेतुः । प्रभावः । सँव्वत्सरभेदश्च । 'प्रभवो जन्महेतौ स्यात्प्रभावे वत्सरेऽपि च । आद्योपलब्धये स्थानेऽपामूले मुनिभिद्यपि ।' इति--(श० र० स० पृ० ३२० पं० १३)। अनश्च अपश्च जनश्च नाडी चेति द्वन्द्वः । अनोपजननाडीशब्देभ्यः परे युगम् । अङ्गम् । पदम् । व्रणम्' इति इमे शब्दाः नृलिङ्गाः भवन्ति । यथा । अनोयुगः = शकटद्वयम् । अपाङ्गः = नेत्रप्रान्तः । जनपदः = देशः । नाडीव्रणः = देहस्थशिरायुक्तो व्रणविशेषः । "नालीव्रणः"

इत्यपि पाठः। अथ पुंलिङ्गैकवचनानन्तरं नियतपुंलिङ्गबहुवचनान्तशब्दानाह--बहुत्वेऽपि इत्यादिना। गृहाः = भवनम्। "घर" इति। "मकान" इति च लोके। दाराश्च। 'गृहा पुंसि च भूम्न्येव' इति--(अम० ना० लिं० पृ० ११७ श्लो० ५)। 'दारेषु च गृहाः' इति च (अम० ना० लिं० पृ० ४४० श्लो० २३८)। 'गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि।' इति च (मे० पृ० १७५ श्लो० ५)। दशाः = पुंभूम्नि वस्त्रान्तः, वसनमञ्चलः, वस्त्रान्तावयवः। "आंचर" इति। आचल" इति च लोके। 'दशा नाभौ प्रयोजयेत्।' इति स्मृतिः। अधोंऽशुकस्येत्यर्थः। इति--(श० चिं० पृ० ११७४ स्तं० २ पं० ६, ७, ८)। मेदिनीकरस्तु वस्त्रान्ते स्त्रियां भूम्नि इत्याह--'दशाऽवस्था दीपवर्त्यो, = र्वस्त्रान्ते भूम्नि योषिति।' इति--(मे० पृ० १६३ श्लो० ८)। 'स्त्रियां बहुत्वे वस्त्रस्य दशाः स्यु,–र्वस्तयोर्द्वयोः।' इति--(अम० ना० लिं० पृ० ४३५ श्लो० २१६)। 'वासो दशा मघा आपः' इति च–(दुर्ग० पृ० ११ श्लो० २४)। रभसस्तु पुंस्त्रियोः भूम्नि इत्याह। 'दशा वर्त्यामवस्थायां, वस्त्रान्ते भूम्नि पुंस्त्रियोः।' इति—(अम० सु० का० पृ० २४२ स्तं० १ पं० १५, १६)। शेषशब्दानां व्याख्या प्राग्वद्बोध्याः।

इति पुंलिङ्गानुशासनं समाप्तम्।

---:o:---

अथ स्त्रीलिङ्गानुशासनम् ।

तत्रेदानीं योनिमदादीन् एकस्वरोदन्तान्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः--(अभि० सं० लिं० पृ० २ श्लो० १८, १९, २०, २१)

"स्त्रीलिङ्गं[1] योनिम[2]-द्वम्री-सेना-वलिल-तडि-न्निशाम् ।
वीचि-तन्द्रा-ऽवटु-ग्रीवा-जीह्वा-शस्त्री-दया-दिशाम्[3] ॥१॥
शिंशपा[4]द्या-नदी-वीणा-ज्योत्स्ना[5]-वा (वी) री- तिथी[6]-धियाम् ।
अङ्गुली-कलसी-कङ्गु-हिङ्गुपत्री-सुरा-नसाम् ॥२॥
रास्ना-शिला-वचा-लाला-शिम्बा-कृष्णो-ष्णिका-श्रियाम् ।
सृक्का-पण्या-ऽतसी-धाय्या-सरघा-रोचना-भुवाम्[7] ॥३॥
हरिद्रा-मांसि-दूर्वा-ऽऽलू-वलाका-कृष्णला-गिराम् ।
इत्तु प्राण्यङ्गवाचि स्या[8]दीदूदेकस्वरं कृतः ॥४॥" इति ।

पाणिनीयेऽपि—(१) (लिङ्गम्) ॥ (स्त्री) ।। अधिकारसूत्रे एते । सि० कौ० पृ० ३९७ सू० १, २ (२) (ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः) ॥ ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गा. । स्वस्रादिपञ्चकस्यैव ङीब्निषेधेन कर्त्रीत्यादेर्ङीपा ऋकारान्तत्वात् । तिसृचतत्रोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरो=ऋदन्तत्वाभावात् । माता=जननी । दुहिता=पुत्री । स्वसा=भगिनी । याता=पतिभ्रातृपत्नी । ननान्दा=स्वभर्तृभगिनी । सि० कौ० पृ० ३९७ सू० ३ (३) (काष्ठा दिगर्था स्त्रियाम्) ॥ इमाः काष्ठाः=दिशः । सि० कौ० पृ० ४०० सू० ७१ । (४) (वृक्षजाति स्त्रियामेव) क्वचिदेवेदम् । हरीतकी=पथ्या । सि० कौ० पृ० ४०३ सू० १६४ (५) (ताराधाराज्योत्स्नादयश्च) ॥ एते स्त्रियां स्युः । तारा=नक्षत्रम् । धारा=घटादिच्छिद्रम् । ज्योत्स्ना=कौमुदी, चन्द्रातपः । सि० कौ० पृ० ३९८ सू० ३३ । (६) (तिथिनाडिरुचिवं चिनालिधूलिकिकिकेलिच्छविरात्र्यादयः । एते स्त्रियां स्युः । पक्षे ङीष् । तिथी, तिथिः=प्रतिपदादिपञ्चदश । अमरोस्त्वाह–"तिथयोर्द्वयो." इति । तथा च भारविः–"तत्र भुवि बहुतिथास्तिथयः" इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च–"निखिलान्निशि पौर्णिमातिथीन्" इति । सि० कौ० पृ० ३९८ सू० २५ । (७) (भूमिविद्युत्सरिल्लतावनिताभिधानानि) ॥ एतानि स्त्रियां स्युः । भूमिः=पृथिवी । विद्युत्=तडित् । लता=वल्ली । वनिता=स्त्री । उक्तशब्दानां समस्तनामानि स्त्रियां स्युः । सि० कौ० पृ० ३९७ सू० १८ । (८) (य्वन्तमेकाक्षरम्) ॥ श्रीः=लक्ष्मीः । भूः=पृथिवी । एकाक्षरं किम् । पृथुश्रीः=महदैश्वर्यम् । सि० कौ० पृ० ३९७ सू० १२ ।

एषां व्याख्या—

स्त्रीलिङ्गमिति । शिंशपाद्येति । रास्नेति । हरिद्रेति च । सभेदानां योनिमदादीनां वीच्यादीनां शिंशपादीनामङ्गुल्यादीनां रास्नादीनां स्पृक्वादीनां हरिद्रादीनां च नाम स्त्रीलिङ्गं स्यात् । योनिमदिति । योनिर्भगं तत्सहितानां प्राणिनां नाम अर्थाद्ये योनिमन्तः प्राणिनस्तेषां नामानि स्त्रियां स्युः । यथा । जननी = माता । दुहिता = पुत्री । याता = भ्रातृभार्या । ननन्दा = पतिभगिनी । स्वसा = भगिनी । योषित्=स्त्री, दारा । आबन्तोऽयं दाराशब्दः स्त्रियां स्यात् । 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडेहारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः ।' इति व्याडिशुभाङ्कौ' इति–(अम० सु० व्या० पृ० २०५ स्तं० १ पं० २४–५)। अदन्तदारशब्दे तु 'दाराः पुंभूम्नि' इति बाधकं प्रागुक्तम् । कलत्रशब्दस्य 'कलत्रं श्रोणिभार्य्ययोः' इति मेदिनीस्थक्लीबपाठो बाधकः । एवमन्यत्राप्युन्नेयम् । धेनुः = गौः । करिणी = हस्तिनी । वडवा = अश्वा । रासभी=गर्दभी । काली = महिषी । अजा = छागीत्यादयो योनिमच्छब्दाः । वम्री = उपजिह्वा, उपदेहिका । "दीमक" इति । "सीमक" इति च लोके । 'वम्रो वर्म्युपदीकोपजिह्विका चोपदेहिका ।' इति—(वै० पृ० १५१ श्लो० ३८) । सेना = ध्वजिनी, वाहिनी, पृतना, चमूः, अनीकिनी । 'सैन्यं चक्रं बलं सेना चमूर्वाहिन्यनीकिनी ।' इति–(वै० पृ० १०८ श्लो० ५५) वल्लिः = लता, व्रततिः । "वेल" इति लोके । तथा च प्रयोगः– 'हिरण्मयोर्वीरुहवल्लितन्तुभिः' इति माघः—इति मुकुटः । 'वल्ली' इत्यपि । 'वल्ली तु व्रततिर्व्रतती लता ।' इति—(वै० पृ० ४५ श्लो० ७) । 'वल्ली स्यादजमोदायां लतायां कुसुमान्तरे ।' इति—(अने० सं० पृ० ४२ श्लो० ५२१) । प्रयोगश्च—'वल्लीवल्कपिनद्धधूसरशिराः' इति दमयन्त्याम्' इति—(अम० सु० व्या० टि० पृ० १३० पं० ३९) 'वेल्लिः' इत्यपि । वल्ली तु वेल्लिः सञ्चरणौ' इति वाचस्पतिः' इति—(अम० सु० व्या० पृ० १३० स्तं० १ पं० २३, २४) । तडित् = विद्युत् । "बिजली" इति लोके । 'तडिद्वता तु विद्युतिः ।' इति—(श० र० स० पृ० १४३ पं० १३) । निट् = रात्रिः । हरिद्रा च । वीचिः = स्वल्पतरङ्गः, ऊर्मिः । अवकाशः, सुखं च । 'वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखे द्वयोः' इति (मे० पृ० २८ श्लो० १०)। तन्द्रा = प्रमीला, आलस्यम्, निद्रा च । 'तन्द्रा निद्राप्रमीलयोः' इति–(वै०पृ० २२१ श्लो० १५)। अवटुः = घाटा, ग्रीवापश्चाद्भागः । ग्रीवायामुन्नतभागो वा । "घांटी" इति लोके । 'अवटुर्घाटा कृकाटिका ॥' इति—(अम० ना० लिं० पृ० २३३ श्लोकः ८८) । तत्रावटुः साहचर्य्यात् स्त्रियां स्यात् । बोपालितस्तु पुंसीत्याह—'अवटुः पुरुषे कृकाटिका घाटा' इति— (अम० सु० व्या० पृ० २३३ स्तं० १ पं० २५) । वैजयन्त्यां तु स्त्रीपुंसयोरुक्तः । 'पिण्डारे त्ववटोः पाणेः' इति— (वै० पृ० २८१ श्लो० ९) । घाटाऽप्यवटुरक्लीबे' इति च (वै० पृ० १८० श्लो० ८५) । गीवा = कन्धरा, शिरोधरा । तच्छिरा च । 'स्यात्तु गीवा कन्धरायां तच्छिरायां च योषिति ।' इति– (मे० पृ० १५८ श्लो० ६) । जिह्वा = रसना, रसज्ञा, वाक्, ज्वाला च । 'जिह्वा तु वाचि

ज्वालारमशयोः ।' इति--(अने० सं० पृ० ४३ श्लो० ५३३) शस्त्री=छुरिका । 'शस्त्री छुरिकायां च विश्रुता ।' इति--(वि० प्र० पृ० १२८ श्लो० ४२) दया=कृपा, अनुकम्पा । अहिंसा च । 'दयाऽहिंसानुकम्पयोः ।' इति--(अने० ध्व० सं० पृ० २५ श्लो० २०९) । दिक्=दिशा, निःसरणं, मुखम् । उदाहरणम् । दन्तक्षतविशेषः । वर्तुलाकारश्च । 'दिग्दिशाशा ककुब्दीर्णी हरिद्देववधूः सरिः ।' इति—(वै० पृ० १७ श्लोकः २)।। 'दिक्तु निःसरणं मुखम् ।' इति--(वै० पृ० १६० श्लो० १५) । 'दिग्दष्टे वर्त्तुलाकारे' इति च (वै० पृ० २३३ श्लो० ४०) । भागुरिमतेन टापि दिशा । 'दिक् तु स्त्रियां दिशा दान्ती ककुब् देववधूः पविः ।' इति शब्दार्णवः इति (अम० सु० व्या० पृ० ३० स्तं० २ पं० ९, १०) । दिक्शब्दयोगे तत्र हि दिशि दृष्टः शब्दो दिक्शब्द इत्युक्तम् । शिंशपा=वृक्षविशेषः । शिंशपाद्याः—शिंशपा, पाटला, शमी इत्यादयः । पाटला=पुष्पवृक्षः । 'पाटला पाटली स्त्री स्यादस्याः पुष्पे पुनर्न ना ।। आशुधान्ये पुमान् श्वेतरक्तवर्णेऽपि वाच्यवत् ।' इति--(मे० पृ० १५३ श्लो० १०९) । शमी=सक्तुफला । शिम्बिका । वल्गुलिश्च । 'शमी सक्तुफलायां च शिम्बिकायां च वाग्गु (वल्गु) लौ ।' इति--(मे० पृ० ११० श्लो० ३१) । नदी=सरित् । गङ्गाद्या च । 'नदी सरित्' इति--(नाना० र० पृ० ३३ पं० १७) । 'नदी तु सरिति स्मृता ।' इति च (वि० प्र० पृ० ७७ श्लो० १) । वीणा=वल्लकी, विद्युच्च । 'वीणा वल्लकिविद्युतोः' इति—(वि० प्र० पृ० ४९ श्लो० २७) । 'वीणा तडिच्च' इति च (नाना० र० पृ० २५ पं० ५) । ज्योत्स्ना-=चन्द्रप्रभा । ज्योतिष्मतीरात्रिश्च । 'ज्योत्स्ना ज्योतिष्मती रात्रिर्ज्योत्स्ना चन्द्रमसः प्रभा ।' इति--(अने० समु० पृ० १८ श्लो० १९२) । वारी=गजबन्धनी । कलसी च । 'वारी स्याद् गजबन्धन्यां कलश्यामपि योषिति । वारिर्वाग्गजबन्धन्योः, स्त्री क्लीबेऽम्बुनि वालुके ।' इति—(मे० पृ० १२७ श्लो० ६७) तिथी=प्रतिपदादितिथयः, कर्मवाटी । 'तदाद्यास्तिथयो द्वयोः ।।' इति—(अम० नालि० पृ० ४३ श्लोकः १) 'तिथिर्न षण् कर्मवाटी' इति च—(वै० पृ० २२ श्लो० ६९) । धीः= बुद्धिः । ज्ञानभेदः । वृकासुरश्च । धीर्ज्ञानभेदे बुद्धौ च' इति--(मे० पृ० ७८ श्लो० २) । 'धीर्वृकासुरः ।' इति—सौभरिः--(एकार्थनाममालायां पृ० ८ श्लो० ६५ । 'बुद्धौ स्त्री धा च धिश्च धीः ।' इति च—(नाना० र० पृ० ६ पं० २०) । अङ्गुली=करशाखा, गजकर्णिका च । 'अङ्गुली करशाखायां कर्णिकायां गजस्य च ।' इति—(मे० पृ० १४९ श्लो० ५९) कलसी=गर्गरी, मन्थपात्रम् । पृश्निपर्णी । "पिठवनी" इति लोके । "कलसिः" "कलशिः" "कलशी" इति चापि । 'कलशी त्रयी' 'घटी पारी' इति--(वै० पृ० १६३ श्लो० ५८, ५९) । 'कलशी गर्गरी तुल्या' इति—त्रि० शे० पृ० ३०२ श्लोकः ८) । 'गर्गरी कलशिर्मता ।' इति च--(हा० व० पृ० ४०६ श्लो० २०९) । कङ्गुः=धान्यविशेषः, प्रियङ्गुः । "काँगनी" इति लोके । 'क्वचिद् धान्ये कङ्गुरित्यभिधीयते ।' इति--(श० र०

स० पृ० ५९ पं० ६) । हिङ्गुपत्री = कम्बोजी, कारवी, पृथुका, त्वक्पत्री । 'पृथ्वीका हिङ्गुपत्री च कबरी दीर्घिका पृथुः ।' इति--(रा० नि० पृ० ७७ श्लो० ६२) । सुरा = मदिरा, मद्यम् । "शराब" इति लोके । चषकश्च । 'सुरा चषकमद्ययोः ।' इति--(मे० पृ० १२९) । श्लो० ९८) । नस् = नासिका । इति—(संस्कृतशब्दार्थकौस्तुभे पृ० ४१८ पं० ३०) । रास्ना = भुजङ्गाक्षी । एलापर्णी च । 'रास्ना तु स्याद्भुजङ्गाक्ष्यामेलापर्ण्यामपि स्त्रियाम् ।' इति—(मे० पृ० ८३ श्लो० १७) । शिला = प्रस्तरः, ग्रावा । मनःशिला । द्वाराधःस्थितदारु च । 'शिला ग्रावा' इति--(नाना० र० पृ० ५४ श्लोकः ६) 'शिला तु प्रस्तरे मता । तथा मनःशिलायां च द्वाराधःस्थितदारुणि ।' इति--(मे० पृ० १४८ श्लो० ५२) । वचा = औषधिः । शारिका च । 'वचौषधौ । शारिकायां च' इति--(मे० पृ० २८ श्लो० ९) लाला = मुखस्रावः, सृणिका, वृक्षविशेषः, श्यामलकः, लवली च । 'सृणिका स्यन्दिनी लाला' इति—(वै० पृ० १८३ श्लोकः १२०) । 'अथ श्यामलके लाला लवली लावली फला ।' इति च--(वै० पृ० ४७ श्लो० २६)। शिम्बा = समी, बीजगुप्तिः । "सेमफली" इति लोके । कृष्णा = द्रौपदी, पिप्पली च । 'पिप्पली द्रौपदी कृष्णा' इति—(त्रि० शे० पृ० ३३२ श्लो० १२४) । उष्णिका = यवागूः । 'यवाग्वामुष्णिका मता ।' इति--(श० र० स० पृ० ८ श्लोकः १३) श्रीः = लक्ष्मीः, सरलद्रुमश्च । 'श्रीर्वेषरचनाशोभासम्पत्सरलशाखिषु । वाणीलक्ष्मीलवङ्गेषु विषे बिल्वेऽप्यथ त्रिषु ॥' इति--(नाना० र० पृ० ८ श्लोकः १६) । 'श्रीर्लक्ष्म्यां सरलद्रुमे ॥ वेषोपकरणे वेषरचनायां मलौ गिरि । शोभा त्रिवर्गसम्पत्योः' इति--(अने० स० पृ० २ श्लो० १३) । स्पृक्का = औषधान्तरम्, शाकविशेषो वा । "पिण्डिका" इति ख्याता स्पृक्का, पृक्का । 'मता स्पृक्कौषधान्तरे ।' इति--(श० र० स० पृ० ६ श्लोकः ५, ६) । 'स्पृक्का तु ब्राह्मणी देवी मरुन्माला लता लघुः ।' इति च वाचस्पतिः—इति--(अम० सु० व्या० पृ० १७३ पं० १७) । पण्या—ओषधिविशेषः, ज्योतिष्मती । "मालकांगणी" इति लोके । 'पारावतांघ्रिः कटभी पण्या ज्योतिष्मती लता ।' इति—(अम० ना० लिं० पृ० १७९ श्लोकः १५०) अतसी = उमा, क्षुमा । "अलसी" इति लोके । 'अतसी स्यादुमा क्षुमा ।' इति—(अम० ना० लिं० पृ० ३०८ श्लोकः २०) । धाय्या = ऋग्वेदविशेषः, सामिधेनी । 'ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धने' इति--(अम० ना० लिं० पृ० २५६ श्लोकः २२) । अग्निसमिन्धने समित्प्रक्षेपणे वह्निज्वलने या ऋक् प्रयुज्यते सा सामिधेनी धाय्या च स्यात् ।' इति महेश्वरः' इति--(अम० ना० लिं० अमरविवेकटीकायां पृ० १७१ पं० १३) । सरघा = मधुमक्षिका, मधुकर्त्री मक्षिका । 'सरघा मधुमक्षिका' । इति--(अम० ना० लिं० पृ० १९७ श्लोकः २६) । रोचना = रक्तकह्लारम् । गोपित्तम् । वरनारी च । 'रोचना रक्तकह्लारे गोपित्तवरयोषितोः ।' इति--(मे० पृ० ९१ श्लोकः १६) । भूः = पृथ्वी । स्थानमात्रम् । जाता । जातश्च । 'अथ भूर्मही ।

जाता जातश्च' इति सौभरिः—इति—(एकाक्षरना० पृ० १० श्लोकः ७५)। 'स्थानभूम्योस्तु भूः स्त्रियाम् ।' इति च—(नाना० र० पृ० ७ पं० १९)। हरिद्रा = काञ्चनी, पीता। "हलदी" इति लोके। 'गौर्य्यां हरिद्रा रात्र्याख्या हेमघ्नी काञ्चनी परा ।' इति—(वै० पृ० ६२ श्लोकः २११)। मांसिः = जटिला। "जटामांसी" इति लोके। "मांसी" इत्यपि। 'जटिला लोमसी मांसी तपस्विन्यामिषी जटा ।' इति—(वै० पृ० २०० श्लोकः ५६)। दूर्वा= तृणान्तरम्। "दूब" इति लोके। 'दूर्वा तृणान्तरे।' इति—(श० र० स० पृ० ३१६ श्लोकः १२)। आलूः = कन्दविशेषः, कासकन्दः, कासालु, गलन्तिका, भेलकश्च। "आलुः" इत्यपि। 'आलुर्गलन्तिकायां स्यादालुकन्दे च भेलके।' इति—(श० र० स० पृ० २९५ पं० ६)। बलाका = विसकण्ठिका, बकभेदः। 'बलाका विसकण्ठिका।' इति—(अम० ना० पृ० १९६ श्लोकः २५)। कृष्णला = रक्तिका, गुञ्जा। "रत्ती" इति। "घुंघुची" इति च लोके। 'काकचिञ्चागुञ्जे तु कृष्णला।' इति—(अम० ना० पृ० १६१ श्लोकः ९८)। गीः = वाणी, वाक्, भाषा, सरस्वती च। 'गीः श्रीमानथ बुद्धिमान्। गीर्वाणी गीः सुरा पत्नी सुधा' इति—(एका० ना० पृ० ४ श्लोकः २४)। गीः स्त्री भाषासरस्वत्योः' इति—(मे० पृ० १२४ श्लोकः २३)। प्राण्यङ्गेति। 'प्राण्यङ्गवाचि इत्तु' योषिति भवति। प्राणिनामङ्गं प्राण्यङ्गम्। इत् अन्ते यस्य तदिदन्तं प्राण्यङ्गम्। प्राण्यङ्गमिदन्तं यथा। नाभिः = मृगमदम्, कस्तूरिकामदम्। 'स्त्रियां कस्तूरिकामदे।' इति—(मे० पृ० १०६ श्लो० ५)। श्रोणिः = कटिः। "कमर" इति लोके। 'कटिः श्रोणिः ककुद्मती।' इति—(अम०ना० पृ० २२७ श्लो० ७४)। 'श्रोणी' इत्यपि। 'श्रोणी कथिताऽवयवान्तरे।' इति—(श० र० स० पृ० १०८ पं० ४)। अङ्गुलिः = अङ्गविशेषः। गजकर्णिका च। "उंगली" इति लोके। "अङ्गुरिः" इत्यपि। 'अङ्गुलिः करशाखायां कर्णिकायां गजस्य च।' इति—(अने० सं० पृ० १०० श्लो० ६६०)। अरत्निः = निष्कनिष्ठेन विस्तृतकनिष्ठेन मुष्टिनोपलक्षितो हस्तः। "मुट्ठी" इति लोके। 'अरत्निस्तु निष्कनिष्ठेन मुष्टिना।' इति—(अम० ना० पृ० २३२ श्लो० ८६)। 'रत्न्यरत्नी स्त्रियौ, बद्धमुष्टितलाङ्गुली।' इत्यमरमाला, इति—(अम० सु० व्या० पृ० २३२ स्तं० २ पं० ११)। रुद्रस्तु नेत्याह—'नाऽरत्निः कफोणौ हस्ते सप्रकोष्ठे चाङ्गुलौ।' इति—(अम० सु० व्या० पृ० २३२ स्तं० २ पं० १५, १६)। मेदिनीकरोऽपि'—'अरत्निर्ना सप्रकोष्ठ-तताङ्गुलिकरेऽपि च। कफोणावपि' इति—(मे० पृ० ८५ श्लोकः ३४)। पार्ष्णिः = गुल्फयो-रधः प्रदेशः। "एडी" इति लोके। पादमूलम्, पादपश्चाद्भागः। जिगीषा, जयस्पृहा च। अत्र त्वयं पुंसि स्यात्। सैन्यपृष्ठे, पादमूले, पृष्ठे चेति पुंस्त्रियोः। उन्मदस्त्रियाम्। कुम्भ्यां च स्त्रियां स्यात्' इति—(श० चिं० पृ० १४१ स्तं० २ पं० १, २, ३)। 'पुमान्पार्ष्णिस्तयो-दधः।' इति—(अम० ना० पृ० २२७ श्लोकः ७२)। 'पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद्

ध्वजिनीकटौ ।' इति रन्तिदेवः' इति--(अम० सु० व्या० पृ० २२७ स्तं० १ पं० १७) । 'पार्ष्णिस्तु पादावयवे सैन्यपृष्ठोन्मदस्त्रियोः ।' इति--(श० र० स० पृ० १०६ पं० ८) । गोधिः = ललाटम्, भालः । ''माथा'' इति लोके । 'ललाटमलिकं गोधिः' इति--(अम० ना० पृ० २३४ श्लोकः ९२) । 'भाले गोध्यलिकालीकललाटानि' इति हैमनाममाला--(अम० ना० सु० व्या० टिप्पण्यां पृ० २३४ स्तं० २ पं० ४१) । पुंस्ययम् । 'गोधिभालौ महाशंखः' इति--(त्रिकाण्डशेषात् पृ० २९२ श्लोकः ३०) । यादवप्रकाशस्तु स्त्रियामित्याह--'ललाटमलिकं गोधिः स्त्री' इति--(वै० पृ० १८१ श्लोकः ९६) । पालिः = कर्णलताग्रम्, अश्रिश्च । 'कोणस्तु स्त्रियः पाल्यश्रिकोटयः ।' इति--(अम० ना० लिं० पृ० २९५ श्लो० ९३) । पालिः स्त्र्यस्त्र्यङ्कपंक्तिषु ।' इति--(अम० ना० लिं० पृ० १३१ श्लो० १९७) 'पालिः कर्णलतायां स्यात्प्रदेशे पंक्तिचिह्नयोः ।' इत्यजयः' इति—(अम० सु० व्या० पृ० ४३१ स्तं० २ पं० २५, २६) । 'सश्मश्रुयुवती पालिः प्रस्थः (पंक्तिः) कर्णलताऽपि च ।' इति--(त्रि० शे० पृ० ३७२ श्लो० ३९९) । 'पालिः कर्णलताग्रेऽस्त्रौ पंक्तावङ्कप्रदे(भे)श(द)योः । छात्रादिदेये स्त्री पाली यूकासश्मश्रुयोषितोः ।' इति--(मे० पृ० १४७ श्लो० ३०) । पाणिशब्दस्य तु भुजपर्यायत्वात्परा पुंलिङ्गसञ्ज्ञा । तथा ह्यंघ्रिशब्दस्यापि । ईदूदेकस्वरम्--एकः स्वरो यस्य तदेकस्वरम् । ईदन्तमूदन्तं वा यदेकस्वरं शब्दरूपं तत्स्त्रियामित्यर्थः । तत्रैकस्वरौ ईदन्तौ श्रीधीशब्दौ प्राग्वद्बोध्यौ । भी = भयम् । ''डर'' इति लोके । 'भीश्च भीतिःस्यात्' इति--(एका० ना० मा० पृ० १० श्लो० ७५) । 'भीः स्त्री भीत्यां, खगे पुंसि' इति च--(नाना० र० मा० पृ० ७ पं० १९) । ह्री = लज्जा ।''लाज'' इति लोके । 'मन्दाक्षं ह्रीस्त्रपा लज्जा व्रीला (डा) सापत्रपान्यतः ।' इति--(वै० पृ० ९९ श्लो० १९४) । भ्रूः = भ्रूकुटिः । दृग्भ्यामूर्ध्वभागौ भ्रुवौ स्त्रियौ स्याताम् । ''भौं' 'इति लोके । 'ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ।' इति--(अम० ना० पृ० २३५ श्लो० ९२) । स्रुः = स्रुवो यज्ञपात्रम् । । ''स्रुवा'' इति लोके । ''स्रोता'' इति ''चश्मा'' इति च लोके । 'स्रूः स्त्रियां निर्झरे स्रुवे ।' इति—(मे० पृ० १२३ श्लो० २) । 'स्रूः स्रुवे निर्झरेऽपि च ।' (अने० सं० पृ० २ श्लो० १४) । द्रूः = कामरूपि, कामाचारम्, रक्षः, सुपर्णं च । 'द्रूः कामरूपणि स्वर्णे' इति--(अने० सं० पृ० २ श्लो० १३) । 'द्रूर्हिरण्यरक्षसो, द्रूः कामचारः' इति च—(अम० ना० लिं० पृ० ४५० स्तं१ पं० ३७) । जूः = त्वरागमनम्, सामान्यगमनं च । 'जूस्त्वरागमने प्रोक्ता सामन्यगमने स्त्रियाम् । जूराकाशे सरस्वत्यां पिशाच्यां, जवने त्रिषु ।' इति--(मे० पृ० २९ श्लो० १-२) । 'जूः कुलालजः' इति--(एका० ना० मा० पृ० ५ श्लो० ३९) । 'जूराकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ।' इति--(अने० सं० पृ० १ श्लो० ८) । 'जूर्ना जीवे व्योमपिशाचयोः । जूः स्त्री वाण्याम्' इति--(नाना० र० मा० पृ० ५ पं०

७,८) । रूपमञ्जरीकारस्तु पुंसीत्याह—'जूः पिशाची, पिशाचश्च पुंसि' इति मुकुटः' इति—(अम० ना० लि० टिप्पण्यां पृ० ४५० स्तं १ पं० ३७) ।'लवनं लूः, भवनं भूः, पवनं पूः, नयति नी, लुनाति लूः' इत्यादौ तु परत्वात् 'कृतः कर्त्तरि' इति बाधितत्वाद् वाच्य(त्रि)लिङ्गत्वम् । कृतः—कृत्प्रत्ययान्ताः यथा । लक्ष्मीः = विष्णुपत्नी । तरीः = नौ, बेडा । कुतूः = चर्म्मनिर्मितस्नेहपात्रम् । ''कुप्पा'' इति लोके । शेषं प्राग्वत् ।

अथेदानीं समाहारे पात्रादिवर्जितादन्तोत्तरपदो द्विगुः समासविशेष इत्यस्य स्त्रीलिङ्गतामाह हेमः—(अभि० सं० लिं० पृ० २ श्लो० २२) ।

पात्रादिवर्जितादन्तोत्तरपदः समाहारे ।
द्विगुः' इति ।

अस्य व्याख्या—

पात्रेति । पात्रादिवर्जितेन पात्रादिरहितेन अदन्तोत्तरपदेन अकरान्तोत्तरपदेन सह एकार्थः समाहारार्थो यो द्विगुसमासः स स्त्रियां स्यात् । यथा । पञ्चानां मूलानां समाहारः 'पञ्चमूली' । त्रयाणां लोकानां समाहारः 'त्रिलोकी' । षडध्यायानां समाहारः 'षडध्यायी' । षण्णां नगराणां समाहारः 'षण्णगरी' । पञ्चानामक्षराणां समाहारः 'पञ्चाक्षरी' । इत्यादिः । पात्रादिवर्जित इति किम् । पात्राद्युत्तरपदैः अदन्तैः एकार्थो द्विगुः स्त्रियां न स्यादित्यर्थः । यथा—पञ्चानां पात्राणां समाहारः 'पञ्चपात्रम्' । चतुर्णां युगानां समाहारः 'चतुर्युगम्' । त्रयाणां भुवनानां समाहारः 'त्रिभुवनम्' । त्रयाणां पुराणां समाहारः 'त्रिपुरम्' । भाष्ये तु 'त्रिपुरि' इति दृश्यते । अदन्तोत्तरपद इति किम् । पञ्चानां कुमारीणां समाहारः 'पञ्चकुमारि' । दशानां धेनूनां समाहारः 'दशधेनु' । पञ्चानां राज्ञां समाहारः 'पञ्चराजम्' । इत्यादौ टचि अदन्तत्वे सत्यपि पात्रादित्वान्नपुंसकत्वमित्येके । एकार्थ इति किम् । पञ्चसु कपालेषु संस्कृतः पुरोडाशो हविर्विशेषः 'पञ्चकपालः, पञ्चकपालौ, पञ्चकपालाः', इत्यादिः ।

स एवान्नन्तादीनां स्त्रीलिङ्गतामाह—(अभि० सं० लिं० पृ० २ श्लोकः २२) ।

अन्नाबन्तान्ता वा' इति ।

अस्य व्याख्या—

अन्नेति । अन्नन्ताः, आबन्ताः, अन्तान्ताश्च ये ते वेति विकल्पेन स्त्रीलिङ्गा भवन्ति । यथा—अन्नन्ताः-बहुराज्ञी, सुराज्ञी इत्यादी । आबन्ताः—रमा, बाला, वत्सा इत्यादयः । अन्तान्ताः-कान्ता, शान्ता इत्यादी ।

स एवानस्तु सर्वो नपुंसक इत्याह—(अभि० सं० लिं० पृ० २ श्लोकः २२) ।

…… अन्यस्तु सर्वो नपुंसकः ॥५॥

अस्य व्याख्या—

अन्य इति । अन्य उक्तादितरः सर्वः समस्तो नपुंसकः नपुंसकलिङ्ग एव स्यात् ।

स एव लिदादिप्रत्ययान्तानां क्वचित्तिगादिप्रत्ययान्तानां विंशत्यादीनां च स्त्रीलिङ्गतामाह—(अभि० सं० लि० पृ० २ श्लोकः २३) ।

लि[1]-न्मिन्य[2]-ऽनि[3]-ण्य-ऽणिस्त्र्युक्ताः
क्वचि-त्तिग-ऽल्पह्रस्वकप् ।
विंश[4]त्याद्याशताद् द्वन्द्वे
सा चैक्ये द्वन्द्वमेययोः ॥६॥' इति ।

अस्य व्याख्या—

लिदिति । लिदादिप्रत्ययान्ता ये ते स्त्रियामुक्ताः । यथा—लिदादिप्रत्ययान्ताः जनता, ग्रामता, बन्धुता, गजता, सहायता, गोता, इत्यादयः । भूमि-अटनि-वाणि-वेणि-काकणि-भूति-चिकीर्षाप्रभृतयः । तिग्प्रत्ययान्ताः तन्तिप्रभृतयः । अल्पे ह्रस्वे चार्थे कप् (न्) प्रत्ययान्ताः कयिका-पुटिकाप्रभृतयश्च स्त्रियां स्युः । विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिश्चेति ।

इह स्त्रीलिङ्गानुशासनेऽमरस्तु विशेषमाह—(अम० ना० लिं० पृ० ४५२ श्लोक० २)

स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च ।

अस्य व्याख्या—

स्त्रियामिति । स्त्रियामित्यधिकारोऽयं मसीशब्दपर्य्यन्तं बोध्यः । ईदूदेति । ईदूदादीनां व्याख्या तु प्रागुक्ता ।

पाणिनीयेऽपि—(१) (तलन्तः) ॥ अयं स्त्रियां स्यात् । शुक्लता=शुक्लस्य भावः । ब्राह्मणता=ब्राह्मणस्य कर्म । ग्रामता=ग्रामस्य समूहः । देवता=देव एव । सि० कौ० पृ० ३९७ सू० १७ । (२) (मिन्यन्तः) ॥ मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः=पृथिवी । ग्लानिः=अनुत्साहः, बलदीनता, रोगश्च । सि० कौ० पृ० ३९७ सू० ६ । (३) (अनूप्रत्ययान्तो धातुः) ॥ अनिप्रत्ययान्तः, ऊप्रत्ययान्तश्च-धातुः स्त्रियां स्यात् । अवनिः—पृथिवी । चमूः—सेना । प्रत्ययग्रहणं किम् । देवयते क्विप्-द्यूः-विशेष्यलिङ्गः । सि० कौ० पृ० ३९७ सू० ४ । (४) (विंशत्यादिरानवतेः) ॥ इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । सि० कौ० पृ० ३९७ सू० १३ ।

नाम–विद्यु–न्निशा–वल्ली–वीणा–दि–ग्भू–नदी–ह्रियाम् ।
अदन्तैर्द्विगुरेकार्थो न स पात्र–युगादिभिः ।।

अस्य व्याख्या–

नामेति । विद्युदादीनां ह्रीपर्य्यन्तानामष्टानां यन्नाम तत्स्त्रियां स्यात् । विद्युत्–निशा-दीनां व्याख्या प्रागुक्ता । 'वाणी'त्यादौ 'ङ्यावूङन्तम्' इति सिद्धे वीणाग्रहणं चिन्त्यम् । केचित्तु वीणास्थाने वाणीं पठन्ति । वाणी = वाक्, गौः, गीः। सरित् = त्रिस्त्रोता, विपाट् । ह्रीग्रहणं चिन्त्यम् । 'ईदूद्विरामैकाच्' इति 'त्रपादौ ङ्यावूङन्तम्' इति च सिद्धत्वात् । केचित्तु 'धियाम्' इति पठन्ति । धीः = संवित्, चित्, प्रतिपत् इत्यादयः । अदन्तैरित्यादीनां व्याख्या तु प्राग्वद् बोध्याः ।

तल्–वृन्दे ये–नि–कट्य–त्रा वैरमैथुनिकादिवुन्
स्त्रीभावादा–वति–क्ति–ण्वुल्–णच्–ण्वुच्–क्यब्–युजि–ञङ्–नि–शाः ।

अस्य व्याख्या—

तलिति । 'तलन्तं स्त्रियाम् ।' तल्प्रत्ययः स्त्रियां स तु भावाद्यर्थे विहितः। तत्र भावे यथा—शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । गवां समूहः गोता । ग्रामाणां समूहः ग्रामता । देव एव देवता । स्वार्थे तल् । वृन्द इति । वृन्दे समूहे य, इनि, कट्य, त्र इमे चत्वारः प्रत्यया योषिति भवन्ति । यथा—'पाश्यादिभ्यो यः ।' पाशानां समूहः पाश्या । वातानां समूहः वात्या । तृणानां समूहः तृण्या। धूमानां समूहः धूम्या । 'खलादिभ्य इनिः' खलानां समूहः खलिनी । पद्मानां समूहः पद्मिनी । शाकानां समूहः शाकिनी । उलूकानां समूहः उलूकिनी । 'रथादिभ्यः कट्यच् ।' रथानां समूहः रथकट्या । गवां समूहः गोत्रा । वृन्दे किम् । मुखे भवो मुख्यः = मुखोत्पन्नः । दण्डोऽस्त्यस्य दण्डी = दण्डयुक्तः । वरेति । मिथुनस्य कर्म्म मैथुनिका । 'द्वन्द्वाद्वुन्वैरमैथुनिकयोः ।' वैरमैथुनादौ च यो वुन्प्रत्ययः स स्त्रियाम् । तत्र वैरे विरोधार्थे यथा—बाभ्रवाश्च शालङ्कायनाश्च तेषां वैरं बाभ्रवशालङ्कायनिका । अश्वश्च महिषश्च तयोर्वैरम् । अश्वमहिषस्येदं वैरम् 'अश्व महिषिका'। काकश्च उलूकश्च तयोर्वैरम्। काकोलू-कस्येदं वैरं काकोलूकिका।' अत्रिश्च भारद्वाजश्च तयोर्विवाहः । 'अत्रिभारद्वाजिका ' अथवा अत्रिभारद्वाजयोरियं मैथुनिका। विवाहरूपसम्बन्ध इत्यर्थः। गर्गाणां भृगूणां च विवाहः गर्गभार्गविका । कुत्सकुशिकिका । कुत्सश्च कुशिका च तयोर्मैथुनिका ।

पाणिनीयेऽपि–(१) (क्तिन्नन्तः) क्तिन्प्रत्ययान्तः स्त्रियां स्यात्। गतिः = गमनम् । कृतिः = करणम । मृतिः = मरणम् । "ल्युट्क्तिनावेकार्थवाचकौ" इति । सि० कौ० पृ० ३९७ सू० ९ ।

कुत्सकुशिकयोर्मैथुनिका । एवं गकुशकिका । वसिष्ठकुशिकिका । आदिना पाद-शतस्य संख्यादेर्वीप्सायां वुन् लोपश्च दण्डव्यवसर्गयोश्च । इति वुनो ग्रहणम् । द्विपादिकां ददाति । द्वौ द्वौ पादौ ददाति । द्वौ द्वौ दण्डितौ द्विपादिकाम् । द्विशतं दण्डितो ददाति द्विशतिकां ददाति च । वैरेत्यादि किम् । 'वासुदेवार्जुनाभ्यां वुन् ।' वासुदेवे भक्तिरस्य वासुदेवकः । वुनोग्रहणं वुञ् उपलक्षणम् । काशिका गार्गिकया श्लाघते । काठिकया विकत्थते । 'द्वन्द्वमनोज्ञादिभ्यश्च ।' वुञ् । शैष्योपाध्यायिका । क्वचिद् वैरमैथुनिकादिरिति पाठः । आदिना वीप्सादौ वुनो ग्रहणम् । स्त्रियां भावादि : स्त्रीभावादिस्तस्मिन् । स्त्रियामित्यधिकृत्य भावादौ ये विहिताः प्रत्यया अनिक्तिन्नादयस्ते स्त्रियां स्युरित्यर्थः । अनिर्यथा—'आक्रोशे नञ्यनिः ।' अकरणिः = आक्रोशनम् । अजननिः = आक्रोशनम् । अजीवनिः = शापः (अजीवनिस्ते शठ भूयात्) क्तिन् यथा—कृतिः = करणम् । गतिः = गमनम् । भूतिः = भवनम् । 'ण्वु' इति ण्वुल्ण्वुचोः सामान्यग्रहणम् । 'रोगाख्यायां ण्वुल् बहुलम् ।' प्रच्छर्दिका = वमिरोगः । प्रवाहिका = संग्रणीरोगः । 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः ।' आसिका = आसनम् । शायिका = शयनम् । 'पर्यायार्हणोत्पत्तिषु ण्वुच् ।' शायिका । भवतः शायिका । इक्षुभक्षिका । भवानिक्षुभक्षिकामर्हति । 'कर्मव्यतिहारे णच् स्त्रियाम् ।' 'णचः स्त्रियामञ् ।' स्वार्थिकः (ङीप्) । व्यावक्रोशी = परस्परा-क्रोशनम् । व्यावहासी = यात्युक्षी = जलक्रीडा । 'व्रजयजोर्भावे क्यप् ।' व्रज्या = पर्य्यटनम् । इज्या = अर्चा । 'संज्ञायां समजनिषद०' इति क्यप् । समज्या = सभा । निषद्या = आपणम् । विद्या = शास्त्रम् । 'स्त्रीभावादौ' इति किम् । 'वदः सुपि क्यप् च ।' ब्रह्मोद्यम् = ब्रह्मवद्यम् । मृषोद्यम् = मिथ्यावादी । 'भुवो भावे क्यप् ।' ब्रह्मभूयम् = मोक्षः । 'ण्यासश्रन्थो युच् ।' कारणा = यातना । कामना = इच्छा । आसना = स्थितिः । 'विभाषाख्यानपरिप्रश्नयोरिञ्च ।' वापिः = वापिका । वासिः = कुठारभेदः । कारिः = क्रिया । गणिः = गणनम्, संख्यानम् । कां त्वं कारिं गणिं वा अकार्षीः । सर्वां कारिं गणिं वाऽकार्षम् । 'इञ् उपलक्षणार्थत्वादिण् इक् च ।' 'इणजादिभ्यः ।' अजनमाजिः = संग्रामः । 'इक् कृष्यादिभ्यः ।' कृषि = कर्षणम् । ''खेती'' इति लोके । 'षिद्भिदादिभ्योऽङ् ।' पचा = पाकः । त्रपा = लज्जा । भिदा = भेदः, भेदनम् । छिदा = छेदनम् । 'अप्रत्ययात् ।' चिकीर्षा = कर्तुमिच्छा । पुत्रीया = पुत्र्यम् । 'गुरोश्च हलः ।' ईहा = चेष्टा, वाञ्छा । ऊहा = अध्याहृतिः । 'ग्ला-म्ला-ज्या-हा-भ्यो निः ।' ग्लानिः = बल-दीनता । म्लानिः = कान्तिक्षयः । ज्यानिः = जीर्णम् । हानिः = अपचयः, क्षतिः । 'कृञः श च ।' क्रिया = करणम्, चेष्टा । इच्छा = वाञ्छा । इति भानुजदीक्षितमहेश्वरौ—(अम० सु० व्या० पृ० ४५० पं० ५ तः) (अम० अमरवि० व्या० पृ० ३५, पं० १० तः) ।

उणादिषु नि-ऊ-रीश्च ङ्याऽऽबूङन्तं चलं स्थिरम् ।
तत्क्रीडायां प्रहरणं चेन्मौष्टा पाल्लवा ण दिक् ॥

अस्य व्याख्या—

उणादिष्विति । उणादिषु उणादिप्रत्ययान्तेषु ये निः, ऊः, ईः एते त्रयः स्त्रीलिङ्गा भवन्ति । 'वीज्याज्वरिभ्यो निः ।' वेणी = केशबन्धः । प्रवेणी = कुथा, परिस्तोमः, वेणी च । ज्यानिः = जीर्णम्, हानिः, तटिनी च । जूर्णिः = ज्वररोगः । 'सृवृषिभ्यां कित् ।' सृणिः = अङ्कुशः । 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।' श्रेणिः = पंक्तिः । श्रोणिः = कटिः । द्रोणिः— नौकाप्रभेदः । 'उणादिष्वनिः' इति पाठान्तरम् । 'अर्तिसृधृधम्यवितॄभ्योऽनिः ।' यथा—धरणिः = पृथ्वी । धमनिः = नाडी । सरणिः = मार्गः । 'कृषिचमितनिधनिसर्जिस्वर्जिभ्य ऊः ।' यथा—कर्षूः = जीविका, अल्पनदी च । चमूः = सेना । 'अवितॄस्तृतंत्रिभ्य ईः ।' अवीः = रजोवती स्त्री । तरीः = नौका । स्तरी = धूमः । तंत्रीः = वीणागुणः । ङ्याबूङन्तमिति ङी च आप् च ऊङ् च अन्ते यस्य तच्चलं जङ्गमं, स्थिरं स्थावरं वा योषिति भवति । जङ्गमं यथा—नारी = स्त्री, अबला, वनिता । कदली = मृगभेदः, रम्भा, वैजयन्ती च । कन्दली = गम्भीरध्वनिः, मृगभेदः ।

पाणिनीयेऽपि—(ईकारान्तश्च) ॥ स्त्रियां स्यात् । लक्ष्मीः = विष्णुपत्नी । सि० कौ० पृ० ३९७ सू० १० । (३, २) (ऊङाबन्तश्च) ॥ स्त्रियां स्यात् । ऊङ्प्रत्ययान्तः—कुरूः = कुरोः पत्नी । गुरूः = गुरोः स्त्री । आप्प्रत्ययान्तः —विद्या = शास्त्रम् । चतुर्दश, अष्टादश वा । सि० कौ० पृ० ३९७ सू० ११ । तत्र विशेषः—(अजाद्यतष्टाप् ४ । १ । ४) । अजादीनाम्, अकारान्तस्य च, यद्वाच्यं स्त्रीत्वं तत्र द्योते टाप् स्यात । अजाद्युक्तिर्ङीपो, ङीपश्च, बाधनाय । अजा । अतः—खट्वा । अजादिभिः स्त्रीत्वस्य विशेषणान्नेह—पञ्चाजी । अत्रहि समासार्थसमाहारनिष्ठं स्त्रीत्वम्, न त्वजानिष्ठम् । अजा = माया, छागली च । एडका = मेषी । अश्वा = वडवा । चटका = चटकभार्या । पाका = बालिका । मूषिका = मूषिकभार्या । एषु जातिलक्षणो ङीष् प्राप्त । बाला = षोडशवर्षीया स्त्री । वत्सा = पुत्री । तर्णका च । होडा = बालिका । मन्दा = सङ्क्रान्तिविशेषः । विलाता = । एषु—(वयसि प्रथमे)—इति ङीष् प्राप्तः । सि० कौ० पृ० ४५ । (सम्भस्त्राजिनशणपिण्डेभ्यः फलात्) ॥ सम्फला = । भस्त्रफला = औषधिविशेषः । अजिनफला = । शणफला = । पिण्डफला— । ङ्यापोरिति ह्रस्वः ॥ सि० कौ० पृ० ४५ पं० २४ । (सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्) । सत्पुष्पा = । प्राक्पुष्पा = । प्रत्यक्पुष्पा = । सि० कौ० पृ० ४६ पं० १ । (शूद्रा चामहत्पूर्वा जातिः) ॥ शूद्रा = शूद्रजातिः । पुंयोगे तु शूद्री = शूद्रस्य भार्या । अमहत्पूर्वा किम् । महाशूद्री—आभीरी । क्रुञ्चा—क्रौञ्चविहगी । वीणाभेदश्च । उष्णिहा — । देवविशा । ज्येष्ठा = ज्येष्ठस्य स्त्री । नक्षत्रविशेषश्च । कनिष्ठा = दुर्बलाङ्गुलिः । नायिकाभेदश्च । मध्यमा = दृष्टरजोनारी । मध्याङ्गुलिश्च । पुंयोगेपि मध्यमा = मध्यमस्य भार्या । कोकिला = पिकभार्या (जातावपि) । अमूला-अग्निशिखावृक्षः । ओषधिविशेषजातिश्च । (मूलान्नञः) ॥ सि० कौ० पृ० ४६ पं० ४ ।

सेनाभेदश्च । रमा=लक्ष्मीः । गङ्गा=देवनदी । शिवा=गौरी, शृगाली च । ब्रह्मवधूः= ब्राह्मणी । वामोरूः=नारीविशेषा । वामौ सुन्दरौ ऊरू यस्याः सा । करभोरूः=उत्तमस्त्री विशेषणम् । करभ इव उरू यस्याः सा । स्थावरं यथा—नाडी=धमनिः, शिरा । कदली= रम्भा । "केला" इति लोके । खट्वा=पर्य्यङ्कः । माला=माल्यम् । अलाबूः=तुम्बी । कर्कन्धूः=बदरीवृक्षः । चरस्थिरग्रहणं चिन्त्यप्रयोजनम् । अन्यस्य व्यवच्छेदस्याभावात् तच्छब्दे-नात्र मुष्टयादिकं निर्दिश्यते । तेनायमर्थः । तन्मुष्टयादिकं प्रहणं यदि क्रीडायां वर्त्तते तर्हि तस्मिन्नर्थे विहितो णप्रत्ययो योषिल्लिङ्गो भवति । 'तदस्यां प्रहरणमिति क्रीडायां णः' इति सूत्रात् । दिगित्यनेनोक्तोदाहरणोद्देशः । णस्य दिगुदाहरणम् । न तु परिगणनम् । तेन 'दाण्डा मौसलेति' चोदाहर्त्तव्यम् । मुष्टिः प्रहणमस्यां क्रीडायां मौष्टा=क्रीडाविशेषः । पाल्लवः प्रहणमस्यां क्रीडायां पाल्लवा=क्रीडाविशेषः । दण्डः प्रहरणमस्यां क्रीडायां दाण्डा=क्रीडा-विशेषः । मुसलः प्रहरणमस्यां क्रीडायां मौसला=क्रीडाविशेषः । इति भानुजदीक्षित-महेश्वरौ—(अम० सु० व्या० पृ० ४५०, ४५१ पं० ३७ तः) (अम० अमर० व्या० पृ० ३५८ पं० ६ तः) ।

घञो ञः सा क्रियाऽस्यां चेद्दाण्डपाता हि फाल्गुनी ।
श्यैनंपाता च मृगया तैलंपाता स्वधे–ति दिक् ॥

अस्य व्याख्या—

घञ इति । सा (क्रीडा) घञन्तवाच्या । दण्डपातादिक्रियाऽस्यां फाल्गुन्यादिकाया-मित्यर्थे घञन्ताद्विहितो यो ञप्रत्ययः स योषिति स्यात् । 'घञः साऽस्यां क्रियेति ञः' इति सूत्रात् । उदाहरति—दण्डपातोऽस्यां फाल्गुन्यां पूर्णिमातिथौ वर्तते दाण्डपाता=तिथिविशेषः । फाल्गुनीपूर्णिमा । श्येनपातोऽस्यां मृगयायां वर्त्तते श्यैनंपाता=मृगया । "शिकार" इति लोके । 'श्येनतिलस्य पाते ञे' इति मुम् ।' तिलपातोऽस्यां स्वधाक्रियायां वर्तते तैलंपाता=स्वधा[1], पितृदानम् । 'पितृदाने स्वधा मतम् ।' इत्यमरमाला' इति—(अम० सु० व्या० पृ० ४५१ स्तं० पं० १७) वररुचिना तु 'स्वधाक्रिया प्रवेणी' इति स्त्रीलिङ्गोक्ता । इति दिक् । उदाहरणम् । तेन मुसलपातोऽस्यां मौसलपाता भूमिरित्यादिसिद्धिः ।

क्वचिद्देशे (वृन्दावनप्रभृतिषु) फाल्गुनपौर्णमास्यां दण्डपातेन क्रीडा भवति' इति । दिगित्यनेन दाण्डपातादिकमुदाहरणमिति सूचितम् । इति—(अम० ना० लि० सु० व्या० पृ० ४५१ पं० १४ तः) (अमरवि० व्या० पृ० ३५८ पं० १४ तः) ।

(१) तथा च प्रयोगः—'नमः स्वधायै स्वाहायै' इति दुर्गा० ।

स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि ।' इति ।

अस्य व्याख्या—

स्त्रीति । यदि चेदल्पत्वे विवक्षा वक्तुमिच्छा स्यात्तदा मृणालीप्रभृतिः स्त्री स्यात् । यथा—अल्पं मृणालं मृणाली = स्वल्पमृणालजातिः । आदिना यथा—ह्रस्वो वंशो वंशी = मुरली-वाद्यम् । "वंसरी" इति लोके । कर्षचतुष्टयं च । गौरादित्वाद् ङीष् । एवं कुम्भी—वारिपर्णी, जलपर्णी । "पुरइनि" इति लोके । प्रणाली = कृत्रिमाम्बुनिःसरणमार्गः । "पनारी या पनारा" इति लोके । मुसली = तालमूली, शाखुपर्णी, गृहगोधिका च । छत्री = लघुच्छत्रम् । "छाता" इति लोके । । पटी = वस्त्रविशेषः । "दुपटी" इति लोके । तटी = तीरम् । मठी = तपस्विनां स्थानम्, कुटी । "झोपड़ी" इति लोके । 'मठी स्थाने तपस्विनाम् ।' इति—(वै० पृ० २९२ श्लो० ३९) । स्वल्पार्थवाचिनः कन्प्रत्ययान्तशब्दास्तु प्रागुक्ताः । काचिदिति किम् । ह्रस्वो वृक्षो 'वृक्षकः' इत्यादि योषिति न भवति ।

अथाधुना स्रुगादीनां गायत्र्यादिपर्य्यन्तानां द्वाविंशतिशब्दानां स्त्रीलिङ्गतामाह हेमः—(अभि० सं० लिं० पृ० ३ श्लो० २४, २५, २६) ।

स्रुग्–गीति–लताभिदि ध्रुवा, विड–ऽनरि, वारि–घंटी–भबन्धयोः, ।
शल्य–ध्वनि–वाद्यभित्सु तुक्ष्वेडा, दुन्दु[१]भि–रक्षाबिन्दुषु, ॥७॥
गृह्या शाखापुरे,ऽश्मन्तेऽन्तिका, कीला रताहतौ ।
रज्जौ रश्मि,–र्यवादि–र्दोषादौ, गञ्जा सुरागृहे ॥८॥
अह्मर्पूविकादि,–र्वर्षा–मघा अ[२]प–कृत्तिका बह्वौ ।
वा तु जलौको–ऽप्सर[३]सः सिकता–सुमन –समाः ॥९॥
गायत्र्यादय' इति ।

पाणिनीयेऽपि–(१) (दुन्दुभिरक्षेषु) ॥ अक्षेषु दुन्दुभिः स्त्रियां स्यात् । दुन्दुभिः = पाशकषडङ्किता । अक्षेषु किम् । अयं दुन्दुभिः वाद्यविशेषोऽसुरो वेत्यर्थः । सि० कौ० पृ० ३९७ सू० १४ ।

(२) (अप्सुमनस्समासिकतावर्षाणां बहुत्वं च) ॥ अबादीनां पञ्चानां स्त्रीत्वं स्यात्, बहुत्वं च । इमाः आपः = जलम् । सुमनसः = पुष्पम् । "स्त्रियः सुमनसः पुष्पम्" । "सुमना मालती जातिः" । देववाची तु पुंस्येव– "सुपर्वाणः सुमनसः" । समाः = सँव्वत्सरः । (समांसमां विजायते) इत्यत्र "समायां समायाम्" इति भाष्याच्च । विभाषाप्राधेडिति सूत्रे "अप्सरातां सुमनसौ" इति वृतिव्याख्यायां हरदत्तोऽप्येवम् । बहुत्वं प्रायिकम्–सिकताः = वालुका । "एका च सिकता तैलदाने असमर्था" इति अर्थवत्सूत्रे भाष्यप्रयोगात् । वर्षाः = वृष्टिः । सि० कौ० पृ० ३९८ सू० २९ ।

(३) (अप्सराः स्त्रियाम्) ॥—अप्सरसः । प्रायेणायं—बहुवचनान्तः । सि० कौ० पृ० ४०३ सू० १५४ ।

एषां व्याख्या—

स्रुगिति । गृह्येति । अहमिति । गायत्रीति च । ध्रुवा, विट्, वारिः, क्ष्वेडा, दुन्दुभिः, गृह्या, अन्तिका, कीला, रश्मिः, यवादिः, गञ्जा, अहम्पूर्विकादिरित्येते शब्दाः स्रुगाद्यर्थेषु स्त्रीलिङ्गाः स्युः । वर्षाः, मघाः, आपः, कृत्तिकाश्चेत्येते शब्दा बहौ भूम्नि योषिल्लिङ्गाः स्युः । जलौकसः, अप्सरसः, सिकताः, सुमनसः, समाश्चेत्येते शब्दास्तु वा=विकल्पेन भूम्नि स्त्रीलिङ्गाः स्युः । गायत्र्यादयोऽपि स्त्रियां स्यादित्यन्वयः । ध्रुवेति । ध्रुवा=स्रुग्, यज्ञपात्रभेदः । गीतिः, गीतभेदः । लताभिद्, मूर्वा च । 'स्त्री मूर्वाऽऽड्योः शालपर्ण्यां गीतिस्रुग्भेदयोः' इति--(मे० पृ० १५८ श्लो० १४) विट्=विष्ठा, दुहिता, व्यापनं च । एष तु अनरि=न पुंसि, क्लीबस्त्रियोः स्यादित्यर्थः । वारिः=घटी, कलशी, इभबन्धः, गजबन्धनी च । 'वारिर्वाग्गजबन्धन्योः' इति—(मे० पृ० १२७ श्लो० ६७) । 'वारिर्घट्यां सरस्वत्यां गजबन्धनभुव्यपि ।' इति च--(अने० सं० पृ० ३७ श्लो० ४६७) । क्ष्वेडा=शल्यम्, वंशशलाका, ध्वनिः, सिंहनादः । वाद्यभिद्, वाद्यभेदश्च । 'क्ष्वेडा वंशशलाकायां सिंहनादे च योषिति ।' इति—(मे० पृ० ४० श्लो० ५) । दुन्दुभिः=अक्षः, पाशकः । "पासा" इति लोके । बिन्दवः, अक्षबिन्दुत्रिकद्वयं च । 'दुन्दुभिः पुमान् । वरुणे दैत्यभेर्योश्च, स्त्र्यक्षे बिन्दुत्रिकद्वये ।' इति (मे० पृ० १०७ श्लो० १६) । गृह्या=शाखापुरम्, शाखानगरम्, नगरासन्नस्थग्रामः । 'गृह्या शाखापुरं, गृह्या गृहासक्तमृगाः खगाः ।' इति--(नाना० र० मा० पृ० ४४ पं० ६) । 'गृह्यं गुदे ग्रन्थभेदे क्लीबं शाखापुरे स्त्रियाम् ।' इति च--(मे० पृ० ११४ श्लो० १९) । अन्तिका=अश्मन्तः, उद्धानम्, चुल्ली । "चुल्हा" इति लोके । 'स्त्री सातलौषधौ । चुल्ल्यां ज्येष्ठभगिन्यां, च' इति—(मे० पृ० ४ श्लो० ४४) । कीला=रताहतिः, रतहतिः, सुरतप्रहरणम्, रतौ प्रतिहतिविशेषः । यदाह वात्स्यायनः--कीला उरसि कर्तरी शिरसि विद्धाकपालयोरिति---(श० चिं० पृ० ६१० स्तं० १ पं० १६) 'कीला हतारतौ ।' इति--(अने० ति० पृ० ११ श्लो० ६०) । 'स्त्रियां कफोणिनिर्घाते प्रहारे रतिसम्भवे ।' इति--(नाना० मं० पृ० ७८ पं० २३) । 'कीलाऽऽरतहतावपि' इति--(श० र० स० पृ० २९६ पं० ६) । 'कीला रताहतावपि ।' इति च--(अने० सं० पृ० ३९ श्लो० ४९२) । रश्मिः=रज्जुः, प्रग्रहः, अश्वरज्जुः । 'रश्मिर्घृणिप्रग्रहयोः' इति--(अने० सं० पृ० २९ श्लो० ३३७) । 'यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे' इति सूत्रोक्ता यवादयः शब्दा दोषादयश्चार्थाः । यवा=दोषः । यवना=लिपिः । "पारसी" इति लोके । अरण्या=उरुः । हिमा=महत्त्वम् । गञ्जा=सुरागृहम् । 'गञ्जा खनौ सुरागृहे ।' इति—(मे० पृ० ३० श्लो० ८) । अहम्पूर्विका=अभिमानविशेषः, अहमहमिका, परस्पराऽहङ्कारः । अहम्पूर्वमहम्पूर्वमिति योधानां धावनक्रिया च । 'अहम्पूर्वमहम्पूर्वमित्यहम्पूर्विका स्त्रियाम् ।'

तत्र तु विशेषः—(छदिः स्त्रियामेव) ॥ इयं–छदिः–छाद्यते अनेनेति । सि० कौ० पृ० ४०२ सू० १३७ ।

इति--(अम० ना० लिं० पृ० २९७ श्लो० १०१) । वर्षाः=(बह्वौ भूम्नि) प्रावृट्कालः, वर्षर्तुः । 'प्रावृट्काले स्त्रियां भूम्नि' इति--(मे० पृ० १६७ श्लो० २४) । मघाः= (भूम्नि) नक्षत्रविशेषः, दशमनक्षत्रम् । 'मघा मघी च नक्षत्रे धान्यभेदे यथाक्रमम् ।' इति—(मे० पृ० २६ श्लो० ३) । आपः=(भूम्नि) जलम् । 'आपः स्त्री भूम्नि वार्वारि' इति--(अम० ना० लिं० पृ० ९३ श्लो० ३) । कृत्तिकाः= (भूम्नि) नक्षत्रविशेष तृतीयनक्षत्रम् । 'कृत्तिका तारकान्तरे ।' इति— (श० र० स० पृ० १२ पं० ३) । जलौकसः=(भूम्नि) रक्तपा, जलूका । 'रक्तपा तु जलौकायां स्त्रियां, भूम्नि जलौकसः ।' इति—(अम० ना० लिं० पृ० १०१ श्लो० २२) । अप्सरसः= (भूम्नि) देवयोनिविशेषः, देवकन्याः । 'स्त्रियां बहुष्वप्सरसः' इति--(अम० ना० लिं० पृ० २२ श्लो० ५२) । 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि ।' इति शब्दार्णवः । इति--(अ० सु० व्या० पृ० २२ स्तं० १ पं० १६) । 'अप्सराः' इति भाष्यप्रयोगोऽपि । सिकताः= (भूम्नि) बालुकाः । 'सिकता स्त्री सिकतिले, वालुकायां च भूम्नि ।' इति—(श० र० स० पृ० १५६ पं० ९३) । सुमनसः=पुष्पम्, मालती च । ''चमेली'' इति लोके । ''स्त्रियः सुमनसः पुष्पम्' इति--(अम० ना० लिं० पृ० १३४ श्लो० १७) । 'भूम्नि स्त्रियां सुमनसः' इति रत्न (धरणि) कोषः' इति—(अम० सु० व्या० पृ० १३४ स्तं० १ पं० २३) 'स्त्रियां सुमनसो भूम्नि पुष्पे जातौ तु भेदतः । विदुष्यपि यदा दृष्टस्तदा भेदेन शिष्यते ।' इति व्याडिः इति--(अम० सु० व्या० पृ० १५३ स्तं० १ पं० ८) । अमरादेरेकत्वमपि । 'सुमना मालती जातिः' इति–(अम० ना० लिं० पृ० १५३ श्लो० ७२) । 'सुमनाः पुष्पमालत्योः स्त्रियां, ना धीरदेवयोः ।' इति—(मे० पृ० १७४ श्लो० ६७) 'पुष्पं सुमनाः कुसुमम्' इति नाममाला इति—(अम० सु० व्या० पृ० १३४ स्तं० १ पं० २५) । तथा च प्रयोगः--'वेश्या श्मशानसुमना इव वर्जनीया ।' इति शूद्रकः' इति—(अम० सु० व्या० टिप्प० पृ० १३४ स्तं १ पं० ४१) । 'सुमनायाश्च पत्रेण' इति सुश्रुतदर्शनाद् टाबन्तापि समाः=(भुम्नि) सँव्वत्सरः । 'बहुवचननिर्देशात्प्रायेणायं बहुवचनान्तः' इति ध्वनयति । क्वचिद्वचनान्तरमपि । 'समां समां विजायते' इति सूत्रात् । एकत्वेऽपि दृश्यते । एकत्वे लक्ष्यम्--'तृतीयस्याः समायास्तु समां समां विजायते ।' इति । 'समां समां विजायते' इत्यत्र 'निर्गतत्वं समायाः' इति । 'समायां समायामिति च च भाष्यादौ वाक्यदर्शनात् । 'समा वर्षं समं सर्वं साधु समं सदृक् ।' इति--(अने० समु० पृ० २१ श्लो० २२८) । 'समा सँव्वत्सरे स्त्रियाम् । सर्वसा (धा) धु (तु) समानेषु, समं स्यादभिधेयवत् ।' इति च--(मे० पृ० ११० श्लो० ३४, ३५) । गायत्र्यादयः=छन्दसां जातयः । ता यथा--गाय[६]त्री । उष्णि[७]क् (ह) । अनुष्टु[८]प् (भू) । बृह[९]ती । । पं[१०]क्तिः । त्रिष्टु[११]प् (भ्) । जग[१२]ती । अतिज[१३]गती । शक्व[१४]री । अति[१५]शक्वरी । अ[१६]ष्टिः । अत्य[१७]ष्टिः । धृ[१८]तिः । अति[१९]धृतिः । कृ[२०]तिः । प्रकृ[२१]तिः । आ[२२]कृतिः । वि[२३]कृतिः । सङ्कृ[२४]तिः । अभि[२५]कृतिः ।

उ[२६]त्कृतिश्चेति। गायत्री त्रिपदादेत्रीछन्दोभित्खदिरेषु च।' इति--(मे० पृ० १३३ श्लो० ५०)। षडक्षरपदा गायत्री। प्रमुखपदेन उष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यतिजगतीशक्वरी-त्यादि एकाक्षरवृद्धया बोध्यम्।' इति—(अम० सु० व्या० पृ० २५७ स्तं १ पं० ५)।

अथेदानीं ङ्याबूङन्तमित्यादिनोक्तलिङ्गानामपि केषाञ्चिन्नाम्नां सुखेन लिङ्गज्ञानाय पृथक् पाठं कान्तादिक्रमेण तत्र कान्तादीन् गान्तपर्य्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः--(अभि० सं० लिं० पृ० ३ श्लो० २७ तः)।

·····इष्टका बृहतिका संवर्त्तिका सञ्जिका-
दूषीके अपि पादुकाझिरुकया पर्य्यस्तिका मानिका।
नीका कञ्चुलिकाऽऽल्लुका कलिकया राका पताका-ऽन्धिका
शूका पूपलिका त्रिका चविकयो-ल्का पञ्जिका पिण्डिका ॥१०॥
ध्रुवका क्षिपका कनीनिका
शम्बूका शिबिका गवेधुका।
कणिका केका विपादिका
मिहिका यूका मक्षिका-ऽष्टका ॥११॥
कूर्चिका कूचिका टीका कोशिका कोणिको-र्म्मिका।
जलौका प्राचिका धूका कालिका दीर्घिको-ष्ट्रि ॥१२॥
शलाका वालुके-षीका विहङ्गिके-षिके उखा।
परिखा विशिखा शाखा शिखा भेङ्गा सुरङ्गया ॥१३॥ इति

एषां व्याख्या

इष्टकेति। ध्रुवकेति। कूर्चिकेति। शलाकेति च। एत इष्टकादयो झिरुकया, कलिकया, चविकया, सुरङ्गया च सह स्त्रीलिङ्गाः स्युः। इष्टका=मृद्विकारविशेषः। 'ईंट'' इति लोके। 'झरुका त्विष्टकायाम्' इति--(वै० पृ० १२५ श्लो० २५)। बृहतिका=उत्तरीयम्, उपरिवस्त्रम्। ''उपर्ना'' इति लोके। कण्टकारी च। 'विद्याद् बृहतिकाभिख्या-मूरुवस्त्रप्रभेदयोः।' इति—(वि० प्र० पृ० २० श्लो० २२८)। 'कण्टकार्य्यां बृहतिका' इति च--(श० र० स० पृ० ३९ श्लो० १७)। संवर्त्तिका=पद्मादीनां नवदलम्। पद्मस्य केसर-समीपस्थदलं च। 'संवर्तिका नवदले' इति--(श० र० स० पृ० ४३ पं० १९)। सज्जिका=

पाणिनीयेऽपि-(१) (शलाका स्त्रियां नित्यम) ॥ नित्यग्रहणमन्येषां क्वचिद् व्यभिचारं ज्ञापयति। शलाका=चित्रकूर्चिका। सि० कौ० पृ० ३९८ सू० ३४।

परिच्छदः। "सजावट" इति लोके। सज्जीकरणं च। "साज" इति, "सामान" इति च लोके। दूषिका = तूलिका, नेत्रमलं च। 'दूषिका तूलिकायां च मले स्याल्लोचनस्य च।' इति--(मे० पृ० ९ श्लो० १०६)। पादुका = पादत्राणम्, चर्मादिनिर्मितपादत्राणम्, पादरक्षिणी। "जूता" इति, "खड़ाऊँ" इति च लोके। 'पादुका पादरक्षिण्याम्' इति--(श० र० स० पृ० २१ पं० १) झिरुका = मृद्विकारविशेषः, इष्टका, झरुका। "ईंट" इति लोके। पर्य्यस्तिका = खट्वा, परिकरः, पर्य्यंकः। "खाट" इति, "पलंग" इति च लोके। 'पर्य्यस्तिका परिकरे' इति--(श० र० स० पृ० ३८ पं० १२)। मानिका = शरावः, कुडवद्वयपरिमाणम्, चतुःषष्टितोलकम्। "सेर" इति लोके। इति वैद्यक परिभाषा। मतान्तरे द्रोणचतुष्टयम्, मद्यं च। 'माणिका' इत्यपि। नीका = क्षेत्रसिञ्चनार्थं जलप्रणाली। कञ्चुलिका = कञ्चुकः, स्त्रीणामङ्गरक्षिणी, अर्द्धचोलकः, कूर्पासश्च। "काँचुली" इति, "कुर्ती" इति च प्रसिद्धम्। 'कञ्चुलिका तु कूर्पासे' इति--(श० र० स० पृ० ३३ पं० १७)। 'कूर्पासस्त्वर्द्धचोलकः।' इति च--(हा० व० पृ० ४०६ श्लो० ९७)। आल्लुका = ।
कलिका = कोरकः, मानविशेषः, अंशस्य षष्टिभागश्च। 'कलिका कोरके मता।' इति—(श० र० स० पृ० १० पं० ६)। राका = पौर्णमासी, सम्पूर्णेन्दुतिथिः, नवरजाः कन्या च। 'राका दृष्टरजाः कन्या' इति--(हा० व० पृ० ४०२ श्लो० ३०)। 'राका नवरजोनार्य्यां पूर्णचन्द्रतिथावपि।' इति—(नाना० र० मा० पृ० १२ पं० ७)। पताका = वैजयन्ती, सौभाग्यम्, नाटकाङ्गं च। 'सौभाग्येऽपि पताका स्यात्' इति—(त्रि० शे० पृ० ३१७ श्लो० २९)। 'पताका वैजयन्त्यां च सौभाग्यनाटकाङ्गयोः।' इति च—(मे० पृ० १० श्लो० ११५)। अन्धिका = द्यूतभेदः, रात्रिश्च। 'अन्धिका द्यूतभेदे च रजन्यामपि योषिति।' इति--(मे० पृ० ४ श्लो० ४६)। शूका = शूकशिम्बी। हृल्लेखश्च। 'शूका हृल्लेखे' इति-(अने० सं० पृ० ४ श्लो० २१)। पूपलिका = पूरली, पूपालिका। "माल पूआ" इति। "पुआ" इति च लोके। त्रिका = कूपनेमिः। 'नेमौ कूपस्य च त्रिका।' इति—(ना० र० मा० पृ० १२ पं० २)। चविका = गजपिप्पली। "चव्य" इति लोके। 'चव्या कोला च चविका चव्यं कुञ्जरपिप्पली।' इति हृद्चन्द्रः--इति-(अम० सु० व्या० पृ० १६१ पं० २३)। 'चव्या कोलाऽथ चविका श्रेयसी गजपिप्पली। च्यवना कोलवल्ली तु चव्यं कुञ्जरपिप्पली।' इति च चन्द्रनन्दनः' इति--(अम० सु० व्या० पृ० १६१ पं० २४)। उल्का = आलातम्, अङ्गारम्, ज्वाला, अग्निशिखा, विद्युत्, उत्पातश्च। 'उल्का तु गदिताऽऽलाते विद्युदुत्पातयोरपि।' इति—(श० र० स० पृ० ३ पं० ६)। पञ्जिका = टीका, व्याख्या, पदभञ्जिका, तूलनालिका च। 'पदभञ्जिकापञ्जिका यां स्यात्' इति (श० र० स० पृ० ४९ श्लो १९)। पिण्डिका अवयवान्तरम्, जंघामांसम्। 'पिण्डिकाऽवयवान्तरे।' इति---(श० र० स० पृ० २१ पं० ८)।

'पिण्डिका पिण्डके जंघामांसे स्यात्' इति च—(ना० र० मा० पृ० ६३ पं० १९) । ध्रुवका= आह्वा, धुवका च । क्षिपका=योधा, योद्ध्री, युद्धकर्त्री । कनीनिका=अक्षणस्तारकम् । कनिष्ठाङ्गुलिश्च । 'कनीनिका तारकेऽक्षणः स्यात्कनिष्ठाङ्गुलावपि ।' इति--(मे० पृ० १५ श्लो० १८१) । शम्बूका=जलजन्तुविशेषः, जलशुक्तिश्च । 'जलजन्तुविशेषे च शम्बूका न नपुंसके ।' इति मेदिनेर्द्विलिङ्गता । 'शम्बूका जलशुक्तिषु ।' इति च—(श० र० स० पृ० २८ पं० १६) । शिबिका=याप्ययानम्, नरवाह्यकम् । ''डण्डी'' ''झपान'' ''डोला'' ''पालकी'' ''चौपाला'' इति च लोके बहुविधं प्रसिद्धम् । 'शिबिका नरवाह्यके ।' इति-- श० र० स० पृ० २९ पं० ६) । 'गवेधुका=बीजभेदः, तृणधान्यम्, नागबला च । 'गवेधुका बीजभेदे' इति (श० र० स० पृ० ३५ पं०१५) । कणिका=परमाणुः, अग्निमन्थ-वृक्षश्च । 'कणिका सूक्ष्मवस्तुनि । अग्निमन्थे' इति—(अने० सं० पृ० ५१ श्लो० १९) । 'कणिका कथ्यतेऽत्यन्तसूक्ष्मवस्त्वग्निमन्थयोः ।' इति च—(वि० प्र० पृ० १५ श्लो० १५९) । केका=मयूरवाक् । 'केका मयूरवाचि च ।' इति—(श० र० स० पृ० ४ पं० ३) । विपा-दिका= रोगविशेषः, पादस्फोटः । ''बिवाई'' इति लोके । अयं कुष्ठरोगप्रभेदः । 'पादस्फोटे विपादिका ।' इति—(श० र० स० पृ० ४२ पं० १४) । मिहिका=हिमम् । 'महिका मिहिके हिमे ।' इति—(श० र० स० पृ० २३ पं० १५) । यूका=क्षुद्रजन्तुविशेषः, केशकीटः, स्वेदजः, षट्पदः । ''जूँ'' इति लोके । यादवस्तु पुंसीत्याह--'यूकस्तु शिरसि क्रिमिः ।' इति--(वै० पृ० १५१ श्लो० ३८) । मक्षिका=कीटविशेषः गन्धलोलुपा, वमनीया । ''मक्खी'' इति लोके । 'भम्भराली तु मक्षिका ।' इति--(वै० पृ० २९ श्लो० ४४) । अष्टका=श्राद्धभेदः, पौषादिमासत्रयाणां कृष्णाष्टम्यां श्राद्धक्रियाविशेषः । कूर्चिका=सूचिका । क्षीरविकृतिः, तूलिका च । 'कूर्चिका तूलिकायां स्यात्सूचिकायां च कुड्मले । कपाटोद्घाटने क्षीरविकृतावपि योषिति ।' इति—(श० र० स० पृ० ११ पं० १८) । कूचिका= कूञ्चिका, चित्रलेखनी च । 'कूचिका चित्रलेखन्यां कूचिकायां तु कूंचिका ।' इति--(श० र० स० पृ० १२ पं० १) । टीका=विषमपदव्याख्या, ग्रन्थार्थवर्णनम् । 'टीका ग्रन्थार्थव-र्णने ।' इति—(श० र० स० पृ० ४ श्लो० ९) । कोशिका=पिष्टपचनम् पत्रस्य शुङ्गा च । 'ऋषी चं पिष्टपचनं मल्लो मल्ली च कोशिका ।' इति—(वै० पृ० १६३ श्लो० ५७) । पर्णं बर्हं पतत्रं च त्रयी शुङ्गास्य कोशिका ।' इति च—(वै० पृ० ४६ श्लो० ३३) । कोणिका=वीणाङ्ग (ङ्क) म् । 'वीणाङ्गे (ङ्के) कोणिका मता ।' इति—(श० र० स० पृ० १२ श्लो० १०) । ऊर्मिका=तरङ्गः, वस्त्रभङ्गः, अङ्गुलीयं च । 'ऊर्मिका त्व (चा) ङ्गुलीये स्याद्वस्त्रभङ्गतरङ्गयोः ।' इति—(मे०पृ० ५ श्लो० ५३) । जलौका=रक्तपा । 'रक्तपा तु जलौकायां स्त्रियां, भूम्नि जलौकसः ।' इति--(अम० ना० लि० पृ० १०१ श्लो० २२) ।

जलमोकोऽस्याः । 'ओक उचः के ।' इति निपातितोऽदन्त ओकशब्दः । सान्तोऽपि । 'जलोरगी जलोका तु जलौका च जलौकसि' इति संसारावर्ताद् 'बहुवचनं प्रायिकम्' इति—(अम० सु० व्या० पृ० १०१ पं० ८) 'जलौकापि जलोका स्याज्जलूका जलजन्तुका ।' इति च तारपालः ।' इति—(अम० सु० व्या० पृ० १०१ पं० ९, १०) । प्राचिका = पक्षिभेदः, श्येना । 'श्येनायां प्राचिका' इति—(वै० पृ० २७ श्लो० २०) 'वनमक्षिका' इति मुकुटः । धूका = । कालिका = मेघजालम्, नवाब्दः, चण्डिका, काकी च । 'मेघजाले च कालिका ।' इति—(अम० ना लिं० पृ० ३९९ श्लो० १५) । 'रोमावली मेघमालाकरटीषु च कालिका ।' इति—(हा० व० पृ० ४०८ श्लो० ५१) । 'कालिका चण्डिकाभेदे कार्ष्ण्यं (त्स्र्न्यं) वृश्चिकपत्रयोः । क्रमदेयवस्तुमूल्ये धूसरीनवमेघयोः ।। पटोलशाखारोमालीमांसीकाकीशिवासु च । मेघावलौ च' इति—(मे० पृ० ६ श्लो० ६६, ६७) । 'धूसरीयोगिनीभेदोमानवाब्देषु कालिका । क्रमदेयवस्तुमूल्ये कार्ष्ण्ये काक्यां घनेषु च ।' इति च रभसः इति—(अम० सु० व्या० पृ० ३९९ पं० १२, १३, १४) । दीर्घिका = वापिका, पुष्करिणी । 'दीर्घिकाख्या पुष्करिण्याम्' इति—(श० र० स० पृ० पं०) । 'वापी तु दीर्घिका ।' इति च—(अम० ना० लिं० पृ० १०४ श्लो० २८) । उष्ट्रिका = मृत्तिकाभाण्डभेदः, उष्ट्रस्त्री । 'मृद्भाण्डेऽप्युष्ट्रिका भवेत् ।' इति—(हा० व० पृ० ४०८ श्लो० ६७) । 'उष्ट्रिका मृत्तिकाभाण्डभेदेऽपि करभस्त्रियाम् ।' इति च—(मे० पृ० ५ श्लो० ५२) । शलाका = कामः, शल्यः, शारिका, शल्लकी च । 'शलाका शल्यमदनशारिकाशल्लकीषु च ।' इति (मे० पृ० १३ श्लो० १६१) । बालुका = सिकता । 'बालुका सिकतासु स्यात् ।' इति—(मे० पृ० ११ श्लो० १३२) । 'वालुकापि' 'वालुका सिकतायां स्यात्' इति च—(श० र० स० पृ० २८ पं० १) । ईषिका = शलाकाभेदः, वीरणादिशलाका, तूलिका । "सींक" इति, "सलाई" इति, "तुली" इति च लोके । अक्षिकूटकम्, गजचक्षुर्गोलकम् । काशः, मुञ्जामध्यवर्तितृणम्, दर्भशलाका च । 'इषीका तूलिका समे ।' इति—(वै० पृ० ६४ श्लो० २३५) । 'इषीका त्वक्षिकूटकम् ।' इति च—(अम० ना० लिं० पृ० २७७ श्लो० ३८) । विहङ्गिका = भारयष्टिः । "बहँगी" इति लोके । 'भारयष्टौ विहङ्गिका ।' इति—(श० र० स० पृ० ४२ पं० ३) । इषिका = काशः, तूलिका, गजाक्षिगोलकं च । 'तथा काशे मतेषिका ।' इति—(श० र० स० पृ० ८ पं० ८)। "ईषिका" "ईषीका" चेत्यपि । 'ईषीका स्यादिषीकापि' इति द्विरूपकोशः' इति—(श० चिं० पृ० ३३२ स्तं० १

(१) तथा च प्रयोगः—'सोऽभिमंत्र्यशरेषीकामीषिकास्त्रेण वीर्य्यवान् । काकं तमभि सन्धाय ससर्ज पुरुषर्षभः ।।' इति रामायणम्—इति (श० चिं० पृ ३३२ पं० १८, १९ ।

पं० २६) । ''एषिका'' इत्यपि । 'एषिका तूलिका समे ।' इति––(अम० ना० लिं० पृ० ३४८ श्लो० ३२) उखा = पिठरम्, रन्धनस्थाली । ''हाँडी'' ''भरथिया'' ''भड्डू'' इति च लोके । कृष्णवधूश्च । 'उखा कृष्णवध्वां निगद्यते ।' इति––(श० र० स० पृ० ५३ पं० १०) । परिखा=सालवेष्टनम्, सर्वतः खेयम्, राजधान्यादीनां खातरूपवेष्टनम् । ''खाई'' इति लोके । 'परिखा सालवेष्टनम्' इति (श० र० स० पृ० ५५ पं० ८) । विशिखा खनित्री, रथ्या, नलिका च । 'विशिखा तु निगद्यते । खनित्र्यामपि रथ्यायां नलिकायामपि क्वचित् ।' इति—(श० र० स० पृ० ५५ पं० १०) । शाखा = द्रुमाङ्गम्, वेदभागश्च 'शाखा पक्षान्तरे बाहौ वेदभागद्रुमाङ्गयोः ।' इति—(मे० पृ० २० श्लो० ५) । शिखा= शाखा, शिफा, बर्हिचूडा च । 'शिखा शाखाबर्हिचूडालाङ्गलिक्यग्रमात्रके ।। चूडामात्रे शिखायां च ज्वालायां प्रपदेऽपि च ।' इति––(मे० पृ० २० श्लो० ६) भङ्गा = शणाख्य-सस्यान्तरम्, मातुलानी, विजया । ''भांग'' इति लोके । त्रिवृता च । 'भङ्गा सस्यान्तरे स्त्रियाम् ।' इति––(मे० पृ० २२ श्लो० ११) । 'भङ्गा सस्यं सणाह्वयम् ।' इति (अने० ध्व० मं० पृ० २० श्लो० १७४) । सुरङ्गा = विवरविशेषः । ''सुरङ्ग'' इति ख्यातः । 'सन्धिः सुरङ्गा' इति––(त्रि० शे० पृ० ३०५ श्लो० ९) । अमरोऽपि––(अम० ना० लिं० पृ० ४५१ श्लो० ७, ८) ।

लङ्का शेफालिका टीका धातकी पञ्जिका-ऽऽढकी ।।
सिध्रका सारिका हिक्का प्राचिको–ल्का पिपीलिका ।
तिन्दुकी कणिका भङ्गि सुरङ्गा' इति ।

एतयो र्व्याख्या—

लङ्केति । एते लङ्कादयः सुरङ्गान्ताः शब्दाः योषिल्लिङ्गा भवन्ति । लङ्का = रक्षसां राजधानी, धान्यविशेषश्च । ''काला चना'' इति लोके । 'लङ्का रक्षःपुरीशाखाशाकिनी-कुलटासु च ।' इति––(मे० पृ० ३ श्लो० ३३) । 'लङ्का रसाली त्रिपुटी कलाया रूक्षणा-त्मिका ।' इति हरिचरणसेनः––(पर्य्यायमुक्तावल्यां पृ० ३१ पं० ५) । शेफालिका= पुष्पभेदः, वृक्षभेदश्च । स तु ''निर्गुण्डी'' इति प्रसिद्धः । 'शेफालिका तु निर्गुण्ड्याम्' इति–– (श० र० स० पृ० ४३ पं० १६) । धातकी = वृक्षभेदः । ''धायटी'' इति प्रसिद्धा । 'धातकी तरुभेदे स्यात्' इति—(श० र० स० पृ० १९ पं० ८) । आढकी = तुवरी । ''तूर'' इति प्रसिद्धा । 'तुवर्य्यामाढकी मता ।' इति—(श० र० स० पृ० ७ पं० १७) सिध्रका = वृक्ष-भेदः । ''सीध'' इति प्रसिद्धः । 'सिद्धवृक्षस्तु सिध्रका (कः)' इति माधवकरः––(पर्य्यायरत्न-

मालायां पृ० ३१ पं० ४) । सारिका = पक्षिभेदः । ''सालुंकी'' इति प्रसिद्धा । 'वरण्डा चित्रपादा च चित्रनेत्रा च सारिका ।' इति—(हा० व० पृ० ४०० श्लो० ८९) । 'सारिका मधुरालापा दूती मेधाविनी च सा ।' इति--(रा० नि० पृ० २७७ श्लो० ४७२) । 'शारिका' इत्यपि । हिक्वा = स्वरभेदः, उर्ध्वे वातप्रवृत्तौ शब्दविशेषः । ''उचकी'' इति प्रसिद्धः । पक्षिभेदः, पेचिका च । 'पेचिका पुनः ॥ उलूकचेटि हिक्वा स्यात्कनकाक्षी च पिङ्गला ।' इति—(वै० पृ० २७ श्लो० २१) । 'हिक्का हेक्का च हिक्किका ।' इति च--(वै० पृ० १८३ श्लो० १२७) । पिपीलिका = कीटभेदः । ''मुंगी'' इति प्रसिद्धा । 'पिपीलिका तु हारी स्यात्' इति—(त्रि० शे० पृ० २८८ श्लो० २७) । 'शनैर्याति पिपीलकः ।' इति पुंस्त्वमपि इति क्षरिस्वामी--(अम० सु० व्या० पृ० ४५१ स्तं २ पं० ३२) । तिन्दुकी = वृक्षभेदः । ''टेंभुरणी'' इति प्रसिद्धा । 'तिन्दुको वृक्षभेदे स्यात्' इति-(श० र० स० पृ० १८ श्लो० २) । भङ्गिः = कौटिल्यभेदः, विच्छित्तिर्वा । 'व्याजच्छलनिभे भङ्गिर्वैदग्धीभनिमीलिका ।' इति रभसः, इति--(अम० सु० व्या० पृ० ४५२ स्तं १ पं० ३,४) । शेषं प्राग्वत् ।

दुर्गसिंहस्तु क्रमरहितान् कान्तादीन् गान्तान्तान् स्त्रीलिङ्गवाचकशब्दानाह--(दु० लिं० पृ० २ श्लो० ३, ४, ५) ।

नवमालिका बलाका गवेधुको–ल्का कृकाटिका यूका ।
शेफालिका शलाका हसन्तिका हसनिका केका ॥
झिरुका लङ्का स्पृक्का करुणेषीका च वालुके–ष्टकया ।
त्विट् पुत्तिका पताकाऽथ मालिका मानिका नाडिः ॥
शाखा शिखा विशाखा परिखा रेखा सुरङ्गया' इति ।

अनयोः सार्द्धश्लोकद्वयो र्व्याख्या––

नवमालिकेति । झिरुकेति । शाखेति च । एते नवमालिकादयः सुरङ्गान्ताः शब्दा इष्टकया सुरङ्गया च सह स्त्रीलिङ्गा भवन्ति । नवमालिका = पुष्पविशेषः, नवमल्लिका, ग्रीष्मोद्भवा, सप्तला । ''नेवारा'' इति । 'नेवारी'' इति च लोके । 'कुमारिका ग्रीष्मभवा सुगन्धा वनमालिका ।' इति--(प० र० मा० पृ० १६ पं० १२) । 'अथ सप्तलायां तु सप्तला नवमल्लिका ।' इति--(रा० नि० पृ० ४२५ श्लो० ४२) । बलाका = पक्षिविशेषः, बकभेदः । 'बलाका- ब्रिसकण्ठिका ।' इति--(अम० ना० लिं० पृ० १९६ श्लो० २५) । 'बलाका विषकण्ठी स्याच्छुष्काङ्गी दीर्घकन्धरा ।' इति--(रा० नि० पृ० ४०५ श्लो० २१) ।

'बलाका वर्हिगश्चैव मेघानन्दः प्रकीर्तितः।' इति च--(रा० नि० पृ० ४२३ श्लो० २)। कृकाटिका=शिरोधरैकदेशः, ग्रीवायामुन्नतभागः। "घाटी" इति ख्यातः। ग्रीवापश्चाद्भाग इति स्वामिमुकुटौ। 'अवटुर्घाटा कृकाटिका।' इति--(अम० ना० लिं० पृ० २३३ श्लो० ८८)। 'अवटस्तु शिरः पश्चात्सन्धिर्घाटा कृकाटिका।' इति च--(रा० नि० पृ० ३९७ श्लो० २७)। शेफालिका=लतासमुदायविशेषः, तत्पुष्पम्, कृष्णपुष्पा, निर्गुण्डी च। "न्यवारी" इति ख्याता। 'शेफालिका तु सुवहा निर्गुण्डी नीलिका च सा॥' इति—(अम० ना० लिं० पृ० १५२ श्लोकः ७०)। हसन्तिका, हसनिका च द्वेऽप्यङ्गारशकट्यौ। "अङ्गेठी" "बोरसी" "त्रिरौसी" "बरौसिया" इति च लोके। 'अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि। हसन्यपि' इति—(अम० ना० लिं० पृ० ३११ श्लो० २९)। 'हसन्तिकाऽङ्गारधान्याम्' इति च--(श० र० स० पृ० ४५ पं० ५)। स्पृक्का=सुगन्धिद्रव्यविशेषः, शाकभेदः, पृक्का। "अस्यर" "अस्परक" "विडारशाक" इति च लोके। 'मरुन्माला तु पिशुना स्पृक्का देवी लता लघुः।' इति--(अम० ना० लिं० पृ० १७३ श्लो० १३३) 'स्पृक्का तु ब्राह्मणी देवी' इति वाचस्पतिः' इति--(अम० सु० व्या० पृ० १७३ स्तं० २ पं० १७)। 'मता स्पृक्कौषधान्तरे।' इति--(श० र० स० पृ० ६ पं० ५) 'पृक्का' इत्यपि। 'पृक्का च महिला वधूः।' इति--(त्रि० शे० पृ० ३४६ श्लो० २२३)। करुणा=कृपा। 'करुणो रसवृक्षयोः। करुणा तु कृपायां स्यात्' इति—(अने० सं० पृ० ६५ श्लो० २०५)। त्विट्=दीप्तिः, शोभा, वाक् च। 'त्विट् शोभापि' इति--(अम० ना० लिं० पृ० ४३७ श्लो० २२५)। 'कान्तौ वाचि रुचौ त्विट् स्त्री' इति च रभसः' इति—(अम० सु० व्या० पृ० ४३७ स्तं० १ पं० १३)। पुत्तिका=मधुमक्षिकाविशेषः। 'पतङ्गिका पुत्तिका स्यात्' इति--(अम० ना० लिं० पृ० १९७ श्लो० २७)। अथानन्तरम्। मालिका=पंक्तिः, पुष्पविशेषः, गृहविशेषः, मद्यं च। 'आवलिः पद्धतिः पंक्तिरालिर्लेखा च मालिका।' इति--(वै० पृ० १८८ श्लो० २४)। 'सुगन्धा ग्रैष्मिका ताना मालिका नवमालिका।' इति--(वै० पृ० ६० श्लो० १८६)। 'मेठो हर्म्यश्च मालिका।' इति—(वै० पृ० १६१ श्लो० २९)। 'कपिशीका च मालिका।' इति च--(त्रि० शे० ४०५ श्लोकः ४२३)। नाडिः=कन्दली, धमनिः, व्रणविशेषः, घटिका, शिरा च। 'नाडी नाले व्रणान्तरे। शिरायां गण्डदूर्वायां चर्य्यायां कुहनस्य च। तथा षट्क्षणकालेऽपि' इति--(श० र० स० पृ० ९७ पं० १९, २०, २१)। विशाखा=नक्षत्र

---

(१) तथा च प्रयोग—'हसन्तीं च हसन्तीं हसन्तीं वामलोचनाम्। हेमन्ते ये न सेवन्ते ते नरा मन्दभागिनः।' इति। हसन्ती=अङ्गारधानी। हसन्ती=मल्लिकाप्रभेदः। हसन्तीः स्त्री चेयेतास्तिस्त्रो ये नरा हेमन्ते न सेवन्ते ते मन्दभागिनः स्युः।

विशेषः, षोडशनक्षत्रम्, कठिल्लकश्च । 'विशाखा भे कठिल्लके ।' इति—(अने० सं० पृ० ५८ श्लो० ११३) । रेखा = आलिः, आवलिः । 'रेखायामावली रेखा' इति—(वै० पृ० २२२ श्लोकः ३२) । शे० प्रा० ।

अथेदानीं जंघादीन् सुधापर्य्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ३ श्लोकः ३१, ३२, ३३, ३४) ।

जंघा चञ्चा कच्छा पिच्छा पिञ्जा गुञ्जा खजा प्रजा ।
झञ्झा घटा जटा घोण्टा पोटा भिस्सटया छटा ।।१४।।
विष्ठा मञ्जिष्ठया काष्ठा पाठा शुण्डा गुडा जडा ।
वेडा वितण्डया दाढा राढा रीढा च लीढया ।।१५।।
घृणो–र्णा वर्वणा स्थूणा दक्षिणा लिखिता लता ।
तृणता त्रिवृता त्रेता गीता सीता सिता चिता ।।१६।।
मुक्ता वार्त्ता लूता–ऽनन्ता प्रसृता मार्जिताऽमृता ।
कन्था मर्यादा गदे–क्षुगन्धा गोधा स्वधा सुधा ।।१७।।' इति ।

एषां व्याख्या—

जंघेति । विष्ठेति । घृणेति । मुक्तेति च । एते जंघादयः सुधान्ताः शब्दा भिस्सटया मञ्जिष्ठया वितण्डया लीढया च सह स्त्रीलिङ्गा भवन्ति । जंघा = अङ्गविशेषः, जाघनी । 'प्रसृता जाघनी जंघा' इति––(वै० पृ० १७७ श्लोकः ५८) । चञ्चा = तृणमयपुरुषः । "वजू" इति लोके । चञ्चा तु तृणनिर्मितपुरुषे ।' इति––(श० र० स० पृ० ७१ श्लो० ९) । कच्छा = चीरिका । "झिल्ली" इति, "मजीरा" इति च भाषायाम् । वाराही, गृष्टिभेषजम्, परिधानापराञ्चलः । "काछ" इति लोके । 'वाराही चीरिका कच्छा' इति––(त्रि० शे० पृ० ३२५ श्लो० ८०) । 'चीरिकायां च कच्छा च स्त्रियाम्' इति च––(श० र० स० पृ० ७४ श्लो० १०) । पिच्छा = ओदनमण्डः, शाल्मलिनिर्यासः, मोचा, आश्रमपादपश्च । 'पिच्छा पूगच्छटाकोषे चोलिकाफणिलालयोः ।' इति—(हा० व० पृ० ४०७ श्लोकः २३०) । 'पिच्छा पूगच्छटाकोषमोचाशाल्मलिवेष्टके । भक्तसम्भूतमण्डे च पंक्तावश्वपदामये । स्त्रियाम्' इति च—(मे० पृ० २९ श्लोकः ३) । पिञ्जा = तूलम्, हरिद्रा, तूलपिञ्जिका च । 'पिञ्जा तूल-हरिद्रयोः । पिञ्जा स्त्रियां मता तूलपिञ्जिकायां बुधोत्तमैः ।' इति––(श० र०स० पृ० ७६ श्लोकः १९, २०) गुञ्जा = रक्तिका । "रत्ती" इति––"घोंगची" इति च लोके । पटहः,

कलध्वनिश्च । 'गुञ्जोक्ता तु कलध्वनौ । पटहे काकचिञ्चायाम्' इति--(श० र० स० पृ० ७६ श्लोकः ११) । खजा = मन्थः, प्रहस्तश्च। 'खजा मन्थप्रहस्तयोः ।' इति--(श० र० स० पृ० ७६ श्लोकः ८) । प्रजा = लोकः, जनः, सन्तानश्च । 'प्रजा जने च सन्ताने' इति--(श० र० स० पृ० ७६ श्लोकः १९) । 'प्रजा तु जनपुत्रयोः ।' इति—(वै० पृ० २२१ श्लोकः २३) । 'स्त्री तु प्रसूतिः सन्ततिः प्रजा ।' इति च--(वै० पृ० १७६ श्लोकः ४१) । झञ्झा = ध्वन्यन्तरम् अम्बुकणवृष्टिश्च । 'झञ्झा ध्वन्यन्तरे मता । अत्यम्बुकणवृष्टावप्युक्ता सा शब्दवेदिभिः ।' इति--(श० र० स० पृ० ८१ श्लोकः ८) । घटा = गजसंहतिः, घटना, घटनम्, गोष्ठी, समूहश्च । 'घटा घटनगोष्टीभघटनासु च योषिति ।' इति--(मे० पृ० ३४ श्लो० १२) । जटा = केशबन्धविशेषः, लग्नकचः, मांसी, वृक्षमूलं च । 'जटा मांस्यां लग्नकचे वृक्षमूले' इति--(श० र० स० पृ० ८४ पं० १८) । घोण्टा = बदरी, पूगवृक्षश्च । 'घोण्टा तु बदरीपूगवृक्षयोश्च निगद्यते ।' इति--(श० र० स० पृ० ८४ पं० १५) । पोटा = पुरुषलक्षणा स्त्री । 'पोटेति गदिता सद्भिर्या स्त्री पुरुषलक्षणा ।' इति--(श० र० स० पृ० ८५ पं०१८) । भिस्सटा = दग्धिका, दग्धान्नम्, दग्धौदनम् । 'भिस्सटा दग्धिका' इति--(अम० ना० लिं० पृ० ३१९ श्लोकः ४९) । 'दग्धान्नं भिस्सिटा झिल्ली' इति च--(वै० पृ० १६५ श्लोकः ७७) । छटा = दीप्तिः, परम्परा, संघातविशेषश्च । 'छटा समूहे कान्तौ च वेष्टने च' इति--(ना० मं० पृ० २४ पं०७३) । विष्ठा = पुरीषम् । 'वर्च्चः किट्टं पुरीषो विड् विष्ठोच्चारः शकृन्मलम् ।' इति--(पं० र० मा० पृ० २६ पं०२५) । मञ्जिष्ठा = रागद्रव्यविशेषः । "मँजीठ" इति लोके । 'मञ्जिष्ठा विकसा जिङ्गी' इति--(अम० ना० लिं० पृ० १५९ श्लोकः ९०) । काष्ठा = दिक्, दारुहरिद्रा, कालमानम्, प्रकर्षः, स्थानमात्रं च । 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः ॥ स्थानमात्रे दिशि च स्त्री' इति—(मे० पृ० ३८, ३९ श्लोकः २, ३,) । 'काष्ठा निशा ककुप् काष्ठा काष्ठा प्रोक्ता वसुन्धरा । काष्ठा कालविशेषः स्यात्काष्ठं दारु निगद्यते ॥' इति च--(अने० ध्व० मं० पृ० ८ श्लोकः ६९) पाठा = ओषधिविशेषः, विद्धकर्णी । "पाठा" इति लोकेऽपि । 'पाठस्तु पठने ख्यातो, विद्धकर्ण्यां तु योषिति ।' इति--(मे० पृ० ३९ श्लोकः ७) । शुण्डा = हस्तिहस्तः, हाला, सुरा, पानागारञ्च । 'शुण्डापानगृहहस्तिहस्तसुरा च । अप्यम्बुहस्तिनीवेश्यास्वपि' इति--(श० र० स० पृ० ९८ पं० १४, १५) । गुडा—गुडिका, बृहद्वटिका, स्नुही । "सेहुण्ड" इति लोके । उशीरी, लघुकाशश्च । 'गुडा स्नुह्यां च कथिता गुडिकायां च योषिति ।' इति—(मे० पृ० ४१ श्लोकः १०) । 'गुडो गोलेक्षुविकृती स्नुहीगुडिकयोर्गुडा ।' इति रुद्रः' इति—(अम० सु० व्या० पृ० १६४ स्तं० १ पं० १८) । गुडश्च ।

'सुङ्गीगुडयोर्गुड ऐक्षवगोलयोः ।' इति चाजयः' इति--(अम० सु० व्या० पृ० १६४ स्तं० १ पं० १९) । जडा= शूकशिम्बी । ''कँवाच'' इति लोके । 'जडा स्त्रियाम् । शूकशिम्बाम्' इति--(मे० पृ० ४१ श्लोकः १३) । वेडा=नौका । 'वेडी' इत्यपि । वितण्डा= वादभेदः, कच्चीशाकं च । 'वितण्डा वादभेदे स्यात्कच्चीशाकेशिलाह्वये । करवीर्य्यामपि स्त्री स्यात्' इति—(मे० पृ० ४३ श्लोकः ३६) । दाढा=दंष्ट्रा, अभिलापश्च । 'दाढा स्यादपि दंष्ट्रायामभिलाषे च कीर्त्यते ।' इति—(मे० पृ० ४३ श्लोकः २) । राढा=जनपदविशेषः, सुह्मदेशः, गौडदेशे पुरीविशेषः, शोभा, युतिश्च । 'राढा देशान्तरे युतौ ।' इति—(अने० ति० पृ० २८ श्लोकः २५३) । 'राढा स्त्री सुह्मशोभयोः ।' इति—(मे० पृ० ४४ श्लो० ३) । 'राढः स्याद्देशभेदेऽपि, स्त्रियां स्यात्सुह्मशोभयोः ।' इति च—(श० र० स० पृ० १०२ पं० ३) । रीढा=अवमानना, अवज्ञा, गतिश्च । 'रीढाऽवमाननागत्योः' इति–(अने० ति० पृ० २८ श्लोकः २५३) । लीढा= । घृणा=जुगुप्सा, कृपा च । 'घृणा जुगुप्साकृपयोः' इति--(मे० पृ० ४५ श्लोकः १२) । ऊर्णा=मेषादिलोम, भ्रुवोरन्तरावर्तकं च । 'ऊर्णा मेषादिलोम्नि स्यादन्तरावर्त्तके भ्रुवोः ।' इति—(मे० पृ० ४५ श्लो० ३) । वर्वणा=बृहन्मक्षिका, नीलमक्षिका, नीलवर्णमक्षिका । 'वर्वणा मक्षिका नीला' इति—(अम० ना० लिं० पृ० १९७ श्लोकः २६) । स्थूणा=गृहादीनामुत्तम्भनकाष्ठम्, सूर्म्मी, रोगान्तरं च । ''स्थूणा स्यात् सूर्म्या स्तम्भेऽपि वेश्मनः, (गृहस्य च) ।' इति--(मे० पृ० ४७ श्लो० ३२) । 'स्थूणा सूर्म्या स्तम्भे रुगन्तरे ।' इति च--(अने० सं० पृ० १४ श्लोकः १५८) । दक्षिणा=यज्ञादिविधिदानम्, दिक् च । 'यज्ञादिविधिदाने दिशि स्त्रियाम् ।' इति--(मे० पृ० ४८ श्लोकः ५१) । 'दक्षिणो दक्षिणोद्भूतसरलच्छन्दवर्तिषु ।। अवामे त्रिषु, यज्ञादिविधिदाने दिशि स्त्रियाम् ।' इति च--(श० र० स० पृ० १११ पं० १६, १७) । लिखिता=धर्म्मशास्त्रप्रवर्तकमुनिपत्नी । लता=व्रततिः, वल्ली, शाखा, सुन्दरस्त्री च । 'लता कस्तूरिकाशाखादूर्वावल्लीप्रियङ्गुषु । पिपीलिकायां माधव्यां ज्योतिष्मत्यूर्णनाभयोः ।' इति--(ना० र० मा० पृ० २७ पं० ६, ७) । 'लता वीरुत्स्त्रियोः स्पृक्कामाधव्योश्च प्रियङ्गुनि । कस्तूरिकायां शाखायाम्' इति च--(श० र० स० पृ० १३१ श्लोकः १९) । तृणता=कार्मुकम्, धनुः, तृणत्वं च । 'तृणता धनुषि तृणत्वे' इति--(मे० पृ० ६२ श्लो० ११४) । त्रिवृता=औषधिविशेषः, शुक्लत्रिधारा । 'त्रिपुटा त्रिवृता त्रिवृत् ।' इति--(अम० ना० लिं० पृ० १६४ श्लोकः १०८) । त्रेता=युगविशेषः, अग्नित्रितयं च । 'त्रेता युगेऽग्नित्रितये' इति--(मे० पृ० ५५ श्लोकः २३) । सीता=जानकी । लाङ्गलपद्धतिः, लाङ्गलकृतरेखा । ''कूंड़'' इति लोके । व्योमगङ्गा, स्वर्गगङ्गा, अलकनन्दा च । 'सीता लक्ष्मीरुमा सीता सीता शस्याधिदेवता । सीता सीरध्वजापत्यं सीता मन्दाकिनी मता ।। सीता

चालकनन्दा च चक्षुर्भद्राऽच्युता क्रमात् ।' इति—(अने० ध्व० मं० पृ० ७ श्लो० ५४, ५५) । 'सीता लाङ्गलपद्धतिवैदेहीस्वर्गगङ्गासु ।' इति—(मे० पृ० ५९ श्लो० ७१) । 'शीता' इत्यपि—'शीता नभः सरिति लाङ्गलपद्धतौ च शीता दशाननरिपोः सह धर्म्मिणी, च । शीतं स्मृतं हिमगुणे च तदन्विते च, शीतोऽलसे च बहुवारतरौ च दृष्टः ।' इति तालव्यादौ धरणिः' इति (अम० सु० व्या० पृ० ३०६ स्तं० १ पं० ३२, ३३) । सिता = शर्करा । ''मिश्री'' इति लोके । 'सिता (धवला) यां स्त्री' इति—(मे० पृ० ५९ श्लो० ७१) चिता = चित्या, संहतिश्च । 'चिता चित्यायां संहतौ स्त्रियाम् ।' इति—(मे० पृ० ५५ श्लो० १८) । मुक्ता = मौक्तिकम् । ''मोती'' इति लोके । 'मुक्ता तु मौक्तिके, मुक्तः प्राप्तमुक्ते च मोचने ।' इति—(वि० प्र० पृ० ५९ श्लो० ३९) । वार्ता—वर्तनम् । वातिङ्गणः, कृष्यादिः, वृत्तिश्च । 'वार्ता, वातिङ्गणे वृत्तौ वार्ता कृष्याद्युदन्तयोः । वृत्तिमन्नीरुजो वार्ता, वार्तमारोग्यफल्गुनोः ।' इति—(वि० प्र० पृ० ६० श्लोकः ४६) । 'वार्त्तं फल्गुन्यरोगे स्यादारोग्ये वृत्तिमत्यपि ।' इति धरणिः' इति—(अम० सु० व्या० पृ० ४१० स्तं० १ पं० १७) । 'निःसारारोग्ययोर्वार्तं, नीरुग् वार्तोऽथ वृत्तिमान् । कृष्यादाविष्यते वार्त्ता वर्त्तनोदन्तयोरपि । वार्त्ताकेऽपि क्वचिद् वार्त्ता' इति च—(अने० समु० पृ० ४ श्लो० २९) । लूता—ऊर्णनाभः, पिपीलिका, गदान्तरं च । 'लूता तूर्णनाभे पिपीलिकागदान्तरे ।' इति—(मे० पृ० ५७ श्लोकः ५२) । अनन्ता = पृथिवी, विशल्या, गुडूची च । 'अनन्ता च विशल्यायां शारिवादूर्वयोरपि । कणादुरालभापथ्यापार्वत्यामलकीषु च । विश्वम्भरागुडूच्योः स्यादनन्तं सुरवर्त्मनि । अनन्तः केशवे शेषे पुमान्निरवधौ त्रिषु ।' इति—(मे० पृ० ६० श्लो० ८१, ८२) । 'अनन्तं विपुले वारि, व्योम्न्यनन्ते हरौ बले । शेषे, ऽनन्ता महीहैमवतीदूर्वाऽमृतासु च ॥' इति च—(अने० ति० पृ० ३९ श्लो० ६) । प्रसूता = जंघा । 'जंघायां प्रसूता मता ।' इति—(मे० पृ० ६३ श्लो० १२४) । मार्जिता = रसाला, शिखरिणी, दधिमधुशर्करामरीचार्द्रादिभिः कृतं लेह्यम् । ''शिखरिण'' इति ख्याता । रचना तु—'अर्धाढकः सुचिरपर्य्युषितस्य दध्नः खण्डस्य षोडशपलानि शशिप्रभस्य । सर्पिः पलं मधु पलं मरिचं द्विकर्षं शुण्ठ्या पलार्धमपि चार्द्धपलं चतुर्ण्णाम् ॥ सूक्ष्मे पटे ललनया मृदुपाणिघृष्टा कर्पूरधूलिसुरभीकृतपात्रसंस्था । एषा वृकोदरकृता सरसा रसाला, या स्वादिता भगवता मधुसूदनेन । 'पुरुषोत्तमेन' इति पाठान्तरम् सूदशास्त्रे इति—(अम० सु० व्या० पृ० ३१७ स्तं० २ पं० २७, २८, २९, ३०, ३१) । 'रसालायां तु मार्जितः । शिखरिणी' इति हैमनाममाला' इति—(अम० सु० व्या० पृ० ३१७ पं० ३२) । 'रसाला तु मार्जिता ।' इति च— (अम० ना० लि० पृ० ३१७ श्लोकः ४४) । अमृता = पथ्या । गुडूची । आमलकी च । 'अमृता तु भवेत्पथ्यागुडूच्यामलकीषु च ।' इति—(श० र० स० पृ० १३६ श्लो० ६) । कन्था = मृण्मयभित्तिः, प्रावरणान्तरं च । 'कन्था मृण्मयभित्तौ स्यात्तथा

प्रावरणान्तरे ।' इति—(मे० पृ० ७२ श्लो० ३) । मर्यादा = सीमा, स्थितिश्च । 'मर्यादा सीमनि स्थितौ ।' इति—(मे० पृ० ७७ श्लो० ३७) । गदा = आयुधविशेषः । 'गदः कृष्णानुजे रोगे, गदा प्रहरणान्तरे ।' इति—(अने० सं० पृ० २० श्लो० २२८) । इक्षुगन्धा = कोकिलाक्षः, गोक्षुरश्च । 'इक्षुगन्धा कोकिलाक्षे क्रोष्ट्र्यां काशे च गोक्षुरे ।' इति—(मे० पृ० ८२ श्लो० ४४) । गोधा = तलः, निहाका । 'गोधा तले निहाकायाम्' इति—(श० र० स० पृ० १८० श्लो० ११) । स्वधा = पितृदानार्थो मंत्रविशेषः । सुधा = अमृतम् । लेपविशेषश्च । "सफेदी" इति लोके । 'सुधाऽमृते स्नुहीमूर्वालेपगाङ्गेष्टिकासु च ' इति—(श० र० स० पृ० १८२ पं० १३) ।

अमरोऽपि—(अम० ना० लिं० पृ० ४५१, ४५२ श्लोकः ८, ९) ।

... ... सूचि–माढयः ॥
पिच्छा–वितण्डा–काकिण्य–श्चूर्णिः शाणी द्रुणी दरत् ।
सातिः कन्थाऽऽसन्दी' इति ।

अस्य व्याख्या—

सूचीति । पिच्छेति च । सूचिः = व्यधनी, शिखा, नृत्यभेदश्च । 'स्त्री सूचिर्नृत्यभेदे च व्यधनीशिखयोरपि ।' इति रत्नकोषः' इति—(अम० सु० व्या० पृ० ४५२ स्तं० १ पं० ८, ९) । माढिः = पत्रशिरा, पत्रमाडिका, पत्रभङ्गिः । "सारी" इति लोके । दैन्यप्रकाशनं च । 'माटिः पत्रशिरा' इति रत्नकोषः' इति—(अम० सु० व्या० पृ० ४५२ स्तं० १ पं० १०) । 'माढिर्दैन्यं पत्रशिरा' इति—(अने० सं० पृ० १२ श्लोकः १३२) 'माढिः स्त्री पत्रभङ्गौ च दैन्यस्यापि प्रकाशने ।' इति च—(मे० पृ० ४४ श्लोकः २) । काकिणी = पणोदमान-मानदण्डमाषाणां चतुर्थांशः, एकवराटकः, रक्तिका च । 'काकिण्येकवराटके । मानदण्डस्य तुर्य्यांशे माषस्य च पणस्य च ।' इति—(ना० र० मा० पृ० ७६ पं० ८, ९) । 'काकिणी पणतुर्य्यांशे मानदण्डे च दृश्यते । कृष्णलैकवराट्योः स्यादुन्मानस्यांशकेऽपि च ।' इति—(मे० पृ० ४८ श्लोकः ४२) । 'पणगण्डकयोस्तुर्य्य उदमानस्य काकिणी ।' इति रुद्रः' इति—(अम० सु० व्या० पृ० ४५२ स्तं० १ पं० २३, २४) । हारावल्यां तु नान्तेऽप्याह—'काकिणी पणतुर्यांशे' इति—(हा० व० पृ० ४०३ श्लोकः ४४) । रभसोऽपि—'पणोदमानगण्डानां तुर्य्यांशेऽपि च काकिणी ।' इति—(अम० सु० व्या० पृ० ४५२ स्तं० १ पं० २४, २५) । आढकस्य पञ्चाशत्तमोभाग उदमानः । उक्तं च गणितावल्याम्—'कुल्या स्यादष्टभिर्द्रोणैर्द्रोणपादेन चाढकः । अतोऽर्द्धशतिको भाग उदमानमुदाहृतम् ।' इति च—(अम० सु० व्या० पृ० ४५२ पं० २६, २७, २८) ।

चूर्णिः = गद्यम्, पातञ्जलमहाभाष्यम्, कपर्दकः, शतसंख्यककपर्दकाश्च । "चूर्णी" इत्यपि । 'चूर्णिर्गद्ये स्त्रियां, चूर्णं क्षोदे क्षारान्तरेऽपि तत् ।' इति--(ना० र० मा० पृ० २५ पं० १६) । 'अथ चूर्णी कपर्दके । चूर्णो धूलौ क्षारभेदे, चूर्णानि वासयुक्तिषु ॥' इति--(मे० पृ० ४५ श्लोकः १२) । 'चूर्णानि वासयुक्तिषु । चूर्णं क्षोदे क्षारभेदे' इति--(अने० सं० पृ० १३ श्लोकः १४२-३) चूर्णानि प्रायेण बहुवचनान्तः' इत्यनेकार्थकैरवाकरकौमुदी । 'चूर्णी चोक्ता कपर्देऽपि, चूर्णो धूलौ निगद्यते । क्षारभेदे च चूर्णं स्यात्सुवासयुक्तिके तथा ।' इति च—(श० र० स० पृ० १०५ पं० ५) । शाणी = प्रावरणान्तरम्, शणपटविशेषः । 'शाणो माषचतुष्टये । लोहादीनां च निकषे, शाणी प्रावरणान्तरे ।' इति--(मे० पृ० ४७ श्लोकः २९, ३०) । द्रुणी = कच्छपी, जलद्रोणी, नौकायाः सेकभाजनं च । द्रोण्यम्बुद्रोणीकच्छप्योः' इति-(मे० पृ० ४६ श्लोकः १७) । 'द्रुणी कुर्म्यां जलद्रोण्याम्' इति--(अने० सं० पृ० १३ श्लोकः १४६) । 'द्रुणं चापे निगद्यते । तथा मतोऽलिनि द्रुणो, द्रोणीकच्छपयोर्द्रुणी ।' इति च--(श० र० स० पृ० १०५ पं० १७-१८) । दरत् = म्लेच्छजातिः, प्रपातः, भयम्, पर्वतः, हृदयम्, कूलम्, तीरं च । 'दरद् स्त्रियां प्रपातेऽपि भयपर्वतयोरपि ॥' इति--(मे० पृ० ७६ श्लोकः ३०) । 'दरत्प्रपातेऽद्रिभये (वे)' इति च--(वि० प्र० पृ० ८० श्लोकः ३३) । सातिः = दानम्, अवसानं च । 'सातिर्दानेऽवसाने स्त्री' इति--(मे० पृ० ५९ श्लोकः ६९) । आसन्दी = आसनभेदः । "वेत्रासनमिति प्रसिद्धम् ।" 'आसन्दो वासुदेवे स्यात्खट्वाभेदे च योषिति ।' इति--(मे० पृ० ७६ श्लोकः २०) ।

दुर्गस्तु क्रमरहितान् जंघादीन् राधान्तान् स्त्रीलिङ्गवाचकशब्दानाह- (दुर्ग० लिं० पृ० २ ३, ४, श्लोकः ५, ६, ७, ८, ९, १०) ।

... ... जंघा ।
चञ्चा वचा च चञ्चुः प्रियङ्गु–सरघा–स्फुलिङ्गा गौः ॥
पिच्छा–रज्जु–यदृच्छा गुञ्जा राजि–प्रजा–ऽऽजयो याच्ञा[1] ।
घाटा–कोटि–जटा–त्रोटि–भ्रुकुटि–सटा–त्रुटिः कोटी ॥
विष्ठा मञ्जिष्ठा काष्ठा सधनिष्ठा–श्रविष्ठया–घण्टा ।
पाठा शुण्डा क्रोडा चूडा माढि–वितण्डो–डुः ॥
वीणा धिषणा तूणा स्थूणा श्राणा द्रुणी घृणा घोणा ।
ऊर्णा–ऽऽषाढा तृष्णा किङ्किण्या काकिणी विपणिः ॥

पाणिनीयेऽपि –(१) (याच्ञा स्त्रियाम्) ॥ याच्ञा = प्रार्थना । सि० कौ० पृ० ३९८ सू० ४० ।

सिकता मुक्ता त्रेता त्रिवृताऽथलता च दीधिति-र्वर्त्तिः ।
वीथी गाथा कन्था कुथा च गीता गदा वेदिः ॥
अजमोदा द्वाः पोटा गोधा मेधा सुधाऽनुराधा च ।
राधा' इति ।

एषां व्याख्या—

जंघेति । पिच्छेति । विष्ठेति । वीणेति । सिकतेति । अजमोदेति च । एते जंघादयो राधान्ताः शब्दाः सधनिष्ठाथविष्ठया किङ्किण्या च सह स्त्रीलिङ्गा भवन्ति । वचा= औषधिविशेषः, उग्रगन्धा, सारिका च । 'वचौषधौ। सारिकायां' इति—(मे० पृ० २८ श्लो० ९) । 'वचा स्यादुग्रगन्धायां सारिकायाम्' इति च—(वि प्र० पृ० ३० श्लो० ९) । चञ्चुः=पक्षिमुखाग्रम् । "चोंच" इति लोके। 'चञ्चुस्त्रोटिरुभे स्त्रियौ ।' इति—(अम० ना० लिं० पृ० २०० श्लो० ३६) 'चञ्चुस्त्रोट्यां तु योषिति ।' इति च—(श० र० स० पृ० ७१ पं० १०) । प्रियङ्गुः=फलिनी, शालिविशेषश्च। 'प्रियङ्गुः स्त्री राजिकाकणयोरपि । फलिन्यां कङ्गुसस्ये च' इति—(मे० पृ० २४, २५, श्लोकः ४३) । सरघा= मधुमक्षिका, मधुकर्त्री मक्षिका । 'सरघा मधुमक्षिका ।' इति—(अम० ना० लिं० पृ० १९७ श्लो० २६) । स्फुलिङ्गा=अग्न्युद्भूतकणिका ।' 'त्रिषु स्फुलिङ्गोऽग्निकणः' इति—(अम० ना० लिं० पृ० २४ श्लोकः ५७) । स्फुलिङ्गा ज्ञातावपि । गौः=स्त्रीगवी । इयं गौः दिगादिः। पशुवाचिनस्तु गोशब्दस्य चतुष्पदजातित्वात्परपरिभाषया स्त्रीपुंस्त्वम् । इयं गौ स्त्रीगवी । अयं गौः बलीवर्दः । व्याडिराचार्यस्तु—दिगादीनामविशेषेण स्त्रीपुंस्त्वं इच्छति ।' इति—(दु० वृ० पृ० ३ पं० ५) । रज्जुः=गुणमयी । वेणी च । 'रज्जुर्वेण्यां गुणे योषित्' इति—(मे० पृ० ३० श्लो० १४) । यदृच्छा=स्वच्छन्दः, स्वातंत्र्यम्, स्वैरिता । 'यदृच्छा स्वैरिता' इति—(अम० ना० लिं० पृ० ३८६ श्लो० २) । 'यदृच्छा नियमोज्झितिः ।' इति च—(वै० पृ० १९२ श्लो० ६) । राजिः=रेखा, लेखा, पंक्तिः, निरन्तरपंक्तिसाधारणम् । वीथी च । 'राजिः स्त्री पंक्तिलेखयोः ।' इति—(मे० पृ० ३० श्लो० १४) । 'राजी रेखायां पंक्तौ च' इति—(अने० सं० पृ० ८ श्लो० ७५) 'राजी' इत्यपि । 'राजी तु पंक्तौ रेखायाम्' इति—(अने० ति० पृ० २८ श्लो० २५२) । पंक्तौ—निश्छिद्रपंक्तावित्यर्थः । आजिः= युद्धम्, क्षणम्, समस्थलं च । 'आजिः क्षणे समक्ष्मायां युधि' इति—(अने० ति० पृ० ८ श्लो० २१) । आजिः स्यात्समभूयुधोः । क्षणेऽपि' इति च—(ना० मं० पृ० २० पं १२)

पाणिनीयेऽपि-(१) (दीधितिः स्त्रियाम्) दीधितिः=किरणः । सि० कौ० पृ० ४०१ सू० १००।

याच्ञा = प्रार्थना । 'आशासनेऽर्थना याच्ञा याचनाध्येषणार्दना । भिक्षा च सनिरक्ली स्यात्' इति—(वै० पृ० ९३ श्लो० १२०, १२१) । घाटा = ग्रीवावयवविशेषः । 'शिरः पीठः कृकाटिका । घाटाऽप्यवटुरक्लीबे' इति—(वै० पृ० १८० श्लो० ८४, ८५) । कोटिः = धनुरग्रभागः, अश्रिः, संख्याभेदः, प्रकर्षश्च । 'कोटिः स्त्री धनुषोऽग्रेऽश्रौ संख्याभेदप्रकर्षयोः ।' इति—(मे० पृ० ३४ श्लो० ९) । 'कोटिरग्रे च संख्यायामटन्याधिक्ययोः फले ।' इति च—(अने० ति० पृ० १३ श्लो० ७७) । जटा = केशबन्धविशेषः, जटामांसी, वृक्षमूलं च । 'जटा केशविकारे स्यान्मांसीपादपमूलयोः ।' इति—(अने० ति० पृ० १७ श्लो० १२०) । त्रोटिः = चञ्चुः, कट्फलं च । 'त्रोटिश्चञ्चौ कट्फले च' इति—(ना० र० मा० पृ० २० पं० २) । भ्रुकुटिः = भ्रूभङ्गः, क्रोधादिना ललाटसङ्कोचनम् । 'भ्रुकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ८६ श्लो० ३७) । ''भृकुटी'' इत्यपि । सटा = केसरिस्कन्धजाः केशाः, व्रतिनः शिखा च । 'व्रतिनस्तु जटा सटा ।।' इति—(अम० ना० लिं० पृ० २३७ श्लो० ९७) । 'सटा जटाकेसरयोः' इति—(मे० पृ० ३५ श्लो० २९) । 'कोटीरस्तु जटा सटा ।' इति च रभसः' इति—(अम० सु० व्या० पृ० २३७ पं० १५) । त्रुटिः = कालविशेषः, सूक्ष्मैला, संशयश्च । 'सूक्ष्मैलायां त्रुटिः स्त्री स्यात्काले‌ऽल्पे संशयेऽपि सा ।' इति—अम० ना० लिं० पृ० ४०३ श्लो० ३७) । 'त्रुटिः स्यात्संशये लेशे सूक्ष्मैलाकालमानयोः ।' इति च—(ना० र० मा० पृ० ३३ पं० १) । कोटी = लक्षाणां शतम्, ज्या च । 'कोटी ज्या जीवा मौर्विका द्रुणा ।' इति—(वै० पृ० ११८ श्लोकः १७८) । 'कोट्युत्कर्षाटनी संख्यास्त्रिषु' इति च—(अने० सं० पृ० ९ श्लोकः ८७) । धनिष्ठा श्रविष्ठया सह वर्तते सधनिष्ठाश्रविष्ठा तया । धनिष्ठा श्रविष्ठा = नक्षत्रविशेषः, त्रयोविंशतिनक्षत्रम् । 'श्रविष्ठया । समा धनिष्ठा' इति—(अम० ना० लि० पृ० ३८ श्लो० २२) । घण्टा = ध्वनिजननी, वाद्यविशेषः, घोषः, कोशफला । ''तोरञ्ी'' इति प्रसिद्धं शाकम् । अङ्गुष्ठरहितमुष्टिः, अनिबला, नागबला, घण्टापाटलिश्च । 'घोषे कोशफला घण्टा घण्टाला फलिनी फली ।' इति—(वै० पृ० ५८ श्लोकः १५६) । 'घण्टाऽङ्गुष्ठेन भिन्ना सा (मुष्टिः)' इति च—(वै० पृ० १७९ श्लोकः ८०) । क्रोडा = उत्सङ्गः, भुजान्तरम्, अश्वानामुरश्च । 'क्रोडं वली कर्ष उत्सङ्गे सूकरे ना, न नोरसि ।' इति—(वै० पृ० २३१ श्लोकः २३) । चूडा = शिखा । ''चोटी'' इति लोके । वडभी, बाहुभूषणं च । 'चूडा वडभौ, शिखायां बाहुभूषणे ।' इति—(मे० पृ० ४१ श्लोकः १३) । उडुः = तारका, नक्षत्रम्, जलं च । 'तारकाऽप्युडु वा स्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ३७ श्लोकः २१) । 'स्त्रीक्लीबयोरुडुः' इति च—(त्रि० शे० पृ० ३९४ श्लोकः १९) । धिषणा = बुद्धिः । 'बुद्धिर्मनीषा धिषणा धीः' इति—(अम० ना० लिं० पृ० ५५ श्लोकः १) । तूणा = शरधिः, शराधारः । 'स्त्रियां तूणेषुधी उपासङ्गः' इति रत्नकोषः' इति—

(अम० सु० व्या० पृ० २९३ स्तं० १ पं ३८)। श्राणा = यवागूः। ''लपसी'' इति ख्याता। 'श्राणा तु स्याद् यवाग्वां स्त्री' इति--(श० र० स० पृ० १०७ पं० १९) घोणा = नासा, नासिका। 'पोत्रितुरङ्गयोर्घोणी नासायां तु मता स्त्रियाम्।' इति--(श० र० स० पृ० १०५ पं० ३)। आषाढा = नक्षत्रविशेषः। तृष्णा = अभिलाषः, पिपासा च। 'तृष्णा स्यात्तर्ष-लिप्सयोः।' इति—(मे० पृ० ४६ श्लोकः १६) 'तृष्णा त्वीहापिपासयोः।' इति च--(ना० र० मा० पृ० २५ पं० ६)। किङ्किण्या सहेति। किङ्किणी = क्षुद्रघण्टिका। ''घुघुर'' ''घुंगुर'' ''घागरी'' इति च लोके। 'क्षुद्रघण्टा तु किङ्किणी।' इति—(वै० पृ० १७० श्लो० १४५)। 'किङ्किणिः' इत्यपि। कङ्कणी—इति स्वामी। 'कङ्कणः स्यात्प्रतिसरः कङ्कणी क्षुद्रघण्टिका।' इति च भागुरिः' इति-(अम० सु० व्या० पृ० २४१ स्तं० १ पं० २१, २२)। विपणिः = पण्यवीथिका, क्रय्यवस्तुशालापंक्तिः, हट्टशून्यविक्रयस्थानम्, हट्टमार्ग इति स्वामी। 'विपणिः पण्यवीथिका॥' इति--(अम० ना० लिं० पृ० ११७ श्लो० २)।'आपणः पण्यवीथ्यां च, पण्ये च विपणिः स्त्रियाम्।' इति रभसः' इति—(अम० सु० व्या० पृ० ११७ स्तं० १ पं० ७, ८)। 'आपणे पण्यवीथ्यां च पण्ये च विपणिः स्त्रियाम्।' इति च रुद्रः' इति—(अम० सु० व्या० पृ० ४०६ स्तं० १ पं० ३, ४)। दीधितिः = रश्मिः, किरणः।'भानुः करो, मरीचिः स्त्री-पुंसयो, र्दीधितिः स्त्रियाम्।' इति—(अम० ना० लिं० पृ० ४२ श्लोकः ३३)। वर्तिः = दीपादिसम्बन्धिवर्तितं द्रव्यम्, गात्रानुलेपयोग्यं पिष्टघृष्टसुगन्धिद्रव्यं च। 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। गात्रानुलेपनीदीपदशादीपेषु योषिति।' इति--(मे० पृ० ५८ श्लो० ५५)। 'गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेपनम्।' इति--(अम० ना० लिं० पृ० २४८ श्लोकः १३३)। द्वौ द्वौ भिन्नार्थौ--इत्येके। 'गात्रानुलेपनी वर्तिर्विगन्ध्यथ विलेपनम्। वर्णकं चाथ विच्छित्तिः स्त्री कषायोऽङ्गरागके।' इति च रभसः' इति--(अम० सु० व्या० पृ० २४८ स्तं० १ पं० २१, २२)। वीथी = पंक्तिः, मार्गः, गृहाङ्गम्, रूपकान्तरं च। 'वीथी पंक्तौ गृहाङ्गे च रूप-कान्तर वर्त्मनोः।' इति--(मे० पृ० ७२ श्लो० १२)। गाथा = आर्या, श्लोकः, संस्कृता-न्यभाषा, गेयम्, वृत्तं च। ''गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः।' इति--(मे० पृ० ७२ श्लोकः ६)। कुथा = वर्णकम्बलः। त्रिषु लिङ्गेष्वित्येके। ''कुथेन नागेन्द्रमिवेन्द्रवाह-नम्।'' इति--(दु० लिं० वि० पृ० ४ पं० १३)। 'कुथः स्त्रीपुंसयोर्वर्णकम्बले, पुंसि बर्हिषि॥' इति च--(मे० पृ० ७२ श्लोकः ४)। वेदिः = यागोपकरणी, परिष्कृतभूतलम्। अङ्गुलिमुद्रा च। 'वेदिः स्यात्पण्डिते पुमान्। स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले।' इति—(मे० पृ० ७५ श्लो० १५)।अजमोदा—ब्रह्मकुशा, यवानीद्वयम्। 'अजमोदा तूग्रगन्धा ब्रह्मदर्भा यवानिका।' इति--(अम० ना० लिं० पृ० १७७ श्लोकः १४५)। द्वाः=द्वारम्। 'स्त्री द्वार्द्वारं प्रतीहारः' इति--(अम० ना० लिं० पृ० १२२ श्लोकः १६)। मेधा = प्रज्ञा, धारणावद्बुद्धिः।

'मेधा बुद्धौ, क्रतौ पुमान्।' इति—(मे० पृ० ७९ श्लोकः १३)। अनूराधा = नक्षत्रविशेषः, सप्तदशनक्षत्रम्, राधामनुगता। राधा = विशाखानक्षत्रम्, गोपी, आमलकी, विष्णुक्रान्ता, विद्युत्, वेधविशेषः, धन्विनां चित्रभेदश्च। 'राधो मासान्तरे,राधा चित्रभेदे च धन्विनाम्। गोपीविशाखामलकीविष्णुक्रान्तासु विद्युति।' इति—मे० पृ० ७९ श्लो० १३, १४)। शे० प्रा०।

अथेदानीं सास्नादीन् स्वाहापर्य्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः—(अभि०सं० लिं० पृ० ३ श्लोकः ३५ तः ४१ या०)।

सास्ना सूना धाना पम्पा झम्पा शम्पा प्रपा शिफा।
कम्बा भम्भा सभा हम्भा सीमा पामा–रुमे उमा॥१९॥
चित्या पद्या पर्या योग्या छाया माया पेया कक्ष्या।
दूष्या नस्या शम्पा सन्ध्या रथ्या कुल्या ज्या मङ्गल्या॥१९॥
उपकार्या जलार्द्रे–रा प्रतिसीरा परम्परा।
कण्डरा–ऽसृग्धरा होरा वागुरा शर्करा सिरा॥२०॥
गुन्द्रा मुद्रा क्षुद्रा भद्रा भत्रा छत्रा यात्रा[1] मात्रा।
दंष्ट्रा फेला वेला मेला गोला दोला शाला माला॥२१॥
मेखला सिध्मला लीला रसाला सर्वला बला।
कुहाला शङ्कुला हेला शिला सुवर्चला कला॥२२॥
उपला शारिवा मूर्वा लट्वा खट्वा शिवा दशा।
कशा कुशे–शा मञ्जूषा शेषा मूषे–षया स्नसा॥२३॥
वस्नसा विस्रसा भिस्सा नासा वाहा गुहा स्वाहा॥इति॥

एषां व्याख्या—

सास्नेति। चित्येति। उपकार्य्येति। गुन्द्रेति। मेखलेति। उपलेति। वस्नसेति च। एते सास्नाप्रभृतयः स्वाहान्ताः शब्दा ईषया सह स्त्रीलिङ्गा स्युः। सास्ना = गोगलचर्म्म।

पाणिनीयेऽपि—(१) (यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव)॥ एताः स्त्रियामेव स्युः। यात्रा = प्रस्थानम्, गमनम्। मात्रा = अक्षरावयवः, द्रव्यं च। भस्त्रा = अग्निदीपकचर्म्मनिर्मितयंत्रविशेषः, चर्मप्रसेविका। दंष्ट्रा = दन्तविशेषः, दाढा। वरत्रा = नद्‌ध्री, चर्म्ममयरज्जुः। सि० कौ० पृ० ४०३ सू० १५६।

"गलकंबरी" इति लोके। 'सास्ना तु गलकम्बलः ।' इति— (अम० ना० लि० पृ० ३२३ श्लोकः ६३) । सूना = पुत्री, वधस्थानं च । 'सूना पुत्र्यां वधस्थानगलशुण्डिकयोः स्त्रियाम् ।' इति—(मे० पृ० ८४ श्लोकः २४) धाना = भृष्टयवः, धन्याकं च । 'धानाभृष्टयवेऽपि च ।' धन्याकेऽभिनवोद्भिन्ने' इति—(मे० पृ० ८३ श्लोकः १२) । पम्पा[२] = दण्डकारण्यान्तर्गतसरोविशेषः, ऋष्यमूकसमीपवर्तिनी पुष्करिणी, औड्रदेशस्थनदीविशेषश्च । झम्पा = सम्पातपनम्, लम्फः, प्लुतगतिः । "लांफ" इति लोके । स्वेच्छाधीनपतनं च । "उछाल" "कुदान" "फलांग" "कुलांच" इति च लोके । शम्पा = विद्युत्, शतह्रदा । "बिजली" इति लोके । 'शम्पा शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा ।' इति—(अम० ना० लिं० पृ० ३२ श्लोकः ९) । प्रपा = पानीयशाला । 'प्रपा पानीयशालिका ।' इति—(वै० पृ० १६० श्लोकः २३) । शिफा = जटा, नदी, मांसी, माता च । 'शिफा जटायां सरिति मांसिकायां च मातरि ।' इति—(मे० पृ० १०४ श्लोकः ३) 'शिफा' इत्यपि । कु(क)म्बा = सुगहना वृतिः, सुगहना निबिडा, वृतिर्वेष्टम्, निविडवेष्टनम्, अस्पृश्यादिदर्शनवारणाय वेष्टनम्, यागभूमावन्त्यजदर्शनवारणाय वेष्टनम् । "यज्ञस्थान का घेरा" इति लोके । 'कुम्बा सुगहना वृतिः ॥' इति—(अम० ना० लिं० पृ० २५६ श्लोकः १८) । भम्भा = भेरीवाद्यम् । "नगाडा" इति लोके । 'दुन्दुभिस्त्वानको भेरी भम्भा नासूश्च नान्द्यपि ।' इति—(वै० पृ० १४६ श्लोकः १३३) । सभा = परिषद्, गोष्ठी, सामाजिकं च । 'सभा सामाजिके गोष्ठ्यां द्यूतमन्दिरयोरपि ।' इति—(मे० पृ० १०६ श्लोकः ९) । 'सभा द्यूतसमूहयोः । गोष्ठ्यां सभ्येषु शालायाम्' इति—(अने० सं० पृ० २७ श्लोकः ३१७) । 'स्त्रियां सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः सभा ।' इति च रभसः' इति—(अम० सु० व्या० पृ० ४२० स्तं० २ पं० २१, २२) । हम्भा = गोध्वनिः । ' म्भा रेभणं च गवां ध्वनौ ।' इति—(त्रि० शे० पृ० ३०३ श्लोकः २१) । सीमा = अवधिः, आघाटः, मर्यादा, ग्रामादीनामवधारितान्तभागः । "सीम" इति लोके । 'सीमाऽऽघाटस्थितिक्षेत्रेष्वण्डकोषेऽपि च स्त्रियाम् ।' इति—(मे० पृ० ११० श्लोकः ३५) । पामा = विचर्चिका, कच्छू, खर्जूश्च । "खसुरोग" इति लोके । 'कच्छां तु पाम, पामा विचर्चिका ।' इति—(अम० ना० लिं० पृ० २१९ श्लोकः ५३) । रुमा = विशिष्टलवणाकरः, सुग्रीवपत्नी च । रुमा सुग्रीवदारेषु विशिष्टलवणाकरे ।' इति—(मे० पृ० ११० श्लोकः २७) । उमा = अतसी, पार्वती च । 'उमाऽतसीहैमवतीहरिद्राकीर्तिकान्तिषु ।' इति (मे० पृ० १०८ श्लोकः २) । चित्या = मृतचितिः । "चिता" इति लोके । 'चित्या मृतचितौ स्त्रियाम् ।' इति—(श० र० स० पृ० २३५ पं०

(२) यल्लक्ष्यम्—पश्य लक्ष्मण । पम्पायां बकः परमधार्मिकः । 'इति रामायणम्' इति—(सं० चि० पृ० ४७ स्तं० २ पं० २० २१) ।

८) । पद्या = वर्त्म, मार्गः । "रास्ता" इति लोके । 'पद्या वर्त्मनि कीर्तिता ।' इति—(मे० पृ० ११५ श्लो० ३५) च(प)र्या = ईर्य्या, नियमात्यागः, ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठानम्, ईर्य्यापथस्थितिः ।'"नियमित अनुष्ठान" इति लोके । ईय्यते गुरोः शास्त्रोपासनया ज्ञायते इति ईर्य्या । ईर्य्यायाः पन्थाः । ईर्य्यापथे ध्यानाद्युपाये परिव्राजकादीनां स्थितिः सेत्यर्थः' इति—(श० चिं० पृ० ९११ स्तं० १ पं० १९ तः) । 'चर्य्या त्वीर्य्यापथस्थितिः ।' इति—(वै० पृ० ९२ श्लो० ११६) योग्या = अभ्यासः, अर्कयोषिच्च । 'स्त्र्यभ्यासार्कयोषितोः ।' इति (मे० पृ० ११६ श्लो० ४९) । छाया = प्रतिबिम्बम्, अनातपः, कान्तिः, भानुभार्य्या च । 'कान्त्य(न्ता)नातपयोश्छाया' इति--(अने० ध्व० मं० पृ० २५ श्लो० २०९) । 'छाया त्वनातपे कान्तौ प्रतिबिम्बार्कजाययोः ।' इति च--(वै० पृ० २२१ श्लो० १३) । माया = शाम्बरी, दम्भः, बुद्धिः, दया च । 'माया दम्भे दयाबुद्ध्योः' इति--(अने० ति० पृ० २६ श्लोक: २२९) । पेया = श्राणा, यवागूः, अच्छमण्डश्च । 'पेया श्राणाच्छमण्डयोः ।' इति--(मे० पृ० ११५ श्लो० ३९) । कक्ष्या=कच्छ, वरत्रा, काञ्ची च ।'कक्ष्या कच्छे वरत्रायां काच्यां गेहप्रकोष्ठके ।' इति (वै० पृ० २२० श्लो० ७) । दूष्या = कक्ष्या, गजमध्यबन्धनम् । 'दूष्या कक्ष्या, निन्द्ये त्वयं त्रिषु ।' इति--(ना० र० मा० पृ० ४५ पं० ३) । नस्या = नासिका, नासारज्जूश्च । "नकेल" "नाथ" इति च लोके । 'नसा नस्या च नासिका । गन्धनाली च नासिक्यम्' इति--(त्रि० शे० पृ० २९२ श्लो० २८) । शम्या = युगकीलकः, यज्ञाङ्गभूतः शूलाकारः काष्ठविशेषश्च । 'अथ शम्या स्त्री युगकीलकः ।' इति--(अम० ना० लिं० पृ० ३०६ श्लो० १४) । दक्षिणहस्तगृहीततालविशेषः, यष्टिश्च । यथा--'धनुः शतं परीहारो ग्रामस्य स्यात्समन्ततः । शम्या पातास्त्रयो वापि त्रिगुणो नगरस्य तु ।' अत्र शम्या यष्टिरिति कुल्लूकभट्टः' इति--(श० चिं० पृ० ५१८ स्तं० १ पं० २७ तः) । सन्ध्या = सन्धिः, पितृप्रसूश्च । 'सन्ध्या सन्धौ पितृप्रस्वां प्रतिज्ञासीमयोरपि ।' इति--(ना० र० मा० पृ० ४२ पं० ११) रथ्या = रथसमूहः, विशिखा, वर्त्तनी च । 'रथ्या रथौघविशिखे' इति—ना० र० मा० पृ० ४४ पं० ३) । कुल्या = प्रणाली, कृत्रिमाऽल्पनदी च । 'कृत्रिमाऽल्पनदी कुल्या प्रणाल्यां च' इति--(ना० र० मा० पृ० ४४ पं० १८) । ज्या = धनुर्गुणः, मौर्वी, माता, भूमिः, जया, विजया, रमा च । 'ज्या मौर्वीमातृभूमिषु ।' इति--(ना० र० मा० पृ० ८ पं० ७) 'ज्या जया विजया रमा ।' इति च (द्व्यक्ष० ना० मा० पृ० १४ श्लो० ११) । मङ्गल्या = रोचना, प्रियङ्गुः, शतपुष्पा च । 'मङ्गल्या रोचनायां च प्रियङ्गुशतपुष्पयोः ।' इति--(वि० प्र० पृ० १२२ श्लो० ९४) । उपकार्या = राजसद्म । 'उपकार्य्या राजसद्मन्युपकारोचितेऽन्यवत् ' इति—(मे० पृ० १२१ श्लो० ११८) जलार्द्रा = याज्ञिकानां व्यजनविशेषः,

धुवित्रम्, विजन्नवस्त्रम् च । 'धुवित्रं तालवृन्तं स्यादुत्क्षेपव्यजनं च तत् । जलेनार्द्रं जलार्द्रा स्यात्' इति--(वै० पृ० १७१ श्लोकः १५९) । इरा = पृथवी, वाक्, जलम्, मद्यं च । 'पृथिव्यां वाचि पानीये मदिरायामिरा मता ।' इति--(अने० समु० पृ० २७ श्लोकः ३०२) प्रतिसीरा= जवनिका, वस्त्रमयी । 'प्रतिसीरा जवनिकायां स्यात्' इति--(श० र० स० पृ० २९० पं० १५) । परम्परा = परिपाटी, हिंसा, सन्तानश्च । 'परम्परा परिपाट्यां हिंसासन्तानयोरपि ।' इति--(मे० पृ० १४२ श्लोकः २७८) । कण्डरा = महास्नायुः, महानाडी । 'महास्नायुनि कण्डरा ।' इति--(१० र० मा० पृ० ४२ पं० १) । 'कण्डरा तु महास्नायुर्महानाडी च सा स्मृता ।' इति च--(रा० नि० पृ० ४०१ श्लोकः ५९) । असृग्धरा = त्वक् । 'स्त्रियां त्वगसृग्धरा ।' इति-(अम० ना०लिं० पृ० २२३ श्लोकः ६२) । होरा = लग्नम्, राश्यर्द्धम्, शास्त्रम्, रेखाप्रभेदश्च । 'होरा तु लग्ने राश्यर्द्धे शास्त्ररेखाप्रभेदयोः ।' इति—(अने० सं० पृ० ३८ श्लोकः ४८५) । वागुरा = मृगबन्धनी । 'वागुरा मृगबन्धिन्याम्', इति—(श० र० स० पृ० २८० पं० ३) । शर्करा = इक्षुरसविकारः, खण्डविकृतिः । "मिश्री" इति लोके । 'शर्करा खण्डविकृतावुपलाकर्परांशयोः । शर्करान्वितदेशेऽपि रुग्भेदे सकलेऽपि च ।' इति—(मे० पृ० १३८ श्लोकः २२०) । कर्परांशः = मृत्कपालखण्डम्, उपला, अश्मरूपा मृच्च । तयोर्यथा— 'नगतरुशिखरामर्दी सशर्करो मारुतश्चण्डः ।' इत्यनेकार्थकैरवाकरकौमुदी' इति--(अम० सु० व्या० पृ० ११३ स्तं० २ टि० पं० ३९ तः) । सिरा = नाडी, अम्बुवाहिनी नाडी । "सीर" इति लोके । 'नाडी तु धमनिः सिरा ।' इति--(अम० ना० लिं० पृ० २२४ श्लोकः ६५) । 'शिरा' इत्यपि । 'शिरो ना पिप्पलीमूले, स्याद् धमन्यां च योषिति ।' इति च रसभः' इति—(अम० सु० व्या० पृ० २२४ स्तं० १ पं० २३) । गुन्द्रा = प्रियङ्गुः, भद्रमुस्तकं च । 'गुन्द्रस्तेजनके, स्त्री तु प्रियङ्गौ भद्रमुस्तके ।' इति—(मे० पृ० १२४ श्लोकः २४) । मुद्रा = प्रत्ययकारिणी । 'मुद्रा प्रत्ययकारिणी ।' इति--(त्रि० शे० पृ० २९८ श्लोकः २९) । क्षुद्रा = सरघा, कण्टकारिका, व्यङ्गा, नटी च । 'क्षुद्रा व्यङ्गानटीकण्टकारिकासरघासु च ।' इति--(मे० पृ० १२४ श्लोकः १७) । भद्रा = तिथिकरणयोर्भेदः, प्रसारिणी, कट्फला, अनन्ता च । 'तिथिभेदे प्रसारिण्यां कट्फलाऽनन्तयोरपि ।' इति--(मे० पृ० १२७ श्लोकः ७०) । भस्त्रा = कंसादिधमनी, चर्म्मप्रसेविका, अग्निज्वलनसाधनम् । 'भस्त्रा चर्म्मप्रसेविका' इति—(अम० ना० लिं० पृ० ३४८ श्लोकः ३३) । छत्रा = मधुरिका । "वनसोंफ" इति ख्याता । तृणविशेषः, धान्याकं च । 'छत्रा मधुरिका मिसिः ।' इति । 'छत्राऽतिच्छत्रापालघ्नौ' इति । 'छत्रा वितुन्नकम् । कुस्तुंबरु च धान्याकम्' इति च—(अम० ना० लिं० पृ० १६३ श्लोकः १०५) यात्रा = प्रस्थानमात्रम्, गमनम्, गतिः, यापनोपायः, देवार्चनोत्सवश्च । 'यात्रा तु यापनेऽपि स्यादगमनोत्सवयोः स्त्रियाम् ।' इति--(मे० पृ० १२८ श्लोकः ७८) । 'यात्रा तु यापनोपाये गतौ देवार्चनोत्सवे ।' इति

च=(वि० प्र० पृ० १३२ श्लोकः ९२)। मात्रा=परिच्छदः, आच्छादनम्, वस्त्रम्। "कपड़ा" इति लोके। परिमाणम्, अल्पं च। 'मात्रा कर्णविभूषायां वित्ते माने परिच्छदे। अक्षरावयवे स्वल्पे, क्लीबं कात्स्न्र्येऽवधारणे।' इति--(मे० पृ० १२८ श्लोकः ७५)। 'मात्रं त्ववधृतौ स्वार्थे कात्स्न्र्ये, मात्रा परिच्छदे। अक्षरावयवे द्रव्ये मानेऽल्पे कर्णभूषणे। काले वृत्ते च' इति--(अने० सं० पृ० ३७ श्लोकः ४५९)। दंष्ट्रा=दन्तविशेषः, दाढा। "दाढ" इति लोके। दन्तपंक्तिद्वयप्रान्ते चतस्रश्चश्चतस्रो दन्तविशेषा दंष्ट्रा। 'द्विगुणीकृता दन्तावलिरिति भावप्रकाशः।' इति—(श० चिं० पृ० ११४४ स्तं० १ पं० ३ तः)। 'मध्यदन्ता राजदन्ता दंष्ट्रा तत्पार्श्वयोर्द्वयोः।' इति च (वै० पृ० १८० श्लोकः ८९)। फेला=भोजनोज्झितम्, भुक्तसमुज्भितम्। 'फेला फेलिस्तथोच्छिष्टे गदिता शब्दवेदिभिः।' इति--(श० र० स० पृ० २९९ पं० २)। वेला=कालः, कालप्रभेदश्च। "चौघड़िया" इति लोके। 'वेला काले च जलधेस्तीरनीरविकारयोः।' इति--(वि० पृ० १५२ श्लोकः ४१)। 'वेला कालविशेषः स्याद्वेला सिन्धुजलोद्गतिः। वेला सेवाङ्गुलीछेदे वेला द्रोण्यन्तरे ध्वनिः।' इति—(अने० ध्व० मं० पृ० ६ श्लोकः ४४)। 'दन्तमांसेऽपि वेला स्यात्' इति—(हा० व० पृ० ४०८ श्लोकः २६८)। 'जलधिजलविकारे वेला, तटेऽप्युपचारात्' इति क्षीरस्वामी' इति--(दु० लिं० श्लोकः १५ विवेचने पृ० ४६ पं० १३)। 'अब्ध्यम्बुविकृतौ चन्द्रोदयादिना जलधिजलवृद्धौ (ज्वारभाटा) काले मर्यादायां च वेला।' इति च—(अम० अम० विवे० व्या० पृ० ३३२ पं० २३, २४)। मेला=मसिजलम्, लेखनद्रव्यम्। 'मसिजलं तु मेला स्यात्' इति--(त्रि० शे० पृ० २९८ श्लोकः २७)। गोला=गोदावरी, सखी, कुनटी, दुर्गा च। 'गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम्।' इति--(मे० पृ० १४६ श्लोकः १४)। दोला=प्रेंखा, यानान्तरम्। "डोली" इति लोके। नाली च। 'दोला नील्यां यानान्तरेऽपि च।' इति--(मे० पृ० १४७ श्लो० २७)। शाला=वृक्षस्कन्धशाखा, गृहैकदेशः, गृहं च। "शाला द्रुस्कन्धशाखायां गृहे गृहैकदेशयोः।' इति—(मे० पृ० १४८ श्लोकः ५१)। माला=स्रक्, पृक्का च। 'मालं क्षेत्रे, स्त्रियां पृक्कास्रजो,र्जात्यन्तरे पुमान्।' इति--(मे० पृ० १४८ श्लो० ४५)। मेखला=रसना, काञ्ची, श्रोणिस्थानं च। 'अथ मेखला। श्रोणिस्थाने कटितटे कटिबन्धेऽसिबन्धने।' इति--(वै० पृ० २४८ श्लोकः १८)। सिध्मला=मत्स्यविकृतिः, शुष्कमीनः। 'सिध्मला शुष्कमीने स्त्री, त्रिलिंग्यां तु किलासिनि।' इति—(त्रि० शे० पृ० ३७४ श्लो० ४०९)। लीला=विदग्धचेष्टा, शृङ्गारचेष्टा, केलिः, विलासश्च। 'लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु।' इति--(वि० प्र० पृ० १५२ श्लो० ४५)। रसाला=शिखरिणी, रसना, दूर्वा च। 'रसाला रसनादूर्वाविदारीमार्जितासु च।' इति—(मे० पृ० १५४ श्लोकः १२६)।

सर्वला = अस्त्रविशेषः, तोमरः। 'तोमरोऽस्त्री लोहहुलदण्डे कासूश्च सर्वला।' इति--(वै० पृ० ११७ श्लोकः १६६)। बला = ओषधिभेदः, वाट्यालकः। ''बलिआर'' इति ख्यातः। 'बल-युक्तेऽन्यलिङ्गः स्याद्, बला वाटचालके स्त्रियाम्।' इति—(मे० पृ० १४७ श्लोकः ३७)। क-(कु) हाला = काहला, वाद्यभाण्डविशेषः। काहली इति हिमगिरिप्रसिद्धा ध्वनिनाला। ''बड़ा ढोल'' इति लोके। अप्सरसां प्रभेदश्च। 'ध्वनिनाला तु काहला॥' इति--(त्रि० शे० पृ० २७१ श्लोकः २)। काहला तु कहाला स्याच्चण्डकोलाहलेति च॥' इति च--(वै० पृ० १४६ श्लोकः १२६)। शङ्कुला = उत्पलपत्रिका, पूगकर्त्तनी। ''सरोता'' इति लोके। महाफला च। 'महाफला शाकफला सुभद्रा शङ्कुलाऽपि च।' इति--(वै० पृ० ५९ श्लोकः १७०)। हेला = अनादरः, अवज्ञा, वरयोषितां विलासः, स्त्रीणां शृङ्गारभावजक्रियाविशेषश्च। 'हेला तु स्यादवज्ञाविलासयोः। हेला शृङ्गारभावस्य क्रियायां च निगद्यते।' इति--(श० र० स० पृ० ३०१ श्लोकः ७, ८)। शिला = दृषद्, पाषाणः, प्रस्तरः। ''पत्थर'' इति लोके। मनःशिला, द्वाराधःस्थितदारु, स्तम्भशीर्षम्, कर्पूरं च। 'शिला द्वाराधोदारु कुनटी दृषद्।' इति--(श० र० स० पृ० ३०० पं० १७)। 'अधस्ताद् दारुणि शिला' इति—(अम० ना० लिं० पृ० १२१ श्लोकः १३)। 'शिल उञ्छे, स्त्रियां ग्राव द्वाराधःस्थितदारुणोः।' इति रसभः' इति च-- (अम० सु० व्या० पृ० १२१ स्तं० १ पं० ६, ७)। 'शिली' इत्यपि। 'तलदारु शिली योषिन्नासा दारूर्ध्वमस्य यत्।' इति च बोपालितः' इति—(अम० सु० व्या० पृ० १२१ स्तं० १ पं० ८)। सुवर्चला = आदित्यभक्ता, शाकविशेषः। ''हुल हुल'' इति प्रसिद्धं शाकम्। अतसी। ''अलसी'' इति लोके। सूर्यपत्नी च। 'आदित्यभक्ता वरदार्कभक्ता सुवर्चला सूर्य्यलताऽर्ककान्ता।' इति--(रा० नि० पृ० १५३ श्लोकः १४४)। 'चणकोमातसी क्षौमी रुद्रपत्नी सुवर्चला।' इति --(प० र० मा० पृ० २५ पं० २)। 'सुवर्चलामसृण्यौ च' इति--(वै० पृ० १२६ श्लोकः ४५)। 'त्रसरेणुर्महावीर्य्या स्वातिः सूर्या सुवर्चला।' इति--(त्रि० शे० पृ० २७० श्लोकः २०)। 'सुवर्चला। अर्कावर्त्ते तु मंडूक्याम्' इति च--(रा० नि० पृ० ४२५ श्लोकः ४१)। कला = चन्द्रषोडशांशः, राशेरष्टादशशतभागः, अंशस्य षष्टिभागः, कालभेदः, त्रिंशत्काष्ठा, शिल्पम्, शिल्पादिः, मूलरैवृद्धिश्च। 'कला तु षोडशो भागः' इति—(अम० ना० लिं० पृ० ३५ श्लोकः १५)। 'त्रिंशत्तु ताः (काष्ठाः) कला' इति--(अम० ना० लिं० पृ० ४७ श्लोकः ११)। 'काला शिल्पे कालभेदेऽपि' इति—(अम० ना० लिं० पृ० ४३१ श्लोकः १९८)। 'सौधावयवविज्ञानगमनेषु कला मता।' इति--(अने० ध्व० मं० पृ० १७ श्लोकः १४७) 'काले शिल्पे वित्तवृद्धौ चन्द्रांशे कलने कला।' इति। 'कला द्विसप्रतिमिताः शिल्पादिरूपाः' इति बाणश्च।

उपला = शर्करा। ''मिश्री'' ''चीनी'' इति च लोके। 'उपलः प्रस्तरे रत्ने, शर्करायां तु योषिति।' इति—(मे० पृ० १४९ श्लोकः ६३)। शारिवा = औषधिविशेषः, उत्पलशारिवा। ''गुलीसर'' इति ख्यातः। शालिविशेषश्च। 'गोपी श्यामा शारिवा स्यादनन्तोत्पलशारिवा।' इति—(अम० ना० लिं० पृ० १६६ श्लोकः ११२)। मूर्वा = ज्याहेतुः, तृणविशेषः, धनुर्गुणोपयुक्ता लताविशेषः, मोरटा। ''मुहार'' इति ख्याता। पीलुपर्णी, बिम्बी च। 'मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा।' इति—(अम० ना० लिं० पृ० १५७ श्लोकः ८३)। लट्वा = करञ्जः, करञ्जभेदः, अलक्तः, फलम्, अवद्यम्, खगान्तरं च। 'लट्वाऽलक्ते करञ्जेऽपि' इति शिवः' इति—(शि० को० पृ० ४६ श्लोकः ५००)। 'लट्वा करञ्जभेदे स्यात्फलेऽवद्ये खगान्तरे।' इति च—(मे० पृ० १५९ श्लोकः २२)। खट्वा = कोलशिम्बी, कपिकच्छूविशेषः, पर्य्यङ्कः, मञ्चश्च। ''पलङ्ग'' ''खाट'' ''चारपाई'' इति च लोके। 'दधिपुष्पी खट्वाङ्गी खट्वा पर्य्यङ्कपादिका कूपा।' इति—(रा० नि० पृ० ३६ श्लोकः २०४)। 'आसन्दी मञ्चकः खट्वापाश्रयो मत्तवारणम्।' इति—(वै० पृ० १७२ श्लोकः १६४)। लक्षणं तु यथा—'अष्टाभिः काष्टखण्डैश्च खट्वेति प्रतिचक्षते।' इति—(श० चिं० पृ० ७४५ स्तं० १ पं० २५, २६)। विशेषो युक्तिकल्पतरौ द्रष्टव्यः। शिवा = गौरी, शृगाली च। 'शिवा गौरी शिवा क्रोष्ट्री, शिवं श्रेयः, शिवाऽभया।' इति—(अने० ध्वं०मं० पृ० १ श्लोकः ४)। दशा = अवस्था, वर्तिः, वस्त्रावयवश्च। 'दशाऽवस्था, दशावर्तिर्वाससोऽवयवे दशा।' इति—(अने० समु० पृ० ३९ श्लोकः ४३२) कशा = अश्वताडनी, अश्वादिताडनचर्म्मदण्डः। 'अश्वादेस्ताडनी कशा।' इति—(अम० ना० लिं० पृ० ३४८ श्लोकः ३१)। 'कशा काम्रा वक्त्रपट्टे' इति च—(वै० पृ० ११३ श्लोकः ११४)। ईशा = लाङ्गलावयवविशेषः। 'ईशा लाङ्गलदण्डके।' इति—(मे० पृ० १६२ श्लोकः २)। मञ्जूषा = वस्त्रालङ्कारादिस्थापनमञ्जूषा, दारुमयी पेटा। ''पेटी'' इति ख्याता। 'पिटकः पेटकः पेटा मञ्जूषा।' इति—(अम० ना० लिं० पृ० ३४७ श्लोकः २९)। शेषा = प्रसादेन स्वनिर्माल्यार्पणम्, निर्माल्यदानम्। 'प्रसादेन स्वनिर्माल्यार्पणे स्त्रियाम्।' इति—(मे० पृ० १६७ श्लोकः २८)। मूषा = सुवर्णादिविलयनभाण्डम्। ''घरिया'' ''कुठाली'' इति च लोके। 'तैजसावर्त्तनी मूषा' इति—(अम० ना० लिं० पृ० ३४८ श्लोकः ३३)। 'मूषी' इत्यपि। 'मूषा त्वावर्त्तनी मूषी' इति च शब्दार्णवः' इति—(अम० सु० व्या० पृ० ३४८ स्तं० २ पं० २५, २६)। ईषा = लाङ्गलावयवविशेषः। स्नसा = स्नायुनाडी। वस्नसा = वायुवाहिनी नाडी, स्नायुः, अङ्गप्रत्यङ्गसन्धिबन्धनरूपा स्नायुः। 'अथ वस्नसा। स्नायुः स्त्रियाम्' इति—(अम० ना० लिं० पृ० २२४ श्लोकः ६६)। 'अथ स्नसा। वस्नसा' इति च—(त्रि० शे० पृ० २९१ श्लोकः १८)। विस्रसा = = जरा। ''बुढापा'' इति लोके। 'विस्रसा जरा' इति—(अम० ना० लिं० पृ० २१५

श्लोकः ४१)। भिस्सा = अन्नम्, ओदनम्, भक्तम्, सिद्धान्नम्। 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इति--(अम० ना० लि० पृ० ३१९ श्लोकः ४८)। नासा = नासिका, द्वारोर्ध्वदारु च। 'नासा तु नासिकायां च द्वारोर्ध्वदारुणि स्त्रियाम्।' इति--(मे० पृ० १७० श्लोकः ५)। 'घ्राणं गन्धवहा नासा नसा नस्या च नासिका।' इति साहसाङ्कः' इति-(अम० सु० व्या० पृ० २३३ स्तं० २ पं० २६, २७)। 'विज्ञेया नासिका नासा नामा द्वारोर्ध्वदारु च।' इति रुद्रः' इति--(अम० सु० व्या० पृ० १२१ स्तं० १ पं० १४, १५)। 'नासा दारूपरि द्वारस्याधोदारु शिला स्त्रियाम्।' इति नाममाला' इति—(अम० सु० व्या० पृ० १२१ स्तं० १ पं० १५, १६)। बाहा = बाहुः, भुजः। "बाँह" इति लोके। 'वाहोऽश्वमानयोः। वृषे, वाहा तु बाहौ स्यात्' इति--(अने० सं० पृ० ४९ श्लोकः ६१५)। गुहा = गिरिविवरम्, अकृत्रिमगिरिबिलम्। 'गुहः षाण्मातुरे, गुहा। सिंहपुच्छ्यां च गर्ते च पर्वतादेश्च गह्वरे (कन्दरे)।' इति-(मे० पृ० १७५ श्लोकः ४)। स्वाहा = अग्निपत्नी। 'अथाग्नायी स्वाहा च हुतभुक्प्रिया ॥' इति—(अम० ना० लिं० पृ० २५६ श्लोकः २१)। 'स्वाहा देवहविर्दाने' इति च--(अम० ना० लिं० पृ० ४४५ श्लोकः ८)।

अमरोऽपि--(अम० ना० लिं० पृ० ४५२ श्लोकः ९, १०)।

... ...नाभी राजसभाऽपि च ॥
झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला।' इति।

अस्य व्याख्या—

नाभिरिति। एते नाभ्यादयः सिध्मलान्ताः शब्दाः स्त्रियां स्युः। नाभिः = अङ्गविशेषः, उदरावर्त्तः, तुन्दकूपी। "सूँडी" इति लोके। कस्तूरिकामदं च। 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्। द्वयोः प्राणिप्रतीके स्यात्, स्त्रियां कस्तूरिकामदे।' इति--(मे० पृ० १०६ श्लोकः ५)। राजसभा = राज्ञां परिषद्। "राजदरबार" "कचहरी" इति च लोके। राज्ञां सभेति तत्पुरुषः। सभाराजेत्यत्र राजपर्य्यायस्यैवेष्यते इत्युक्तम्। तेन राजशब्दपूर्वकसभान्ततत्पुरुषे क्लीबत्वस्य निषेधात् स्त्रीत्वम्। झल्लरी = वाद्यभेदः। 'झल्लरी झिल्लरी च द्वे हुडुक्के बालचक्रके।' इति—(मे० पृ० १३४ श्लोकः १५९)। चर्चरी = करशब्दः हर्षक्रीडा वा। 'चर्चरी, गीतभेदे च केशभित्करशब्दयोः।' इति कोशान्तरात्' इति--(अम० सु० व्या० पृ० ४५२ स्तं० २ पं० २०, २१)। 'चर्चरी चर्भटिस्तुल्ये' इति च—(वै० पृ० ३३ श्लोकः २७)। पारी = हस्तिपादरज्जुः। ''पारी पूरपरागयोः। पत्र्यां कर्पूरिकायां च पादबन्धे च हस्तिनाम्।' इति--(अने० सं० पृ० ३६ श्लोकः ४४८-९)। शेषं प्राग्वत्।

अथेदानीं क्षान्तशब्दानाह हेमः--(अभि० सं० लिं० पृ० ३ श्लोकः ४१)।

कक्षा-ऽऽमिक्षा रिक्षा राक्षा' इति।

अस्य व्याख्या—

कक्षेति। एते कक्षादयो राक्षान्ताः शब्दाः स्त्रिलिङ्गा भवन्ति। कक्षा = अन्तरीयवस्त्रस्य पश्चिमाञ्चलः, अधोंऽशुकस्य पृष्ठतो निहिताञ्चलः, इभरज्जुः, करिमध्यरज्जुः, काञ्ची, कायैकदेशः, प्रकोष्ठश्च। 'कक्षा तु भवनान्तर्भूमेखलागजरज्जुषु।' इति—(अने० ध्वं० मं० पृ० १३ श्लोकः १०६) 'कक्षा स्यात्परिधानस्य पश्चादञ्चलपल्लवे। कक्षा स्पर्द्धास्पदेऽपि च।' इति–(अने० सम्० पृ० १३ श्लोकः १२९, ७७१)। आमिक्षा = वैश्वदेवी, तप्ते पक्वे च पयसि दधियोगतो जाता दुग्धविकृतिः। तत्र घनीभूतः पिण्ड आमिक्षा, जलं, वाजिनम्। इति--(श० चिं० पृ० २७५ स्तं० २ पं० २० तः)। 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति श्रुतिः' इति--(त्रि० शे० व्या० पृ० १८, १९)। 'आमिक्षा मस्तु वाजिनम्॥' इति--(त्रि० शे० पृ० ३११ श्लोकः १७)। 'आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः।' इति--(अम० ना० लिं० पृ० २५७ श्लोकः २३)। रिक्षा = यूकाण्डम्, लत्वे लिक्षा। लिक्षिका। "लीक" "लीख" इति च प्रसिद्धः। केशकीटः, परिमाणविशेषश्च। 'त्रसरेणुभिरष्टाभिर्लिक्षा सैव मरीचिका।' इति--(वै० पृ० १८९ श्लोकः ४२)। राक्षा = जतु, द्रुमामयः। "महावर" इति ख्यातः। लत्वे लाक्षा। 'राक्षा लाक्षा, जतु क्लीबे, यावोऽलक्तो द्रुमामयः।' इति--(अम० ना० लिं० पृ० २४५ श्लोकः १२५)। 'स्याद्रङ्गमातृका लाक्षा' इति च--(त्रि० शे० पृ० २९२ श्लोकः ३७)।

तथा चामरः—(अम० ना० लिं० पृ० ४५२ श्लोकः १०)

लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी॥' इति।

अस्य व्याख्या—

लाक्षेति। एते लाक्षादयो मस्यन्ताः शब्दा योषिति स्युः। 'गण्डूषा=उन्नतनाभिः। 'उन्नतनाभिस्तु गण्डूषा, नाऽपि मुखपूर्तिः' इति बोपालितः' इति—(अम० सु० व्या० पृ० ४५२ स्तं० २ पं० ४१) पुंस्यपि—'गण्डूषो मुखपूर्तिः स्याद् गजहस्ताङ्गुलावपि। प्रसृत्या प्रमितेऽपि स्यात्' इति--(अने० सं० पृ० १०८ श्लोकः ७७५) 'गण्डूषो मुखपूर्तीभपुष्करप्रसृताञ्जलिः।'

इति रुद्रः' इति--(अम० ना० लि० पृ० ४५२ स्तं० २ पं० ४०)। यादवस्त्वस्त्रीत्याह--'गण्डूषो ऽस्त्रीगण्डपूर्तौ प्रसृते गजपुष्करे।' इति च (वै० पृ० २५९ श्लोकः ३४)। गृध्रसी = वातरोगभेदः। स तूरुसन्धौ भवति। चमसी = यज्ञपात्रभेदः। "प्रणीता" इति प्रसिद्धा। वैद्यकग्रन्थे तु--माषपिष्टपोटलिकाविशेषश्च। 'चमसो यज्ञपात्रस्य भेदेऽस्त्री, पिष्टकेस्त्रियाम्।' इति--(मे० पृ० १७१ श्लोकः २१)। मसी = कज्जलम्, मेला, लिपिप्रयोजना, पत्राञ्जनम्, लिपिसाधनविशेषः। "स्याही" इति लोके। शेफालिकावृन्तं च। 'मसिः' इस्यपि। 'अथ स्त्रीपुंसयोः केलिर्मणिर्योनिर्मसिर्मुनिः।' इति। 'मेला मसीजलं पत्राञ्जनं च स्यान्मसिर्द्वयोः।' इति च--(त्रि० शे० पृ० २९८ श्लोकः २७)। हेमचन्द्रस्तु मूर्धन्योपधमाह--'मलिनाम्बु मषी मसी'--इति-(अभि० सं० अभि० चिं० पृ० २२ श्लोकः ४८४)। शेषं प्राग्वत्।

दुर्गस्तु क्रमरहितान् दृगादीन् स्वाहापर्य्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह--(दु० लिं० पृ० ४ तः श्लोकः १० तः १९ यावत्)।

दृगो-षधि-ज्योत्स्ना नौः पृतना खनिः खानिः ॥
रशना रसना रास्ना सास्ना धाना च रोचना धेनुः।
तनु-निःश्रेणि-वपा-वापी-कृपा-सशिफा-वणिज्या--ज्याः ॥
हम्भा-भम्भा-रम्भा अम्बा-कम्ब्य-क्षदुन्दुभिः सन्ध्या।
स्नायुः सरयु-रुमा मा शमी च सीमा छटा प्रतिमा ॥
छाया माया रथ्या तारा च दया शिरोधरा धारा।
प्रतिसीरा च शिरा-ऽऽर्द्रा मथुरा कृसरा सुरा हारा ॥
यात्रा मात्रा भस्त्रा द्रंष्टा निद्रा वरत्रया गोत्रा।
वागुरया कन्धरया शर्करया मन्दुरा मदिरा ॥
एला लाला लीला हेला दोला मनःशिला माला।
शाला शिला च वेला कला-ऽऽवलि-तुलाश्च मेखलया ॥
ज्वाला-ऽऽलि-बला-फेला वलि-रिल्वलया सुवर्चला धूलिः।
शष्कुलि-पालि-स्थाली-प्रवेणि-वेण्य-श्रि-तडि-त्ताडि ॥
कृष्य-टवी-छवि-नीवी-ग्रीवा-मूर्वा-मुषुण्ढि-शम्या-ऽर्वाक्।
वासोदशा-कशा-पेशि-शारिवाः पथ्यया च कथा ॥
मञ्जूषा गण्डूषा मूषा रुट् तृट् स्वधा मषि-र्मसी।

अतसी वृसी वसा नासा स्नुषयो–रु–र्गुहा च कुहूः ॥
द्राक्षा लक्षा लाक्षा लिक्षा कक्षा च काङ्क्षया स्वाहा ।' इति ।

एषां व्याख्या—

दृगिति । रशनेति । हम्भेति । छायेति । यात्रेति । एलेति । ज्वालेति । कृषीति । मञ्जूषेति । द्राक्षेति च । एते दृगादयः स्वाहान्ताः शब्दाः सह शिफया, वरत्रया, वागुरया, कन्धरया, शर्करया, मेखलया, इल्वलया, पथ्यया, स्नुषया, कांक्षया च सह स्त्रीलिङ्गा भवन्ति। दृक् = चक्षुः, दर्शनम्, बुद्धिश्च । 'दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च, त्रिषु वीक्षके ।' इति––(मे० पृ० १६३ श्लोकः ८) । ओषधिः = व्रीहियवादिः, फलपाकान्ता, फलपाक एवान्तो यस्याः । 'ओषधिः फलपाकान्ता' इति (अम० ना० लिं० पृ० १२९ श्लो० ६) । तथा च प्रयोगः––'यत्रौषधयो रजन्याम्' इति कुमारः–– इति मुकुटः । 'यत्रान्या ओषधयो म्लायन्ते' इति श्रुतिः' इति च–(अम० सु० व्या० टि० पृ० १२९ स्तं० १ पं० ३८, ३९) । 'ओषधी' इत्यपि । ज्योत्स्ना = चन्द्रप्रभा । 'ज्योत्स्ना चन्द्रातपेऽपि स्याज्ज्योत्स्नायुक्तनिशि स्मृता ।' इति––(मे० पृ० ८३ श्लो० ८) । नौः = जलतरणकाष्ठपञ्चर्यविशेषः, नौका । "नाव" इति लोके । 'स्त्रियां नौस्तरणिस्तरिः ।।' इति–– (अम० ना० लिं० पृ० ५६ श्लो० १०)। पृतना = सेनामात्रम्, सेनाविशेषश्च । 'सेना पृतनानीकिनी चमूः' इति । 'वाहिनी पृतना चमूः ।' इति च––(अम० ना० लिं० पृ० २८९, २९० श्लो० ७८, ८१) । खनिः खानिश्च द्रव्याकरविशेषौ, रत्नाद्युत्पत्तिस्थानम्। 'खनिः स्त्रियामाकरः स्यात्' इति (अम० ना० लिं० पृ० १२६ श्लो० ७) । 'खनिरेव मता खानिः' इति द्विरूपकोषः' इति— (अम० सु० व्या० पृ० १२६ स्तं० २ पं० २५) । रशना = काञ्ची, स्त्रीकटिभूषणम् । 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ।' इति––(अम० ना० लिं० पृ० २४० श्लोकः १०८) रसना = जिह्वा । 'रसनं स्वदने ध्वनौ । जिह्वायां तु न पुंसि स्यात्' इति––(मे० पृ० ९१ श्लोकः १२) । 'रसनं स्वदने ध्वाने, रसना काञ्चिजिह्वयोः । रसनं चापि रास्नायाम्' इति––(वि० प्र० पृ० ८७ श्लोकः ३०) । 'रसनं निस्वने स्वादे, रसना काञ्चिजिह्वयोः।' इत्यजयधरणी' इति— (अम० सु० व्या० पृ० २४० स्तं० २ पं० १५) । 'रसनं तु ध्वनौ स्वादे,रसज्ञारास्नयोः स्त्रियाम् ।' इति रभसः' इति— (अम० सु० व्या० पृ० २३४ स्तं० २ पं० १०, ११) । 'रशना' इत्यपि । दन्त्यतालव्यमध्योऽयम् । 'तालव्या अपि दन्त्याश्च शम्बशम्बलशूकराः । रशनाऽपि जिह्वायाम्' इत्यूष्मविवेकः' इति च––(अम० सु० व्या० पृ० २४० स्तं० २ पं० १३, १४) । रास्ना = ओषधिविशेषः, गन्धनाकुली । "रासना" इति ख्याता । एलापर्णी च । 'नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ॥' इति—(अम० ना० लिं० पृ० १६७ श्लोकः ११४) । एलापर्णी तु सुवहा रास्ना युक्तरसा च सा ।' इति च––(अम० ना० लिं० पृ० १७५ श्लोकः १४०) ।

रोचना=गोपित्तम्, रक्तकह्लारम्, वरस्त्री च। 'रोचना रक्तकह्लारे गोपित्तवरयोषितोः।' इति--(मे० पृ० ९१ श्लोकः १६)। धेनुः=प्रत्यग्रप्रसवा, अभिनवप्रसवा, नूतनप्रसूता। 'धेनुः स्यान्नवसूतिका।' इति--(अम० ना० लिं० पृ० ३२६ श्लोकः ७१)। 'धेनुर्गोमात्रके दोग्ध्याम्' इति--(अने० सं० पृ० २३ श्लोकः २७५)। तनुः=शरीरम्, त्वक् च। 'तनुः काये त्वचि स्त्री स्याद् त्रिस्वल्पे विरले कृशे।' इति--(मे० पृ० ८३ श्लोकः ९)। 'त्वग्देहयोरपि तनुः' इति च --(अम० ना० लिं० पृ० ४१६ श्लोकः ११३)। निःश्रेणिः=आरोहिणी, काष्ठादिकृतारोहणमार्गः, खर्जूरीवृक्षश्च। 'निःश्रेणिरधिरोहिण्यां खर्जूरीपादपेऽपि च।' इति--(अने० सं० पृ० ६६ श्लोकः २२३)। वपा=विवरम्, बिलम्, मेदश्च। 'वपा विवरमेदसोः।' इति--(अने० सं० पृ० २६ श्लोकः ३०३)। वापिः=उदकाधारविशेषः। "वावली" "वावड़ी" इति च लोके। 'वापि तु दीर्घिका।' इति--(अम० ना० लिं० पृ० १०४ श्लोकः २८)। 'वापिः' इत्यपि। 'वाप्यां वापिरिति स्मृता।' इति द्विरूपकोषः' इति च--(अम० सु० व्या० पृ० १४ स्तं० १ पं० १०)। कृपा=करुणा, दया। 'कृपा दयायाम्' इति--(मे० पृ० १०२ श्लोकः ४)। सह शिफया वर्तत इति सशिफा। शिफा=तरुजटा, सरित्, नदी, मांसिका, जटामांसी, माता च। 'शिफा जटायां सरिति मांसिकायां च मातरि॥' इति--(मे० पृ० १०४ श्लोकः ३)। वणिज्या=वणिग्भावः, वणिक्कर्म। 'वाणिज्यं तु वाणिज्या स्यात्' इति--(अम० ना० लिं० पृ० ३२८ श्लोकः ७९)। हम्भाभम्भारम्भाः--हम्भा च भम्भा च रम्भा च इतरेतरयोगो द्वन्द्वः। हम्भा=गोध्वनिः, गवां रेम्भणम्। "गौओं का राम्भणा" इति लोके। 'हम्भा रेम्भणं च गवां ध्वनौ॥' इति--(त्रि० शे० पृ० ३०३ श्लोकः २१)। भम्भा=वाद्यविशेषः, भेरी। 'दुन्दुभिस्त्वानको भेरी भम्भा नासूश्च नान्द्यपि।' इति--(वै० पृ० १४६ श्लोकः १३३)। रम्भा=मोचा, कदली। "केला" इति लोके अप्सरोविशेषश्च। 'कदली सुकुमारा च रम्भा भानुफला मता।' इति धन्वन्तरिः' इति--(अम० सु० व्या० पृ० १६७ स्तं० १ पं० ८, ९)। 'रम्भा कदल्यप्सरसोः' इति च--(मे० पृ० १०६ श्लोकः ७)। अम्बा= जननी, माता। 'अम्बा तु माता' इति नाट्योक्ता' इति—(वै० पृ० १४४ श्लोकः १०६)। 'जनयित्री जनन्यम्बा माता' इति च--(वै० पृ० १७५ श्लोकः २६)। कम्बिः =वंशादीनां भागविशेषः, दर्विश्च। 'कम्बिरंशे च वंशस्य खजाकायामपि स्त्रियाम्॥' इति— (मे० पृ० १०४ श्लोकः २)। अक्षदुन्दुभिः=पाशकषडङ्किता। अक्षाः पाशकास्तैरुपलक्षितो दुन्दुभिः अक्षदुन्दुभिः। अक्षविषयो दुन्दुभिशब्दः स्त्रीलिङ्ग इत्यर्थः। इयं दुन्दुभिः पाशकषडङ्किता। अक्षबिन्दुत्रिकद्वयम्। तथा च प्रयोगः--'दुन्दुभ्या किल तत्कृतं पतितया यद् द्रौपदी हारिता' इति–(दु० लिं० व्या० पृ० ५ पं० १४-५)। अक्षग्रहणं वाद्यविशेषार्थस्य दुन्दुभिशब्दस्य निवृत्त्यर्थम्। तस्य पुंस्त्वमेव। 'केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्' इति–(वेणीसं० अं० १

श्लोकः २२) । इति–(दु० लिं० व्या० पृ० ५ पं० १६-७) । स्नायुः = अस्थिबन्धनम्, अङ्गप्रत्यङ्ग-सन्धिबन्धनरूपा स्नायुः । 'अथ वस्नसा। स्नायुः स्त्रियाम्' इति––(अम० ना० लिं० पृ० २२५ श्लोकः ६६) । सरयुः = नदीविशेषः । 'सरयूः' इत्यपि । 'सरयूसलिलं स्वादु बलपुष्टिप्रदायकम् ।' इति––(रा० नि० पृ० ३८३ श्लोकः १३) । उमा = अतसी । ''अलसी'' इति लोके । पार्वती च । 'उमा दुर्गाऽतसी च' इति—(त्रि० शे० पृ० २५६ श्लोकः २९३) । मा = लक्ष्मीः, मानश्च । 'मा स्त्री माने मृतौ वेलामेधाश्रीमध्यमातृषु ।' इति नानार्थरत्नमाला । 'मा जालन्ध्री व्यथा लक्ष्मीर्माता' इति च--(एका० ना० मा० पृ० १० श्लोकः ७७) । शमी = शिम्बा, वृक्षविशेषश्च । 'शमी शक्तुफलायां स्याच्छिम्बायां गुग्गुलावपि ।' इति–– (शि० को० पृ० ३० श्लोकः ३३२) । 'शमी हरिद्रा वृद्धिश्च लक्ष्मीः स्यात्पद्मचारिणी ।' इति च––(रा० नि० पृ० ४३० श्लोकः ११) । प्रतिमा = प्रतिकृतिः, अनुकृतिः, गजदन्तबन्धश्च । 'प्रतिमा गजदन्तस्य बन्धे चानुकृतावपि ।' इति—(मे० पृ० १११ श्लोकः ४८) । तारा = दशमहाविद्याप्रभेदः, भगवती, नक्षत्रम्, बालिभार्या, सुरगुरुपत्नी, कनीनिका च । 'नक्षत्रे चाक्षिमध्ये च तारा स्यात्तार इत्यपि ।' इति व्याडिः' इति––(अम० सु० व्या० पृ० ३७ स्तं० २ पं० २१, २२) । 'तारो वानरभिन्मुक्ताविशुद्ध्योः शुद्धमौक्तिके । ना, नक्षत्रेऽक्षिमध्ये च न ना, रूप्ये नपुंसकम् ॥ स्त्री बुद्धदेवताभेदे बालिगीष्पतिभार्य्ययोः । त्रिलिङ्गोऽत्युच्चशब्दे च' इति च–– (मे० पृ० १२५, १२६ श्लोकः ४३, ४४) । दया = कृपा । 'कृपा दयाऽनुकम्पा स्यात्' इति—(अम० ना० लिं० पृ० ७८ श्लोकः १८) । शिरोधरा = ग्रीवा । 'शिरोधरा वसुगिरा शिरोधिर्व्यापलण्डिका ।' इति— (वै० पृ० १८० श्लोकः ८४) । धारा = जलादिप्रपातः, सैन्याग्रिमस्कन्धः, अश्वगतिपञ्चकं च । 'धारा सैन्याग्रिमस्कन्धे तुरङ्गगतिपञ्चके ।' इति—(मे० पृ० १२६ श्लोकः ५०) । 'धारा सैन्याग्रदेशे च तुरङ्गगतिपञ्चके ॥ घटादिच्छिद्रसन्तत्योः प्रपाते स्याद् द्रवस्य च । खड्गादेर्निशिते देशे' इति च— (श० र० स० पृ० २५६ पं० २, ३, ४) । शिरा = रुधिरादिवाहिनी नाडी । 'शिरो ना पिप्पलीमूले, स्याद्धमन्यां च योषिति ।' इति—(मे० पृ० १२९ श्लोकः ९१) । मूर्धन्यादिरपि । 'नाडी तु धमनिः षिरा' इति च––(अम० ना० लिं० पृ० २२४ श्लोकः ६५) । नक्षत्रविशेषः, षष्ठनक्षत्रम् । 'आर्द्रा नक्षत्रभेदे स्यात्स्त्रियां, क्लिन्नेऽभिधेयवत् ॥' इति—(मे० पृ० १२३ श्लोकः ७) मथुरा = पुरीविशेषः, मधुपुरी, मधुरा । 'मथुरा तु मधूपघ्नम्' इति––(त्रि० शे० पृ० २७९ श्लोकः १५) । शब्दार्थचिन्तामणौ त्वस्या नाम्नो विशेषतोक्ता—'मथुराऽत्र विलोमेन मध्यमोनं यदक्षरम् । यो न स्मरति लोकेऽस्मिंस्तन्मध्यं तन्मुखोपरि ।' इति च—(श० चिं० पृ० ४९८ स्तं० १ पं० २७, २८) ।'मथूरा' इत्यपि । कृसरा = तिलौदनः । ''खिचड़ी'' इति लोके । 'कृसरा कृसरस्तिलौदनः' इति हर्षारुणौ' इति—(दु० लिं० पृ० ४६ पं० १) । अयं कृसरः,

इयं कृसरा, तिलतण्डुलमिश्रं भोजनम् । तालव्यमध्योऽपि–'कृशराऽपि तिलौदने ॥' इति––(हा० व० पृ० ४०८ श्लो० २६९) । 'किशरा' इत्यपि । 'कृशरा किशराऽपि च ।' इति च—(द्वि० को० पृ० ४१० श्लो० २१) । सुरा = मदिरा, देवस्त्री । 'सुरा देवस्त्रियां मद्ये' इति––(ना० मं० पृ० ७१ पं० १६) । हारा = मुक्तामाला । 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम् । क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः ॥' इति व्याडिशुभाङ्कौ । 'हट्टचन्द्रः' इति वा पाठः ।' इति––(अम० सु० व्या० पृ० २०५ स्तं० १ पं० २४, २५) । निद्रा = स्वप्नः । 'स्वापस्तु स्वप्नसंशयौ । निद्रा गुडाका सुप्तं च' इति––(वै० पृ० ९९ श्लोकः १९७) । वरत्रा = चर्म्मरज्जुः, गजमध्यबन्धनं च । 'वद्ध्रीं नद्ध्री वरत्रा च' इति––(वै० पृ० १३९ श्लोकः ४४) । 'चूषा कक्ष्या वरत्रा स्यात्' इति च––(वै० पृ० १११ श्लोकः ८४) । गोत्रा = पृथिवी, गोसमूहश्च । 'गोत्रा भूगव्ययोः' इति (मे० पृ० १२४ श्लोकः २६) । कन्धरा = ग्रीवा । 'ग्रीवायां कन्धरा मता ।' इति—(मे० पृ० १३१ श्लो० १२३) । मन्दुरा = अश्वशाला । 'मन्दुरा वाजिशालायाम्' इति––(मे० पृ० १३७ श्लो० २००) । मदिरा = मद्यम् । 'मदिरा कश्यमद्येऽपि' इति च—(अम० ना० लिं० पृ० ३५० श्लोकः ४०) । एला = बहुलगन्धा, ऐन्द्री । "इलायची" इति लोके । 'तटनीलिकयोरेला' इति—(रा० नि० पृ० ४२६ श्लो० ५५) । लाला = श्लेष्मादिस्रवः, मुखस्रावः । "लार" थूक" इति च लोके । 'लाला भवेन्मुखस्रावः सृणिका स्यन्दिनी च सा ।' इति—(रा० नि० पृ० ४०० श्लो० ५५) । मनःशिला = धातुद्रव्यविशेषः । 'कुनटी तु मनःशिला' इति––(रा० नि० पृ० ४२१ श्लोकः ६) । 'मनःशिला स्यात्कुनटी मनोज्ञा शिला मनोह्वापि च नागजिह्वा ।' इति च––(रा० नि० पृ० १५५ श्लो० १५८) । आवलिः = सान्तर्पंक्तिः, वृक्षादिपंक्ति, परम्परा च । 'आवलिः पद्धतिः पंक्तिरालिर्लेखा च मालिका ।' इति––(वै० पृ० १८८ श्लो० २८) । तुला = ऊर्ध्वमानम्, पलशतम्, राशिविशेषः, सादृश्यं च । 'तुला सादृश्यमानयोः ॥ गृहाणां दारुबन्धाय पीठिकायामपीष्यते । राशौ पलशते भाण्डे' इति—(मे० पृ० १४६ श्लो० २४, २५) । ज्वाला च आलिश्च बला च फेला चेतीतरेतरयोगो द्वन्द्वः । ज्वाला = अग्न्यर्चिर्विशेषः । 'शिखा जिह्वार्चिरपुमान्, कीला ज्वाला च नृस्त्रियोः ।' इति––(वै० पृ० ११ श्लो० २९) । आलिः- = सखी, रेखा च । 'आलिः सखी सेतुरालिरालिरावलिरिष्यते ।' इति—(अने० समु० पृ० ३८ श्लो० ४२३) । वलिः = त्वग्मांससङ्कोचः, मध्यगरेखा, ऊर्मिः, गृहदारु च । 'वलिर्मध्यगरेखोर्मिजीर्णत्वग्गृहदारु च ।' इति––(वै० पृ० २२२ श्लो० ३३) । इल्वलाः = मृगशीर्षशिरोदेशस्थाः पञ्च स्वल्पतारकाः । नित्यबहुवचनान्तोऽयम् । 'इन्वका अपि ।' 'इन्वकास्तच्छिरोदेशे तारका इल्वला मताः ।' इति––(वै० पृ० २० श्लो० ३९) । धूलिः = पांशुः । 'धूलिः स्त्रियां,

रजः पांशू रेणुः पुंसि' इति—(वै० पृ० १२५ श्लो० २५) । शष्कुलिश्च पालिश्च स्थाली च प्रवेणिश्च वेणी च अश्रिश्च तडिश्च ताडिश्च एषां समाहारो द्वन्द्वः । शष्कुलिः = कर्णदेशः, अपूपविशेषश्च । ''सोहाली'' इति लोके । 'शष्कुल्यपूपभेदेऽपि' इति—(वै० पृ० २४९ श्लो० २६) । 'शष्कुली त्वायता पिष्टगुडतैलतिलैः कृता ।' इति च—(वै० पृ० १६५ श्लो० ७५) । पालिः = कर्णलतिका, सेतुश्च । 'पालिः स्त्र्यस्त्र्यङ्कपंक्तिषु ॥' इति—(अम० ना० लिं० पृ० ४३१ श्लो० १९७) । 'सश्मश्रुयुवती पालिः प्रस्थः (पंक्ति) कर्णलताऽपि च ।' इति—(त्रि० शे० पृ० ३७२ श्लो० ३९९) । 'पालिः कर्णलतायां स्यात्प्रदेशे पंक्तिचिह्नयोः ।' इत्यजयः' इति—(अम० सु० व्या० पृ० ४३१ स्तं० २ पं० २४, २५) । 'पाली' इत्यपि । 'पालिः कर्णलताग्रेऽस्नौ पंक्तावङ्कप्रदेशयोः । छात्रादिदेये, स्त्री पाली यूका सश्मश्रुयोषितोः ।' इति च—(मे० पृ० ४३१ श्लो० १९७) । स्थाली = पिठरः, ओदनादिपचनपात्रम् । 'स्थालं भाजनभेदेऽपि, स्थाली स्यात्पाटलोखयोः ।' इति—(मे० पृ० १४९ श्लो० ५५) । प्रवेणिः = गीतप्रस्तारः । गजोपर्य्यास्तरणचित्रकम्बलः । प्रोषितभर्तृकादिधार्यकेशरचनाविशेषश्च । 'प्रवेणिः स्त्री कुथावेण्यो.' इति—(मे० पृ० ४९ श्लो० ६३) । 'प्रवेणी' इत्यपि । 'स्त्री प्रवेणी' । 'कुथं त्रिषु' इति बोपालितः' इति—(अम० सु० व्या० पृ० २७९ स्तं० २ पं० २४) । 'प्रवेण्यास्तरणं वर्णः' इति च—(अम० ना० लिं० पृ० २७९ श्लो० ४२) । वेणिः = केशबन्धनविशेषः । 'वेणिप्रवेणी' इति—(अम० ना० लिं० पृ० २३७ श्लो० ९८) । 'करणिश्रोणिवेणयः' इति स्त्रीकाण्डे निगमः' इति—(अम० सु० व्या० पृ० २३७ स्तं० १ पं० २०, २१) । 'वेण्यपि' । 'वेणी सेतुप्रवाहयोः । देवताडे केशबन्धे' इति—(अने० सं० पृ० १४ श्लोकः १५६) । 'देवताडेऽपि वेणी स्यात्प्रवेण्यामपि योषिति ।' इति रभसः' इति च—(अम० सु० व्या० पृ० १५१ स्तं० २ पं० ३०, ३१) । अश्रिः = कोटिः, कोणभागः । 'कोणस्तु स्त्रियः पाल्यश्रिकोटयः ॥' इति—(अम० ना० लिं० पृ० २९५ श्लोकः ९३) । 'अश्रिः कोणैकदेशयोः ।' इति च धरणिः' इति— (अम० सु० व्या० पृ० २९५ स्तं० २ पं० १४) । तडिः = आघातस्थानम् । ताडिः = वृक्षविशेषः, आभरणविशेषश्च । 'ताल्यां दृढदला ताडी पत्रताली वराङ्गना ।' इति—(वै० पृ० ६३ श्लोकः २२४) । कृषिः = कर्षणम् । ''जुताई'' ''किसानी'' इति च—लोके । 'अनृतं कृषिः' इति—(अम० ना० लिं० पृ० ३०३ श्लोकः २) । 'अनृतं कृषावसत्ये च' इति रुद्रः । 'प्रमृतं' इति तु सभ्यपाठः–इति स्वामी । 'प्रमृतं कर्षणं स्मृतम् ।' इति (मनुः ४।५) अत्र तु कृषेर्निरुक्तिः—'शुनो वृत्तिः स्मृता सेवा गर्हितं तद् द्विजन्मनाम् । हिंसादोषप्रधानत्वादनृतं कृषिरुच्यते ।' इति च—(अम० सु० व्या० पृ० ३०३ स्तं १ पं० ७तः) । अटवी = अरण्यम्, वनम् । 'अटव्यरण्यं विपिनम्' इति—(अम० ना० लिं० पृ० १२७ श्लो० १) । छविः = त्वक् । 'राढा शोभा छवी रुक् त्विट्' इति—(वै० पृ० १७१ श्लो० १५०) । 'छविः

शोभारुचोर्योषित्' इति च--(मे० पृ० १५८ श्लो० ७) । नीवी=मूलधनम्, युवतिजघन-वस्त्रबन्धश्च । 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ।' इति--(अम० ना० लिं० पृ० ४३४ श्लो० २१२) 'नीवी स्त्रीकटीवस्त्रबन्धने । मूलद्रव्ये परिपणे' इति--(अने० सं० पृ० ४३ श्लो० ४५१) । परिपण आडम्बरः—इत्यनेकार्थकैरवाकरकौमुदी' इति च--(अम० सु० व्या० टि० पृ० ३२८ स्तं० २ पं० ३८) । ग्रीवा=कन्धरा । ''गरदन'' इति लोके । 'स्यात्तु ग्रीवा कन्धरायां तच्छिरायां च योषिति ।' इति--(मे० पृ० १५८ श्लो० ६) । मुषुण्ढि:=दण्डविशेषः, अग्नियंत्रम्, आयुधविशेषश्च । 'मुसुण्ठी' इत्यपि । 'मुसुण्ठी स्याद्दारुमयी वृत्तायः कीलसञ्चिता ।' इति--(वै० पृ० ११८ श्लो० १७०) । शब्दार्थचिन्तामणौ तु 'भुशुण्डी' इति दृश्यते । तत्रैव तस्या लक्षणम्—'उड्डीयोड्डीय च प्राप्य नदन्ती दशकर्त्तृका । क्रमते चानताङ्गी या सा 'भुशुण्डी' निगद्यते ॥' इति च—(श० चिं० पृ० ४४७ पं० ११ तः) । अन्यत्रापि, 'भुशुण्डी परिघायुधा ।' इति । शम्या=दक्षिणहस्तगृहीततालविशेषः, युगकीलिका च । ''सैला'' ''संबल'' इति वा लोके । 'शम्या तु युगकीलकम् ।' इति--(वै० पृ० १२५ श्लोकः २८) । यष्टिरपि । यथा--'धनुःशतं परीहारो ग्रामस्य स्यात्समन्ततः । शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु ॥' अत्र शम्या यष्टिरिति कुल्लूकभट्टः' इति च--(श० चिं० पृ० ५१८ स्तं० १ पं० २७ तः) । अर्वाक्=अवान्तरम्, प्रधानान्तःपाति, मध्य-वर्ति, अन्तर्गतम् । वासा=औषधिविशेष, आटरूषकः । ''अरडूसा'' इति लोके । वृषो वासाऽऽटरूषकः ।' इति--(प० र० मा० पृ० १५ पं० १०) । 'वासो गृहेऽप्यवस्थाने, वासा स्यादाटरूषके ।' इति च रुद्रः' इति--(अम० सु० व्या० पृ० १६३ पं० २३) । पेशिः=मांसा-द्येकदेशः, शुण्ठः, मांसलता, पक्षिणामण्डं च । 'पेशिः शुण्ठः' इति--(वै० पृ० १६६ श्लोकः ८९) । 'पेशिर्मांसलता' इति--(वै० पृ० १८२ श्लोकः ११२) । 'पेशी' इत्यपि । 'पेशी कोशश्च डिम्बोऽण्डम्' इति--(वै० पृ० ३० श्लोकः ५०) । 'पेशी सुपक्वकणिके मांस्यां खड्गपिधानके । मांसपिण्डयामण्डभेदे' इति च--(मे० पृ० १६३ श्लोकः १२) । पथ्या=हरी-तकी । ''हड़'' इति लोके । 'पथ्या मुण्डी-विजया-वन्ध्या-पद्मासु' इति—(शि० को० पृ० ३१ श्लोकः ३४३) । 'पथ्या हरीतकी, महाश्रावणी, पद्मचारिणी च' इति धन्वन्तरिः' इति--(रा० नि० पृ० ४३९ द्रव्यसंख्या ५३) ।' 'अभया चिर्भिटा वन्ध्याकर्कोटी च मृगादनी । पथ्यायां सम्प्रवक्ष्यन्ते चतस्रश्च भिषग्वरैः ।' इति च--(रा० नि० पृ० ४२९ श्लोकः ३) । कथा= कथनम्, प्रबन्धकल्पना, कादम्बर्य्यादिः । 'प्रबन्धकल्पना कथा' इति--(अम० ना० लिं० पृ० ६५ श्लोकः ६) । 'कथा सूत्रं प्ररोचना ।' इति—(वै० पृ० १४७ श्लोकः १४१) । 'कथा त्वाख्यायिकाऽऽख्यानम्' इति च--(वै० पृ० ३४ श्लो० ३८) । रुट्=रोषः, कोपः ।

'कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ ।' इति--(अम० ना० लिं० पृ० ८० श्लोकः २६) । टापि । (भागुरिमतेन) 'क्रोधो भामः क्रुधा रुषा ।' इति च शब्दार्णवः' इति--(अम० सु० व्या० पृ० ८० स्तं० २ पं० १९) । तृट् = तृष्णा । 'तृट् लिप्सायामुदन्यायां स्मरपुत्र्यामपि स्त्रियाम् ।' इति--(मे० पृ० १६६ श्लो० १४) (टाबन्तापि भागुरिमते) 'तृषा लिप्सातृषोः स्त्रियाम् ।' इति च--(मे० पृ० १६६ श्लोकः १३) । स्वधा = पितृदानार्थो मंत्रविशेषः । मषिः = लेखद्रव्यविशेषः । 'मषी' इत्यपि । 'मालिनाम्बु मषी मसी' इति—(अभि० सं० अभि० चिं० पृ० २२ श्लोकः ४८४) । 'मसिः' 'मसी' इति च । 'मेला पत्राञ्जनं मसिः ।' इति--(हा० व० पृ० ४०६ श्लो० २१२) । 'वर्गिका मसी ॥ मसिर्ना' इति--(त्रि० शे० पृ० २७२ श्लोकः ३, ४) । 'मसिजलं तु मेला स्यात्पत्राञ्जनं, मसिर्द्वयोः ॥' इति च--(त्रि० शे० पृ० २९८ श्लो० २७) । मांसी = गन्धद्रव्यविशेषः । 'मांसी कङ्कोलीजटयोः स्त्रियाम् ।' इति--(शि० को० पृ० ४८ श्लोकः ५२५) । 'अथ जटादिमांस्याम् । मांसी रुदन्त्याम्' इति च—(रा० नि० पृ० ४२७ श्लोकः ७७) । अतसी = क्षुमा । "अलसी" इति लोके। 'अतसी स्यादुमा क्षुमा।' इति—(अम० ना० लिं० पृ० ३०८ श्लोकः २०) । वृसी = आसनविशेषः, ब्रह्मचर्य्याद्यासनम् । 'अतसी वृसी मांसी' इति चन्द्रगोमी' इति—(अम० सु० व्या० पृ० २६४ स्तं० १ पं० २४) । 'मूर्धन्यान्तोऽपि ।' 'व्रतिनामासनं बृषी ।' इति—(अम० ना० लिं० पृ० २६४ श्लोकः ४६) । 'गण्डूषा मञ्जूषा वृषी' इति च मूर्धन्यान्तेषु लिङ्गकारिका--इति मुकुटः' इति--(अम० सु० व्या० टि० पृ० २६४ स्तं० १ पं० ३९, ४०) । वसा = मेदः, शुद्धमांसस्नेहः । 'वसा त्वामिषो रसः ।' इति -(वै० पृ० १८२ श्लोकः ११४) । नासा = नासिका । 'घ्राणं गन्धवहा नासा नसा नस्या च नासिका ।' इति साहसाङ्कः' इति-- (अम० सु० व्या० पृ० २३३ स्तं० २ पं० २६, २७) । स्नुषा = पुत्रपत्नी । 'समाः स्नुषाजनीवध्वः' इति--(अम० ना० लिं० पृ० २०६ श्लोकः ९) । ऊरुः = जंघा, जानूपरिभागः । 'सक्थि क्लीबे, पुमानूरुः' इति—(अम० ना० लिं० पृ० २२७ श्लोकः ७३) । कुहूः = अमावस्याविशेषः, नष्टचन्द्रकला । 'सा (अमावास्या) नष्टेन्दुकला कुहूः ।' इति--(अम० ना० लिं० पृ० ४६ श्लोकः ९) । 'कुहू स्त्री कोकिलालापनष्टेन्दुकलदर्शयोः ॥' इति--(मे० पृ० १७५ श्लोकः २) । 'कुहुः' इत्यपि।। मृगय्वादित्वाद् ह्रस्वोऽपीत्यन्ये । 'धेनूरुरज्जुकुहुसरयुतनुकरेणवः स्त्रियाम्' इति च विन्ध्यवासी' इति-- (अम० सु० व्या० पृ० ४६, स्तं० २ पं० १६, १७) । द्राक्षा = मृद्वीका । "दाख" "मुनक्का" "अँगूर" इति च लोके। 'मृद्वीका गोस्तनी द्राक्षा' इति- (अम० ना० लिं० पृ० १६४ श्लोकः १०७) । लक्षा = सहस्राणां शतम् । 'लक्षा न पुंसि संख्यायां, क्लीबं व्याजशरव्ययोः ॥' इति--(मे० पृ० १६७ श्लोकः २३) । कांक्षा = वाञ्छा, इच्छा । 'इच्छा कांक्षा स्पृहेहा तृड्

वाञ्छा लिप्सा मनोरथः ॥' इति--(अम० ना० लि० पृ० ८१ श्लोकः २७) ।

अथेदानीं ह्रस्वेकारान्तान् भंग्यादीन् कीर्त्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः। इति--(अभि० सं० लि० पृ० ३४ श्लोकः ४१, ४२, ४३, ४४, ४५, ४६) । ।

... ... भङ्ग्या–ऽऽवल्या–ऽऽयति–स्त्रोटिः ॥ २४ ।
पेशि–र्वासि–र्वसति–विपणी नाभि[1]–नाल्या–ऽऽलि पालि–
र्भल्लिः पल्लि–र्भ्रुकुटि–शकटी चर्चरिः शाटि–भार्चतिः ।
खाटि–र्वर्ति–र्व्रतति–वमि–शुण्ठी–ति रीति–र्वितर्दि–
र्द[2]र्वि–र्नीवि–च्छवि–लिबि–शठि–श्रेढि–जात्याऽ[3]जि–रा[4]जि ॥२५॥
रुचिः सूचि–साची खनिः खानि–खा[5]री ।
खलिः कीलि–तूली क्लमि–र्वापि–धूली ।
कृषिः स्थालि–हिण्डी त्रुटि–र्वेदि–नान्दी
किकिः कुक्कुटिः काकलिः शुक्ति–पंक्ती ॥२६॥
किखि–स्ताडि–कम्बी द्युतिः शारि–राति–

पाणिनीयेऽपि–(१) (नाभिरक्षत्रिये) । क्षत्रियार्थे रहिते नाभिः स्त्रियां स्यात् । नाभिः=मृगमदः । सि० कौ० पृ० ३९७ सू० १५ ।

पाणिनीयेऽपि--(२) (दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः) एते स्त्रियां स्युः। पक्षे ङीष्--दर्वी, दर्विः=पाकोपकरणम् । विदी, विदिः=वेदी, वेदिः=यागोपकरणी, परिष्कृता भूमिः। खनी, खनिः=आकर, गञ्जा । शानी, शानिः=पट्टवृक्षः। अश्री, अश्रिः=कोटिः, खड्गाद्यग्रभागः । वेशी, वेशिः=वारवध्वालयः। कृषी, कृषिः=वैश्यवृत्तिविशेषः, अनृतम् । ओषधी, ओषधिः=फलपाकान्तः कदल्यादिः, व्रीहिर्यवादिः। कटी, कटिः=श्रोणिदेशः । अङ्गुली, अङ्गुलिः=करशाखा । सि० कौ० पृ० ३९८ सू० २४ ।

(३) (आजिः स्त्रियामेव) ॥ आजिः=युद्धम् । सि० कौ० पृ० ४०३ सू० १६२ ।

(४) (शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिबलिपंक्तयः) ॥ एतेऽपि स्त्रियां स्युः। शष्कुली, शष्कुलिः=कर्णदेशः । अपूपविशेषश्च । राजी, राजिः=रेखा । कुटी, कुटिः=स्वल्पगृहम् । अशनी, अशनिः=विद्युत्, पविश्च । वर्त्ती, वर्तिः=दीपादिसम्बन्धिवर्तितं द्रव्यम् । भ्रुकुटी, भ्रुकुटिः=भ्रूभङ्गः। त्रुटी, त्रुटिः=कालविशेषः। बली, बलिः=जरया श्लथचर्म, त्वड्मांस-सङ्कोचः । पंक्ती पंक्तिः=श्रेणिः, सान्तरवीथी । सि० कौ० पृ० ३९८ सू० २६।

(५) (खारीमानिके स्त्रियाम्) ॥ इयं खारी=मानविशेषः। मानिका=द्रोणचतुष्टयम् । सि० कौ० पृ० ४०१ सू० १०४।

स्तटि: कोटि[2]–विष्टी वटिर्गृष्टि–वीथी ।
दरि–र्वल्लरि–र्मञ्जरिः पुञ्जि–भेरी ।
शरारि–स्तुरिः पिण्डि–माढी भुषुण्ढिः ॥२७॥
राटि–राटि–रटविः[3] परिपाटिः
फालि–गालि–जनि–काकिनि कांतिः (निः) ।
चारि–हानि–वलभि प्रधि–क्रुत्ती
चुल्लि[4]–चुण्डि–तरयोऽतिथि–शाणी ॥२८॥
सनि: सानि–मेनी–मरि–र्मारि–रश्र्यो–
षधी विद्रिधि–र्झल्लरिः पारि–रभ्रिः
शिरोधिः कविः कीर्त्ति, इति ।

एषां व्याख्या—

भङ्गीति । पेशिरिति । रुचिरिति । किखिरिति । राटिरिति । सनिरिति च । एते भङ्ग्यादयः कीर्त्यन्ता ह्रस्वेकारान्तशब्दाः स्त्रीलिङ्गा भवन्ति । भङ्गिश्च आवलिश्च तयोः समाहारो द्वन्द्वः व्याख्या तु प्राग्वत् । आयतिः=दैर्घ्यम्, प्रभावः, आगामिकालश्च । 'आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः ।' इति—(मे० पृ० ६१ श्लो० ९४) । वासिः= तक्षणी । ''वसूली' इति लोके । 'वासी स्याद् दारुतक्षणी ।' इति—(वै० पृ० १३९ श्लोकः ३६) । वसतिः=वासः, निशा, निकेतनं च । 'वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने ।' इति—(मे० पृ० ६५ श्लो० १५१) । नालिः= नाडी, शिरा, पद्मादिदण्डः, शाकविशेषः । 'मतान्तरे तु' कन्दली, तृणविशेषश्च । आलिः=वयस्या, सेतुः, पंक्तिश्च । 'आलिर्विशदाशये । त्रिषु, स्त्रियां वयस्यायां सेतौ पंक्तौ च कीर्तिता ।' इति—(मे० पृ० १४५ श्लोकः २) । पालिः=कर्णलताग्रः, अस्रिश्च । 'पालिः कर्णलताग्रेऽस्रौ पंक्तावङ्कप्रदे-

(१) (त(तृ)टिसीमासम्बन्ध्याः) ॥ त(तृ)टिः=तीरं कूलं च । सीमा=अवधिः । सम्बध्या=सि० कौ० पृ० ३९८ सू० ३१ ।

(२) (लक्षा कोटिः स्त्रियाम्) ॥ इयं लक्षा=सहस्त्राणां शतम् । कोटिः—लक्षाणां शतम् । "वा लक्षा नियुतं च तत्" इत्यमरात् क्लीबेऽपि लक्षम् । सि० कौ० पृ० ४०२ सू० १४७ ।

(३) (अटवी स्त्रियाम्) ॥ अटवी, अटविः—अरण्यम् । सि० कौ० पृ० ४०२ सू० १४१ ।

(४) (चुल्लिवेणिखार्य्यश्च) ॥ चुल्लिः—उद्धानम् । वेणिः—केशबन्धनविशेषः । खारी—मानविशेषः सि० कौ० पृ० ३९८ स० ३२

शयो: ।' इति--(मे० पृ० १४७ श्लोक: ३०) । भल्लि: = भल्लातक: । "भिलावां" इति लोके । पल्लि: = भिल्लादिनिवासविशेष:, क्षुद्रग्राम:, कुटी, कुटीसमूहश्च । शकटि: = वाहनविशेष:, मुनीनां वाहनविशेषश्च । चर्चरि: = गीतभेद:, अनृजुकेश:, करशब्दश्च । 'चर्चरी गीतभेदे च केशभित्करशब्दयो: ।' इति रुद्र:' इति--(श० चिं० पृ० ९०९ स्तं० १ पं० ३त:) हर्षक्रीडेति सुभूतिश्च । शाटि: = प्रावरणविशेष: । भाति: = शोभा । खाटि: = असद्ग्रह:, किण:, शवरथश्च । 'शवयानं कट: खाटि:' इति--(वै० पृ० १२२ श्लोक: २१६) । व्रतति: = लता । 'वल्ली तु व्रततिर्व्रतती लता ।' इति--(वै० पृ० ४५ श्लोक: ७) । वमि: = वान्ति: । 'वमन' इति लोके । 'वमिर्वान्तौ स्त्रियाम् ।' इति—(मे० ११० श्लोक: २९) । शुण्ठि: = महौषधम्, शुण्ठी । "सूँठ" इति लोके । इति: = गति:, गमनम् । रीति: = पित्तलम् । वैदर्भ्यादिश्च । 'रीति: स्त्रियां स्पन्दप्रचारयो: । पित्तले लोहकिट्टे च' इति--(मे० पृ० ५७ श्लोक: ५१) । वितर्दि: = वेदिका, प्राङ्गणादिषु कृतस्योपवेशस्थानम् । 'स्याद्वितर्दिस्तु वेदिका ।' इति—(अम० ना० लिं० पृ० १२२ श्लोक: १६) । 'वेदिका तु वितर्दिका ।' इति च—(वै० पृ० १६१ श्लो० ३६) । दर्वि: = खजाका, सर्पफणा च । 'दर्वि: स्त्रियां खजाकायां फणायामुरगस्य च ।' इति—(मे० पृ० १०५ श्लोक: ५) । लिबि: = लिपि:, लिखितवर्ण:, अक्षरपद्धति:, लिखिताक्षरविन्यास:, लेखनम् । 'लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ ।' इति--(अम० ना० लिं० पृ० २७० श्लोक: १६) । शठि: = गन्धशटी, गन्धमूली, गन्धपलाशी । "कचूर" इति लोके । 'गन्धपलाशी' सुगन्धद्रव्यम् काश्मीरे प्रसिद्धम् । 'सुगन्धमूला गन्धाली शटिका च पलाशिका ।' इति—(रा० नि० पृ० १९ श्लोक: ८६) । श्रेढि: = गणितप्रभेद:, लीलावत्युक्ताङ्कविशेष: । जाति: = मालती, जातीफलम्, गोत्रम्, जन्म च । 'जातिश्छन्दो जन्म गोत्रं सव्याहृतिकरोत्तरम् । सामान्यं मालती च' इति—(ना० र० मा० पृ० २८ पं० ५) । आजि: = युद्धम्, समस्थलं च । 'आजिर्युद्धे समस्थले ।' इति--(ना० र० मा० पृ० १७ पं० १४) । राजि: = पंक्ति:, रेखा च । 'राजिस्तु पंक्तौ रेखायाम्' इति—(ना० र० मा० पृ० १७ पं० १४) । रुचि: = शोभा, दीप्तिश्च । 'रुचि: शोभास्पृहाभिष्वङ्गदीप्तिषु ।' इति--(अने० ति० पृ० २८ श्लोक: २५१) । साचि: = तिर्यक् । "तिरछा" इति । "टेढा" इति च लोके । 'तिर्यक् साचिरपि स्त्रियाम् ।' इति रत्नकोष:' इति--(अम० सु० व्या० टि० पृ० ४४५ स्तं० १ पं० ३९) । तथा च प्रयोग:-- 'भित्तौ साची परिणतमुखी' इति च सप्तकुमारिका' इति--(अम० सु० व्या० टि० पृ० ४४५ स्तं० १ पं० ३८, ३९) । खारि: = धान्यमानभेद:, खारी, द्रोणचतुष्टयम् । 'तौ (वाहौ) द्वौ खारी' इति--(वै० पृ० १९० श्लोक: ५७) । खलि: = तैलकिट्टम् । "खल" इति लोके । पक्वान्नविशेषश्च । 'पिण्याको ना, खलि: स्त्रियाम् ।' इति—(वै० पृ० १३८ श्लोक: २७) । 'खलि: स्त्री तण्डुलै: पिष्टैर्जले पक्वा घनद्रवा ।' इति

च––(वै० पृ० १६५ श्लोकः ८१) । कीलिः = कीलिका । ''धुरी की कील'' इति लोके । तूलिः = तूली, ईषिका, स्वनाम्ना ख्यातं चित्रकारोपकरणम्, चित्रकूर्चिका, शय्याविशेषः, शय्योपकरणम् । ''तोसक'' इति लोके । क्लमिः = क्लान्तिः । हिण्डिः = । नान्दिः =

किकिः = किकिदिवः, चाषः, नारिकेलश्च । कुक्कुटिः = दम्भचर्या । काकलिः = सूक्ष्मस्वरः, सूक्ष्मध्वनिः । 'काकली तु कले सूक्ष्मे' इति––(अम० ना० लिं० पृ० ७२ श्लोकः २)। तथा च प्रयोगः––'साधूदितं काकलिभिः कुलीनैः' इत्यभिनन्दः' इति—(अम० सु० व्या० पृ० ७२ स्तं० १ पं० १६, १७) । शुक्तिः = मुक्तास्फोटः । ''सीपी'' इति लोके । शंखश्च । 'शुक्तिः कपालशकले शंखे शंखनकेऽपि च । नख्यश्वावर्त्तदुर्नाममुक्तास्फोटेषु च स्त्रियाम् ।' इति––(मे० पृ० ५९ श्लोकः ६६, ६७) । पंक्तिः = श्रेणी, दशाक्षरच्छन्दः, दशसंख्या च । 'छन्दोऽपि दशमं पंक्तिः' इति––(ना० र० मा० पृ० २७ पं० १३) । किखिः = फेरुः, शृगालविशेषः, लघुशृगालः । ''लोमड़ी'' इति लोके । कालगोत्रविशेषः, नालमूलविशेषश्च । 'किखिः स्त्री क्रोष्टुभेदेऽल्पे' इति––(वै० पृ० ६८ श्लोकः ३९) । द्युतिः = रश्मिः, शोभा च । 'द्युतिः स्त्री रश्मिशोभयोः ।' इति—(मे० पृ० ५५ श्लोकः २५) । शारिः = शकुनिकान्तरम्, युद्धार्थगजपर्य्याणम्, व्यवहारान्तरं च । 'स्त्रियां शकुनिकान्तरे । युद्धार्थगजपर्य्याणे व्यवहारान्तरेऽपि च ।' इति––(मे० पृ० १२५ श्लोकः ८८) आतिः = पक्षिविशेषः, शरारिपक्षी । 'आतिस्त्वाटिः शराटिका ।' इति—(वै० पृ० २६ श्लोकः ११) । तटिः = नदस्य तटम् । विष्टिः = करणविशेषः, भद्रा, सप्तमकरणम्, आजूः वेतनं बिना कर्मकर्त्ता । ''वेठी'' ''वेठु'' ''बेगारी'' इति च लोके । 'विष्टिस्त्रिषु कर्मकरे, स्त्र्याजूवेतनकर्मसु ।' इति––(मे० पृ० ३५ श्लोकः २८) । 'विष्टिः कर्मकरे मूल्ये भद्राजूप्रेषणेषु च ।' इति—(अने० सं० पृ० १० १०१) । 'आजूवेतनयोर्विष्टिः कर्मकृत्कर्मणोरपि ।' इति—(अने० समु० पृ० ४५ श्लोकः ५०७) । 'हठादभृतिकः क्लेशो विष्टिराजूश्च कीर्त्यते ।' इति कोषान्तरम् इति च—(श० चिं० पृ० २५० पं० २३, २४) । वटिः = वटिका, उपजिह्विका च । ''दीमक'' इति लोके । 'अथो वटिः ॥ उत्पादिका(को) देहिका स्यात्' इति—(त्रि० शे० पृ० २८८ श्लोकः १२, १३) । गृष्टिः = वाराही, वराहकान्ता, गृष्टिभेषजम्, कन्दविशेषः । ''गेंठी'' इति लोके । बदरम्, सकृत्सूतगवी च । 'अथ गृष्टिः सकृत्सूतगवीबदरयोः स्त्रियाम् ।' इति––(मे० पृ० ३४ श्लोकः ११) । दरिः = कन्दरा, कृत्रिमगृहाकारं विवरम्, गुहा । 'दरी' इत्यपि । 'कन्दरे तु दरी स्मृता ।' इति––(मे० पृ० १२६ श्लोकः ४६) । वल्लरिः = मञ्जरिः । मञ्जरिः = वल्लरिः । 'मञ्ज्यां मञ्जरि वल्लरी ।' इति––(वै० पृ० ४६ श्लोकः २०) । 'वल्लरिर्मञ्जरिः स्त्रियौ ।' इति––(अम० ना० लिं० पृ० १३२ श्लोकः १३) । तुलस्यादेरभिनवोद्भिद् । ङीपि दीर्घान्तोऽपि । 'मेथिकाचित्रमूलयोः । वल्लरी च' इति––

एषां व्याख्या—

(रा० नि० पृ० ४२६ श्लोकः ५४, ५५)। 'नवपुष्पाद्यशाखाग्रे वल्लरी मञ्जरी तथा।' इति—(रा० नि० पृ० ३२६ श्लोकः २२)। मञ्जरी = तुलसी। 'सुरभिर्बहुपत्री च मञ्जरी सा हरिप्रिया।' इति च—(रा० नि० पृ० १४४ श्लोकः ७८)। तथा च प्रयोगः—'व्यवृणुत वेल्लितबाहुवल्लरीका' इति माघः। 'नववञ्जुलमञ्जरीसनाथकरम्' इति काव्यप्रकाशे—इति मुकुटः।' इति—(अम० सु० व्या० पृ० १३२ स्तं० १ पं० ३९, ४०)। पुञ्जिः = समूहः। "ढेर" इति लोके। भेरिः = वाद्यविशेषः। "बड़ा ढोल" "नगाड़ा" इति वा लोके। शरारिः = पक्षिविशेषः। "आडी" इति लोके। 'शरारिराटिराडिश्च' इति—(अम० ना० लिं० पृ० १९६ श्लोकः २५)। 'शरालिः' अपि। 'शरातिः' इति पाठान्तरम्। 'आडिः शरालिर्वरटी गन्धोली वानरी कपी।' इति स्त्रीकाण्डे रत्नकोषः' इति—(अम० सु० व्या० पृ० १९६ स्तं० २ पं० ७, ८)। तुरिः = तन्तुवायस्य काष्ठनिर्मित उपकरणविशेषः, तुरी, तुली, वयन-साधनम्। 'तंत्रकाष्ठं तुरी (रिः) स्त्री स्यात्' इति—(त्रि० शे० पृ० ३०५ श्लोकः १२)। पिण्डिः=रथनाभिः, पिचिण्डिका, जानुनोऽधो मांसलप्रदेशश्च। राटिः = युद्धम्। "राड़" इति लोके। आटिः = पक्षिविशेषः, शरारिः। अटविः = वनम्। "जँगल" इति लोके। परिपाटिः = अनुक्रमः, आनुपूर्वी, क्रमः। 'आनुपूर्वी स्त्रियां वावृत्परिपाटी अनुक्रमः॥' इति—(अम० ना० लिं० पृ० २६१ श्लोकः ३६)। ङीषि परिपाटी च। 'कृता लङ्काभर्त्तुर्वदनपरिपाटीषु घटना' इति पूर्वप्रयोगः—इति मुकुटः' इति—(अम० सु० व्या० टि० पृ० २६१ स्तं० १ पं० ३९, ४०)। फाणिः (णिः) = गुडः, करम्भश्च। गालिः = निन्दा। 'क्षारणं गर्हणं निन्दा जुगुप्सा-गालिकुत्सना।' इति—(वै० पृ० ३३ श्लोकः ३३)। 'गालिः शपनम्' इति च—(त्रि० शे० पृ० ३१० श्लोकः ९)। जनिः = उत्पत्तिः, अभूतप्रादुर्भावः, जननम्। 'जनुर्जन्मन्यपि जनिस्त-दर्थेव निगद्यते।' इति—(श० र० स० पृ० १८६ पं०२०)। 'पुंस्त्वमपि'। तथा च प्रयोगः—'किमर्थं जनिना जन्तोः' इति—मुकुटपीयूषौ' इति—(अम० सु० व्या० टि० पृ० ५४ स्तं० २ पं० ३९)। कान्तिः (तिः) = शोभा, इच्छा च। 'कान्तिः शोभेच्छयोः स्त्रियाम्।' इति—(मे० पृ० ५४ श्लो० ८)। चारिः = चारी, नृत्याङ्गविशेषः, पितृप्रपा च। 'आम्रसेकस्तु यस्तत्र (गयायां) सा चारी सा पितृप्रपा।' इति—(वै० पृ० ८८ श्लोकः ६७)। हानिः = अपचयः, क्षतिः, क्षयम्। 'हानिः क्षये स्त्रियाम्' इति—(श० र० स० पृ० १८९ पं० १७)। वलभिः = गोपानसी, कुड्येषु छादनार्थं दत्तवक्रकाष्ठम्। "छज्जा" इति लोके। पटलाधारवंशपञ्जरं च। 'शुद्धान्ते वलभीचन्द्रशाले सौधोर्ध्ववेश्मनि।' इति रभसः' इति—(अम० सु० व्या० पृ० १२१ स्तं० २ पं० २१, २२)। 'वलभीच्छादनं दारुवक्रं गोपानसीं विदुः।' इति कोशा-न्तरम्' इति—(अम० सु० व्या० टि० पृ० १२१ स्तं० २ पं० ३५)। 'ह्रस्वान्तप्रयोगस्तु'—

'तां कस्यांचिद्भवनवलभौ' 'चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते' इति मेघदूतः । 'दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था' इत्यादिप्रयोगानुरोधाद् दीर्घान्तोपि ।' इति--(अम० सु० व्या० टि० पृ० १२२ स्तं० १ पं० ३५ तः) । प्रधिः = प्रकृष्टबुद्धिः । तद्युक्ता च--प्रकृष्टा धीर्बुद्धिर्यस्या सा । कृत्तिः = कृष्णसारादिचर्म, त्वक्, भूर्जः, नक्षत्रविशेषः, कृत्तिकानक्षत्रम् । 'कृत्तिश्चर्म्मत्वचोर्भूर्जे कृत्तिकायां द्वयं स्त्रियाम् ।।' इति—(मे० पृ० ५४ श्लोकः १२) । चुल्लिः = अश्मन्तम्, उद्धानम् । ''चूल्हा'' इति लोके । 'चुल्ली चितायामुद्धाने क्वचिद् वाक्येऽप्युदीरिता ।' इति--(श० र० स० पृ० २९७ पं० २) । चुण्टिः (ण्डि) = चुण्टी, कूपः, कूपसमीपाल्पजलाशयश्च । 'चुण्टा चुण्टी च लूता' इति--(त्रि० शे० पृ० २७६ श्लोकः २०) । तरिः = नौका, वस्त्रादीनां पेटकं च । 'स्त्रियां नौस्तरणिस्तरिः ।।' इति--(अम० ना० लिं० पृ० ९६ श्लोकः १०) 'तारिर्दशायां वेडायां वस्त्रादीनां च पेटके ।' इति--(अने० सं० पृ० ३५ श्लोकः ४३८) । अन्तिः = नाट्योक्तया ज्येष्ठभगिनी । सनिः = भक्तिः, दानम्, अध्येषणा, भिक्षा च । 'भिक्षा च सनिरक्ली स्यात्' इति—(वै० पृ० ९३ श्लोकः १२१) । सानिः = वाद्यविशेषः । ''सनाई'' इति लोके । वंशीवाद्यं च । नेमिः = चक्रावयवविशेषः । 'नेमिर्ना तिनिशे, कूपत्रिकाचक्रान्तयोः स्त्रियाम् ।' इति--(मे० पृ० १०९ श्लोकः ७) । मरिः = । मारिः = मारणम्, वर्षम्, जनक्षयः, मरकश्च । 'मारिः स्त्री मारणे वर्षे' इति—(मे० पृ० १२८ श्लोकः ७७) । अश्रिः = कोटिः, खड्गाद्यग्रभागः, कोणभागः । 'अश्रिः कोणैकदेशयोः ।' इति--धरणिः' इति—(अम० सु० व्या० पृ० २९५ स्तं० २ पं० १४) । विद्रधिः = रोगविशेषः । ''फोड़ा'' इति लोके । 'व्याधिभेदा विद्रधिः स्त्री, ज्वरमेहभगन्दराः ।' इति--(अम० ना० लिं० पृ० २२० श्लोकः ५६) । पुंस्त्वमप्याह भावमिश्रः--'स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः ।' इति—(भा० प्र० पृ० ८८० श्लोकः २) । यादवस्तु स्त्रीपुंसयोरित्याह--'रुग्भेदाः शूलाद्या, विद्रधिर्न षण् ।' इति च—(वै० पृ० १८४ श्लोकः १३७) । अभ्रिः = काष्ठकुद्दालः, नौमलोत्सारकः, पोतादेर्मलापनयनार्थं काष्ठादिरचितकुद्दालः । 'अभ्रिः स्त्री काष्ठकुद्दालः' इति--(अम० ना० लिं० पृ० ९७ श्लोकः १३) । शिरोधिः = ग्रीवा, कन्धरा । 'अथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।' इति—(अम० ना० लिं० पृ० २३३ श्लोकः ८८) । कविः = कविका, खलीनम् । ''कडि आली'' ''लगाम'' ''रास'' इति च लोके । 'सूरौ काव्यकरे पुंसि, खलीने स्यात्तु योषिति ।' इति---(मे० पृ० १५७ श्लोकः ४) । कीर्तिः = यशः, समज्ञा, प्रसादः, विस्तारः, कर्दमश्च । 'कीर्तिः प्रसादयशसोर्योषित्' इति--(मे० पृ० ५४ श्लोकः १०) ।

अथेदानीं गव्यादीन् क्षैरेयीत्यन्तान् दीर्घकारान्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः, इति--(अभि० सं० लिं० पृ० ४ श्लोकः ४६, ४७, ४८, ४९) ।

... ...गंत्री–कवर्य्यः ।
कुमार्य्या–ढकी स्वेदनी ह्लदिनी–ली ॥२९॥
हरिण्य–श्मरी कर्त्तनी–स्थग्य–पट्यः
करीर्य्ये–कपद्य–क्षवत्यः प्रतोली ।
कृपाणी–कदल्यौ पलाली–हसन्यौ
वृसी गृध्रसी घर्वरी कर्परी च ॥३०॥
काण्डी खल्ली मदी धटी गोणी षण्डाल्ये–षणी द्रुणी ।
तिलपर्णी केवली खटी नद्ध्री–रसवत्यौ च पातली ॥३१॥
बाली गन्धोली–काकली–गोष्ठ्य–जाजी–
न्द्राणी मत्स्यण्डी दामनी शिञ्जिनी ।
शृङ्गी कस्तूरी देहली मौर्व्य–तिभ्या–
क्षैरेयी' इति । ... ... ॥३२॥

एषां व्याख्या—

गंत्रीति । हरिणीति । काण्डीति । वालीति च । एते गंत्र्यादयः शब्दाः स्त्रीलिङ्गा भवन्ति । गंत्री=शकटिका, कम्बलिवाह्यकम्, वृषभवहनीयशकटः । "गाडी" इति लोके । 'गंत्री कम्बलिवाह्यकम् ॥' इति—(अम० ना० लिं० पृ० २८३ श्लोकः ५२) । कवरी=केशविन्यास, केशवेशः, पृथ्वी, तुङ्गी च । 'कवरी पुनः । पृथ्वीतुङ्ग्योः केशवेशे' इति— (मे० पृ० १३२ श्लोकः १२७) । कुमारी=पार्वती, नवमाली, नदीभेदश्च । 'कुमारी शैलतनयानवमाल्योर्नदीभिदि ।' इति—(मे० पृ० १३२ श्लोकः १३९) । आढकी=तुवरी । 'आढकी तु तुवर्य्यां स्त्री' इति—(मे० पृ० ५ श्लोकः ४८) । स्वेदनी=कन्दुः, कन्दुशाला च । 'कन्दुर्ना, स्वेदनी स्त्रियाम् ।' इति—(वै० पृ० १६३ श्लोकः ५६) । ह्लादिनी=वज्रम्, विद्युत्, शल्लकी, नदी च । 'ह्लादिनी वज्रतडितोः' इति—(मे० पृ० ९४ श्लोकः ५९) । ईली=खड्ग एकधारः, खड्गः, करवालिका, ह्रस्वगदाकारो हस्तदण्डः । "तलवार" इति ख्यातः ।—"गुप्ती" इति ख्यातः—इत्यन्ये । 'स्यादीली करवालिका ।' इति—(अम० ना० लिं० पृ० २९४ श्लोकः ९१) । हरिणी=मृगी, एणी, हरिणस्य स्त्री, हरिणीवृत्तप्रभेदः, स्वर्णप्रतिमा, हरिता च । 'हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ॥' इति—(अम० ना० लिं० पृ० ४०५ श्लोकः ५०) । 'हरिणी हरितायां च नारीभिद्वृत्तभेदयोः । सुवर्णप्रतिमायां च' इति— (मे० पृ० ५१ श्लोकः

८८) । अश्मरी = मूत्रकृच्छ्रम् । 'अश्मरी मूत्रकृच्छ्रं स्यात्' इति–– (अम० ना० लिं० पृ० २२० श्लोकः ५६) । कर्त्तनी = कर्त्रिका । ''कैंची'' इति लोके । 'कर्त्रिका कर्त्तनी कृत्री ।' इति–– वै० पृ० १३८ श्लोकः २६) । स्थगी = ताम्बूलपात्रविशेषः, ताम्बूलकरङ्कः । ''पानवट्टा'' इति लोके । अपटी = काण्डपटः, वस्त्रप्रावरणम् । ''कनात'' इति लोके । करीरी = चीरिका, दन्तिनां दन्तमूलं च । एकपदी = पन्थाः, मार्गः । ''रास्ता'' इति लोके । 'वर्तन्येकपदीति च ।।' इति— (अम० ना० लिं० पृ० ११४ श्लोकः १५) । अक्षवती = द्यूतक्रीडाविशेषः । ''चौपड़'' इति लोके । 'द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ।' इति––(अम० ना० लिं० पृ० ३५२ श्लोकः ४४) । प्रतोली = ग्राममध्यमार्गः, रथ्या, विशिखा । 'रथ्या प्रतोली विशिखा' इति— (अम० ना० लिं० पृ० ११७ श्लोकः २) । कृपाणी = कर्तरी, असिलता, छुरिका च । 'कृपाणी कर्त्तरी समे ।।' इति––(अम० ना० लिं० पृ० ३४९ श्लोकः ३३) । कदली = मोचा, पताका, मृगविशेषश्च । 'कदलश्च कदल्यसौ ।' इति व्याडिः' इति—(अम० सु० व्या० पृ० १६६ स्तं० २ पं० ३५) । 'कदलं त्रिषु' इत्यमरमाला' इति––(अम० सु० व्या० पृ० १८९ स्तं० २ पं०३८) 'रम्भावृक्षे च कदली पताकामृगभेदयोः ।' इति––(मे० पृ० १५० श्लोकः ७०-७१) । पलाली = महत्पलालः । हसनी = हसन्ती, अङ्गारधानी, अङ्गारशकटी । ''बोरसी'' इति ख्याता । 'अङ्गार धानिकाङ्गारशकट्यपि हसन्त्यपि ।। हसन्यपि' इति—(अम० ना० लिं० पृ० ३११ श्लोकः २९, ३०) । घर्घरी = क्षुद्रघण्टिका । कर्परी = दारुहरिद्रायाः क्वाथस्य तुत्थम्, क्वाथोद्भवतुत्थम्, दर्विका । काण्डी = औषधिविशेषः । 'काण्डी वसीरकाण्डीरौ गृहकाण्डः शिरः पुमान् ।।' इति— (वै० पृ० १२९ श्लोकः ७८) । खल्ली = हस्तपादावमर्दनाख्यरोगः । मदी = चषकवस्तु, कृष्यङ्गं च । धटी = वाससश्चीरम् । ''धज्जी'' इति लोके । कौपीनं च । गोणी = धान्याधारः । ''गूण'' इति भाषाप्रसिद्धमावपनम् । षण्डाली = सरसी, कामुकस्त्री, तैलमानः । ''छटाँक'' इति लोके । एषणी = एषणिका । ''काँटा'' इति लोके । व्रणमार्गानुसारिणी, व्रणवेधशलाका च । तिलपर्णी = रक्तचन्दम्, श्रीवासः, सिह्लकः, मलयजं च । केवली = ज्ञानविशेषः, ग्रन्थविशेषश्च । खटी = कटिनी, धवलमृत्तिका । नद्ध्री = वरत्रा, चर्म्ममयरज्जुः । रसवती = पाकस्थानम्, महानसम् । पातिली = वागुरा, नारी, मृत्पात्रविशेषश्च । ''पतीली'' इति लोके । 'पातिली वागुरायां स्यान्नारीपात्रप्रभेदयोः ।' इति–(मे० पृ० १५३ श्लोकः १११) । बाली = मेध्यम्, स्वनाम्ना प्रसिद्धोऽलङ्कारविशेषश्च । 'अलङ्कारान्तरे मेध्ये (धौ) बाली' इति––(मे० पृ० १४८ श्लोकः ४०) । गन्धोली = वरटा । ''ततैया'' ''वरडै'' इति च भाषाप्रसिद्धः सपक्षकीटः । शुण्ठी, भद्रा च । काकली = सूक्ष्मस्वरः । 'काकली तु कले सूक्ष्मे' इति––(अम० ना० लिं० पृ० ७२ श्लोकः २) । गोष्ठी = सभा, संलापः, पोष्यवर्गश्च । 'सभासंलापयोर्गोष्ठी' इति—(ना० र० मा० पृ० २१

पं० १४) । अजाजी = कृष्णजीरकः, श्वेतजीरकः, काकोदुम्बरिका च । इन्द्राणी = सिन्धुवारः, पौलोमी, शची, रतिबन्धश्च । 'इन्द्राणी स्यात्सिन्धुवारे पौलोमीरतिबन्धयोः ।' इति—(ना० र० मा० पृ० ७६ पं० ६) । मत्स्यण्डी = फाणितम् । "राब" इति लोके । दामनी = तन्त्री, पशुबन्धनरज्जुः । शिञ्जिनी = मौर्वी, ज्या, धनुर्गुणः । शृङ्गी = अतिविषा, कुण्डलादिभूषणानां स्वर्णम्, मीनविशेषश्च । कस्तूरी = मृगमदम्, मृगनाभिः, गन्धकेलिका, वेधमुख्या । देहली = गृहावग्रहणी, द्वारपिण्डी । "देहल" इति लोके । मौर्वी=ज्या, धनुर्गुणः, अजशृङ्गी च । अतिभीः = वज्रज्वाला, विद्युत् । "बिजली" इति लोके । क्षैरेयी = यवागूः, पायसं च ।

· · · · · ·दद्रु–पर्शू कणेरुः ॥३२॥
कर्णान्दु–कच्छू तनु–रज्जु–चञ्चु
स्नायुः' इति—

अस्य व्याख्या—

दद्रिवति । एते दद्र्वादयःस्नायुपर्यन्ताः शब्दाः स्त्रीलिङ्गा भवन्ति । दद्रुः = रोगविशेषः । "दाद" इति प्रसिद्धो रोगः । 'अत्र चक्रं तु दद्रुः स्त्री' इति—(वै० पृ० १८३ श्लोकः १२५) । पर्शुः = पार्श्वास्थि । "पांसु" इति लोके । कणेरुः = कर्णिकारः, करिणी, वेश्या च । 'कणेरुः कर्णिकारे च करिणीवेश्ययोः स्त्रियाम् ।' इति—(मे० पृ० १३२ श्लोकः १२१) । कर्णान्दुः = कर्णपाली, कर्णभूषणम् । "कानबाली" "बाली" इति च लोके । 'कर्णान्दुरुत्क्षिप्तिकायां कर्णपाल्यामपि स्त्रियाम् ।' इति—(मे० पृ० ७६ श्लोकः २३) । कच्छूः = रोगविशेषः, पामरोगः । "खाज" इति लोके । शेषं प्राग्वत् ।

अथ साम्प्रतं दीर्घोकारान्तेन द्यावा नावा च सह हलन्तान् स्त्रीलिङ्गवाचकशब्दानाह हेमः' इति—(अभि० सं० लिं० पृ० ४ श्लोक ४९, ५०) ।

· · · · · ·जुहूः सीम–धुरौ स्फिग–वाक् ।

पाणिनीयेऽपि—(१) (धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्) ॥ एते स्त्रियां स्युः । धेनुः = नवप्रसूता गौः । रज्जुः = बन्धनसाधनवस्तु, गुणः । कुहुः = नष्टेन्दुकलाऽमावास्या । सरयुः = नदीविशेषः । तनुः = शरीरम् । रेणुः = धूलिः । प्रियङ्गुः = राजिका, राजसर्षपः । सि० कौ० पृ० ३९९ सू० ५२ ।

पाणिनीयेऽपि—(२) (आशीर्धूःपूर्गीर्द्वारः) ॥ एते स्त्रियां स्युः । आशीः = आशीर्वादः । धूः = भारः, विंशतितुलापरिमाणम्, यानमुखं च । पूः = नगरम्, पुरी । गीः = वाणी । द्वाः = निर्गमनम् । सि० कौ० पृ० ३९८ सू० २८ ।

(३) (स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिग्ः) एते स्त्रियां स्यु । स्रक् = मूर्ध्निन्यस्तपुष्पदाम, माल्यम् । त्वक् =

द्वा–र्द्यो–दिवौ स्त्रुक्–त्व–गृचः शर–द्वा–
श्छर्दि–र्दर–त्याम–दृषद्–दृशो नौः ॥३३॥' इति ॥

अस्य व्याख्या—

जुहूरिति । एते जुह्वादयो नौपर्य्यन्ताः शब्दाः स्त्रियां स्युः । जुहूः = स्त्रुग्भेदः, पलाश-काष्ठनिर्मितमर्द्धचन्द्राकृतिरूपं यज्ञपात्रम् । पर्णमयो यज्ञपात्रविशेषश्च । 'स्त्रुचो भेदाः स्युर्जुहूरुप-भृद्ध्रुवा ।' इति—(वै० पृ० ९१ श्लोकः १००) । स्फिक् = पुन्दः, कटिप्रोथः । "चूतड़" इति भाषाप्रसिद्धः कटिदेशस्थमांसपिण्डः । द्योदिव्शब्दौ = स्वर्गवाचकौ, आकाशवाचकौ च । स्त्रुक् = यज्ञपात्रविशेषः । त्वक् = त्वचा, शरीरच्छविः । ऋक् = वेदमंत्रविशेषः । शरद् = ऋतु-विशेषः, वर्षं च । छर्दिः = वान्ति । पामा = कण्डूः । दृषद् = शिला, प्रस्तरः । शेषं प्राग्वत् ।

दुर्गसिंहस्तु क्रमरहितान् काञ्च्यादीन् खारीपर्य्यन्तान् स्त्रीलिङ्गवाचकशब्दानाह—(दु० लिं० पृ० ८, ९, १०, ११ श्लोकः १९ तः २५ यावत्) ।

काञ्चि–र्वीचिः सूचि–र्मारि–भेरी हरिद्रा–ऽऽरा ॥
द्युति–पलिल–तुलि–लिपि–लिबि–रुचि–कृपि–किखि–
कीलि–नालिभि–श्चूर्णिः ।
सरणि–र्ग्रहणि–रिती–दूदन्तं चा–ऽवी–चमूप्रभृति ॥
एकस्वर–मी–दूदन्तं शाटि–र्भावसूचित–स्नाश्च ।
स्रक् स्रुक् स्फिक् त्वक् वाक् संवि–दुपानद् गी–दृषद् धूः पूः ॥
प्राण्यङ्ग–मिदन्तं विप्रुट्–छर्दि–शरद्–समिद्–द्यु–सुमन–र्चः ।
स्यु–र्भू–विद्युद्–वल्ली–निशा–ऽङ्गना–दिग्–नदीनाम ॥
सम्प–त्प्रतिप–द्विपदा–ऽऽपत्–संस–त्समि–दपि क्षुधा परिषत् ।

चर्म । ज्योक् = । वाक् = वाणी । यवागूः = षड्गुणजलपक्वघनद्रवद्रव्यविशेषः, यज्ञद्रव्यविशेषश्च । नौः = नौका । स्फिक् = कटिप्रोथः, कटिदेशस्थमांसपिण्डः । सि० कौ० पृ० ३९८ सू० ३० ।

(१) (द्यौः स्त्रियाम्) ॥ द्यौः = स्वर्गः । द्योदिवौ—तंत्रेणोपादानमिदम् । सि० कौ० पृ० ३९९ सू० ४५ ।

(२) (भाः स्त्रुक्स्रग्दिगुपानहः) ॥ एते स्त्रियां स्युः । भाः = दीप्तिः । स्त्रुक् = होमपात्रान्तरम्, स्त्रुवा ॥ स्रग् = माल्यम । दिक् = दिशा । उपानत् = पन्नधी, पादुका । सि० कौ० पृ०३९७ सू० २० ।

पाणिनीयेऽपि—(३) (प्रतिपदापद्विपत्सम्पच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुत्मुत्समिधः) ॥ एते स्त्रियां स्युः ।

गायत्र्याद्याः क्य–ब्भावे प्रावृड्–र्दिव–मुद्–भासः ॥
वासोदशा मघा आपो–ऽप्सरसः कृत्तिकाः समा वर्षाः ।
बह्वर्था विंशतय–स्त्वेकार्थाः स्यु–र्नवत्यन्ताः ॥
शुक्तिः पामा सीमा जिह्वा कारे–लया–ऽऽशिषा संयत् ।
ईषा–नेमि–सभाः खारी स्त्रीलिङ्गा इति समाप्ताः ॥' इति ।

एषां व्याख्या

काञ्चिरिति । द्युतीति । एकेति । प्राण्यङ्गमिति । सम्पदिति । वास इति । शुक्तिरिति च । एते काञ्च्यादयः शब्दा द्युतिपल्लितूलिलिपिलिबिरुचिकृपिकिखिकीलिनालिभिः, क्षुधा, इलया, आशिषा च सह स्त्रीलिङ्गाः भवन्ति । काञ्चिः = रशना, पुरी च । 'काञ्ची पुरीमेखलयोः' इति—(ना० र० मा० पृ० १६ पं० ११) । वीचिः = कुन्तलवक्रत्वम्, स्वल्पम्, पंक्तिः, तरङ्गश्च । 'वीचिः कुन्तलवक्रत्वे स्वल्पे पंक्तितरङ्गयोः ।' इति––(ना० र० मा० पृ० १६ पं० १०) । आरा = चर्म्मवेधिनी । 'आरा चर्म्मप्रभेदिन्याम्' इति––(ना० र० मा० पृ० ४८ पं० १५) । लिपिर्लिबिश्च = अक्षरपद्धती, अक्षरविन्यासौ । कृपिः = छेदोपकरणविशेषः । सरणिः = मार्गः । ग्रहणिः = रोगविशेषः । इति शब्दः अत्र आकृतिगणार्थः तेन विटिः = पीतचन्दनम् । हलिः = । मूलिः = । कूलिः = । सृणिः = अङ्कुशः । 'अङ्कुशोऽस्त्री, सृणिः स्त्रियाम् ॥' इति––(अम० ना० लिं० पृ० २७९ श्लोकः ४१) । 'सृणिः स्यादङ्कुशे पुमान् ।' इति कोषान्तरम् । तेनोभयलिङ्गोयमंकुशे' इति––(श० चिं० पृ० ८९९ स्तं० १ पं० ३) । तथा च प्रयोगः—'आरक्षमग्नमवमस्य सृणिं शिताग्रम्' इति माघः' इति––(अम० सु० व्या० पृ० २७९ स्तं० १ पं० १४)। सूणिः = । अवीः = ऋतुमती । चमूः = सेना । तरी = नौः, वेडा, द्रोणी, वस्त्रादिपेटकं च । तंत्री = वीणाप्रभेदः, गुडूची, देहशिरा, नाडी, रज्जूश्च । लक्ष्मीः = रमा । वधूः = स्नुषा । "बहू" इति लोके । नवोढा, भार्या, अङ्गना च । जम्बूः—राजफला । "जामुन" इति लोके । दृन्भूः (दम्भूः) = सर्पः, चक्रसर्पश्च । दिधिषूः =

इयं—प्रतिपत् = तिथिविशेषः, पक्षतिः । आपत् = आपत्तिः । विपत् = विपत्तिः, तृतीयतारा च । सम्पत् = सम्पत्तिः । द्वितीयतारा च । शरत् = सँवत्सरः । ऋतुविशेषश्च । संसत् = सभा । परिषत् = सभा । उषः = उषा, उच्छन्ति । प्रातरधिष्ठात्री देवता च । संवित् = बुद्धिः । क्षुत् = क्षुधा । युत् = संग्रामः । मुत् = हर्षः । समित् = याज्ञिकप्रसिद्ध प्रादेशमात्रं काष्ठम् । सि० कौ० पृ० ३९८ सू० २७ ।

(१) (प्रावृट्विप्रुट्रुट्तृड्विट्त्विषः) ॥ एते स्त्रियां स्युः । प्रावृट् = वर्षाकालः । विप्रट् = बिन्दुः, जलकणः । रुट् = रोषः । तृट् = तृष्णा । विट् = विष्ठा । त्विट् = शोभा । सि० कौ० पृ० ३९८ सू० २३ ।

द्विरूढा, पुनर्भूः । कर्कन्धूः = बदरी, बदरीफलं च । "बेर" इति लोके । अलाबूः = तुम्बी । कसेरूः = तृणकन्दम्, पृष्ठकीकसम्, शणजातिश्च । कच्छूः = पामरोगः । आकृतिगणश्चायम् । भावसूचितः ताश्चेति । 'तत्वौ भावे ।' भावेन सूचित उपलक्षितो यः ताप्रत्यय इति । पुरुषता = पुरुषस्य भावः । जडता = जडस्यभावः कर्म वा । ग्रामता = ग्रामाणां समूहः । जनता = जनानां समूहः । राजता=राज्ञां समूहः । बन्धुता = बन्धूनां समूहः । सहायता = सहायानां भावः । देवता = देव एव । स्रक् = माला । वाक् = वाणी । संवित् = संवेदनम् । उपानत् = चर्मपादुका । गीः = वाणी । पूः = पुरी, प्राणिनामङ्गम्, प्राण्यङ्गम् । इत् अन्ते यस्य तदिदन्तं प्राण्यङ्गम् । विप्रुट् च छर्दिश्च शरच्च समिच्च द्यौश्च सुमनाश्च ऋक् चेतीतरेतरयोगो द्वन्द्वः । विप्रुट् = बिन्दुः । समित् = याज्ञिकप्रसिद्धं प्रादेशमात्रं काष्ठम् । सुमनाः = पुष्पम् । शोभनं मनो यस्येति बहुव्रीहिणा तु वाच्यलिङ्गता । भूश्च विद्युच्च वल्ली च निशा च अङ्गना च दिक् च नदी चेतीतरेतरयोगो द्वन्द्वः । एषां विप्रुडादीनां भ्वादीनां च शब्दानां नाम संज्ञाः च स्त्रियां स्युः । भूनाम—भूः, भूमिः, क्षितिरित्यादयः । विद्युन्नाम-विद्युत्, तडित्, अचिराभेत्यादिः । वल्लीनाम—वल्ली, लता, व्रततिरित्यादिः । निशानाम––निशा, क्षपा, रात्रिरित्यादिः । अङ्गनानाम–– अङ्गना, योषित्, वनितेत्यादिः । दिङ्नाम––दिक्, ककुप्, काष्ठेत्यादिः । नदीनाम—नदी, सरित्, धुनीत्यादिः । अत्र कस्यचित् अम्भः शब्दादेः नद्यादिनाम्नोऽपि असन्तत्वात् नपुंसकत्वं एव परत्वेन । क्वचित् "पूर्वपरयोः परो विधिर्बलीयान्" इति परस्येष्टवाचित्वात् । यथा कोः उषसश्च उदन्तस्य असन्तस्य च भूनाम्नो अङ्गनानाम्नश्च स्त्रीत्वं सिद्धम् । सम्पत् = सम्पत्तिः प्रतिपद = तिथिविशेषः, आद्या तिथिः । विपद् = विपत्तिः । आपद् = आपत्तिः । संसत् = सभा समित् = संग्रामः । क्षुत् = बुभुक्षा । परिषत् = सभा । गायत्री आद्या यासामिति गायत्र्याद्याः । एताश्छन्दसां जातयः । ब्रह्महत्या = ब्रह्मणो हननम् । अश्वहत्या = अश्वस्य हननम् । प्रावृट् = वर्षासमयः । दर्विः = पाकोपकरणम् । मुद् = हर्षः । भाः = दीप्तिः । वाससो दशा वासोदशाः । बहवोऽर्था आसामिति बह्वर्थाः । ताश्च स्वभावात् व्यक्तिभेदे एव वर्त्तन्ते, न जातावित्यर्थः । विंशतयस्त्विति बहुवचनं गणं सूचयति । तूशब्दो वाक्यभेदे । नवतिरेवान्तोऽवयवः आसामिति नवत्यन्ता एक एवार्थः आसामिति एकार्थाः । स्वभावात्समुदाये वर्त्तन्ते नावयवभेदे इत्यर्थः । वस्त्रस्य दशाः । अवस्थावाचिकायास्तु बह्वर्थतायां अनियमः । इयं दशा अवस्था इति । समाः = सँव्वत्सरः । केचित्समेति पाठं मन्यते । तेषां इयं समा इत्यपि भवति । 'समां समां विजायते' इत्येकत्वेऽपि दृश्यते । इति क्षीरस्वामी । एकत्वे लक्ष्यम्—'तृतीयस्याः समायास्तु समां समां विजायते ।' 'तृतीयस्याः समायास्तु' इति बहुत्वं प्रायिकम् । . . .समां समां विजायते इत्यत्र 'समायां समायां' इति भाष्यात् । 'निर्गतत्वं समायाः' इत्यादौ वाक्यदर्शनाच्च । जिह्वा = रसना ।

कारा = बन्धनगृहम् । इला = पृथ्वी । आशीः = आशंसनम् । संयत् = संग्रामः । सभा=परिषत् इति--(दु० लि० स्वोपज्ञवृत्तिः पृ० ८, ९, १०, ११ श्लोकः १९, २०, २१, २२, २३, २४, २५) ।

पुरुषोत्तमदेवोऽपि क्रमरहितान् आज्यादीन् स्त्रीलिङ्गवाचकान् कतिचिच्छब्दानाह--(त्रि० शे० पृ० ३८६ श्लोकः १) ।

लिङ्गादिसंग्रहेऽनुक्तममरेणाभिदध्महे ।
स्त्रियामाजि–र्दर–ज्जातिः पुरु–र्भा द्वाः समाः शरत् ।।
सिकताद्या बहुत्वेऽपि विंशत्याद्येकवागपि ।' इति ।

अस्य व्याख्या–

लिङ्गेति । इह स्त्रियामित्यधिकारः शरच्छब्दपर्य्यन्तं ज्ञेयः । आज्यादिशरत्पर्य्यन्तानां यदभिधानं तत्स्त्रियां स्यात् । पुरुः = नदीविशेषः । शेषशब्दानां व्याख्या तु प्राग्वद् बोध्या । सिकताद्या बहुत्वे भूम्नि योषिति भवन्ति । विंशतिः द्विदशकसंख्या । आदिपदात् एकविंशतिः द्वाविंशतिरित्यादिनवत्यन्ता संख्या एकवागपि योषिल्लिङ्गैकवचनं स्यादित्यर्थः । शेषं प्राग्वद् ।

यादवस्तु संक्षेपतः स्त्रीलिङ्गानुशासनमाह---(वै० पृ० २८९ श्लोकः २ तः ८ यावत् ।

एक स्वरं हलादी–दूद् दृङ् मा श्री–भ्रू–रिति स्त्रियाम् ।।
इच्च सर्वमुदन्तेषु पाकु–रज्ज्वादि किञ्चन ।
नदीनामाह्वयाः सर्वे प्रायेण च लताह्वयाः ।।
णचो ञि व्यवहाराद्या, अङङन्तास्तु पचादयः, ।
अप्रत्यये जुगुप्साद्या, युजन्ता भावनादयः, ।।
क्तिन्नन्ता–स्तति–गत्याद्या, क्विबन्ताः सम्पदादयः, ।
इञि स्युः कारिबोध्याद्या, ण्वुलि प्रच्छर्दिकादयः, ।।
क्रीडाप्रहरणे णान्ता पाल्लवाद्या, घञस्तु ञे ।
क्रियायां दाण्डपाताद्या,–स्त–लङ्या–बूङ्श्व–न्धतादयः,
अके वैरादिवीप्सादौ स्युः काकोलूकिकादयः, ।
क्यपि तु ब्रह्महत्याद्या,दल्याद्य–ल्पत्वकीर्त्तने ।।
त्रिलोकीत्यादयोऽदन्तैः समाहारार्थकद्विगौ ।
त्रिपात्र–त्रियुगाद्याः ष–ण्ण भवन्यादय–स्त्वनौ ।।' इति ।

एषां व्याख्या–

एकस्वरमिति। इदिदि। णच इति। क्तिनिति। क्रीडेति। अक इति। त्रिलोकीति च। एकः स्वरः यस्मिन् शब्दे तदेकस्वरं, हल् आदिर्यस्मिन् तद्धलादि, ईदूदन्तं ईकारान्तं ऊकारान्तं च दृक् मा श्रीः भ्रूश्चेति स्त्रियां स्त्रीलिङ्गा स्युः। सर्वं समस्तं इत् इदन्तं स्त्रियां स्यात्। उदन्तेषु ह्रस्वोकारान्तेषु किञ्चन पाकुरज्ज्वादि स्त्रियां स्यात्। पाकुः = सूपकारः। रज्जुः = वेणी, बन्धनसाधनवस्तु च। ''रस्सी'' ''डोरी'' इति च लोके। 'रज्जुर्वेण्यां गुणे योषित्' इति—(मे० पृ० ३० श्लोकः १४)। नदीनां सरितां सर्वे समस्ता आह्वया नामानि स्त्रियां स्युः। लताह्वया लतानां नामानि च प्रायेण स्त्रियां स्युः। णचो अञि व्यावहाराद्याः स्त्रियां स्युः। एवं अङन्ताः पचादयः। अप्रत्यये जुगुप्साद्याः। युजन्ता भावनादयः। क्तिन्नन्ताः ततिगत्याद्याः। क्विबन्ताः सम्पदादयः। इञि इञ्प्रत्ययान्ताः कारिबोध्याद्याः। ण्वुलि ण्वुलप्रत्ययान्ताः प्रच्छर्दिकादयः। क्रीडाप्रहरणे णान्ताः पाललवाद्याः घञो ञो क्रियायां दाण्डपाताद्याः। तल्ङ्याबूङ्क्षु तल्ङ्याबूङ्प्रत्ययान्ता अन्धतादयः। वैरादौ वीप्सादौ च अके अकप्रत्ययान्ताः काकोलूकिकादयः। क्यपि तु क्यप्प्रत्ययान्तास्तु ब्रह्महत्याद्याः। अल्पत्वकीर्त्तने दल्यादिः। अदन्तैः अकारान्तैः समाहारार्थकद्विगौ त्रिलोक्यादयश्चैते योषिल्लिङ्गा भवन्ति। त्रिपात्रत्रियुगाद्याः षण् क्लीबे स्युः, स्त्रियां न। अनौ अनिप्रत्ययान्ता भवन्यादयस्तु स्त्रियां स्युः।

॥ इति स्त्रीलिङ्गानुशासनम् ॥

—:०:—

अथ

नपुंसकलिङ्गानुशासनम् ।

तत्रादौ नान्तादीन् कर्त्तृभिन्नमन्प्रत्ययान्तान् नपुंसकलिङ्गवाचकशब्दानाह हेमः-- (अभि० सं० लिं० पृ० ४ श्लोकः ५१) ।

न-लं[1]-स्[2]तु-तं[3]-त्तं[4]-संयुक्त-र-रुं[5] या[6]-ऽन्तं नपुंसकम्[7] ।
वेध आदी-न्विना-ऽस[8]न्तं द्विस्वरं मं[9]-न्नकर्त्तरि ॥१॥

पाणिनीयेऽपि—(१) (लोपधः) ॥ कुलम्=गोत्रम्, सजातीयगणाश्च। कूलम्=तीरम्, तटम्। स्थलम्=जलशून्याकृत्रिमभूभागः। सि० कौ० पृ० ४०२ सू० १४२।

(२) (५) (रुत्वन्तः) (दारुकसेरुजतुवस्तुमस्तूनि नपुंसके) ॥ एतानि नपुंसके स्युः। दारु=काष्ठम्। दा० उ०। सि० कौ० पृ० ३९९ सू० ५६।

(३, ४) नवनीताऽवतानाऽनृताऽमृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि) ॥ एतानि नपुंसके स्युः। अवतानम्= । अनृतम्=असत्यम्। व्रतम्=ब्रह्मचर्यादिनियमः। रजतम्=रूप्यम्, श्वेतं च। वृत्तम्=शीलम्, निस्तलं च। सि० कौ० पृ० ४०३ सू० १६६।

(६) (धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि) ॥ एतानि क्लीबे स्युः। वर्ण्यम्=कुङ्कुमम्। धृष्यम्= । हव्यम्=देवान्नम्, नैवेद्यम्। शे० उ०। सि० कौ० पृ० ४०३ सू० १६९।

(७) (नपुंसकम्) ॥ अधिकारोऽयम्। सि० कौ० पृ० ४०१ सू० ११७।

(८) (असन्तो द्व्यच्कः)॥ असन्तो द्व्यच्कः क्लीबः स्यात्। यशः=समज्ञा, सुख्यातिः। मनः=मानसम्। तपः=स्वाश्रमविहितकर्म, लोकविशेषश्च। (यादोनपुंसकम्) ॥ यादः शब्दः सरिद्वाचकोऽपि क्लीबः स्यात्। यादः=जलजन्तुः। द्व्यच्कः किम्। चन्द्रमाः=विधुः। सि० कौ० पृ० ४०३ सू० १५३।

(९) (मन्द्व्यच्कोऽकर्त्तरि)॥ मन्प्रत्ययान्तो द्व्यच्कः क्लीबः स्यात्, न तु कर्त्तरि। वर्म=कवचम्, तनुत्रम्। चर्म=त्वक्, अजिनम्। द्व्यच्कः किम्। अणिमा, महिमा चेतौ द्वौ सिद्धिभेदौ। कर्त्तरि किम्। ददाति इति दामा=रज्जुः। सि० कौ० पृ० ४०२ सू० १५०।

(नामरोमणी नपुंसके) ॥ मन्द्व्यच्क इत्यस्यायं प्रपञ्चः। नाम=अभिधानम्। रोम=लोम। सि० कौ० पृ० ४०३ सू० १५२।

वामनीयलिङ्गानुशासनेऽपि—'नाम नपुंसकलिङ्गं तत्तनलस्तुत्वशब्दपर्यन्तम्। मन्नन्तो द्व्यजुदितमपि सन्तं हल्पूर्वररुयान्तम्॥ इति। पृ० २ श्लो० २।

अस्य व्याख्या—

नेति । नान्ताश्च लान्ताश्च स्त्वन्ताश्च तान्ताश्च त्तान्ताश्च संयुक्तरान्ताश्चसंयुक्तरुशब्दान्ताश्च संयुक्तयान्ताश्च तेषां समाहारो नलस्तुतत्तसंयुक्तररुयान्तं नपुंसकं नपुंसकलिङ्गाः स्युरित्यर्थः । यथा--नान्ताः काञ्चनजननेत्यादयः । लान्ताः चक्रवालमित्यादयः । स्त्वन्ता वस्तु–मस्त्वित्यादयः । तान्ताः शीत–द्वैत–गीतप्रभृतयः । त्तान्ता भित्त–पित्तप्रभृतयः । संयुक्तरान्ता अग्रप्रभृतयः । संयुक्तरुशब्दान्ता अश्रुप्रभृतयः । संयुक्तयान्ता लक्ष्य–द्रव्यप्रभृतयः । कर्त्तृभिन्नार्थक मन्प्रत्ययान्ताः सद्म–वेश्म–भस्मप्रभृतयः । अस् अन्ते यस्मिन् तद् असन्तम् । द्वौ स्वरौ यस्मिन् तद् द्विस्वरम् । वेध आदीन्विना यद् द्विस्वरमसन्तं तन्नपुंसकं नपुंसकलिङ्गाः स्युरित्यर्थः । यथा पयः=दुग्धम्, जलं च । 'पयः स्यात्क्षीरनीरयोः ।' इति—(मे० पृ० १७२ श्लोकः २८) । वयः=अवस्था, पक्षी च । 'वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम् ।' इति—(मे० पृ० १७२ श्लोकः ३५) । यशः=सुख्यातिः, कीर्तिः, समज्ञा । 'ख्यातिः कीर्तिः समज्ञा च' इति—(वै० पृ० ३४ श्लोकः ३६) । यशःकीर्त्त्योर्भेदो दृश्यते । 'दानादिप्रभवा कीर्तिः शौर्य्यादिप्रभवं यशः' इति । तथा च कस्यचित्प्रयोगः--यशः कीर्तिपरिभ्रष्टो जीवन्नपि न जीवति ।' इति--(श० चिं० पृ० १८ स्तं० १ पं० २२ तः) । मन्नकर्त्तरीति । कर्त्तृभिन्नार्थकद्विस्वरमन्प्रत्ययान्ताः च नपुंसकलिङ्गा भवन्ति । यथा—भस्म=भसितम् । सद्म=गृहम् । जन्म=उत्पत्तिः इत्यादयः ।

अथाधुना धनादीन् द्रवत्पर्य्यन्तान्नपुंसकलिङ्गवाचकशब्दानाह हेमः (अभि० सं० लिं०पृ० ४ श्लोकः ५२, ५३, ५४)

धं[1]न–रत्न–नभो–ऽन्न–हृषीक–तमो–
घुसृणा–ऽङ्गण–शुक्त–शुभा–ऽम्बुरुहाम् ।
अघ–गूथ–जलां–ऽशुक–दारु–मनो–
विल–पिच्छ–धं[2]तु–र्दल–ता[3]लु–हृदाम् ॥२॥

पाणिनीयेऽपि-(१) (मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि) ॥ एतेषामभिधायकानि क्लीबे स्युः । मुखं=आननम् । नयनं=लोचनम् । लोहं=कालम् । वनं=गहनम् । मांसं=आमिषम् । रुधिरं=रक्तम् । कार्मुकं=धनुः । विवरं=बिलम् । जलं=वारि । हलं=लाङ्गलम् । धनं=द्रविणम् । अन्नम्=अशनम । सि० कौ० पृ० ४०२ सू० १३८ ।

(२) पाणिनीये तु धनुरेव नपुंसके उक्तम् । (इसुसन्तः) क्लीबः स्यात् । हविः=होतव्यद्रव्यम् । धनुः=चापः । सि० कौ० पृ० ४०२ सू० १३५

(३) तत्रैव तात्वेव नपुंसके उक्तम् । (श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके) ॥ एतानि नपुंसके

हृल–दुःख–सुखाऽगुरु–हिङ्गु–रुत (च)
त्वच–भेषज–तुत्थ–कुसुम्भ–दृशाम् ।
मरिचाऽस्थि–शिलाभव–सृक्क–यकृ–
न्नलदा–ऽन्तिक–वल्कल–सिध्म–युधाम् ॥३॥
सौवीर–स्थानक–द्वार–क्लोम–धौतेयका–ऽसृजाम् ।
लवण–व्यञ्जन–फल–प्रसून[1]–द्रवतां सभिद् ॥४॥

एषां व्याख्या—

धनेति । हृलेति । सौवीरेति च । धनादीनामघादीनां हृलादीनां मरिचादीनां सौवीरादीनां लवणादीनां चैषां सभिद् भेदसहितानां नाम नपुंसकं स्यात् । यथा—धनम्, वित्तम्, द्रविणमित्यादि । रत्नम्, मणिरित्यादि । नभः, खम्, व्योमेत्यादि । अन्नम् भक्तम्, ओदनमित्यादि । हृषीकम्, विषयि, इन्द्रियमित्यादि । तमः, ध्वान्तमित्यादि । घुसृणम्, कुङ्कुममित्यादि । अङ्गणम्, अङ्गनम्, चत्वरम्, अजिरमित्यादि । शुक्तम्, चुक्रमित्यादि । शुभम्, कुशलम्, कल्याणम्, शिवम्, मङ्गलम्, भव्यमित्यादि । अम्बुरुट्, पङ्कजम्, सरोजम्, कमलमित्यादि । अघम्, पापम्, दुरितमित्यादि । गूथम्, विष्ठा, शकृदित्यादि । जलम्, अम्बु, उदकमित्यादि । अंशुकम्, वस्त्रमित्यादि । दारु, काष्ठमित्यादि । मनः, चेतः, चित्तमित्यादि । बिलम्, रन्ध्रम्, छिद्रमित्यादि । पिच्छम्, बर्हमित्यादि । धनुः, शरासनमित्यादि । दलम्, पत्रम्, पर्णमित्यादि । तालु, काकुदमित्यादि । हृद्, हृदयमित्यादि । हृलम्, लाङ्गलमित्यादि । दुःखम्, कृच्छ्रम्, कष्टमित्यादि । सुखम्, शर्म, शातमित्यादि । अगुरु, वंशकम्, राजार्हमित्यादि । हिङ्गु, रामठमित्यादि । रुतम्, वाशितमित्यादि । त्वचम्, त्वगित्यादि । भेषजम्, औषधमित्यादि । तुत्थम्, रसाञ्जनमित्यादि । कुसुम्भम्=महारजनपुष्पमित्यादि । दृग्, नयनमित्यादि । मरिचम्, कोलकम्, ऊषणमित्यादि । अस्थि, कीकसमित्यादि । शिलाभवम्, शैलेयमित्यादि । सृक्क, सृक्व, सृक्कमित्यादि । यकृत्, कालखण्डमित्यादि । नलदम्, सेव्यम्, अभयम्, अमृणालमित्यादि । अन्तिकम्, समीपम्, निकटमित्यादि । वल्कलम्, वल्कमित्यादि । सिध्मम्, किलासमित्यादि । युद्, रणमित्यादि । सौवीरम्, आरनालकम्, कुल्माषमित्यादि । स्थानकम्, आलवालम्, नगर-

स्युः । (वसु चार्थवाचि) वसु=धनम् । अर्थवाचीति किम् । "वसुर्मयूखाग्निधनाधिपेषु" इति विश्वप्रकाशः । शे० उ० । सि० कौ० पृ० ३९९ सू० ५४

(१) (बलकुसुमशुल्बयुद्धपत्तनरणाभिधानानि) ॥ एषामभिधायकानि नपुंसके स्युः । बलम्=वीर्य्यम् । कुसुमम्=प्रसूनम् । शुल्बम्=ताम्रम्, यज्ञकर्म च । युद्धम्=अयोधनम् । पत्तनम्=नगरम् । रणम्=जन्यम् । सि० कौ० पृ० ४०३ सू० १५९ ।

मित्यादि । द्वारम्, द्वा इत्यादि । क्लोम, तिलकमित्यादि । धौतेयकमित्यादि । असृक्, रक्तम्, रुधिरमित्यादि । लवणम्, अक्षीवम्, वसिरमित्यादि । व्यञ्जनम्, तेमनम्, निष्ठानमित्यादि । फलम्, निरीशम्, कुटकमित्यादि । प्रसूनम्, पुष्पम्, कुसुममित्यादि । द्रवत् = अग्निसंयोगेन द्रवीभवतां सुवर्णादीनां सभेदानां च नामानि नपुंसकं स्यात् ।

अथेदानीं पुरादीन् पथिशब्दपर्य्यन्तान्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ४ श्लोकः ५५, ५६, ५७, ५८) ।

पुरं सद्माऽङ्गयो,–श्छत्र–शीर्षयोः पुण्डरीक–के, ।
मधु द्रवे, ध्रुवं शश्व–त्तर्कयोः, खपुरं घटे, ॥५॥
अयूपे, दैवे, अकार्यादौ, युगं, दिष्टं, तथा कटु,
असे द्वन्द्वं, स्थले धन्वा,–ऽरिष्ट–मद्रुम–पक्षिणोः, ॥६॥
धर्म्मं दानादिके, तुल्यभागे–ऽर्द्धं, ब्राह्मणं श्रुतौ, ।
न्याय्ये सारं, पद्म–मिभबिन्दौ, काम–मनुमतौ, ॥७॥
खलं भुवि, तथा लक्षं वेध्ये,–ऽहः सुदिनै–कतः ।,
भूमो–ऽसंख्यात एकार्थे, पथः संख्या–ऽव्ययो–त्तरः, ॥८॥

एषां व्याख्या—

पुरमिति । अयूप इति । धर्ममिति । खलमिति च । एते पुरादयः पथिपर्य्यन्ताः शब्दा उक्तार्थेषु नपुंसकलिङ्गाः स्युः । सद्माङ्गयोर्गृहदेहयोरर्थे पुरम् । छत्रशीर्षयोः पुण्डरीकके अर्थात् छत्रे पुण्डरीकम् शीर्षे कम् । द्रवे विद्रवे मधु । शश्वत्तर्कयोः ध्रुवम् । घटे खपुरम् । अयूपे युगम् । दैवे भाग्ये दिष्टम् । अकार्यादौ अकार्यमत्सरदूषणेषु कटु । असे समासभिन्नेऽर्थे द्वन्द्वम् । स्थले धन्व । अद्रुमपक्षिणोर्वृक्षपक्षिवर्जितयोरर्थे अरिष्टम् । दानादिके धर्म्मम् । तुल्यभागे समानभागे अर्द्धम् । श्रुतौ वेदे ब्राह्मणम् । न्याय्ये गौतमोक्ते शास्त्रभेदे सारम् । इभबिन्दौ गजबिन्दौ पद्मम् । अनुमतौ कामम् । भुवि खलम् । वेध्ये लक्षं च नपुंसकं स्यात् । सुदिनैकतः—सुदिनं च एकश्च सुदिनैकौ ताभ्यां परो विहितः समासान्तोऽहन्शब्दः क्लीबे स्यात् सुदिनं च तदहश्च सुदिनाहम् । एकं च तदहश्च एकाहम् । सुदिनमिह पुण्यमुच्यते । सुदिनशब्दः प्रशस्तार्थो वा । तेन पुण्यं च तदहश्च पुण्याहम्, प्रशस्ताहम् । शोभनाहम् । कृतसमासान्त इति

पाणिनीयेऽपि—(१) (अपथपुण्याहे नपुंसके) ॥ एते नपुंसके स्तः । अपथम्=अमार्गः । पथोऽभावश्च । पुण्याहम्=शोभनदिवसः । सि० कौ० पृ० ४०२ सू० १३२

किम् । पुण्यानि अहानि यस्मिन् पुण्याहो मासः । असंख्याते अकृतसंख्ये एकार्थे भूमिशब्दो नपुंसकलिङ्गः । पाण्डुः भूमिरस्मिन् पाण्डुभूमम् । कृष्णः भूमिरस्मिन् कृष्णभूमम् । उदीची भूमिरुदग्भूममित्यादि । 'कृष्णोदकपाण्डुसंख्याया भूमेरजिष्यते ।' इति । संख्याव्ययोत्तरः पथि-शब्दो नपुंसकलिङ्गः । संख्याया अव्ययाच्च परः पथः क्लीबे स्यादित्यर्थः । यथा—द्वौ पन्थानौ समाहृतौ, द्वयोः पथोः समाहारो वा द्विपथम् । त्रयाणां पथां समाहारस्त्रिपथम् । चतुर्णां पथां समाहारश्चतुष्पथम् । अव्ययाद्यथा—विगतः पन्थाः अपथम् । विरुद्धः पन्थाः विपथम् । विरूपः पन्थाः कापथम्, दुष्पथम्, उत्पथम् । संख्याव्ययात्परः किम् । धर्म्मस्य पन्थाः धर्मपथः । योगस्य पन्थाः योगपथः । जलपथः । परमपथः । कृतसमासान्तः (तत्पुरुषे) किम् । अतिपन्थाः । सुपन्थाः । सुपथा नगरी । उत्पथो देशः ।

अथेदानीं द्वन्द्वैकत्वाऽव्ययीभावादिजान् नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ५ श्लोकः ५९, ६०, ६१, ६२) ।

द्वन्द्वै[1]–कत्वाव्ययीभावौ[2], क्रिया–ऽव्यय–विशेषणे ।
कृत्याः क्ता[3]–ऽनाः[4] खल्–ञिद्–भावे[5], आ–त्वा–त्वा–ऽऽदिः
समूहजः ।। ९।।

पाणिनीयेऽपि—(१) (द्वन्द्वैकत्वम्) ।। इदं नपुंसके स्यात् । पाणिपादम्=पाण्योः पादयोश्च समाहारः । सि० कौ० पृ० ४०२ सू० १२४ ।

(२) (अव्ययीभावः) ।। अयं क्लीबे स्यात् । अधिस्त्रि=स्त्रियमधिकृत्य वर्तते । स्त्र्यधीनं गृहकार्य-मित्यर्थः । सि० कौ० पृ० ४०२ सू० १२३ ।

(३) (निष्ठा च) ।। भावे या निष्ठा तदन्तं क्लीबं स्यात् । हसितम्=हास्यम्, अट्टहास्यं च । गीतम्=गानम् । सि० कौ० पृ० ४०१ सू० ११९ ।

(४) (भावे ल्युडन्तः) ।। भावे ल्युट्प्रत्ययान्तः क्लीबे स्यात् । हसनम्=हास्यम् । भावे किम् । पचनः=अग्निः । इध्मव्रश्चनः=कुठारः । सि० कौ० पृ० ४०१ सू० ११८ ।

(५) (त्वष्यञौ तद्धितौ) ।। एतौ चेत्तद्धितौ तदा नपुंसके स्तः । शुक्लस्य भावः शुक्लत्वम्, शौक्ल्यम् । सि० कौ० पृ० ४०१ सू० १२० । (कर्मणि च ब्राह्मणादिगुणवचनेभ्यः) । ब्राह्मणस्य कर्म—ब्राह्मण्यम् । सि० कौ० पृ० ४०१, २ सू० १२१ । (यद्यढग्यगञ्ण्वुञ्छाश्च भावकर्मणि) ।। तदन्तानि क्लीबानि । (स्तेनाद्यन्नलोपश्च)–स्तेयम् । (सख्युर्यः)—सख्यम् । (कपिज्ञात्योर्ढक्)—कापेयम् । (पत्यन्तपुरोहितादिभ्यो यक्)—आधिपत्यम् (प्राणभृज्जाति-वयोवचनोद्गात्रादिभ्योऽञ्)—औष्ट्रम् । (हायनान्तयुवादिभ्योऽण्)—द्वैहायनम् । (द्वन्द्वमनोज्ञादिभ्यो वुञ्)—पितापुत्रकम् । (होत्रादिभ्यश्छः)—अच्छावाकीयम् । सि० कौ० पृ० ४०२ सू० १२२

(अभाषायां हेमन्तशिशिरावहोरात्रे च) स्पष्टम् । सि० कौ० पृ० ४०२ सू० १२५ ।

गायत्र्याद्य–ऽण् स्वार्थे–ऽव्यक्त–मथा–ऽनञ्[1]–कर्म्मधारयः ।
तत्पुरुषो वा, बहूनां चे–च्छाया[2], शालां विना सभा[3] ॥१०॥
राजवर्जित–राजार्थ–राक्षसादेः परापि च ।
आदा–वुपक्रमो–यज्ञे कन्थो–शीनरनाम्नि च ॥११॥
सेना–शाला–सुरा–च्छाया–निशं वो–र्णा शशात्[4] परा ।
भाद् गणो गृहतः[5] स्थूणा संख्या–ऽदन्ता शतादिका[6] ॥' इति ॥१२॥

एषां व्याख्या—

द्वन्द्वेति । गायत्रीति । राजेति । सेनेति च । एकत्वे द्वन्द्वो द्वन्द्वैकत्वम् । 'राजदन्तादिः ।' षष्ठीतत्पुरुषे तु, एकत्वस्य प्राधान्यात्तस्यैव लिङ्गान्वयः स्यात्, न तु द्वन्द्वस्य । एकार्थको द्वन्द्वः, समाहारद्वन्द्वः, अव्ययीभावश्च क्लीबे स्यात् । द्वन्द्वैक्यं यथा—पाण्योः पादयोश्च समाहारः पाणिपादम् । शिरसो ग्रीवायाश्च समाहारः शिरोग्रीवम् । एवं मार्दङ्गिकपाणविकम् । अव्ययीभावो यथा—शक्तिमनतिक्रम्य यथाशक्ति । शास्त्रमनतिक्रम्य यथाशास्त्रम् । अधिहरि । अधिस्त्रि । अधिगोपम् । उपगङ्गम् । क्रियाव्ययविशेषणे नपुंसकं स्यात् । क्रियाणां भ्वादिधातूनां, अव्ययानां स्वरादिनिपातानां च, भेदकानि विशेषणानि, क्लीबे नपुंसके, एकवचने च स्युरित्यर्थः । क्रियाविशेषणं यथा—कुटिलं गच्छन्ति । मन्दं पचन्ति । मृदु पचन्ति वा । सुखं तिष्ठन्ति योगिनः । सलिलं नृत्यन्ति बालाः । अव्ययविशेषणं यथा—रम्यं भद्रं वा स्वः । सुखदं प्रातः । प्रातः कमनीयं वा । कृत्या इति । कृत्याः—तव्यादिप्रत्ययाः । तदुक्तम्—सुपद्मसम्मतायां कारिकायाम्—'कृत्याः षट् ते समाख्याताः क्यप्ण्यतौ भावकर्म्मणोः । तव्यानीयावनन्ताद् यत् केलिमः कर्मकर्त्तरि ॥' इति । कर्त्तरि कर्मणि चार्थे विहिताः कृत्या वाच्यलिङ्गा भवन्ति ।' इति—(श० चिं० पृ० ६६२ स्तं० २ पं० १६, १७, १८, १९) । भावे कृत्यप्रत्ययान्ताः—एधनीय–भवनीय-करणीयप्रभृतयः । भावे क्तान्ताः—हसित–भूत–सहित–भुक्त-

(१) (अनञ्कर्मधारयस्तत्पुरुषः) ॥ अधिकारोऽयम् । सि० कौ० पृ० ४०२ सू० १२६ ।

(२) (अनल्पे छाया) ॥ शरच्छायम् । सि० कौ० पृ० ४०२ सू० १२७ ।

(३) (राजामनुष्यपूर्वा सभा) ॥ इनसभमित्यादि । सि० कौ० पृ० ४०२ सू० १२८ ।

(४।५) (गृहशशाभ्यां क्लीबे) ॥ नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम्=गृहधारणम् । शशोर्णम्=शशलोम । "शशोर्णं शशलोमानि" इत्यमरः । सि० कौ० पृ० ३९८ सू० २२ ।

(६) (शतादिः संख्या) । क्लीबे स्यात् । शतम्=दशगुणितदशसंख्या, दशतिः, संख्येयं च । सहस्रम्=दशशतम्, अनन्तं च । शतादिरिति किम् । एकः, द्वौ, बहवः । संख्येति किम् । शतशृङ्गः=पर्वतविशेषः । सि० कौ० पृ० ४०२ सू० १४५ ।

प्रभृतयः । भावेऽनान्ता हसनप्रभृतयः । भावे खल्प्रत्ययान्ताः—दुर्भव–दुराढ्यभवप्रभृतयः । भावे ञितप्रत्ययान्ताः–सांरावीण–सांकौटीनप्रभृतयः । 'ब्रह्मणस्त्वः' इत्यभिव्याप्य भावार्थकप्रत्ययान्ताः—शुक्लस्य कर्म भावो वा शौक्ल्यम्, शुक्लत्वम्, शुक्लता । सख्युः कर्म भावो वा सख्यम् । स्तेनस्य कर्म भावो वा स्तेयम् । चोरस्य कर्म भावो वा चौर्य्यम् । चपलस्य कर्म भावो वा चापलम् । कपेः कर्म भावो वा कापेयम्, कपित्वम् । ज्ञातेयम् । 'कपिज्ञात्योर्ढक्' इति । आचार्य्यस्य कर्म्म आचार्य्यकम् । 'योपधाद् गुरूपोत्तमाद् वुञ्' इति । द्विपिनो विकारो द्वैपम् । एवं द्वैहायनप्रभृतयः । गायत्र्यादितो गायत्री छन्दसां जातिस्तत्प्रभृतितः स्वार्थे योऽण्प्रययः क्रियते सोऽपि नपुंसकलिङ्गः स्यादित्यर्थः । गायत्र––त्रैष्टुभादयः । अव्ययतम् = अव्ययतलिङ्गकम् । अथानन्तरम् । 'अनञ्कर्म्मधारयस्तत्पुरुषो वा' इत्यधिक्रियते । समासे षष्ठीविभक्त्यन्तात्परा छाया नपुंसके स्यात् । 'छाया बाहुल्ये' इति पाणिनिसूत्रम् । सा चेद् बहूनां सम्बन्धिनी तर्ह्येव क्लीबे । यथा––वीनां पक्षिणां छाया विच्छायम् । इक्षूणां छाया इक्षुच्छायम् । एवं पादपच्छायम्, वृक्षच्छायम्, धनुश्छायम्, शरच्छायम्, इषुच्छायम्, शलभच्छायम्, गण्डच्छायम्, गृध्रच्छायम्, खगच्छायम्, रत्नच्छायमिति । बहूनामिति किम् । वृक्षस्य वृक्षयोर्वा छाया वृक्षच्छाया, वृक्षच्छायम् । कुड्यस्यच्छाया कुड्यच्छाया, कुड्यच्छायम् । एवं पर्वतच्छाया, पर्वतच्छायम् । छत्रच्छाया छत्रछायमिति वा । 'विभाषा सेनासुराच्छायाशालानिशानाम्' इति क्लीबत्वम् । शालां बिना राजवर्जितराजार्थराक्षसादेः परा सभा अपि क्लीबे स्यात् । अथ वा । समूहे वर्त्तमानो यः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे, षष्ठ्यन्तात्परा चेत् । अथ वा । शालार्था गृहार्था अपिशब्दात् संहत्यर्था च या सभा सा अराजकात् राजशब्दवर्जितात्, राजाऽमनुष्याऽर्थात्, राजार्थात् राजपर्य्यायात्, अमनुष्यार्थात् रक्ष आदिशब्दात्षष्ठ्यन्तात्परा चेत् क्लीबे नपुंसके स्यादित्यर्थः । शाला गृहं अर्थो अभिधेयो यस्याः सा शालार्था । अराजकराजपर्य्यायात् यथा––इनसभम्, ईश्वरसभम्, इन्द्रसभम्, नृपसभम्, नृपतिसभम्, प्रभुसभम् । अमनुष्यार्थात् यथा—रक्षःसभम्, पिशाचसभम् । अराजकात्किम् । राज्ञः सभा राजसभा । राजपर्य्यायग्रहणान्नेह चन्द्रगुप्तसभा, जगत्तुङ्गसभा । राजविशेषोऽयम् । षष्ठ्यन्तात्किम् । नृपतिविषये सभा नृपतिसभा । नृणां पतिर्यस्यां सा चासौ सभा चेति वा नृपतिसभा । ईश्वरा सभा = ईश्वरसभा । न सभा–असभा । तत्पुरुषे इति किम् । ईश्वरस्य सभेव सभा यस्य स ईश्वरसभः । 'सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च' इति बहुव्रीहिः । अमनुष्यार्थादिति किम् । दासीसभा । दासीनां शालेत्यर्थः । 'आदावुपक्रमोपज्ञे' इति । तयोरुपज्ञोपक्रमयोरादौ प्रथमे क्लीबे स्यात् । अथवा । उपज्ञा, उपक्रमश्चान्ते यस्य स तत्पुरुषः क्लीबे स्यात् । अथवा । तयोरुपज्ञोपक्रमयोरादित्वं प्राथम्यं तस्य प्रकाशने द्योतने उपज्ञान्त उपक्रमान्तश्च समासः क्लीबे स्यादित्यर्थः । उपज्ञायत इत्युपज्ञा । उपज्ञायाः उपज्ञेयस्य च प्राथम्य-

कथने गम्यमाने । उपज्ञा यथा--को ब्रह्मा तस्योपज्ञा कोपज्ञम् = स्वर्गः प्रजा वा । सृष्टिस्तेनादौ ज्ञाता। पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । अथ वा । पाणिन्युपज्ञं अकालकं व्याकरणम् । पाणिनिना प्रथमं कालधिकाररहितं व्याकरणं कर्त्तुं शक्यमिति परिज्ञातम् । चन्द्रस्योपज्ञा चन्द्रोपसंज्ञकं व्याकरणम् । अथ वा । चन्द्रोपज्ञमसंज्ञकं व्याकरणम् । शाकटायनोपज्ञं शब्दानुशासनम् । तेन प्रथमं ज्ञातम् । आदिदेवोपज्ञं धर्माधर्मव्याख्या । उपक्रम्यत इत्युपक्रमः । उपक्रमस्य उपक्रम्यस्य च प्राथम्य कथने गम्यमाने । उपक्रमो यथा--कस्योपक्रमः कोपक्रमम् = लोकः । तेनादौ प्रक्रान्ता । कुरुराजोपक्रमं (श्रेयांसोपक्रमं) दानम् । कुरुराजेन श्रेयसा प्रथमं प्रवर्तितम् । नन्दोपक्रमाणि मानानि । तेन प्रथमं कृतानि । अथवा--नन्दस्य उपक्रमः आद्यारम्भः, नन्दोपक्रमम् = द्रोणः । कातंत्रोपक्रमम् = कालापकं व्याकरणमिति । उशीनरनाम्नि कन्था च क्लीबे स्यात् । अथवा । षष्ठ्यन्तात्परा या कन्था तदन्तस्तत्पुरुषः क्लीबे स्यात्, उशीनरदेशस्थसंज्ञासु चेद्वर्त्तते । सौशमेः सौशमीनां वा कन्था सौशमिकन्थम्, सौसमिकन्थम्, सौसमीकन्थम् । आह्वराणां कन्था आह्वरकन्थम् । शार्मिकी कन्था यस्यासौ शार्मिकिकन्थम् । उशीनरदेशे इति किम् ? दाक्षीणां कन्था दाक्षिकन्था । ग्रामस्येयं संज्ञा अस्ति किन्तु उशीनरदेशे स ग्रामो न भवति । बाह्लिकेष्वियं सज्ञा । नामसु किम् ? वीरणानां वीरणैः कृता वा वीरणकन्था । कुत्रापि नेयं सज्ञा । सेना च शाला च सुरा च छाया च निशा च तेषां समाहारः सेनाशालासुराच्छायानिशं वा क्लीबे स्यात् । सेना यथा--नृणां सेना नृसेनम्, नृसेना । कपीनां सेना कपिसेनम्, कपिसेना। क्षत्रियाणां सेना क्षत्रियसेनम्, क्षत्रियसेना । ब्राह्मणानां सेना ब्राह्मणसेनम् ब्राह्मणसेनेति । शाला यथा--गवां शाला गोशालम्, गोशाला । हस्तिनां शाला हस्तिशालम्, हस्तिशाला । अनाथानां शाला अनाथशालम्, अनाथशालेति । सुरा यथा—यवानां सुरा यवसुरम्, यवसुरा। छाया यथा--कुड्यस्यच्छाया कुड्यच्छायम्, कुड्यच्छाया । निशा यथा—चोराणां निशा चोरनिशम् चोरनिशा । भूतानां निशा भूतनिशम्, भूतनिशा । शुनां निशा श्वनिशम्, श्वनिशेति । शशात्परा उर्णा, भात्परो गणः, गृहतः परा स्थूणा च नपुंसकलिङ्गे भवन्ति । शशस्योर्णा शशोर्णम् = शशलोम । भानां गणः भगणम् = नक्षत्रसमूहः । गृहस्य स्थूणा गृहस्थूणम् = गृहधाधारणम् । शतादिका शतपूर्वा अदन्ता अकारान्ता या संख्या सा क्लीबे स्यात् । यथा—शतम्, सहस्रम्, अयुतमित्यादि । अदन्ता किम् ? कोटिः, लक्षा ; इति ।

अमरोऽपि—(अम० ना० लिं० पृ० ४५७ श्लोकः २२, २३) ।

द्विहीने–ऽन्य–च्च खा–ऽरण्य–पर्ण–श्वभ्र–हिमो–दकम् ।
शीतो–ष्ण–मांस–रुधिर–मुखा–ऽक्षि–द्रविणं बलम् ॥

फल–हेम–शुल्ब–लोह–सुख–दुःख–शुभा–ऽशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्य–ऽनुलेपनम् ॥

अनयोर्व्याख्या—

द्विहीन इति । फलेति च । द्विहीने द्वाभ्यां पुंस्त्रीभ्यां हीने वर्जिते क्लीबे स्यात् । अधिकारोऽयम् । अन्यदत्रशिष्टम् । उक्तसंग्रहाच्छेषः क्लीबे स्यात्, बाधकविषयादन्यः । तत्र कांश्चिद्दर्शयति—चकाराद्वस्त्राभरणदिग्रहः । खमिन्द्रियं व्योम च । तद्यथा––छिद्रम्, नभः, वियत् इत्यादि । 'खमिन्द्रिये व्योम्नि पुरे शर्मणि त्रिदशालये । क्षेत्रे 'संवेदने बिन्दौ शून्येऽपि च निगद्यते ।' इति––(श० र० स० पृ० ५३ पं० ८, ९) । अरण्यम्, विपिनम्, काननमित्यादि । अटव्यरण्यं विपिन'मिति—(अम० ना० लिं० १२७ पृ० १ श्लोकः) । पर्णम्, पत्रम्, दलमित्यादि । 'पर्णं पक्षे पलाशेऽपि, पर्णः स्यात्किंशुकद्रुमे ।' इति––(श० र० स० पृ० १०६ पं० ५) । श्वभ्रम्, रसातलम्, पातालमित्यादि । 'रन्ध्रं श्वभ्रं वपा शुषिः ।' इति—(अम० ना० लिं० पृ० ८६ श्लोकः २) । हिमम्, तुहिनम्, प्रालेयमित्यादि । 'हिमं स्यान्मलयोद्भूते तुषारेऽपि च शीतले ।' इति—(श० र० स० पृ० २२७ पं० ४) । उदकम्, जलम्, अम्बु, नीरमित्यादि । 'कबन्धमुदकं पाथः' इति––(अम० ना० लिं० पृ० ९३ श्लोकः ४) । शीतम्, शीतलमित्यादि । 'शीतं क्लीबे शैत्यगुणे' इति––(ना० र० मा० पृ० २९ पं० १५) । उष्णम्, तिग्ममित्यादि । 'उष्णस्त्वातपोष्मणोः । वह्नौ तु पुंसि, चतुरतिग्मयोस्त्वेव वाच्यवत् ।' इति—(ना० र० मा० पृ० २६ पं० ८)। मांसम्, पिशितम्, तरसमित्यादि । 'अथ मांसं क्रव्ये' इति––(ना० र० मा० पृ० ५९ पं० १०) । रुधिरम्, शोणितम्, रक्तमित्यादि । 'रुधिरं कुङ्कुमे रक्ते रुधिरोद्गारके पुमान् ।' इति––(श० र० स० पृ० २७९ पं० ३) । मुखम्, वदनम्, वक्त्रमित्यादि । 'मुखं प्रधाने प्रारम्भे वक्त्रे निःसरणेऽपि च । उपाये द्वारि ताम्रे' इति—(ना० र० मा० पृ० १३ पं० ४) । अक्षि, नेत्रम्, लोचनम्, नयनमित्यादि । 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी ।' इति––(अम० ना० लिं० पृ० २३५ श्लोकः ९३) । द्रविणम्, वित्तम्, धनमित्यादि । 'अथ द्रविणं गेहे वित्ते स्वर्णे पराक्रमे ।' इति––(ना० र० मा० पृ० ७६ पं० १५) । इह बलशब्देन शक्तिसैन्यग्रहणम् । शक्तौ यथा––बलम्, तरः, शुष्ममित्यादि । 'बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः ।' इति––(मे० पृ० १४७ श्लोकः ३७) । सैन्ये यथा––सैन्यम्, चक्रमित्यादि । 'सैन्यं क्लीबं बले, सेनासमवेते तु वाच्यवत् ॥' इति—(मे० पृ० ११७ श्लोकः ६४) । फलम्, निरीशम्, कुटकमित्यादि । 'फलं हेतुकृते जातीफले फलकसस्ययोः । त्रिफलायां च कक्कोले शस्त्राग्रे व्युष्टिलाभयोः ।' इति––(अने० सं० पृ० ४१ श्लोकः ५१०) । हेम, सुवर्णम्, स्वर्णम्, कनकमित्यादि । 'हिरण्यं हेमहाटकम् ।' इति—

(अम० ना० लि० पृ० ३३३ श्लोकः ९४) । शुल्बम्, ताम्रमित्यादि । 'शुल्बं ताम्रे यज्ञकर्मण्याधारे जलसंनिधौ ।' इति—(मे० पृ० १५९ श्लोकः २७) । लोहम्, कालायसमित्यादि । 'लोहोऽस्त्री शस्त्राके लौहे जोङ्गके सर्वतेजसे ।' इति--(मे० पृ० १७५ श्लोकः ८) । सुखम्, शर्म, शातमित्यादि । 'सुखं शर्मणि नाके च' इति—(मे० पृ० २० श्लोकः ८) । दुःखम्, आमनस्यम्, कष्टमित्यादि । 'आबाधा वेदना दुखम्' इति हलायुधः इति—(अम० सु० व्या० पृ० ९२ स्तं० १ पं० १८, १९) । शुभम्, कल्याणम्, मङ्गलमित्यादि । 'शुभो योगे, शुभं भद्रे, वाच्यवत्क्षेमशालिनि ।' इति--(मे० पृ० १०६ श्लोकः ८) । अशुभम्, अशस्तम्, अकल्याणमित्यादि । जलपुष्पाणि, जलभवानि पुष्पाणि कुमुदकमलकह्लारोत्पलानि । लवणम्, सैन्धवम्, अक्षीवमित्यादि । 'लवणं सैन्धवादौ, ना सिन्धुरक्षोभिदो रसे ।' इति--(मे० पृ० ५० श्लोकः ७५) । व्यञ्जनानि, तेमनानीत्यादीनि । 'व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेऽह्नि ।' इति--(मे० पृ० ९१ श्लोकः २२) । अनुलेपनम्, कुङ्कुमादि । अत्र बाधितादन्यत् इति किम् ? आकाशो विहाया द्यौः । अटवी अरण्यानीत्यादिकम् । एवमन्यदप्यूह्यम् । खादि सपर्यायं सविशेषं च क्लीबे भवति--इति मुकुटः ।

क्षीरस्वाम्यपि–खादि सपर्यायविशेषं तृतीये– इत्येव व्याचष्ट' इति--(अम० सु० व्या० पृ० ४५७ स्तं० २ पं० २८) ।

कोट्याः शतादिसंख्या–ऽन्या वा लक्षा नियुतं च तत् ।
द्व्यच्क–मसि–सुस–ऽन्नन्तं यद–ऽनान्त–मकर्त्तरि ॥

अस्य व्याख्या—

कोट्या इति । कोट्या कोटिशब्दं विना यान्या शतादिसंख्या सा क्लीबे स्यात् । लक्षशब्दो वा क्लीबे । पक्षे योषिति । 'लक्षा नपुंसि संख्यायां, क्लीबं व्याजशरव्ययोः ।' इति--(मे० पृ० १६३ श्लोकः २३) । नानार्थरत्नमालाकारस्तु न स्त्रियामित्याह--'लक्षं शरव्ये व्याजे च न स्त्रियां, नियुते तु ना ।' इति--(ना० र० मा० पृ० ६१ पं० ४) । तदिति लक्षस्य पर्याया नियुतमित्यर्थः । उदाहरणं च--नियुतं शतं सहस्रमयुतमित्यादि । 'शतं सहस्रमयुतं नियुतं प्रयुतं मतम् । स्त्री कोटिरर्बुदमिति क्रमाद्दशगुणोत्तरम् ।' इति रत्नकोषः' इति—(अम० सु० व्या० पृ० ४५७ स्तं० २ पं० ३६, ३७) । असन्त–मिसन्त–मुसन्त–मन्नन्तं च यद् द्व्यच्कं द्विस्वरं तत् क्लीबे भवति । असन्तं यथा—मनः = मानसम् । तेजः = प्रतापः। तमः = अन्धकारः । इसन्तं यथा--सर्पिः = घृतम् । ज्योतिः = प्रकाशः । हविः = सांनाय्यं हविर्विशेषः । शोचिः = प्रभा, रोचिश्च । उसन्तं यथा–वपुः = शरीरम् । यजुः = वेदविशेषः । धनुः = शरासनमित्यादि । द्विस्वरमन्नन्तं यथा –चर्म = अजिनम्, कृत्तिः । शर्म = कल्याणम् । साम = वेद-

विशेषः । वर्म = कवचम् । कर्म = क्रियेत्यादि । अनेनैव क्लीबत्वे सिद्धे परतो यन्मर्मशब्दोपादानं तदस्यानित्यत्वज्ञापनार्थम् । तेन--'गुणान्धकारशोकेषु तमो राहौ पुमानय'मित्याद्यपि सिद्धम् । इति—(अम० अम० वि० व्या० पृ० ३६७ पं० ९) । अकर्त्तरीति । कर्त्तृवर्जितेऽर्थे यदनान्तं नाम तन्नपुंसके भवति । गम्यते इति गमनम् = गतिः । म्रियते इति मरणम् = मृत्युः । दीयते इति दानम् = वितरणम् । क्रियते इति करणम् = कारणम् । वरणम् = कन्यादिवरणम्, वेष्ठनं च । कदनम् = मर्दम्, पापं च । गगनम् = आकाशः । दमनम् = आत्मसंयमः । शमनम् = शान्तिः । इत्यादि । 'कृत्यल्युटो बहुलम्' इत्यनान्तानां त्रिलिङ्गत्वं स्वरन्ति । कथं राज्ञा भुज्यते इति राजभोजनी शाला क्षैरेयी वा । राजभोजनः शालिः, राजभोजनं भवतम्, अन्नम्, इत्यादि-- क्षीरस्वामी, इति--(अम० सु० व्या० टि० पृ० ४५८ स्तं० १ पं० ३२, ३३) ।

त्रान्तं स–लो–पधं शिष्टं रात्रं प्राक्संख्ययान्वितम् ।
पात्राद्य–ऽदन्तै–रेकार्थो द्विगु–र्लक्ष्यानुसारतः ॥

अस्य व्याख्या—

त्रान्तमिति । त्रान्तं त्रशब्दान्तं, सलोपधं सकारो लकारो वा उपधा अन्त्यात्पूर्वो यस्य तत् सलोपधं च नपुंसके भवति । त्रान्तं यथा--दात्रम् = लवित्रम् । पात्रम् = भाजनम्, भाण्डम् । वस्त्रम् = वसनम्, अंशुकम् । वहित्रम् = वहनम् । गात्रम् = शरीरम् । मित्रम् = सुहृत्, सखा । यंत्रम् = नियंत्रणम्, देवाद्यधिष्ठानम्, पात्रभेदश्चेत्यादि । सोपधं यथा—बिसम् = कमलम्, पद्मम्, मृणालं च । विशम्' इत्यपि । 'मृणाले तु बिसं विशम् ।' इति द्विरूपकोषः' इति--(अम० सु० व्या० पृ० १०८ स्तं० २ पं० ५, ६) । अन्धतमसम् = घनान्धकारः । बुसम् = कडङ्गरः, पलालादिक्षोदम् । 'बुषमपि ।' 'बुषवेषतुषारतोषाः ।' इति षभेदान्मूर्धन्यान्तमपि' इति—(अम० सु० व्या० पृ० ३०९ स्तं० १ पं० २२) । इत्यादि । लोपधं यथा--कुलम् = वंशः । मूलम् = नक्षत्रविशेषः, बुध्नः, अंघ्रिश्च । कूलम् = तटम् । शूलम् = रोगविशेषः, आयुधविशेषश्च । तूलम् = कार्पासम्, ब्रह्मदारु चेत्यादि । शिष्टमिति । यदवशिष्टं प्रागुक्तादन्यत् तच्च प्रागुक्तम् । यद-बाधितं तदपि त्रान्तादिकं क्लीबे इत्यर्थः । शिष्टमिति किम् ? पुत्रः = आत्मजः । वृत्रः = असुर-विशेषः । मंत्रः = वेदभेदः, गुह्यवादश्च । हंसः = पक्षिविशेषः । कंसः = शूरसेनपुत्रः । पनसः = कण्टकिफलः । ''कटहल'' इति लोके । कालः = समयः, यमश्च । शालः = मत्स्यप्रभेदः,

---

पाणिनीयेऽपि--(१) (त्रान्तः) एष नपुंसके स्यात् । पत्रम् = पर्णम् । छत्रम् = आतपत्रम् । सि० कौ० पृ० ४०३ सू० १५५ ।

(२) (संख्यापूर्वा रात्रिः)॥ त्रिरात्रम् = त्रयाणां रात्रीणां समाहारः । संख्यापूर्वेति किम् ? सर्वरात्रः । सि० कौ० पृ० ४०२ सू० १३३ ।

वृक्षविशेषश्च। शिला=पाषाण' इत्यादि। संख्यापूर्वो रात्रशब्दः क्लीबे। 'रात्राह्नाहाः पुंसी' ति पुंस्त्वप्राप्तेरपवादोऽयम्। संख्यापूर्वं रात्रं क्लीबमिति वार्तिकं रात्राह्नाहा इत्यस्य बाधकम्। एका चासौ रात्रिश्च एकारात्रम्। द्वयोः रात्र्योः समाहारः द्विरात्रम्। पञ्चानां रात्रीणां समाहारः पञ्चरात्रम्, अहोरात्रम्, गणरात्रमिति। संख्ययेति किम्। अर्द्धरात्रः, पूर्वरात्रः, मध्यरात्र इति। पात्रादिभिरदन्तैरेकार्थो यो द्विगुः स क्लीबे स्यात् शिष्टप्रयोगात्। पञ्चानां पात्राणां समाहारः पञ्चपात्रम्। आदिना चतुर्णां युगानां समाहारः चतुर्युगम्। त्रयाणां भुवनानां समाहारः त्रिभुवनम्। एकार्थः किम्। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः= पुरोडाशः। तद्धितार्थे द्विगुरयम्। लक्ष्यानुसारत इति किम्। त्रयाणां पुराणां समाहारः त्रिपुरी। पञ्चानां मूलानां समाहारः पञ्चमूली। त्रयाणां लोकानां समाहारः त्रिलोकी। तिसृणां वलीनां समाहारः त्रिवली'त्यादि।

द्वन्द्वैकत्वा–ऽव्ययीभावौ पथः संख्या–ऽव्ययात्परः।
षष्ठा–श्छाया बहूनां चेद् विच्छायं संहतौ सभा॥
शालार्थापि परा–ऽराजा–ऽमनुष्यार्था–दराजकात्।
दासीसभं नृपसभं रक्षसभमिमा दिशः॥
उपज्ञो–पक्रमान्तश्च तदादित्वप्रकाशने।
कोपज्ञ–कोपक्रमादि कन्थो–शीनरनामसु॥

एषां व्याख्या—

द्वन्द्वेति। शालेति। उपज्ञेति च। द्वन्द्वैकत्वादीनां व्याख्या प्रागुक्ता। स्त्रियां तु वक्ष्यते। संहताविति। संहतौ समूहे वर्त्तमानो यः सभाशब्दस्तदन्तस्तत्पुरुषः क्लीबे, षष्ठ्यन्तात्परा चेत्। स्त्रीणां सभा, स्त्रीसभम्=स्त्रीसंघातः स्त्रीसमुदायो वा। दासीनां सभा दासीसभम्=दासीसंघातः 'अशाला च' इति क्लीबत्वम्। संहताविति किम्। दासीनां सभा, दासीसभा=दासीगृहमित्यर्थः। धर्मस्य सभा, धर्मसभा=धर्मशाला। इमा दिश इति। दासीसभमित्यादीनि त्रीण्युदाहरणानीत्यर्थः। तत्र दासीसभमित्यादि तु संहतावित्यस्यैव। इतरे तु शालासंहतिसाधारणे। तयोरुपज्ञोपक्रमयोरादित्वं प्राथम्यं तस्य प्रकाशने द्योतने उपज्ञान्त उपक्रमान्तश्च समासः क्लीबे स्यात्। उदाहरणं तु प्रागुक्तम्। तदादित्वेति किम्। देवदत्तोपज्ञा। मृन्मयः प्रकारः। मृत्प्रकारस्यानेककारणत्वात्। देवदत्तेति सामान्यशब्देन च तदादित्वप्रतिपादनाभावे क्लीबत्वाभावः। एवं देवदत्तोपक्रमः रथः' इति। शे० प्राग्वत्।

भावे न–ण–क–चिद्भ्यो–ऽन्ये समूहे भाव–कर्म्मणोः ।
अदन्तप्रत्ययाः पुण्य–सुदिनाभ्यां त्व–ऽहः परः ॥
क्रिया–ऽव्ययानां भेदकान्ये–कत्वेऽपि' इति ।

अस्य व्याख्या—

भाव इति । क्रिया इति च । चकार इत् अनुबन्धो यस्य स चित् । नश्च णश्च कश्च चिच्च नणकचितः । तेभ्योऽन्ये ये तव्यादयोऽदन्ता धातुप्रत्यया भावे विहितास्ते क्लीबे । अथ वा । नश्च णश्च कश्च चितः (च इद्येषां ते) च । एभ्योऽन्येऽदन्तप्रत्यया कृतो ये भावे विहिताः, तथा समहेऽर्थे भावकर्मणोर्विहिता येऽकारान्तप्रत्ययास्तद्धिताः, तदन्तं नाम क्लीबे स्यात् । तत्र धातुप्रत्यया यथा—सहितम् = युक्तम् । भुक्तम् = खादितम्, गतं च । भूतम् = अतीतम् । 'नपुंसके भावे क्तः' । भवितव्यम्, भवनीयं, भवद्भिः । भवति—भूयते भवितुं योग्यमिति वा भव्यम् 'तयोरेव'—इति भावे तव्यादयः । भव्यं योग्यं 'कर्त्तरि भावे यत्' । तदुक्तम्—'भवितव्यं भवत्येव नारिकेलफलाम्बुवत् । गन्तव्यं गतमित्याहुर्गजभुक्तकपित्थवत् ।' इति—(श० चिं० पृ० ४१८ स्तं० १ पं० १०, ११, १२) । भाव्यम्, विभावनीयम्, भवति । भू० बाहुलकात् कर्त्तरि ण्यत् । तदुक्तम्—'कृतस्य करणं नास्ति दैवाधिष्ठितकर्मणः । भावीत्यवश्यं यद्भाव्यं तत्र ब्रह्माऽप्यबाधकः ।' इति—(श० चिं० पृ० ४३४ स्तं० २ पं० १७, १८, १९) । अवश्यभवितव्यम् । 'ओरावश्यके' इति ण्यत् । भावयतीति भवतेर्ण्यन्तात्कर्मणि यत् । ब्रह्मणो भवनं, ब्रह्मभूयम् = ब्रह्मसाक्षात्कारः, मोक्षः, ब्रह्मत्वम् । 'भुवो भावे क्यप्' । संरवणम्, सांराविणम् । सङ्कूटनम्, साङ्कूटिनम्, सांकोटिन, सांकौटिनं, वर्त्तते । 'अभिविधौ भाव इनुण्' इति । 'अणिनुणः' इति । 'नणकचिद्भ्योऽन्य' इति किम् । 'यजयाच–यत–विच्छ–प्रच्छ–रक्षो नङ्' । यज्ञः = क्रतुः । यत्नः = प्रयत्नः । उत्साहः, उद्योगश्च । प्रश्नः = अनुयोगः, पृच्छा । 'स्वपो नन्' इति स्वप्नः = निद्रा, शयनम् स्वापः । 'नौ णच' इति णच । न्यदनम्, न्यादः = आहारः । 'सुपीतिकः' । आरवृत्थः = मूषकसमूहः । वेपथुः = कम्पः । 'घञर्थे' इति कः । विघ्नः = अन्तरायः, प्रत्यूहः । चित् 'एरच्' इति अच् । चयनम्, चयः = समूहः । जयनम्, जयः = विजयः, उत्कर्षप्राप्तिः । ''जीत'' इति लोके । 'ण्यासश्रन्थो युच्' इति युच् । कारणम् = करणम्, साधनम्, कर्म । कारणा = यातना, गाढवेदना । नणकेति घञ उपलक्षणम् । पाकः = पचा, स्थाल्यादौ पचनम्, परिणतिः, दैत्यविशेषश्च । भावे किम् । कर्त्तव्यो धर्म्मसंग्रहः, मृतो वैरी । समूहे तद्धिताः । 'भिक्षादिभ्योऽण्' इति अण् । भैक्षम् = भिक्षाणां समूहः । गार्भिणम् = गर्भिणीनां समूहः । 'गोत्रोक्षोष्ट्र'—इति वुञ् । औपगवकम् = औपगवानां समूहः । 'तस्य समूहः' इति अण् । चाषम् = चाषाणां

समूहः । काकम् = काकानां समूहः । कौमारम् = कुमाराणां समूहः । कैशोरम् = किशोराणां समूहः । यौवनम् = यूनां समूहः । यौवतम् = युवतीनां समूहः । वानस्पत्यम् = वनस्पतीनां समूहः । भैक्षमित्यादीनां स्वभावात् समूहवृत्तिः नपुंसकत्वं च । भावक्रियाविषयं यथा--वृक्ष्यम् = वृक्षस्य भावः । जाड्यम् = जडस्य भाव. । गार्हपत्यम् = गृहपतीनां भावः । पाशुपत्यम् = पशुपतेर्भावः । "कपिज्ञातिभ्यो ढक्" इति ढक् । कापेयम् = कपेर्भावः । ज्ञातेयम् = ज्ञातेर्भावः । रामणीयकम् = रमणीयस्य भावः । पौरोहित्यम् = पुरोहितस्य कर्म भावो वा । सैनापत्यम् = सेनापतेः कर्म भावो वा । नार्प्यम् = नृपस्य कर्म भावो वा । नारपत्यम् = नृपतेः कर्म भावो वा । "यण् च प्रकीर्तितः ।" छात्रम् = छात्रस्य भावः क्रिया वा । आश्वम् = अश्वस्य भावः क्रिया वा । औग्दात्रम् = उग्दातुर्भावः क्रिया वा । "प्राणभृज्जातिवयोवचनाद् गोत्रादेः भावे क्रियायां वाऽण् च (?)" । "सख्युर्यः" इति यः । सख्यम् = सख्युर्भावः क्रिया वा । इत्यादीनां अभिधानादेव नपुंसकत्वं सिद्धम् । "केदाराद्यञ् च" इति यञ् । चकारात् वुञ् इति च । कैदार्य्यम्, कैदारकम् = केदाराणां समूहः । द्वन्द्व मनोज्ञादिभ्यश्च' इति वुञ् । मानोज्ञकम् = मनोज्ञानां समूहः । 'तस्य भावस्त्वतलौ' भावे अदन्ता यथा— गोत्वम् = गोर्भावः । 'इगन्ताच्च लघुपूर्वात्' इति अण् । शौचम् = शुचेर्भावः । मौनम् = मुनेर्भावः । मार्दवम् = मृदोर्भावः । 'स्तेनाद्यन्नलोपश्च' इति यत् नलोपश्च । स्तेयम् = स्तेनस्य भावः, कर्म वा । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । शौक्ल्यम् = शुक्लस्य भावः, कर्म वा । कर्मणि यथा—राज्यम् = राज्ञः कर्म । चौर्य्यम् = चोरम् । तल्प्रत्ययस्य तु स्त्रीत्वमुक्तम् । पुण्येत्यादीनां व्याख्या तु प्राग्वद् बोध्या ।

अथाधुना कान्तादिक्रमेण मौक्तिकादीन् पिञ्जपर्य्यन्तान्नपुंसकलिङ्गवाचकशब्दान् कण्ठरवेनाह हेमः—(अभि० सं० लिं० पृ० ५ श्लोकः ६३, ६४, ६५, ६६)

मौक्तिकं माक्षिकं सौप्तिकं क्लीतकं
नाणकं नाटकं खेटकं तोटकम् ।
आह्निकं रूपकं जातकं जालकं
वैणुकं गैरिकं कारकं वास्तुकम् ॥१३॥

पाणिनीयेऽपि—(१) (चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके) ॥ एषां व्याख्या तु हैमादिषु प्रोक्ता । सि० कौ० पृ० ३९९ सू० ६१ । वामनीयेऽपि—'कुहकं चिबुकं लिङ्गं ककचं बीजं ललाटशृङ्गाटम् । वटपिष्टलोष्टकरोटं पीठं पृष्ठं च कुण्डं च ॥ कुण्डाण्डभाण्डकारणशरणमृणक्षूणमुण्णतीर्थोत्थम् । गुदवृन्दकुसीदानी श्राद्धान्ने रत्नचिह्ने ॥ इति । पृ० ९ श्लो० ९, १० ।

रुचकं धान्याक–निःशलाका–

ऽलीका–ऽलिक–शल्को–पसूर्यकाऽकम् ।

कवक–कविक–तोक–तिन्तिडीकै—

डूक–च्छत्राक–त्रिको–ल्मुकानि ॥१४॥

मार्द्वीक कदम्बके बुक्कं चिबुक–कुंक–मनूक–चित्रके ।

कुब्जकं मधुपर्क–शीर्षके शालूकं कुलकं प्रकीर्णकम् ॥१५॥

हल्लीस–पुष्पके खलिङ्ग–स्थगु–भङ्ग–पूग–चोच–बीज–पिञ्जम् ।

एषां व्याख्या

मौक्तिकमिति । रुचकमिति । मार्द्वीकेति । हल्लीसकेति च । एते मौक्तिकादयः पिञ्ज-पर्य्यन्ताः शब्दा नपुंसकलिङ्गाः स्युः । मौक्तिकम् = मुक्ताफलम् । 'रत्नभेदाश्च मौक्तिकम् ।' इति । 'मुक्ता तु मौक्तिकम् ॥ मुक्ताफलम्' इति च––(वै० पृ० १५२ श्लोकः ५६, ५७) । माक्षिकम् = मधु । 'माक्षिकं मधुनि स्मृतम् ।' इति—(श० र० स० पृ० २४ पं० २१) । सौप्तिकम् = युद्धरात्रिः । 'सौप्तिकं युद्धरात्रौ स्यात्' इति—(श० र० स० पृ० ३० पं० ९) । क्लीतकम् = मधुयष्टिः । 'क्लीतकं मधुयष्टौ स्यात्' इति—(श० र० स० पृ० ११ श्लो० ४) । नाणकम् = मुद्राचिह्नितनिष्कादिः । ''सिक्का'' इति लोके । अत्राह याज्ञवल्क्यः—'तुलाशासन-मानानां कूटकृन्नाणकस्य च । एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम् ।' इति––(श० चिं० पृ० १३७१ स्तं० २ पं० २३, २४, २५) । नाटकम् = महारूपकम्, गद्यपद्यप्राकृत-भाषामयो ग्रन्थविशेषः । 'नाटकं नाटिका भाणो वीथिः प्रहसनं डिमः ।' इति—(वै० पृ० १४४ श्लोकः १००) । नाटकक्रीडने तु नियममाह—'देवतादर्शनान्तं च कर्त्तव्यं नाटकं बुधैः । राजर्षिदर्शनान्तं वा तेऽपि देवैः समा मताः ।' इति––(श० चिं० पृ० १३५९ स्तं० २ पं० ८, ९, १०) । खेटकम् = लघुग्रामः, युद्धसाधनचर्म च । ''ढाल'' इति लोके । 'खेटकं तु लघुग्रामे युद्धसाधनचर्म च ।' इति––(श० र० स० पृ० १३ पं० ५) । तोटकम् = वृत्तभिद् । 'तोटकं वृत्तभिद्यपि ।' इति––(श० र० स० पृ० १८ पं० ५) । आह्निकम् = नित्यक्रिया, भोजनम्, प्रकरणवृन्दं च । 'आह्निकं दिननिर्वर्त्त्ये त्रिलिङ्गमथ न द्वयोः । नित्यक्रिया भोजनयोर्वृन्दे प्रकरणस्य च ।' इति—(मे० पृ० ५ श्लोकः ४९) । रूपकम् = नाटकम्, मूर्त्तम्, काव्यालङ्क-रणं च । 'रूपकं नाटके मूर्त्ते काव्यालङ्करणेऽपि च ।' इति—(मे० पृ० १२ श्लोकः १४९) । जात (प) कम् = जातस्य शुभाशुभनिर्णायको होराग्रन्थः, जातकर्माख्यमङ्गलं च । तथा च प्रयोगः–'जातकमवलोक्य निरवशेषम्' इति भट्टोत्पलः' इति–(आर्य्या सप्तत्यां पृ० १ श्लोकः १)।

जालकम् = कोरकः, कुलायः, जालिनीफलं च। 'जालकं कोरके प्रोक्तं कुलाये जालिनीफले। आनाये दम्भभेदे च' इति--(श० र० स० पृ० १६ पं० १३)। वैणुकम् = गजालानम्, गजबन्धनस्तम्भः । 'वैणुकं तु गजालाने' इति--(श० र० स० पृ० २८ श्लोकः ११)। गैरिकम् = धातुः, स्वर्णं च। 'गैरिकं धातुरुक्मयोः ।' इति--(मे० पृ० ७ श्लोकः ८४)। कारकम् = क्रियानिमित्तमात्रम्, कर्मादि । अन्यस्तु कारयतीति कारिका स्त्री, कारकः पुमान्, कारकं कुलम् । 'अथ कारिका नटयोषिति। कृतौ विवरणश्लोके शिल्पयातनयोरपि । नपुंसकं तु कर्मादौ कारकं, कर्त्तरि त्रिषु।' इति--(मे० पृ० ६ श्लोकः ६३, ६४) । वास्तुकम् = शाकविशेषः, वास्तुकशाकम् । "बथुवा" इति लोके । 'वास्तुकम्' इति--(अम० ना० लिं० पृ० १८१ श्लोकः १५८) । तथा च प्रयोगः—'रम्या वास्तववास्तुकस्तबकिता' इति--मुकुटः' इति--(अम० सु० व्या० टि० पृ० १८१ स्तं० २ पं० ३९)। रुचकम् = सर्जिकाक्षारः, अश्वाभरणम्, माल्यं च। 'न द्वयोः सर्जिकाक्षारेऽप्यश्वाभरणमाल्ययोः। सौवर्चलेऽपि माङ्गल्य-द्रव्ये चाप्युत्कटेऽपि च।' इति--(मे० पृ० १२ श्लोकः १४७) । धान्याकम् = धन्याकम्, कुस्तुम्बुरु। "धनियाँ" इति लोके। 'धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम् ।' इति रभसः' इति--(अम० सु० व्या० पृ० ३१५ स्तं० १ पं० ३६, ३७) । निःशलाकम् = निर्जनम्, रहः । "एकान्त" इति लोके। 'छन्नं गुह्यं निःशलाकं रहः क्लीबोऽथ वाव्ययम्।' इति--(वै० पृ० २११ श्लोकः १२०) । अलीकम्, अलिकम् = अप्रियम्, असत्यं च । 'अलीकम-प्रियेऽपि स्याद् दिव्य (गोध्य) सत्ये नपुंसकम्।' इति--(मे० पृ० ४ श्लोकः ४२)। 'भाले गोध्यलिकालीकललाटानि' इति हैमनाममाना' इति—(अम० सु० व्या० टि० पृ० २३४, पं० ४१) । 'अलीकमहितेऽपि' इति कात्यः। बाहुलकादिकन्नपि। 'अलिकं ह्रस्वदीर्घमध्यम्।' इति राजदेवः' इति--(अम० सु० व्या० पृ० २३४ स्तं० २ पं० ३१)। शल्कम् = शकलम्, वल्कं च। 'शल्कं तु शकले वल्के' इति--(मे० पृ० ४ श्लोकः ३५) । उपसूर्यकम् = परिवेषः, चन्द्रसूर्ययोरुत्पातादिजातमण्डलम् । 'परिवेषस्तु परिधिरुपसूर्यकमण्डले ॥' इति—(अम० ना० लिं० पृ० ४२ श्लोकः ३२) ।'मण्डलं परिवेशश्च परिधिश्चोपसूर्यकम् ।' इति भागुरिः' इति--(अम० सु० व्या० पृ० ४२ स्तं १ पं० २७, २८) । 'मण्डले तूपसूर्यकम् ।' इति च—(श० र० स० पृ० ४७ पं० ८)। अकम् = दुःखम्, पापं च। अत्राल्कमित्यपि पाठो दृश्यते। कवकम् = छत्राकम्, भूस्फोटः । 'कवको ग्रासमात्रे स्याद्, भूस्फोटे कवकं विदुः।' इति—(श० र० स० पृ० १० पं० ४)। अत्राह मनुः—'भौमानि कवकानि च।' इति--(श० चिं० पृ० ५४४ स्तं० १ पं० २३)। कविकम् = खलीनम्, अश्वस्य मुखबन्धनम्। "लगाम" इति लोके। इह किंवुकमित्यपि पाठो दृश्यते । तोकम् = अपत्यम् । 'अपत्यं तोकं तयोः समे ।' इति । तयोस्तनयदुहित्रोः समे समानलिङ्गे । 'तोकं सन्तानसुतयोः' इति--(अने० सं० पृ० ३ श्लोकः

१०) । तिन्तिडीकम् = औषधम्, वृक्षाम्लम्, चुक्रम् । 'तिन्तिडीकं तथौषधे ।' इति—(श० र० स० पृ० ३७ पं० ७) । एडूकम् = अन्तर्न्यस्तकीकसं कुड्यम्, अस्थ्यादिमयकुड्यम् । 'एडूकं यदन्तर्न्यस्तकीकसम् ।' इति—(अम० ना० लिं० पृ० ११७ श्लोकः ४) । 'एडूकं च तथैडोकम्' इति । 'भवेदेडोकमेडूकमेडुकं च' इति च द्विरूपकोषः' इति—(अम० सु० व्या० पृ० ११७ स्तं० २ पं० ३२) । छत्राकम् = भूम्फोटः, शिलीन्ध्रम् । "कुकुर मुत्ता" इति लोके । 'छत्राकं धरणीस्फोटे' इति—(श० र० स० पृ० १६ श्लोकः ४) । त्रिकम् = पृष्ठाधरम्, पृष्ठवंशाधोभागः, कटिभागः । 'त्रिकं पृष्ठाधरे त्रये ।' इति—(मे० पृ० ३ श्लोकः २६) । उल्मुकम् = अर्द्धदग्धं काष्ठम्, आलातम्, अङ्गारम् । 'स्यादुल्मुकं तथाऽऽलाते सोत्कण्ठे तूल्मुको मतः ।' इति—(श० र० स० पृ० ८ पं० १०) । मार्द्वीकम् = मधु, मधुकपुष्पकृतमद्यम् । मृद्वीका = द्राक्षा तस्य विकारः । 'तस्य विकारः' इत्यण् । द्राक्षामद्यं च । 'मध्वासवो माधवको मधु मार्द्वीकमद्वयोः ।' इति—(अम० ना० लिं० पृ० ३५१ श्लोकः ४१) । केचित्तु 'माध्वीकम्' इति पठन्ति । तत्र पृषोदरादित्वम् । अद्वयोः क्लीबमित्यर्थः । कदम्बकम् = निकुरम्बम्, समूहः । 'कदम्बं निकुरम्बे, स्यान्नीपसर्षपयोः पुमान् ।' इति—(मे० पृ० १०५ श्लोकः ९) । बुक्कम् = अग्रमांसम्, हृदयान्तर्गतमांसविशेषः । 'शोणितेषु स्त्रियां वृक्का, बुक्कं सुरसमद्वयोः ।' इति रभसः' इति—(अम० सु० व्या० पृ० २२३ स्तं० २ पं० २७, २८) । चिबुकम् = वदनैकदेशः, चिबुः, ओष्ठाधोभागः । "ठोडि" इति लोके । 'अधस्तादधरोष्ठस्य चिबुः स्याच्चिबुकं तथा ।' इति निगमः' इति—(अम० सु० व्या० पृ० २३४ स्तं० १ पं० ५) । कुतुकम् = कुतूहलम्, कौतुकम् । 'कुतुकं तु कुतूहले ।' इति—(श० र० स० पृ० ११ पं० १२) । अनूकम् = कुलम्, शीलं च । 'अनूकं तु कुले शीलेऽप्यनूको गतजन्मनि ।' इति—(श० र० स० पृ० ६ पं० १३) । चित्रकम् = तिलकम् । 'चित्रकः स्यादग्नितरौ, चित्रकं तिलके मतम् ।' इति—(श० र० स० पृ० १५ पं० १०) । कुब्जकम् = कुब्जकपुष्पम् । "महसह" इति ख्यातस्य पुष्पप्रधानवृक्षस्य पुष्पम् । 'अशोकात्पुष्पसाहस्रात्सेवतीपुष्पमुत्तमम् । सेवतीपुष्पसाहस्रात्कुब्जकं पुष्पमुत्तमम् ।' इति नारसिंहम्' इति—(त्रि० शे० टी० पृ० २८५ पं० १२, १३) । मधुपर्कम् = दध्याज्यमधुसंयोगः, महोदयम् । 'दध्याज्यमधुसंयोगे मधुपर्कमितीरितम् ।' इति—(श० र० स० पृ० ४० पं० १४) । शीर्षकम् = शिरोऽस्थि, शीर्षण्यम्, शिरस्त्रम्, शिरोरक्षणसन्नाहः । "टोप" इति लोके । जयपराजयपत्रं च । 'अथ शीर्षकम् ॥ शीर्षण्यं च शिरस्त्रे' इति—(अम० ना० लिं० पृ० २८६ श्लोकः ६३, ६४) । शालूकम्=उत्पलादिमूलम्, पद्मकन्दकः, उत्पलकन्दः, सौगन्धकादीनां कन्दः । 'शालूकमेषां कन्दः स्यात्' इति—(अम० ना० लिं० पृ० १०७ श्लोकः ३८) । 'शालूकं पद्मकन्दके ।' इति च—(श० र० स० पृ० २८ पं० १६) । कुलकम् = श्लोकसम्बद्धगुच्छकः, पटोलम्, वस्त्रान्तरम् । 'कुलकं तु पटोले स्यात्संबद्धश्लोकसंहतौ ।' इति—(मे० पृ० ६ श्लोकः ६९) ।

पटोलं = वस्त्रभेदः । प्रकीर्णकम् = चामरम् । 'प्रकीर्णकं चामरे स्याद्विस्ता(स्त)रे, ना तुरङ्गमे ।' इति--(मे० पृ० १६ श्लोकः १९७) । हल्लीसकम् = योषितां मण्डलीनृत्यम् । 'हल्लीसकं तु स्त्रीनृत्ये' इति--(श० र० स० पृ० ४५ पं० ६) । 'हल्लीषमित्यपि ।' 'स्त्रीणां हल्लीषं सहनर्त्तनम् ।' इति--(त्रि० शे० पृ० २७२ श्लोकः २) । 'मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीसकं तु तत् ।' इति--(अभि० सं० अभि० चिं० पृ० १६ श्लोकः २८१) । पुष्पकम् = रीतिपुष्पम्, कुबेरविमानं च । 'पुष्पकं रीतिपुष्पे च विमाने धनदस्य च । नेत्ररोगे तथा रत्नकङ्कणे च रसाञ्जने ॥ लोहकांस्ये मृदङ्गारशकट्यां च नपुंसकम् ।' इति--(मे० पृ० १० श्लोकः १२३) । खम् = इन्द्रियम्, नभश्च । 'खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि ।' इति--(मे० पृ० १९ श्लोकः १) । लिङ्गम् = चिह्नम्, अनुमानं च । 'लिङ्गं चिन्हेऽनुमाने च सांख्योक्तप्रकृतावपि ।' इति--(मे० पृ० २३ श्लोकः २१) । स्थगु = गडुः, पृष्ठगुडः, घाटामस्तकयोर्मध्ये मांसवृद्धिः । भङ्गम् = खण्डम्, भञ्जनम् । 'भङ्गं सस्यं च भञ्जनम् ।' इति--(अने० ध्व० मं० पृ० २० श्लोकः १७४) । पूगम् = गुवाकफलम्, उद्वेगम् । "सुपारी" इति लोके । 'पूगं क्रमुकजे फले ।' इति--(श० र० स० पृ० ६० पं० ८) । चोचम् = उपभुक्तफलावशेषः । 'फलावशिष्टं तालफलं च चोचं कदल्याः फलं भवेत् ।' इत्यार्षकोषः इति--(अ० सु० व्या० पृ० ४५९ स्तं१ पं० २३) ।' 'फलवाचिनस्तु नपुंसकत्वं सिद्धं लोपधत्वात् । बीजम् = उत्पत्तिहेतुः, कारणम्, सस्यं च । 'बीजं कारणसस्ययोः ।' इति--(श० र० स० पृ० ७७ श्लोकः २) । पिञ्जम् = बलम् । 'पिञ्जा तूलहरिद्रयोः । पिञ्जा स्त्रियां मता तूलपिञ्जिकायां बुधोत्तमैः । क्लीबं बले, वधे पुंसि, त्रिलिङ्गं व्याकुले मतम् ।' इति--(मे० पृ० ३० श्लोकः १२) ।

अथेदानीं रिष्टादीन् शुल्बपर्य्यन्तान्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ५ श्लोकः ६६, ६७, ६८, ६९) ।

रिष्टं फाण्टं ललाट–मिष्ट–व्युष्ट–करोट–कूपीट–चीनपिष्टम् ॥१६॥
शृङ्गाट–मोरट–पिटान्य–ऽथ पृष्ठ–गोष्ठे
भाण्डा–ऽण्ड–तुण्ड–शरण[२]–ग्रहणे–रिणानि ।

पाणिनीयेऽपि–(१) (किरीटमुकुटललाटवटवीटशृङ्गाटकरोटलोष्टानि नपुंसके) ॥ किरीटम् = मुकुटम् । अमरस्तु "किरीटं पुन्नपुंसकम्" इत्याह । वीटम् = । शेषशब्दानां व्याख्या तु हैमादितो बोध्या । सि० कौ० पृ० ३९९ सू० ६४ ।

(२) (ऋणलवणपर्णतोरणरणोष्णानि नपुंसके) ॥ तोरणम् = वहिर्द्वारम्, द्वारबाह्यभागः । अमरस्तु–

पिङ्गाण–तीक्ष्ण–लवण–द्रविणं पुराणं
त्राणं शणं हिरण–कारण–कार्म्मणानि ॥१७॥
पर्य्याण–र्ण–घ्राण–पारायणानि
श्रीपर्णो–ष्णे धोरण–क्षुण्ण–भूतम् ।
प्रादेशान्ता–ऽश्मन्त–शीतं निशान्तं
वृन्तं तूस्तं वार्त्त–वाहित्थं–मुक्थम् ॥१८॥
अच्छोद–गोर्द–कुसिदानि कुसीद–तुन्द–
वृन्दा–ऽऽस्पदं द–पद–निम्नं–सशिल्पं–तल्पम् ।
कूर्प–त्रिपिष्टप–प्रतीपवद–ऽन्तरीप–
रूपं च पुष्प–निकुरम्ब–कुटुम्बं–शुल्बम् ॥१९॥

एषां व्याख्या–

रिष्टमिति शृङ्गाटेति । पर्य्याणेति । अच्छोदेति च । एते रिष्टादयः शुल्बान्ताः शब्दाः

"तोरणोऽस्त्री" त्याह। शे० व्या० उपर्युक्तवत् । सि० कौ० पृ० ४०० सू० ६७।

(१) काष्ठपृष्ठसिक्थोक्थानि नपुंसके) ॥ सिक्थम्=मधूच्छिष्टम् । शे० उ० । सि० कौ० पृ० ४०० सू० ७० ।

(२) (जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमियुनस्मशानरत्ननिम्नचिह्नानि नपुंसके)॥ काननं विपिनं च=अरण्ये । शासनम्=शास्तिः, आज्ञा च । चिह्नम्=लाञ्छनम्, पताका च । शे० उ० । सि० कौ० पृ० ४०० सू० ७४ ।

(३) (पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके) ॥ समीपम्=निकटम्। अमरस्तु— "समीपे निकटासन्ने"त्यनेन त्रिलिङ्गत्वमाह । शे० उ० । सि० कौ० पृ० ४०० सू० ७७ ।

(४) (त्रिविष्टपत्रिभुवने नपुंसके) ॥ एते नपुंसके स्तः । तृतीयं वि(पि)ष्टपं त्रिविष्टपम्=स्वर्गः । स्वर्गाभिधानतया पुंस्त्वे प्राप्तेऽयमारम्भः । त्रिभुवनम्=त्रिलोको, स्वर्गमर्त्यपातालात्मकं लोकत्रयम् । सि० कौ० पृ० ३९९ सू० ४४ ।

(५) (द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि) ॥ एतानि नपुंसके स्युः । द्वन्द्वम्=युग्मम्, कलहं च । बर्हम्=मयूरपिच्छम् । दुःखम्=कष्टम् । बडिशम्=मत्स्यधारणाय वक्रलौहकण्टकविशेषः, मत्स्यवेधनम् । पिच्छम्=बर्हम् । बिम्बम्=प्रतिबिम्बम् । कुटुम्बम्=पोष्यवर्गः, बान्धवश्च । कवचम्=वर्म । वरम्=कुङ्कुमम् । शरम्=जलम् । वृन्दम्=समूहः । अरम्=शीघ्रम्, चक्राङ्गं च । कम्=सुखम्, शिरः, जलं च । सि० कौ० पृ० ४०३ सू० १७० ।

क्लीबे स्युः। रिष्टम्=क्षेमम्, कल्याणम्। अशुभम्, अमङ्गलम्, अभावः, नाशश्च। 'रिष्टं क्षेमाशुभाभावेषु' इति—(अम० ना० लिं० पृ० ४०३ श्लोकः ३६)। 'रिष्टं स्यादशुभेनसोः।' इत्यजयः' इति—(अम० सु० व्या० पृ० ४०३ स्तं० १ पं० १६)। 'रिष्टं खड्गे फेनिले च रिष्टं स्यादशुभेऽपि च।' इति च-(श० र० स० पृ० ८६ श्लोकः ७)। फाण्टम्=औषधान्तरम्, कषायविशेषः। 'फाण्टः स्यादौषधान्तरे।' इति-(श०र०स० पृ०८५ पं०१९)। ललाटम्=अलिकम्, गोधिः। 'ललाटमलिकं गोधिः' इति-(अम० ना० लिं० पृ० २३४ श्लोकः ९२)। इष्टम्=संस्कारः, क्रतुकर्म च। 'क्लीबे संस्कारे क्रतुकर्मणि।' इति—(मे० पृ० ३३ श्लोकः २)। व्युष्टम्=कल्यम्, प्रभातम्। 'व्युष्टं कल्ये, त्रिषूषिते।' इति—(मे० पृ० ३५ श्लोकः २८)। करोटम्=भाजनम्। शिरोऽस्थि च। कृपीटम्=उदरम्, जलं च। 'कृपीटमुदरे तोये' इति—(मे० पृ० ३६ श्लोकः ४०)। चीनपिष्टम्=सिन्दूरम्, सीसकं च। शृङ्गाटम्=नलोद्भवं प्रसिद्धमेव, वारिकण्टकम्, जलजलताफलम्। "सिंघाड़ा" इति लोके। चतुष्पथं च। 'शृङ्गाटकं भवेद्वारिकण्टके च चतुष्पथे।' इति—(मे० पृ० १८ श्लोकः २१९)। मोरटम्=इक्षुमूलम्, अङ्कोठप्रसूनम्, सप्तरात्रात्परक्षीरं च। 'मोरटं तु भवेदिक्षुमूलाङ्कोठप्रसूनयोः। सप्तरात्रात्परक्षीरे' इति—(मे० पृ० ३७ श्लोकः ५३)। पिटम्=छदिः, चालः, गृहाच्छादनतृणादि। 'पिटं चालः' इति—(त्रि० शे० पृ० २८० श्लोकः २)। 'छदिः पिधाने' इति च—(श० र० स० पृ० १७३ पं० १)। पृष्ठम्=चरममात्रम्, शररीरावयवान्तरं च। "पीठ" इति लोके। 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे।' इति—(मे० पृ० ३९ श्लोकः ७)। गोष्ठम्=गोस्थानकम्। 'गोष्ठं गोस्थानके' इति—(मे० पृ० ३९ श्लोकः ४)। भाण्डम्=पात्रम्, परिस्कारः, वणिङ्मूलधनम्, भूषा, अश्वभूषणं च। 'भाण्डं पात्रे वणिङ्मूलधने भूषाऽश्वभूषयोः।' इति—(मे० पृ० ४२ श्लोकः २१)। अण्डम्=पक्ष्यादिप्रसवः, पेशी, मुष्कः, अण्डकोषश्च। 'अण्डं मुष्के च पेश्यां स्यात्' इति—(मे० पृ० ४० श्लोकः १)। तुण्डम्=मुखाग्रम्, मुखं च। 'अथ मुखे तुण्डमुदीर्य्यते।' इति—(श० र० स० पृ० ९७ श्लोक ११)। शरणम्=गृहम्, रक्षयिता, त्राता च। 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि।' इति—(मे० पृ० ५० श्लोकः ७९)। ग्रहणम्=पर्वप्रतिपत्सन्धौ राहुणा सूर्यचन्द्रमसोर्ग्रसनम्, आदानम्, हस्तयोर्व्यापारः, स्वीकारश्च। 'ग्रहणं स्वीकारादरकरोपरागोपलब्धिवन्दिषु, (च)।' इति—(मे० पृ० ४८ श्लोकः ४५)। ईरिणम्=ऊषरः, क्षारभूमिः, शून्यं च। 'ईरिणं तूषरे शून्ये त्विरिणं चापि गद्यते।' इति 'ऊषरं क्षारमृद्भुवि।' इति च—(श० र० स० पृ० १०९ पं० ६)। पिङ्गाणम्=वर्णविशेषः। यादवस्तु पुंसीत्याह—'सितकाचस्तु पिङ्गाणः' इति—(वै० पृ० १९७ श्लोकः १३)। तीक्ष्णम्=समुद्रलवणम्, लोहम्, विषम्, युद्धं च। 'तीक्ष्णं क्लीबे विषे युद्धे समुद्रलवणायसोः।' इति—(ना० र० मा० पृ० २५ पं० १३)। लवणम्=सैन्धवादि। 'लवणं सैन्धवादौ'

इति--(मे० पृ० ५० श्लोकः ७५) । द्रविणम् = वित्तम्, धनम्, स्वर्णं च । 'अथ द्रविणं गेहे वित्ते स्वर्णे पराक्रमे ।' इति--(ना० र० मा० पृ० ७६ पं० १५) पुराणम् = ग्रन्थभेदः । 'पुराणं ग्रन्थभेदे च क्लीबे, त्रिषु पुरातने ।' इति--(ना० र० मा० पृ० ७८ पं० ८) । त्राणम् = रक्षणम्, त्रायमाणौषधिश्च । 'त्राणं तु त्रायमाणायां रक्षणे, रक्षिते त्रिषु ।' इति—(मे० पृ० ४६ श्लोकः १४) । शणम् = भङ्गा, मातुलानी, धान्यविशेषश्च । 'शणस्तु माल्यपुष्पः स्याद्वमनः कटुतिक्तकः । निशावनो दीर्घशाखः' इति--(रा० नि० पृ० ३३५ श्लोकः १०) हिरणम् = रेतः, स्वर्णम्, वराटश्च । कारणम् = हेतुः, करणम्, वधश्च । 'कारणं करणे हेतुवधयोश्च नपुंसकम् ।' इति--(मे० पृ० ४८ श्लोकः ४३) । कार्मणम् = मंत्रतंत्रादियोजनम्, कर्मठश्च । 'कार्मणं मंत्रतंत्रादियोजने कर्मठेऽपि च ।' इति—(मे० पृ० ४८ श्लोकः ४१) । पर्य्याणम् = पल्ययनम्, वङ्क्काग्रभागः । ''घोड़े का पलान'' इति लोके । 'पल्ययनं पर्याणमस्य तु । वङ्क्काग्रभागः स्यात्' इति--(त्रि० शे० पृ० ३०० श्लोकः ४७) । ऋणम् = उद्धारः, पर्य्युदञ्चनम् । 'ऋणं पर्य्युदञ्चनम् । उद्धारः' इति—(अम० ना० लिं० पृ० ३०३ श्लोकः ३,४) । 'ऋणं देये निगद्यते ।' इति—(श० र० स० पृ० १०३ पं० १०) । 'ऋणं देये जले दुर्गे' इति च--(अने० सं० पृ० १२ श्लोकः १३५) । घ्राणम् = नासिका । 'घ्राणं क्लीबं नासिकायां, घ्राते स्याद्वाच्यलिङ्गकम् ।' इति--(मे० पृ० ४५ श्लोकः ११) । पारायणम् = समासङ्ग, कात्स्न्र्यम्, पारगतिश्च । 'पारायणं समासङ्गे कात्स्न्र्ये पारगतावपि ।' इति--(मे० पृ० ५२ श्लोकः १०३) । श्रीपर्णम् = पद्मम्, अग्निमन्थश्च । 'क्लीबं पद्माग्निमन्थयोः ।' इति--(मे० पृ० ५१ श्लोकः ८२) । 'गभार्य्यां कट्फलेऽपि श्रीपर्णी, पद्माग्निमन्थयोः । क्लीबे' इति च--(ना० र० मा० पृ० १८ पं० १६) । उष्णम् = अशीतम् । ''गर्मी'' इति लोके । सूर्यातपश्च । ''घाम'' इति लोके । त्रिकाण्डशेषे तु दक्षार्थे क्लीबलिङ्गमाह— 'उष्णं दक्षेऽपि, नाऽऽतपे ।' इति--(त्रि० शे० पृ० ३३१ श्लोक० १२२) । धोरणम् = वाहनम्, यानम् । 'सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोरणम् ।' इति—(अम० ना० लिं० पृ० २८४ श्लोकः ५८) । क्षुण्णम् = अभ्यस्तम्, प्रहतम् । 'व्युत्पन्नः प्रहतः क्षुण्णः' इति—(वै० पृ० २०५ श्लोकः ४९) । इह क्षूणमित्यपि पाठो दृश्यते । भूतम् = क्ष्मादिः, पृथिव्यप्तेजोवाय्वाकाशाः, पिशाचादिः, जन्तुश्च । 'भूतं क्ष्मादौ पिशाचादौ क्लीबं, त्रिषूचिते ।' इति--(मे० पृ० ५७ श्लोकः ४१) । प्रादेशान्तम् = तर्जन्यङ्गुष्ठान्तसम्मितम्, तर्जनीसहितविस्तृताङ्गुष्ठान्तम् । अश्मन्तम् = चुल्ली, अशुभं च । 'अश्मन्तमशुभे चुल्ल्यां मरणेऽनवधावपि । क्षेत्रेऽपि' इति--(मे० पृ० ६० श्लोकः ८३) । शीतम् = हिमगुणः । 'शीतं हिमगुणे क्लीबम्' इति—(मे० पृ० ५८ श्लोकः ६५) । निशान्तम् = गृहम्, उषश्च । 'निशान्तं त्रिषु शान्ते स्यात् क्लीबं तु भवनोषसोः ।' इति--(मे० पृ० ६३ श्लोकः १२०) तथा च प्रयोगः—'ययौ

निशान्तं न वधूर्निशान्तम्' इति । वृन्तम् = फलपत्रादिर्येन धार्यते तत्, प्रसवबन्धनम् । "भीण्ड" "वेंटा" "वोंटा" इति च लोके । घटीधारा, स्तनमुखं च । 'वृन्तं प्रसवबन्धेऽस्त्री (च) घटीधाराकुचाग्रयोः ।' इति—(मे० पृ० ५८ श्लोकः ६०) । तूस्तम् = रेणुः, जटा, पापं च । 'पापं तु पातकम् । शल्यं तूस्तं च कल्कः' इति—(त्रि० शे० पृ० २७१ श्लोकः ११) । वार्तम् = निःसारम्, आरोग्यं च । 'वृत्तिमन्तीहजोर्वार्तं क्लीबे त्वारोग्यफल्गुनोः ।' इति—(ना० र० मा० पृ० २९ पं० १६) । वाहित्थम् = हस्तिकुम्भाधोभागः । कुम्भोऽत्रवातकुम्भः । 'वाहित्थं वातकुम्भाधः' इति भागुरिः' इति—(अम० सु० व्या० पृ० २७८ स्तं० १ पं० ५, ६) । स च ललाटाऽधोभागः । 'अधः कुम्भस्य, वाहित्थम' इति—(अम० ना० लिं० पृ० २७८ श्लोकः ३९) । 'कुम्भयोरन्तरं विदुः । वातकुम्भस्तु तस्याधो वाहित्थं तु ततोऽप्यधः ।' इति हैमनाममाला' इति—(अम० सु० व्या० पृ० २७८ स्तं० १ पं० ६, ७) । उक्थम् = सामविशेषः, सामभक्तिः, प्राणश्च । 'साम्न्युक्थं स्वरपत्तनम् ।" इति—(त्रि० शे० पृ० २७१ श्लोकः २) । स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः । उक्थं तु नवत्रिधातमकसाम्नोऽवयवभेदः स्यात् । अच्छोदम् = हिमालयपर्वतस्थसरोविशेषः । गोर्दम् = मस्तिष्कम्, मस्तिष्कभवस्नेहः । "दिमाग" इति लोके । 'मस्तिष्कं गोर्दम्' इति—(अम० ना० लिं० पृ० २२४ श्लोकः ६५) । कुसिदम्, कुसीदं च = वृद्ध्याजीवनम् । "ब्याज का धन्धा" इति लोके, 'अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका ।' इति—(अम० ना० लिं० पृ० ३०३ श्लोकः ४) । 'कुसीदं जीवने वृद्ध्या क्लीबं, त्रिषु कुसीदके ।' इति—(मे० पृ० १६ श्लोकः २६) । तुन्दम् = उदरम् । 'तुन्दं स्यादुदरे' इति—(श० र० स० पृ० ७३ श्लोकः २) । वृन्दम् = समूहः । 'स्त्रियां तु संहति,र्वृन्दं निकुरम्बं कदम्बकम् ॥' इति—(अम० ना० लिं० पृ० २०१ श्लोकः ४०) । आस्पदम् = पदम्, स्थानम्, कृत्यं च । 'अथास्पदं पदकृत्ययोः ।' इति—(मे० पृ० ७६ श्लोकः २०) । दम् = कलत्रम्, स्त्री, पानम्, वैराग्यं च ।' 'दं दानं शरणं कर्म भव्यं न्यूनमकिल्बिषम् ।' इति—(एका० ना० मा० पृ० ८ श्लोकः ६४) । 'दं क्लीबे पानवैराग्यकलत्रेष्ववलोकने । भेद्यलिङ्गस्त्वयं मूके गृहीते द्रावके शुचौ ।' इति च—(ना० र० मा० पृ० ६ पं० १६) । पदम् = स्थानम्, लक्षणम् पादश्च । 'पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः । श्लोकपादेऽपि च क्लीबम्' इति—(मे० पृ० ७५ श्लोकः ८) । निम्नम् = गभीरम् । "नीचा" इति । "गहरा" इति च लोके । 'निम्नं गभीरं गम्भीरम्' इति—(अम० ना० लिं० पृ० ९८ श्लोकः १५) । शिल्पेनं सहितं सशिल्पम् । शिल्पम् = स्रुवः, क्रियायोग्यं च । शिल्पं स्रुवे क्रियायोग्ये' इति—(मे० पृ० १०२ श्लोकः १२) । तल्पम् = शयनीयम्, कलत्रम्, अट्टश्च । 'तल्पं स्याच्छयनीयेऽपि कलत्रेऽट्टेऽपि न द्वयोः ।' इति—(मे० पृ० १०२ श्लोकः ६) । कूर्पम् = भ्रुवोर्मध्यम् । 'कूर्चं कूर्पं भ्रुवोर्मध्ये' इति—(अभि० सं० अ० चिं० पृ० २५ श्लोकः ५८०) । त्रिपिष्टपम् = स्वर्गः ।

'त्रिविष्टप'मित्यपि । 'क्लीबे त्रिविष्टपम्' इति--(अम० ना० लिं० पृ० ४ श्लोकः ६) । प्रतीपम् = अर्थालङ्कारविशेषः, वामं च । अन्तरीपम् = द्वीपम्, जलमध्यस्थस्थलम् । 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ॥' इति—(अम० ना० लिं० पृ० १६ श्लोकः ८) । पुष्पम् = विकासिकुसुमम् । "फूल" इति लोके । स्त्रीरजश्च : 'पुष्पं विकासिकुसुमस्त्रीरजःसु नपुंसकम्' इति--(मे० पृ० १०२ श्लोकः ८) । निकुरम्बकम् = कदम्बकम्, समूहः । 'निकुरम्ब'मित्यपि । 'समुदायः समुदयो निकुरम्बं कदम्बकम् ॥' इति--(वै० पृ० १८६ श्लोकः २) । कुटुम्बम् = पोष्यवर्गः, बान्धवः, सन्ततिश्च । 'कुटुम्बन्तु सुतादिकम् ।' इति--(वै० पृ० १७७ श्लोकः ५१) । शुल्बम् = ताम्रम्, यज्ञकर्म, आचारः, जलसन्निधिश्च । शुल्बं ताम्रे यज्ञकर्मण्याचा(धा)रे जलसन्निधौ ।' इति--(मे० पृ० १५९ श्लोकः २७) ।

अथेदानीं भान्तादीन् क्षान्तान्तैरिकारान्तैरुकारान्तैर्व्यञ्जनान्तैश्च सहितान्नपुंसकलिङ्गवाचकान् शब्दानाह हेमः (अभि० सं० लिं० पृ० ५, ६, श्लोकः ७०, ७१, ७२, ७३, ७४) ।

प्रसभ[1]-कुसुम[2]-शुष्मा-ऽध्यात्म-धामे-र्म-सूक्ष्मं
किलिम-तलिम-तोक्मं युग्म-तिग्मं त्रिसन्ध्यम्[3] ।
किसलय-शयनीये साय-खेये-न्द्रियाणि
द्रुवय-भय[4]-कलत्र[5]-द्वापर-क्षेत्र-सन्त्रम् ॥२०॥

पाणिनीयेऽपि—(१) (तलभं नपुंसकम्) ॥ एतन्नपुंसके स्यात् । तलभम्= । सि० कौ० पृ० ४०० सू० ८० ।

(२) (रुक्मसिध्मयुध्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके) ॥ एतानि क्लीबे स्युः । रुक्मम्=सुवर्णम् । युध्मम्=युद्धम् । गुल्मम् = अप्रकाण्डम् । शे० उ० । सि० कौ० पृ० ४०० सू० ८३ ।

(३) (किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके) ॥ एतानि क्लीबे स्युः । व्याख्या तु हैमादितो बोध्या । सि० कौ० पृ० ४०० सू० ८६ ।

(४) (भयलिङ्गभगपदानि नपुंसके) ॥ एतानि नपुंसके स्युः । भयम् =दरम् । लिङ्गम् = चिह्नम् । पदम्= स्थानम् । सि० कौ० पृ० ३९८ सू० ३८

(५) (द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दरपञ्जराऽजरजठराऽजिरवैरचामरपुष्करगह्वरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतंत्रयंत्रक्षत्रक्षेत्रमित्रकलत्रचित्रच्छत्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रनक्षत्राणि नपुंसके) ॥एतानि नपुंसके स्युः । वक्त्रम्=सरिद्बङ्कः पुटभेदः । वप्रम्=सीसकम् । नारम्=जलम् । रन्ध्रम्—छिद्रम् । भीरम्= गभीरम्=निम्नम् । विचित्रम्=कर्बुरवर्णः । केदारम्=क्षेत्रविशेषः । अजस्रम्=निरन्तरम्, सन्ततम् । शरीरम्=

शृङ्गवेर–मजिरा–ऽभ्रं[1]–पुष्करं तीर–मुत्तर–मगार–नागरे ।
स्फार–मक्षर–कुकुन्दरा–ऽवर–प्रान्तराणि शिबिरं कलेवरम् ॥२१॥
सिन्दूर–मण्डूर–कटीर–चामर–कूराणि दूर्या–ऽरर–वैर–चत्वरम् ।
उशीर–पाताल–मुलूखलाऽऽर्त्तवे सत्त्वं च सान्त्वं दिवि–किण्व–पौतवम्॥
विश्वं वृशं वलिश–र्मपिश–किल्बिषे[2] च
कर्षा–ऽऽमिषं मिष–मृचीष–मृजीष–शीर्षे ।
पीयूष–साध्वसं[3]–महानस–साहसानि
कासीस–मांस–तरसं यवसं बिसं च ॥२३॥
मन्दाक्ष–मक्षं[4]–मथ सक्थि[5] सशालु–यातु

देहः । कन्दरम् = गुहा । मन्दरम् = वर्णवृत्तान्तरम् । अजरम् = । जठरम् = कुक्षिः । मेदिनीकारस्तु "जठरं न स्त्रियां कुक्षौ" इति । कुलीरम् = । काश्मीरम् = कुङ्कुमम्, पुष्करमूलं च । नीरम् = जलम् । अम्बरम् = आकाशः । तंत्रम् = शास्त्रविशेषः । यंत्रम् = देवाद्यधिष्ठानम्, पात्रभेदः, नियंत्रणं च । क्षत्रम् = तगरम्, शरीरं च । चित्रम् = तिलकम्, आलेख्यं च । छत्रम् = आतपत्रम् । मूत्रम् = प्रस्रावः । सूत्रम् = तन्तुः । वक्त्रम् = मुखम् । नेत्रम् = लोचनम् । गोत्रम् = कुलम् । अङ्गुलित्रम् = अङ्गुलिकवचम् । भलत्रम् = शस्त्रम् = आयुधम् । शास्त्रम् = आगमम्, वेदः, शास्त्रमात्रं च । वस्त्रम् = वसनम् । पत्रम् = पर्णम्, दलम् । पात्रम् = भाजनम् । नक्षत्रम् = तारा । सि० कौ० पृ० ४०० सू० ८९ ।

(शुक्रमदेवतायाम्) ॥ देवतार्थवर्जिते शुक्रं क्लीबं स्यात् । शुक्रम् = रेतः, वीर्य्यम् । अदेवतायां किम् । शुक्रः = भार्गवः । सि० कौ० पृ० ४०० सू० ९० ।

पाणिनीयेऽपि—(१) (अभ्रं नपुंसकम्) ॥ एतन्नपुंसके स्यात् । अभ्रम् = मेघः ।

(२) (शिरीषर्जीषाम्बरीषपीयूषपुरीषकिल्बिषकल्मषाणि नपुंसके) ॥ एतानि नपुंसके स्युः । शिरीषम् = शिरीषपुष्पम् । ऋजीषम् = पिष्टभर्जनपात्रम्, पिष्टपचनम् । कल्मषम् = पापम् । शे० उ० । सि० कौ० पृ० ३९९ सू० ५० ।

(३) (पनसबिसबुससाहसानि नपुंसके) ॥ एतानि नपुंसके स्युः । बुसम् = तुच्छधान्यम्, कडङ्गरम् । शे० उ० । सि० कौ० पृ० ४०१ सू० ९६ ।

(४) (अक्षमिन्द्रिये) ॥ एतदिन्द्रियार्थे नपुंसके स्यात् । अक्षम् = इन्द्रियम् । इन्द्रिये किम् । रथाङ्गादौ माभूत् । सि० कौ० पृ० ४०३ सू० १७१ ।

(५) (श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यास्याऽऽस्पदाऽऽकाशकिण्वबीजानि) ॥ एतानि क्लीबे स्युः । श्राद्धम् = पितृक्रिया । कुलिशम् = वज्रम् । दैवम् = भाग्यम् । पीठम् = आसनम् । कुण्डम् = भाण्डविशेषः । अङ्कम् = चिह्नम् । अङ्गम् = अवयवः । दधि = क्षीरविकारविशेषः । सक्थि = ऊरुः, जानूर्ध्वभागः । अक्षि = नेत्रम् । आस्यम् =

स्वाद्वा-ऽऽशु तुम्बुरु कशेरु शलालु चाऽऽलु ।
संयत्-कुमुन्-महद-ऽह्नानि पृषत्-पुरीतत्-
पर्वाणि रोम च मरुच्च जगल्ललाम ।।'इति।।२४।।

एषां व्याख्या—

प्रसभेति । शृङ्गवेरेति । मिन्दूरेति । विश्वमिति । मन्दाक्षेति च । एते प्रसभादयो ललामान्ताः शब्दाः क्लीबे स्युः । प्रसभम् = बलात्कारः, हठः । 'प्रसभं तु बलात्कारो हठः' इति—(अम० ना० लिं० पृ० २९९ श्लोकः १०८) । 'प्रसभोऽस्त्री बलात्कारो हठश्च' इति—(वै० पृ० १२१ श्लोकः २०९) । 'क्लीबे तु प्रसभं हठः ।' इति च बोपालितः' इति—(अम० सु० व्या० पृ० २९९ स्तं० ५ पं० २५) । कुसुमम् = पुष्पम्, फलम्, स्त्रीरजः, नेत्ररोगश्च । 'कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः ।।' इति—(मे० पृ० १११ श्लोकः ४१) । शुष्मम् = तेजः । 'शुष्मं तेजसि, सूर्ये ना' इति—(मे० पृ० ११० श्लोकः ३४) । अध्यात्मम् = सूक्ष्मम्, सूक्ष्मशरीरम् । धाम = देहम्, गृहम्, रश्मिश्च । 'धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः ।' इति—(मे० पृ० ८८ श्लोकः ८०) । ईर्म्मम् = व्रणः । 'ईर्म्ममीर्म्भो व्रणे मतौ ।' इति—(श० र० स० पृ० २२२ पं० ६) सूक्ष्मम् = अध्यात्मम्, सूक्ष्मशरीरम्, कैतवम्, शाठ्यं च । 'सूक्ष्मं स्यात्कैतवेऽध्यात्मे' इति—(मे० पृ० ११० श्लोकः ३६) । किलिमम् = देवदारु । 'देवदारु स्मृतं दारु सुराह्वं किलिमं च तत् ।' इति धन्वन्तरिः' इति—(रा० नि० पृ० २१ श्लोकः ७६) । 'भद्रदारु द्रुकिलिमं पीतदारु च दारु च ।।' इति—(अम० ना० लिं० पृ० १४६ श्लोकः ५३) । द्रुकिलिमम् किलिमम् भीमसेनो भीम इतिवत् । तलिमम् = कुट्टिमम्, तल्पम्, वितानं च । 'तलिमं कुट्टिमे तल्पे चन्द्रहासे वितानके ।' इति—(मे० पृ० १११ श्लोकः ४४) । तोक्मम् = कर्णमलम् । 'तोक्मम् कर्णमले, पुंसि हरिते च हरिद्यवे ।' इति-(मे० पृ० १०९ श्लोकः १४) । युग्मम् = युगलम् । 'युग्म् तु युगलं युगम् ।'

मुखम् । आस्पदम् = प्रतिष्ठा । आकाशम् = वियत् । किण्वम् = सुराबीजम् । बीजम् = उत्पत्तिकारणम् । सि० कौ० पृ० ४०३ सू० १६७ ।

(१) (दिनाहनी नपुंसके) ।। एते नपुंसके स्तः । दिनम्, अहश्च = दिवसौ । सि० कौ० पृ० ४०१ सू० १०१ ।

(२) (वियज्जगत्सकृच्छकत्पृषच्छकृद्यकृदुदश्वित्तः) ।। एते क्लीबाः स्युः । वियत् = आकाशम् । जगत् = त्रैलोक्यम् । सकृत् = स्तोकं,अल्पञ्च । शकत् = पृषत् = बिन्दुः । शकृत् = गूथम् । यकृत् = कालखण्डम् । उदश्वित् = तक्रम् । सि० कौ० पृ० ४०३ सू० १६५ ।

इति—(अम० ना० लिं० पृ० २०१ श्लोकः ३८) । 'युग्मं यमलयामले ।' इति रभसः' इति–(अम० सु० व्या० पृ० २०१ स्तं १ पं० ३६, ३७) । तिग्मम्=तीक्ष्णम्, अत्युष्णम् । 'तिग्मं तीक्ष्णं खरं तद्वत्' इति—(अम० ना० लिं० पृ० ४३ श्लोकः ३५) । त्रिसन्ध्यम्=दिनाद्यन्तमध्याः, त्रिकालः । तिसृणां सन्ध्यानां समाहारः, आबन्तो वेति पाक्षिकी क्लीबता, पक्षे त्रिसंध्यी । 'प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यम्' इति––(अम० ना० लिं० पृ० ४४ श्लोकः ३) । किसलयम्=पल्लवः, नवपत्रम् । 'पल्लवोऽस्त्री किसलयम्' इति––(अम० ना० लिं० पृ० १३२ श्लोकः १४) । शयनीयम्=शय्या, शयनम्, तूलिकादिः । 'शय्यायां शयनीयवत् ।। शयनम्' इति––(अम० ना० लिं० पृ० २४९ श्लोकः १३७, १३८) । सायम्=सन्ध्या, दिनान्तः । 'सायंसन्ध्या दिनान्तश्च निशादिर्दिवसात्ययः । सायं पितृप्रसूश्चाथ प्रदोषः स्यान्निशामुखम् ।' इति––(रा० नि० पृ० ४१६ श्लोकः० ३०) । 'दिनान्ते तु सायं सन्ध्या पितृप्रसूः ।' इति । तत्र सायमित्यव्ययं नपुंसकलिङ्ग वा । 'सायः काण्डे दिनान्ते चे'ति मेदिन्यादिषु साय इत्युक्तत्वात्सायमिति मान्ताव्ययस्याव्ययवर्गे वक्ष्यमाणत्वादत्र सायोऽदन्तः पुंस्येव' इति—(अम० अम० वि० टी० पृ० २३ श्लोकः ३ पं० १७ तः) । 'सायं सायो भवेत्' इति पुरुषोत्तमदेवः' इति च (शब्दभेदप्रकाशः पृ० ४ श्लोकः १६) । खेयम्=परिखा, दुर्गादिपरितम् । 'खेयं तु परिखा' इति—(वै० पृ० १६० श्लोकः १३) । इन्द्रियम्=हृषीकम्, चेतश्च । 'इन्द्रियं तु हृषीके चेतसि स्मृतम् ।' इति—(मे० पृ० ११८ श्लोकः ७५) । द्रुवयम्=मानविशेषः, पाय्यम्, यौ (पौ) तवम्, मानार्थे परिमाणम् । 'यौ(पौ)तवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।' इति—(अम० ना० लिं० पृ० ३३० श्लोकः ८५) । भयम्=दरम्, साध्वसम्, प्रतिभयम्, घोरम्, कुब्जकपुष्पञ्च । 'भयं प्रतिभये घोरे प्रसूने कुब्जकस्य च।' इति––(मे० पृ० ११५ श्लोकः ४१) । कलत्रम्=स्त्री, श्रोणिश्च । 'कलत्रं क्षोणिभार्य्ययोः ।' इति––(मे० पृ० १३२ श्लोकः १३०) । द्वापरम्=युगविशेषः, त्रेतायुगान्तरयुगम्, संशयः, संदेहश्च । 'कृतं त्रेता द्वापरं च कलिश्चेति यथाक्रमम् ।' इति । 'द्वापरे यज्ञयाग्नेयौ' इति । 'द्वापरौ युगसंशयौ ।' इति च (वै० पृ० २४१ श्लोकः ३०) । 'द्वापरं संशये युगे ।' इति च—(मे० पृ० १३४ श्लोकः १६८) । क्षेत्रम्=केदारः । "खेत" "क्यार" इति च लोके । सिद्धस्थानम्, शरीरम्, कलत्रञ्च । 'क्षेत्रं देहे भगे पत्न्यां केदारे भारतादिषु ।' इति–(अने० ति० पृ० ३८ श्लोकः ३६१) । शृङ्गवेरम्=आर्द्रकम्, शुण्ठी, पुरविशेषः, तीर्थविशेषश्च । राममित्रस्य निषादाधिपतेर्गुहस्य पुरम्, अत्र रामो गङ्गामुत्तीर्णः । तथा च प्रयोग—'शृङ्गवेरपुराधीशाद्रामो वै लब्धजीवकः ।' इति–नागोजीभट्टः'इति–(शे०पृ० १ श्लोकः १) । अजिरम्=प्राकाराद् बहिः क्रीडास्थानम्, प्राङ्गणम्, वातश्च । 'अजिरं प्राङ्गणे वाते विषये दर्दुरे तनौ ।' इति–(मे० पृ० १३० श्लोकः १०९) ।

अभ्रम् = मेघः, गगनम्, धातुभेदश्च । 'अभ्रं मेघे च गगने धातुभेदे च काञ्चने ।' इति--(मे० पृ० १२३ श्लोकः ६) । पुष्करम् = भेषजम्, तीर्थं च । 'पुष्करं भेषजे तीर्थे पद्मदन्तिकराग्रयोः। द्वीपे तूर्यमुखे वारिव्योमखड्गफलादिषु ।' इति—(अने० ति० पृ० ५४ श्लोकः १६७) । तीरम् = रोधः, कूलम्, तटं च । 'तीरं तु रोधसि ।' इति— (मे० पृ० १२६ श्लोकः ४६)। 'तीरा वङ्गे, तीरं पुनस्तटे ।' इति च—(अने० सं० पृ० ३६ श्लोकः ४४१)। तथा च प्रयोगः—'समुद्र-तीरञ्जितसर्वलोका सेनापगां व्याप्तवती बलेन ।' इति द्विसन्धानश्लेषः' इति--(अम० सु० व्या० टि० पृ० ९५ स्तं० २ पं० ४०, ४१) । उत्तरम् = प्रतिवाक्यम् । 'नपुंसकं प्रतिवाक्ये' इति--(मे० पृ० १३१ श्लोकः ११८) । आगारम् = गृहम् । 'भवनागारमन्दिरम् ।' इति—(अम० ना० लिं० पृ० ११७ श्लोकः ५) । 'विद्यादगारमागारम्' इति— (श० भे० प्र० पृ० १ श्लोकः २)। नागरम् = मुस्तकम्, शुण्ठी च । 'नागरं मुस्तके शुठ्यां विदग्धे नगरोद्भवे ।' इति--(मे० पृ० १३५ श्लोकः १०२) । स्फारम् = विपुलम्, बहु, बृहत्, बहुलम् । 'स्फारं भद्रं बृहद् व्यूढमुद्रूढं बहुलं बहु ।' इति—(वै० पृ० २०७ श्लोकः ८०) । अक्षरम् = वर्णः, गगनम्, तपश्च । 'अक्षरं गगने वर्णे तपस्यध्वरधर्मयोः । निर्वाणेऽपि परंब्रह्ममूलकारणयोरपि ।' इति—(अने० ति० पृ० ३९ श्लोकः ७) । कुकुन्दुरम् = कूपकम्, कटिकूपः, नितम्बस्थकूपकद्वयम्, स्त्रियाः पृष्ठवंशादधो-गर्त्तम् । 'कुकुन्दर'मित्यपि । 'कूपकौ तु निम्बस्थौ, द्वयहीने कुकुन्दरे ।' इति--(अम० ना० लिं० पृ० २२८ श्लोकः ७५) । अवरम् = गजपश्चार्द्धम्, गजान्त्यजंघादिदेशः । 'न ना गात्रावरे' इति—(त्रि० शे० पृ० २९९ श्लोकः ३९) । 'अपर' मित्यपि । प्रान्तरम् = दूरशून्यवर्त्म, विपिनम्, कोटरं च । 'प्रान्तरं विपिने दूरशून्यवर्त्मनि कोटरे ।' इति--(मे० पृ० १३६ श्लोकः १८४) । शिबिरम् = सैन्यवसतिः । 'शिबिरं सैन्यवसतौ' इति--(श० र० स० पृ० २८२ पं० ६) । कलेवरम् = शरीरम् । 'अथ कलेवरम् । गात्रं वपुः संहनम्' इति--(अम० ना० लिं० पृ० २२६ श्लोकः ७०) । सिन्दूरम् = रक्तवर्णचूर्णविशेषः, नागसम्भवम्, सीमन्तकम् । 'सिन्दूरं रक्तचू-(व)र्णके ।' इति--(मे० पृ० १३९ श्लोकः २३६) । मण्डूरम् = लौहमलम्, सिंहाणम्, शिंघा-णम् । भावमिश्रस्तु पुंसीत्याह--'ध्मायमानस्य लोहस्य मलं मण्डूर उच्यते। यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ।' इति-(भा० प्र० पृ० श्लोकः)। कटीरम् = कटिः, कन्दरं च। 'कटीरं कन्दरे कट्याम्' इति-(वै० पृ० २५० श्लोकः ६) । चामरम् = चमरीपुच्छनिर्मितं वालव्यजनम्, प्रकीर्णकम् । 'चंवर" "चौंरी" इति च लोके । दण्डं च । 'चामरं चामरापि च । दण्डे च वालव्यजने' इति—(मे० पृ० १३३ श्लोकः १५४) । क्रूरम्--नक्षत्रविशेषः । 'पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा ।' इति रामः' इति--(मु० पृ० श्लोकः) । अस्थि च । 'अथास्थि कीकसं विड्ड कललं क्रूरमाढिकम् ।' इति--(वै० पृ० १८२ श्लोकः १०८) ।

दूर्यम् = विष्ठा, शठी च । अररम् = कपाटम्, छदश्च । 'अररं छदकपाटयोः । (मे० पृ० १३० श्लोकः ११०) । वैरम् = विरोधः । ''वैरं विरोधे' इति--(श० र० स० पृ० २६० पं० १४) । चत्वरम् = अङ्गणम्, स्थण्डिलम्, यागार्थसंस्कृतभूमिः, नानाजनावस्थानदेशश्च । "चबूतरा" इति लोके । 'चत्वरं स्थण्डिलेऽङ्गणे ।' इति--(मे० पृ० १३३ श्लोकः १५२) । उशीरम् = वीरणमूलम्, अभयम्, नलदम् । 'मूलेऽस्योशीरमस्त्रियाम् । अभयं नलदम्' इति--(अम० ना० लिं० पृ० १८४ श्लोकः १६४) पातालम् = नागलोकः, विवरम्, वडवानलश्च । 'पातालं नागलोके स्याद्विवरे वडवानले ।' इति--(मे० पृ० १५३ श्लोकः ११०) । उलूखलम्, = उदूखलम्, कक्षावंक्षणयोः सन्धिश्च । 'अयोनिर्मुसलोऽस्त्री, स्यादुदूखलमुदूखलम् ।' इति--(वै० पृ० १६४ श्लोकः ६५) । 'उलूखलं तु सन्धिः स्यात्कक्षाया वंक्षणस्य च ।' इति च-(वै० पृ० १७८ श्लोकः ७०) । आर्त्तवम् = स्त्रीरजः । 'आर्त्तवं स्त्रीरजस्युक्तम्' इति--(श० र० स० पृ० ३१९ पं० ४) । सत्त्वम् = गुणः, पिशाचादिः, बलं च । 'सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः ।' इति--(मे० पृ० १५९ श्लोकः २८) । सान्त्वम् = दाक्षिण्यम्, साम च । 'सान्त्वं-दाक्षिण्यसामनोः ।' इति--(मे० पृ० १५९ श्लोकः २९) । दिवम् = गगनम्, स्वर्गश्च । 'दिवं क्लीबं तयोः (स्वःखयोः) स्मृतम् ।' इति-(मे० पृ० १५८ श्लोकः ११) । किण्वम् = मद्यबीजम्, पापं च । 'किण्वं बीजे च शीधुनः । पापे' इति--(मे० पृ० १५७ श्लोकः ५) । पौतवम् = मानविशेषः, द्रुवयम्, पाय्यं च । 'पाय्यं हस्तादिभिर्मानं द्रुवयं कडुबादिभिः । पौतवं तुलया तस्य सूत्रं स्याद्रागसूत्रकम् ।' इति-- (वै० पृ० १६१ श्लोकः ६४) । 'यौतव' मित्यपि । 'यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् । मानं तुलाङ्गुलिप्रस्थैः' इति । क्रमेणेति च शेषः । विश्वम् = जगत् । 'जगति स्यान्नपुंसकम् ।' इति--(मे० पृ० १५९ श्लोकः २३) । वृशम् = आर्द्रकम् । "अदरक" इति लोके । मूलं च । वलिशम् = मत्स्यधारणाय वक्रलौहकण्टकविशेषः, मत्स्यवेधनम् । ''बंसी'' इति लोके । अर्पिशम् = हृन्मांसम् । 'अर्पिसः' इत्यपि दृश्यते । किल्बिषम् = पापम्, रोगश्च । 'किल्बिषं पापरोगयोः ।' इति--(मे० पृ० १६८ श्लोकः ३४) । कर्षम् = अक्षः, षोडशमाषा, अशीतिरक्तिकाः, तोलकद्वयम्, सुवर्णम्, बिडालपदकम् । आमिषम् = मांसम्, उपादानम्, उत्कोचश्च । 'उपादानेऽप्यामिषं स्यात्' इति--(अम० ना० लिं० पृ० ४३६ श्लोकः २२३) । 'आमिषं पुन्नपुंसकम् । भोग्यवस्तुनि सम्भोगेऽप्युत्कोचे पललेऽपि च ।' इति च--(मे० पृ० १६७ श्लोकः ३१) । मिषम् = व्याजः । "बहाना" "बनावटी" दिखावट" इति च लोके । 'मिषं व्याजे, स्पर्द्धने ना' इति--(मे० पृ० १६७ श्लोकः २१) । ऋचीषम् = पिष्टपचनपात्रम् । "कड़ाही" "तवा" "तसला" इति च लोके । 'ऋचीषं पिष्टपचनम्' इति--(अम० ना० लिं० पृ० ३१३ श्लोकः ३२) ऋजीषम् = कटाहिकातम्बिकादिः, पिष्ट-

भर्जनपात्रम्, पिष्टपचनम्, धनम्, नरकविशेषश्च । शीर्षम् = मस्तकम् । "सिर" इति लोके । 'उत्तमाङ्गं शिरः शीर्षम्' इति—(अम० ना० लिं० पृ० २३६ श्लोकः ६५) पीयूषम् = अमृतम्, सप्तदिवसावधिक्षीरं च । 'पीयूषं सप्तदिवसावधिक्षीरे तथाऽमृते ।' इति—(मे० पृ० १६८ श्लोकः ४१) । साध्वसम् = भयम् । 'आशङ्का साध्वसं दरः । भिया च' इति—(अभि० सं० अ० चि० पृ० १६ श्लोकः ३१६) । 'अथ भयं भिया । त्रासोत्त्रासौ दरो भीतमातङ्को भीश्च साध्वसम् ।' इति शब्दार्णवः' इति—(अम० सु० व्या० पृ० ७९ स्तं० १ पं० २१, २२) । महानसम् = चुल्ली, पाकागारं च । 'चुल्ल्यां महानसं प्राहुः पाकागारे च तद्विदः ।' इति—(श० र० स० पृ० ३३९ पं० १०) । साहसम् = बलात्कारकृतकार्यम्, दमश्च । 'साहसं तु बलात्कारकृतकार्ये दमेऽपि च ।' इति—(श० र० स० पृ० ३३८ पं० १०) । कासीसम् = उपधातुविशेषः । "हीराकस" इति लोके । 'कासीसं धातुकासीसं केसरं तप्तलोमशम् ।' इति—(रा० नि० पृ० ११९ श्लोकः १७९) । मांसम् = आमिषम्, पललम् । "गोश्त" इति लोके । 'मांसं स्यादामिषे क्लीबं, कक्कोलीजटयोः स्त्रियाम् ।' इति—(मे० पृ० १७० श्लोकः ८) । तरसम् = मांसम् । 'पिशितं तरसं मांसम्' इति—(अम० ना० लिं० पृ० २२३ श्लोकः ६३) । यवसम् = घासः, गवाद्यदनीयतृणविशेषः । 'घासो यवसम्' इति—(अम० ना० लिं० पृ० १८५ श्लोकः १६७) । बिसम् = पद्ममूलम् अब्जादीनां मूलम् । "कमल नाल" "मुहार" "भसींड़ा" इति च लोके । 'अथास्त्रियाम् । मृणालं बिसम्' इति—(अम० ना० लिं० पृ० १०८ श्लोकः ४२) । 'विश'मित्यपि । 'मृणाले तु बिसं बिशम् ।' इति द्विरूपकोशः' इति—(अम० सु० व्या० पृ० ४२ स्तं २ पं० ५, ६) । बिसं दन्त्यान्तम् । तथा च—'हंसपंक्तिरिव बिसंवादिनी' इति वासवदत्ता—इति मुकुटः ॥ 'मुनय इव बिसाधारा जलपक्षिणः' इति दमयन्ती' इति—(अम० सु० व्या० टि० पृ० १०८ स्तं० २ पं० ३५, ३६) । मन्दाक्षम् = लज्जा । "लाज" इति लोके । 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा' इति—(अम० ना० लिं० पृ० ७९ श्लोकः २३) । अक्षम् = सौवर्चलम्, इन्द्रियम्, तुत्थं च । 'अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके ॥ रुद्राक्षे रावणौ सर्पे विभीतकतरावपि । चक्रे कर्षे पुमान्, क्लीबं तुत्थे सौवर्चलेन्द्रिये ॥' इति—मे० पृ० १६५ श्लोकः २, ३) । अथानन्तरम् । सक्थि = शरीरावयवविशेषः । ऊरुः, जानू-परिभागः । 'सक्थि क्लीबे, पुमानूरुः' इति—(अम० ना० लिं० पृ० २२७ श्लोकः ७३) । सशालु शालुना सहितम् । शालु = शालूकम्, सौगन्धिकादीनां कन्दः, पङ्कशूरणः । 'शालूकमेषां कन्दः स्यात्' इति—(अम० ना० लिं० पृ० १०७ श्लोकः ३८) । एषां सौगन्धिकादीनां कन्दो मूलं शालूकम् । पुरुषोत्तमस्तु पुंस्त्वमाह—'शालूकः पङ्कशूरणः ॥' इति—(त्रि० शे० पृ० २७७ श्लोकः २७) यातु = राक्षसः । 'नैर्ऋतः कर्वरः क्रव्यात् कर्वुरो यातुरक्षसी ।' इति शब्दार्णवः' इति—(अम० सु० व्या० पृ० २५ स्तं २ पं० २, ३) । स्वादु = मिष्टम्, मनोज्ञं

च । 'स्वादुर्मिष्टमनोज्ञयोः ।' इति--(मे० पृ० ७५ श्लोकः १६) । आशु=शीघ्रम्, द्रुतम् । "जल्दी" इति लोके । आशुः पुंस्यपि-'आशुः स्याद् व्रीहिशीघ्रयोः ।' इति--(प० र० मा० पृ० ६५ पं० ८) तुम्बुरु=धान्याकम्, कुस्तुम्बुरु । 'तुम्बरु' इत्यपि पाठः । तिन्दुकीफलं च । 'धन्याकं धान्यकं धान्यं कुस्तुम्बुरु धनीयकम् ।' इति--(प० र० मा० पृ० ६ पं० १५) 'शूलघ्नं तुम्बुरु स्मृतम् ।' इति च--(प० र० मा० पृ० ३३ पं० ४) । कशेरु=पृष्ठास्थि, तृणविशेषश्च । 'शुक्लकारं तु क्रूसरं वृष्यकन्दं कशेरु च ।' इति-(वै० पृ० १५७ श्लोकः ४७)।'पृष्ठस्यास्थि कशेर्वना ।' इति-(वै० पृ० १८२ श्लोकः ११५)। 'कशेरु कन्दभिद्यपि ।' इति च-(श०र० स० पृ० २६७ पृ० ३)।शलालु=सुगन्धिद्रव्यविशेषः। आलु='कचालू' इत्यादिप्रसिद्धा मूलविशेषाः। भेलकं च। "डौंगा" इति लोके। 'आलुर्गन्तिकायां स्त्री, क्लीबं मूले च भेलके ।। इति-(मे०पृ० १४५ श्लोकः ३)। संयत्=युद्धम्, आयोधनम्, समितिः। 'लड़ाई' इति लोके। कुमुत्=कैरवम्। 'कैरवे तु नपुंसकम् ।' इति-(मे० पृ० ७६ श्लोकः २५)। महत्=प्राज्यम्। 'महती वल्लभीभेदे, प्राज्ये स्यात्तु नपुंसकम् ।' इति--(मे० पृ० ६४ श्लोकः १४१) । अहः=दिनम् । 'घस्रो, दिनाहनी, वा तु क्लीबे दिवसवासरौ ।' इति--(अम० ना० लिं० पृ० ४४ श्लोकः २) । पृषत्=बिन्दुः। 'पृषन्मृगे पुमान्, बिन्दौ न द्वयोः ।' इति--(मे० पृ० ६४ श्लोकः १३६) । पुरीतत्=अंत्रम् ।। "आंत" इति लोके । हृदयपरिवेष्टननाडी च । 'अंत्रं पुरीतत्' इति-- (अम० ना० लिं० पृ० २२४ श्लोकः ६६) । 'पुरीतदस्त्रियाम्' इति वाचस्पतिः' इति-- (अम० सु० व्या० पृ० २२४ स्तं० २ पं० १८, १९) । पर्व=दर्शप्रतिपदोः सन्धिः, विषुवत्प्रभृतयश्च । पर्व क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि ।' इति-(मे० पृ० ८९ श्लोकः ८८) । रोम=तनुरुहम्, लोम । 'रोम क्लीबं तनुरुहे' इति—(श० र० स० पृ० २२५ पं० १६) । मरुत् =ग्रन्थिपर्णम्, वर्हिपुष्पम्, कुक्कुरम् । "कुकुरोंदा" इति लोके । 'मरुद्देवे समीरे ना ग्रन्थिपर्णे नपुंसकम् ।' इति--(मे० पृ० ६४ श्लोकः १४३) । जगत्=त्रैलोक्यम्, विष्टपम् पिष्टपम्, भुवनम् । 'जगत्स्याद्विष्टपे क्लीबम्' इति--(मे० पृ० ६२ श्लोकः१०९) । ललाम=लाञ्छनम्, भूषा च । ललाम नान्तः । अदन्तोऽपि । 'प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु । भूषावाजिप्रभावेषु ललामं स्याल्ललाम च ।' इति रुद्रः' इति-- (अम० सु० व्या० पृ० ४२१ स्तं० २ पं० ३१, ३२) । 'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ।।' इति—(अम० ना० लिं० पृ० ४२१ श्लोकः १४३) ।

अमरसिंहस्तु क्रमरहितान् कांश्चिन्नपुंसकलिङ्गवाचकशब्दानाह--(अम० ना० लिं० पृ० ४५९ श्लोकः ३०-१-२) ।

... ... उक्थ–तोटके ।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्म योजनम् ॥
राजसूयं वाजपेयं गद्य–पद्ये कृतौ कवेः ।
माणिक्य–भाष्य–सिन्दूर–चीर–चीवर–पिञ्जरम् ॥
लोकायतं हरितालं विदलं स्थाल–बाह्लिकम् ।'इति ।

एषां व्याख्या—

उक्थेति । राजसूयमिति । लोकायतमिति च । एते उक्थादयो बाह्लिकान्ताः शब्दाः क्लीबे स्युः । पिच्छम् = बर्हम्, पुच्छं च । 'पिच्छं पुच्छे तु गदितम्' इति—(श० र० स० पृ० ७४ पं० १५) । गृहस्थूणम् = गेहस्तम्भः, गृहस्य स्थूणा । तिरीटम् = वेष्टनम्, शिरोभूषणमिति केचित् । मर्म = सन्धिस्थानम् । योजनम् = क्रोशचतुष्टयम् । 'चतुष्क्रोश्यां तु योजनम् । परमात्मनि योगे च' इति—(श० र० स० पृ० १९७ पं० १७) । राजसूयम् = यागविशेषः । राज्ञा लतात्मकः सोमः सूयतेऽत्र राजसूयम् । वाजपेयम् = यज्ञभेदः । 'वाजमन्नं पैष्टी सुरा पेयमत्र वाजपेयम् । कवेः कृतौ वर्त्तमानं गद्यम् = पदसमूहः, अनिबद्धवचनम् । 'गद्यमनिबद्धे वचस्यपि ।' इति—(श० र० स० पृ० २३४ पं० १६) । पद्यम् = श्लोकः । 'पद्यं श्लोके, पुमाञ्छूद्रे, पद्या स्याद्वर्त्मनि स्त्रियाम् ।' इति—(श० र० स० पृ० २३७ पं० ११)। कवेः कृताविति किम् । गद्या = वाक् । पद्या = पद्धतिः । मणिक्यम् = रत्नभेदः । 'मणिके मणिपूराख्ये नगरे भवं माणिक्यम् । भाष्यम् = पदार्थविवृतिः । तल्लक्षणं यथा—'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।' इति—(अम० सु० व्या० पृ० ४५९ स्तं० २ पं० १६, १७) । सिन्दूरम् = रक्तचूर्णभेदः । 'सिन्दूरस्तरुभेदे, स्यात्सिन्दूरं रक्तचूर्णके । सिन्दूरी रोचनीरक्तचे(वे)लि(लिल)का धातकीषु च ।' इति—(वि० प्र० पृ० १४१ श्लोकः २०२) । चीरम् = वस्त्रभेदः, गोस्तनम्, चूडा, सीसकं च । 'चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च ।' इति—(श० र० स० पृ० २५४ पं० २) । चीवरम् = मुनिवासः, वल्कलम् । 'चीवरं वल्कले मतम् ।' इति—(श० र० स० पृ० २७० पं० १८) । 'शाक्यभिक्षुप्रावरण'मिति सुभूतिश्च । पिञ्जरम् = पक्ष्यादिबन्धनागारम्, कायास्थिवृन्दम्, स्वर्णम्, पीतकं च । 'पिञ्जरोऽश्वान्तरे प्रोक्तः, क्लीबं स्वर्णे च पीतके ।' इति—श० र० स० पृ० २७५ पं० १६) । 'पिञ्जरोऽश्वान्तरे, क्लीबं स्वर्णे, पीते च वाच्यवत् ।' इति—(मे० पृ० १३६ श्लोकः १८५) । क्वचित्तु 'पञ्जरम्' इति पाठः । तथा च प्रयोगः । 'यावन्मध्यं बहुधापाञ्जरन्नावगाहते' इति दमयन्ती श्लेषादकारवान् । इति—(अम० सु० व्या०

टि० पृ० ४५९ स्तं० २ पं० ४२) । लोकायतम् = तर्कभेदः, चार्वाकशास्त्रम्, चार्वाकदर्शनम् । हरितालम् = धातुभेदः । 'हरितालं धातुभेदे, स्त्री दूर्वाऽऽकाशरेखयोः ।' इति—(मे० पृ० १५७ श्लोकः १६७) । विदलम् = वंशदलकृतपात्रभेदः । स्थालम् = भाण्डभेदः, भोजनपात्रम् । 'स्थालं भोजनपात्रेऽपि स्थाली स्यात्पाटलोखयोः ।' इति—(श० र० स० पृ० ३०१ पं० ५) । बाह्लिकम् = कुङ्कुमादि । "बाह्लकमिति च बाह्लवमित्यपि । बहलुदेशे भवं बाह्लवम्" । शे० प्राग्वत् ।

तथा च पुरुषोत्तमदेवः—(त्रि० शे० पृ० ३८८ श्लोकः ६, ७) ।

क्लीबे कलत्र–विष–बीज–कुटुम्ब–रत्न–
तल्पो–क्थ–कुङ्कुम–तृण–क्षर–काननानि ।
शृङ्गाट–पीठ–गृह[1]–भेषज–पृष्ठ–किण्व–
दैवा–ऽण्ड–भाण्ड–चिबुको–डुप–साहसानि ॥
यकृ–त्कुहक–सिध्मानि तीरं कशिपु जानु च ।
धामा–ऽर्द्ध–सार–मित्राण्य–ङ्ग–दल–न्याय–बन्धुषु ॥इति॥

अनयोर्व्याख्या—

क्लीब इति । यकृदिति च । एते कलत्रादयो मित्रान्ताः शब्दाः क्लीबे स्युः । विषम् = वत्सनाभः, जलम्, पद्मकेशरम्, मृणालम्, गन्धरसश्च । 'विषं क्ष्वेडे जलेऽपि च । विषा त्वौषधभेदे स्यात्' इति—(श० र० स० पृ० ३३१ पं० ४) । 'विषं जले, ऽतिविषायां स्त्रियां, क्ष्वेडे तु न स्त्रियाम् ।' इति—(मे० पृ० १६७ श्लोकः २५) । 'गरले विषमम्भसि च, स्त्रियामतिविषायाम्' इत्यूष्मविवेकान्मूर्धन्यान्तम् । 'पुंसि क्लीबे च' इति विषेणापि सम्बध्यते इति केचित्' इति च—(अम० सु० व्या० पृ० ९० स्तं० १ पं० ३४, ३५, ३६) । इह वाग्भटे तु विशेषः—'भजते विषरूपत्वं तुल्यांशे मधुसर्पिषोः ।' इति । रत्नम् = माणिक्यादि-प्रस्तरः, स्वस्वजातिषु श्रेष्ठम्, हीरकं च । 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम् ।' इति—मे० पृ० ८३ श्लोकः १७) । कुङ्कुमम् = कश्मीरदेशजं स्वनामख्यातं गन्धद्रव्यम् । तृणम् = अर्जुनम् । "घास" इति लोके । काननम् = वनम् । "जंगल" इति लोके । पीठम् = आसनम् । 'पीठमासनम् ।' इति—(अम० ना० लिं० पृ० २४९ श्लोकः १३८) । 'विष्टरः, पीठम-स्त्रियाम् ।' इति च—(त्रि० शे० पृ० २९३ श्लो० ४१) । गृहम् = इष्टकाप्रस्तरमृत्तिका-दिरचितं गेहम्, भवनम् । "घर" इति लोके । कलत्रं च । 'गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि

(१) वामनस्तु विशेषमाह—'भवनस्य रजतहान्तं चार्थरणापत्यहृदयतालुपुराम् । गन्तं च लनोर्द्राण्डुत-मसामव्यक्तलिङ्गोक्तौ ॥ इति । पृ० ३ श्लोकः ३ ।

च सद्मनि ।' इति—(मे० पृ० १७५ श्लोकः ५) । 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ।' इति च—(श० चि० पृ० ८२८ स्तं० १ पं० १८, १९, २०) । भेषजम् = औषधम् । 'भेषजौषधभैषज्यान्यगदो जायुरित्यपि ।' इति—(अम० ना० लिं० २१८ श्लोकः ५) । दैवम् = भाग्यम्, फलोन्मुखं शुभाशुभकर्म, पूर्वजन्मार्जितसदसत्कर्मविपाकः । 'प्राग्जन्मनि कृतं कर्म शुभं वा यदि वाऽशुभम् । दैवशब्देन निर्दिष्टमिह जन्मनि तद्बुधैः ।' इति—(श० चि० पृ० १२४७ स्तं० २ पं० १६, १७, १८) । । 'दैवं दिष्टं भागधेयं' इति—(अम० ना० लिं० पृ० ५३ श्लोकः २८) 'दैवं भाग्ये च नियतौ देवसम्बन्धवत्यपि ।' इति—(श० र० स० पृ० ३१६ पं० १६) । देवतीर्थं च । 'अङ्गुल्यग्रे तीर्थं दैवम्' इति—(अम० ना० लिं० पृ० २६५ श्लोकः ५०) । उडुपम् = प्लवः, क्षुद्रनौका । 'उडुपं तु प्लवेऽस्त्रियाम् । चन्द्रे पुंसि' इति—(मे० पृ० १०३ श्लोकः १५) । 'चर्म्मावनद्धमुडुपं प्लवकाष्ठं करण्डवत्' इति च सज्जनः' इति—(र० वं० म० टी० पृ० ५ पं० ७)। तथा च प्रयोगः—'उडुपेनास्मि सागरम् ।' इति रघुः (१।२) । यकृत् = कुक्षौ दक्षिणभागस्थं मांसपिण्डम्, कालखण्डम् । ''कलेजा'' इति लोके । तद्वृद्धरोगश्च । 'कालखण्डयकृती तु समे इमे ।।' इति—(अम० ना० लिं० पृ० २२४ श्लोकः ६६) । 'करण्डा तु महास्नायुः कालेयं कालखण्डके ।' इति रभसः' इति—(अम० सु० व्या० पृ० २२५ स्तं० १ पं० २) । कुहकम् = कृतपापप्रतिच्छादनलक्षणा माया, इन्द्रजालमाया वा । 'कुहकं स्यादिन्द्रजाले, कुहकः कपटान्विते ।' इति—(श० र० स० पृ० ११ पं० ११) । सिध्मम् = रोगविशेषः, कुष्ठविकारः, किलासरोगः । ''सेहुवां'' इति लोके । 'किलाससिध्मे' इति—(अम० ना० लिं० पृ० २१९ श्लोकः ५३) । नान्तोऽपि—'सिध्मा किलासं त्वक्पुष्पं सिध्मम्' इति—(अभि० सं० अभि० चि० पृ० २२ श्लोकः ४६७) । कशिपु = अन्नम्, वस्त्रं च । 'कशिपु त्वन्नमाच्छादनं द्वयम् ।' अन्नं = भोजनम् । आच्छादनं = वस्त्रम् । एतद् द्वयं कशिपुसंज्ञम् ।' इति—(अम० ना० लिं० पृ० ४१९ श्लोकः १३०) । 'एकोक्त्या कशिपुर्भक्ताच्छादने च द्वयोः पृथक् ।' इति च—(वि० प्र० पृ० १०५ श्लोकः १८) । जानु = ऊरुजंघयोर्मध्यभागः, जानूरुसन्धिः । 'जानूरुपर्वाष्ठीवदस्त्रियाम् ।।' इति—(अम० ना० लिं० पृ० २२७ श्लोकः ७२) । मित्रम् = बन्धुः, बान्धवः । शेषशब्दानां व्याख्या प्रागुक्ता ।

दुर्गसिंहोऽपि क्रमरहितान्नपुंसकलिङ्गवाचकान्बहूञ्छब्दानाह—(दु० लिं० पृ० २०तः २८ यावत् श्लोकः ४० तः ५७ या०) ।

शालुक–कारको–ल्मुक–चेतक–चिबुकांऽशुक–भग–लिङ्गाऽङ्गम् ।
चोचं पिच्छं बीजं भेषज—माज्यं मुकुट—मुडुपम् ।।

अस्य व्याख्या—

शालूकेति । एते शालूकादयः शब्दाः क्लीबे स्युः । कारकम्=क्रियानिमित्तमात्रम् । अन्यस्तु—कारयतीति कारिका स्त्री, कारकः पुमान्, कारकं कुलम् । 'कारिका यातनायां स्यान्नवयोषिति च स्मृता । कृतौ विवरणश्लोके कारिका नटयोषिति । नपुंसकं तु कर्मादौ कारकं, कर्त्तरि त्रिषु ।' इति—(श० र० स० पृ० १० पं० ७, ८, ९) । चेतकम्=हरीतकीफलम् । अंशुकम्=वस्त्रमात्रम्, सूक्ष्मवस्त्रम्, उत्तरीयं च । 'अंशुकं स्यात्सूक्ष्मवस्त्रे वस्त्रमात्रोत्तरीययोः ।' इति—(श० र० स० पृ० ७ पं० १२) । भगम्=ज्ञानम् । 'भगं श्रीयोनिवीर्य्येच्छाज्ञानवैराग्यकीर्तिषु ।' इति—(मे० पृ० २२ श्लोकः १२) । पिच्छम्=मयूरकलापः । चूडा च । 'न द्वयोर्बर्हचूडयोः ।' इति—(मे० पृ० २९ श्लोकः ४) । आज्यम्=घृतम्, तिलश्च । 'स्यादाज्यं तिलसर्पिषोः ।' इति—(श० र० स० पृ० २३२ पं० ११) । मुकुटम्=मौलिः । 'अथ मुकुटं कीरीटं पुन्नपुंसकम् ।' इति—(अम० ना० लिं० पृ० २३८ श्लोकः १०२) । शे० प्रा० ।

शृङ्गाट–ललाट–तिरीट–पिटानि ख–पीठ–लोष्ट–काष्ठानि ।
पृष्ठं तुण्डं काण्डा–ऽऽलीढे भाण्डा–ऽण्ड–कुण्डानि ॥

अस्य व्याख्या—

शृङ्गाटेति । एते शृङ्गाटादयः शब्दा नपुंसकलिङ्गा भवन्ति । लोष्टम्=मृत्संस्थानविशेषः । 'लोष्टानि लेष्टवः पुंसि' इति—(अम० ना० लि० पृ० ३०५ श्लोकः १२) । पुंलिङ्गोऽप्ययम् । 'लेष्टुः शण्ढे (ठे) ऽपि लोष्टः स्यात्' इति च बोपालितः' इति—(अम० सु० व्या० पृ० ३०५ स्तं० १ पं० १२, १३) । काष्ठम्—दारु । 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः ॥ स्थानमात्रे दिशि च स्त्री, दारुणी स्यान्नपुंसकम् ।' इति—(मे० पृ० ३८, ३९ श्लोकः २, ३) । काण्डम्=सन्धिविच्छिन्नैकखण्डास्थि । 'काण्डः स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः ॥ कुत्सिते, वृक्षभिन्नाडीबन्धे रहसि न स्त्रियाम् ।' इति—(मे० पृ० ४० श्लोकः २ ३) । आलीढम्=स्थानविशेषः, धनुर्धराणां स्थितिभेदः । 'स्यात्प्रत्यालीढमालीढमित्यादिस्थानपञ्चकम् ।' इति—(अम० ना० लिं० पृ० २९२ श्लोकः ८५) । 'आलीढं पादन्यासे, शिते त्रिषु ।' इति—(मे० पृ० ४४ श्लोकः ७) । 'वितस्त्यन्तरेण स्थिते पादद्वये विशाखः । रभसस्तु षट् स्थानान्याह 'वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् ।' इति— (अम० सु० व्या० पृ० २९२ स्तं० १ पं० २७, २८, २९) । कुण्डम्=भाण्डविशेषः । 'कुण्डमग्न्यालये मानभेदे देवजलाशये ।' इति- (मे०पृ०४० श्लोकः ४) । शे० प्रा० ।

प्रत्यालीढं शरणं शण–मृणं च कारण–ममृत–मलातम् ।
पलितं शुक्तं नवनीतं लोकायत–मरकते च ॥

अस्य व्याख्या—

प्रत्यालीढमिति । एते प्रत्यालीढादयः शब्दाः क्लीबे स्युः । प्रत्यालीढम् = धन्विनां स्थानविशेषः । अमृतम् = सुधा, सुरभोज्यम्, जलम्, विषम्, घृतं च । 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते । अयाचिते च मोक्षे च, ना धन्वन्तरिदेवयोः ।' इति––(मे० पृ० ५९ श्लोकः ७७) । अलातम् = उल्मुकम्, अर्द्धदग्धकाष्ठम् । 'अथ न स्त्री स्यादङ्गारोऽलातमुल्मुकम् ।' इति—(अम० ना० लिं० पृ० ३११, ३१२ श्लोकः ३०) । पलितम् = पक्वकेशः, शैलजं च । 'पलितं शैलजे तापे केशपाके च कर्दमे ।' इति—(मे० पृ० ६३ श्लोकः १२३) । शुक्तम् = अम्लम्, परुषश्च । 'शुक्तं पूताम्लनिष्ठुरे ।' इति––(मे० पृ० ५८ श्लोकः ६५) । नवनीतम् = घृतकारणम्, अकृताग्निसंयोगनवोद्धृतम् । 'नवनीतं नवोद्धृतम् ।' इति—(अम० ना० लिं० पृ० ३२१ श्लोकः ५२) । मरकतम् = रत्नविशेषः । "पन्ना" इति लोके । 'गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ।' इति—(अम० ना० लिं० पृ० ३३२ श्लोकः ९२) । शे० प्रा० ।

जतु वस्तु मस्तु चित्तं पित्तं तोकं निमित्त–शव–बडिशम् ।
अस्थ्यु–क्थ–सक्थि सनिरुक्त–मङ्कदे–ङ्गद–गुद–पद–मृधम् ॥

अस्य व्याख्या—

जत्विति । एते जत्वादयः शब्दा निरुक्तेन च सह नपुंसकलिङ्गाः स्युः । जतु = लाक्षा-निर्यासः, लाक्षा च । 'पुनर्जतु । लाक्षायाम्' इति––(श० र० स० पृ० १२६ पं० १६–७) । वस्तु = पदार्थः, द्रव्यं च । 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिर्भवति' इति व्याख्यातारः । इति–– (श० चिं० पृ० २३९ स्तं० २ पं १०, ११) । मस्तु = दधिविकारः, वस्त्रनिःसृतदधिजलम् । दध्न उपरिभाग इत्यन्ये । 'मण्डं दधिभवं मस्तु' इति––(अम० ना० लिं० पृ० ३२१ श्लोकः ५४) । चित्तम् = मनः । 'चित्तं तु चेतो हृदयम्' इति—(अम० ना० लिं० पृ० ५५ श्लोकः ३१) । पित्तम् = दोषविशेषः, मायुः । 'पित्तं दोषविशेषे स्यात्' इति––(श० र० स० पृ० १२९ पं० ८) । निमित्तम् = कारणम्, हेतुः, लक्ष्म च । 'निमित्तं हेतुलक्ष्मणोः ।' इति—(अम० ना० लिं० पृ० ४१० श्लोकः ७६) । शवम् = मृतशरीरम्, पानीयं च । 'कुणपः शवमस्त्रियाम् ।।' इति––(अम० ना० लिं० पृ० ३०१ श्लोकः ११८) । 'शवः स्यात्कु-

णपे पुमान् । नपुंसके तु पानीये' इति--(मे० पृ० १५९ श्लोकः २४) । बडिशम् = बलिशम्, मत्स्यबन्धनम् । अस्थि = कुल्यम् । ''हड्डी'' इति लोके । 'कीकसं कुल्यमस्थि च ॥' इति-- (अम० ना० लिं० पृ० २२५ श्लोकः ६८) । निरुक्तम् = ग्रन्थविशेषः । अङ्गदम् = केयूरम्, प्रगण्डभूषणम् । 'अङ्गदः कपिभेदे ना, केयूरे तु नपुंसकम् ।' इति-- (मे० पृ० ७५ श्लोकः १७) । इङ्गुदम् = वृक्षविशेषः, तापसतरुः । ''हिंगोटा'' इति लोके । यादवस्तु द्वयोरेवेत्याह--'इङ्गुदी नषण्' इति--(वै० पृ० ५१ श्लोकः ७८) । गुदम् = अपानम्, विष्ठानिर्गममार्गः । 'गुदंत्वपानं, पायुर्ना' इति--(अम० ना० लिं० पृ० २२७ श्लोकः ७३) । पदम् = स्थानम्, लक्षणम्, पादश्च । 'पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः स्थानत्राणयोरङ्कवस्तुनोः ।' इति-- (वि० प्र० पृ० ७७ श्लोकः ३) । 'श्लोकपादेऽपि क्लीबं च, पुंलिङ्गः किरणे पुनः ।' इति--(मे० पृ० ७ श्लोकः ८) । मृधम् = युद्धम् । 'मृधमास्कन्दनं संख्यम्' इति--(अम० ना० लिं० पृ० २९८ श्लोकः १०४) । शे० प्रा० ।

काकुद–मास्पद–बाह्लव–दधि–किण्व–श्राद्ध–वाजपेयानि ।
जानु–जघन–तुहिना–ऽजिन–वृजिन–पनस–मिथुन–सोपानैः ॥

अस्य व्याख्या—

काकुदमिति । एते काकुदादयः शब्दाः जान्वादिभिः सह क्लीबे स्युः । काकुदम् = तालु । 'निश्चेष्टं ककुदं शिरः ।' ककुदे भवः काकुदम् । 'तालु तु काकुदम्' इति— (अम० ना० लिं० पृ० २३४ श्लोकः ९१) : आस्पदम् = पदम्, प्रतिष्ठा, कृत्यं च । 'प्रतिष्ठाकृत्यमास्पदम् ।' इति— (अम० ना० लिं० पृ० ४१३ श्लोकः ९४) । बाह्लवम् = परिस्कारजातम् । दधिः = क्षीरविकार-विशेषः, सरलद्रवश्च । 'अथ सरलद्रवः ॥ दधिक्षीरघृताह्वः स्यात्' इति— (त्रि० शे० पृ० २९२ श्लोकः ३७, ३८) । श्राद्धम् = पितृक्रिया । 'श्राद्धं तत्कर्म शास्त्रतः ।' तेषां पितॄणां कर्म शास्त्र-विधानेन । इति—(अम० ना० लिं० पृ० २५९ श्लोकः ३१) । यस्तु श्राद्धशब्दः अणन्तः व्युत्पाद्यते श्रद्धा अस्यास्तीति स वाच्यलिङ्ग एव । श्राद्धा स्त्री, श्राद्धो नरः, श्राद्धं कुलम् । जघनम् = अवयवविशेषः, स्त्रीकटचा अग्रभागः । 'क्लीबे तु जघनं पुरः ॥' इति— (अम० ना० लिं० पृ० २२८ श्लोकः ७४) । 'जघनं स्यात् स्त्रियाः श्रोणिपुरोभागे कटावपि ।' इति—(मे० पृ० ८७ श्लोकः ६७) । तुहिनम् = हिमम् । 'तुषारस्तुहिनं हिमम् ।' इति-- (अम० ना० लिं० पृ० ३६ श्लोकः १८) । अजिनम् = चर्म । ''चमड़ा'' इति लोके । 'अजिनं चर्ममात्रेऽपि च नपुंसकम् ।' इति-- (श० र० स० पृ० १९० पं० १८) । तथा च प्रयोगः—'वसानमेणाजिनमञ्जनद्युति ।' इति माघः (१।६) । वृजिनम् = पापम्, कलुषम् । 'वृजिनं कल्मषे क्लीबं, केशे ना, कुटिले

त्रिषु ।' इति--(मे० पृ० ६२ श्लोकः ३४) । पनसम् = फलविशेषः, पनसस्य फलम् । "कटहल" इति लोके । मिथुनम् = युग्मम्, राशिभेदश्च । 'मिथुनं राशिभेदे स्यात्तथा स्त्रीपुंसयुग्मयोः ।' इति-(श० र० स० पृ० १६७ पं० १०) । सोपानम् = आरोहणविशेषः, निःश्रेणिः, पाषाणादिरचितं सौधाद्यारोहणम् । "पैडी" इति लोके । 'स्यात्सोपानं तु निःश्रेण्यां, सुकुमारे (?) तु वाच्यवत् ।' इति--(श० र० स० पृ० २०१ पं० १५) । 'आरोहणं च सोपानं 'पैडी' इति समाह्वये । सोपाने काष्ठघटिते निःश्रेणिस्त्वधिरोहिणी ।' इति च शब्दरत्नावली' इति-- (श० चिं० पृ० ६०७ स्तं० १, २ पं० २८, २९, ३०) । शे० प्रा० ।

द्वन्द्व-श्मशान-वेतन-ससैन्य-चिह्न-प्रधान-धान्यानि ।
हर्म्यं शष्पं पापं त्रिविष्टपं त्रपु-समीपा-ऽभ्रम् ॥

अस्य व्याख्या—

द्वन्द्वेति । सह सैन्येन वर्तत इति ससैन्यम् । ससैन्यं च तच्चिह्नं चेति । एते द्वन्द्वादयः शब्दाः क्लीबे स्युः । द्वन्द्वम् = युगलम्, रहस्यं, युद्ध च । 'द्वन्द्वं रहस्ये कलहे तथा मिथुन-युग्मयोः ।' इति--(मे० पृ० १५८ श्लोकः १०) । श्मशानम् = शवयानम्, पितृवनम् । 'श्मशानं स्यात्पितृवनम्' इति--(वै० पृ० ३९ श्लोकः ४८) । वेतनम् = भृतिमूल्यम्, मूल्यम् । "मासिक तनख्वाह" इति च लोके । 'कर्मण्या तु विधा भृत्याभृतयो भर्म वेतनम् ।' इति—(अम० ना० लिं० पृ० ३५० श्लोकः ३८) । सैन्यम् = सेना, बलम् । 'सैन्यं क्लीबं बले, सेनासमवेते तु वाच्यवत् ।' इति—(मे० पृ० ११७ श्लोकः ६४) । चिह्नम् = लिङ्गम्, पताका च । 'अथ चिह्नं लक्ष्मपताकयोः ।' इति--(मे० पृ० ८३ श्लोकः ४) । प्रधानम्=श्रेष्ठम्, प्रकृतिः, गुणसाम्यावस्था च । 'प्रधानं स्यात्महामात्रे प्रकृतौ परमात्मनि । प्रज्ञायामपि च क्लीबम्' इति---(मे० पृ० ८८ श्लोकः ८५) धान्यम् = व्रीहिः, धन्याकं च । 'धान्यं व्रीहिषु धन्याके' इति—(मे० पृ० १५५ श्लोकः ३३) । हर्म्यम् = प्रासादः, धनिनां वासः । 'सौधो-ऽस्त्री सुधया श्वेतं मेटो हर्म्यं च मालिका । तदेव राजदेवानां स्यात्प्रासादः प्रसादनम् ।' इति—(वै० पृ० १६१ श्लोकः २९) । शष्पम् = बालतृणम् । 'अथ शष्पं बालतृणे स्मृतम् ।' इति—(मे० पृ० १०२ श्लोकः ११) । पापम् = अशुभम्, दुष्कृतम् । 'पापं किल्बिषकल्मषम् ।' इति--(अम० ना० लिं० पृ० ५१ श्लोकः २३) । त्रपु = सीसम् । "सीसो" इति लोके । रङ्गं च । "राँग" इति लोके । 'त्रपु पिच्चटम् ॥ रङ्गं वङ्गे' इति--(अम० ना० लिं० पृ० ३३७ श्लोकः १०५-६) । । रुद्रस्तु पुंसीत्याह-रङ्गसीसकयोस्त्रपुः ।' इति च—(अम० सु० व्या० पृ० ३३७ स्तं० १ पं० ४२) । समीपम् = निकटम् । 'समीपे निकटा-

सन्नसन्निकृष्टसनीडवत् ॥' इति—(अम० ना० लिं० पृ० १७१ श्लोक: ६६)। शे० प्रा०।

शिल्पं तल्पं रूपं तथा–ऽन्तरीपं शफं च कुप्यं च।
कुङ्कुम–कुटुम्ब–कलभे–ध्म–सिध्म–युग्मे–न्द्रियैः सस्यम् ॥

अस्य व्याख्या—

शिल्पमिति। कुङ्कुमादिभिः सह सस्यं शिल्पादयश्चैते नपुंसकलिङ्गा भवन्ति। शिल्पम्=क्रियाकौशलम्, कलाकौशल्यादिकर्म। 'शिल्पं कर्म कलादिकम्।' इति—(अम० ना० लिं० पृ० ३४६ श्लोक: ३५)। कला नृत्यगीतादिरूपा चतुःषष्टिभेदभिन्ना। 'शिल्पं स्रुवे क्रियादिके।' इति च—(वि० प्र० पृ० १०४ श्लोक: १०)। तल्पम्=शयनम्, अट्टः, दाराश्च। 'तल्पं शय्याट्टदारेषु' इति—(अम० ना० लिं० पृ० ४१९ श्लोक: १३१) 'अस्त्रियाम्' इति कशिपुतल्पाभ्यां सम्बध्यते। अट्टोऽट्टालिका। शफम्=खुरः, तरुमूलं च। 'शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च।' इति—(मे० पृ० १०४ श्लोक० ३)। कुप्यम्= असारद्रव्यम्, रूप्यसुवर्णाभ्यामन्यत्; 'ताभ्यां (हेमरूप्याभ्याम्) यदन्यत्तत्कुप्यम्' इति—(अम० ना० लिं० पृ० ३३२ श्लोक: ९१)। कलभम्=करिपोतः। अमरस्तु पुंस्त्वमाह—'कलभः करिशावकः।' इति—(अम० ना० लिं० पृ० २७६ श्लोक: ३५)। इध्मम्=काष्ठम्। 'इन्धनं त्वेध इध्ममेधः, समित्स्त्रियाम्।' इति—(अम० ना० लिं० पृ० १३२ श्लोक: १३)। सस्यम्=धान्यादि, क्षेत्रगतव्रीह्यादि। 'सस्यं क्षेत्रगतं प्राहुः, सतुषं धान्यमुच्यते। आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतम्।' इति वसिष्ठः' इति—(श० चिं० पृ० १०१ स्तं० २ पं० ११ तः)। वृक्षादिफलं च। 'वृक्षादीनां फलं सस्यम्' इति—(अम० ना० लिं० पृ० १३३ श्लोक: १५)। सस्यं दन्त्यादि। 'ग्राम्यकविकथाबन्ध इव नारसस्य मनोहरआर्यावर्तः' इति च दमयन्तीश्लेषः' इति—(अम० सु० व्या० टि० पृ० १३३ स्तं० १ पं० ४१, ४२)। 'शस्य' मित्यपि शे० प्रा०।

शिक्यं हृदयं मद्यं भय–सत्या–ऽपत्य–राजसूयानि।
धिष्ण्यं पण्यं मूल्यं कार्यं वीर्य्यं किसलयं दम् ॥

अस्य व्याख्या—

शिक्यमिति। एते शिक्यादयः शब्दाः नपुंसकलिङ्गा भवन्ति। शिक्यम्=उद्ग्रहणं भारयष्टिर्वा। 'तदालम्बि (भारयष्ट्यालम्बि) शिक्यं काचः' इति— (अम० ना० लिं० पृ०

३४७ श्लोकः ३०) । ''छींका'' इति लोके । हृदयम् = उरः, हृत्, हृदयकमलम्, मनश्च । 'हृदयं मानसे बुक्कोरसोरपि नपुंसकम् ।' इति--(मे० पृ० १२१ श्लोकः ११५) । मद्यम् = मदिरा । 'मद्यं त्वरिष्टं मैरेयं कत्तोयं कापिशायनम् ।' इति--(त्रि० शे० पृ० ३०६ श्लोकः १५) । भयम् = भीतिः, भीः, त्रासः, कुब्जपुष्पं च । 'भयं भीकुब्जपुष्पयोः ।' इति--(त्रि० शे० पृ० ३६० श्लोकः ३१८) । सत्यम् = तथ्यम्, शपथः, कृतयुगं च । 'सत्यं कृते च शपथे तथ्ये, त्रिषु तु तद्वति ।' इति-- (मे० पृ० ११७ श्लोकः ६१) । अपत्यम् = पुत्रपुत्र्यौ । 'अपत्यं पुत्रयोर्मतम् ।' इति--(मे० पृ० ११८ श्लोकः ७०) । धिष्ण्यम् = नक्षत्रम्, स्थानम्, शक्तिः, अग्निः, गृहं च । 'धिष्ण्यं स्थानाग्निमद्मसु । शक्तावृक्षेऽपि' इति-(मे० पृ० ११५ श्लोकः ३३) । 'गेहस्थानोडुवह्नयः ।' इति--(दु० लिं० वि० पृ० २३ पं० ५) । पण्यम् = विक्रेयम्, विक्रय-क्रियाकर्म । 'विक्रेयं पणितव्यं च पण्यं, क्रय्यादयस्त्रिषु ।' इति—(अम० ना० लिं० पृ० ३२९ श्लोकः ८२) । मूल्यम् = वसुपरिमाणम्, वस्नः, अवक्रयः, वेतनं च । 'मूल्यं स्याद्वेतने वस्ने' इति-(मे० पृ० ११६ श्लोकः ४६) । कार्यम् = कृत्यम्, कर्त्तव्यम्, प्रयोजनम्, हेतुश्च । 'कार्यं कृत्ये प्रयोजने ।' इति—(मे० पृ० ११३ श्लोकः १०) । वीर्य्यम् = शक्तिः, प्रधानधातुश्च । 'वीर्य्यं प्रधानधातौ च' इति--(त्रि० शे० पृ० ३६० श्लोकः ३१८) । शे० प्रा० ।

शिशिराऽम्बरीष-पुष्कर-गह्वर-केयूर-मुदर-दुःखाऽग्रम् ।
चामर--मक्षर--मन्तर--मश्रु--द्वारं तथा--ऽगारम् ॥

अस्य व्याख्या—

शिशिरेति-एते शिशिरादयः शब्दाः क्लीबे स्युः । शिशिरम् = ऋतुविशेषः । 'शिशिरो ना हिमे, न स्त्री ऋतुभेदे, जडे त्रिषु ।' इति—(मे० पृ० १३९ श्लोकः २२७) । अम्ब-रीषम् = भ्राष्ट्रम् । ''भाटी'' ''भट्टी'' इति च लोके । रणं च । 'अम्बरीषं रणे भ्राष्ट्रे क्लीबं, पुंसि नृपान्तरे ।' इति--(मे० पृ० १६९ श्लोकः ४८) । गह्वरम्—गहनम्, गुहा च । 'अथ गह्वरम् । गुहागहनदम्भेषु, निकुञ्जे तु पुमानयम् ।' केयूरम् = बाहुभूषणविशेषः, प्रगण्ड-भूषणम् । 'केयूरमङ्गदं तुल्ये' इति—(अम० ना० लिं० पृ० २३९ श्लोकः १०७) । उदरम् जठरम् । 'जठरे तूदरं मतम् ।' इति— (श० र० स० पृ० २६६ पं० १) । दुःखम् = पीडा, कष्टम् । 'पीडा बाधा व्यथा दुःखम्' इति—(अम० ना० लिं पृ० ६२ श्लोकः ३) । 'आबाधा वेदना दुःखम्' इति हलायुधः' इति--(अम० सु० व्या० पृ० ६२ स्तं० १ पं० १८, १९) । अग्रम् = प्रान्तम् । 'प्रान्ते च स्यान्नपंसकम् ।' इति--(मे० पृ० १२३ श्लोकः ३) । श्रेष्ठवृत्तेस्तु वाच्यलिङ्गता--इयमग्रा, अयमग्रः, इदमग्रम् । अन्तरम् = मध्यम् । 'अन्तरम-

वकाशावधिपरिधानान्ततद्धि भेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्यात्मसदृशेषु ।' इति— (मे० पृ० १३० श्लोकः १०६) । यस्तु अन्तरशब्दः बहिर्योगादौ तस्य सर्वनामत्वात् वाच्यलिङ्गता—अन्तरा शाटी, अन्तरः पटः, अन्तरं वस्त्रम् । अश्रु = बाष्पम्, नेत्रोदकम् । 'अस्रु नेत्राम्बु रोदनं चास्रमश्रु च ॥' इति—(अम० ना० लिं० पृ० २३५ श्लोकः ९३) । द्वारम् = गृहमुखम्, निर्गमनम्, अभ्युपायश्च । 'द्वारं निर्गमनेऽपि स्यादभ्युपाये' इति—(मे० पृ० १२६ श्लोकः ४८) । शे० प्रा० ।

कुड्यं स्फारं तक्रं क्षिप्रं क्षुद्र–सकुकुन्दर–कुटीरम् ।
पञ्जर–करीर–चीवर–चीरं पीयूष–तीरे च ॥

अस्य व्याख्या—

कुड्यमिति । सह कुकुन्दरेण वर्त्तत इति सकुकुन्दरम् । सकुकुन्दरं च तत्कुटीरं चेति कर्मधारयः । क्षुद्रं च सकुकुन्दरकुटीरं चेति समाहारो द्वन्द्वः । एते कुड्यादयः शब्दा नपुंसकलिङ्गाः स्युः । कुड्यम् = भित्तिः, विलेपनम्, कौतूहलं च । 'कुड्यं स्यात्तु नपुंसकम् । विलेपने च भित्तौ च तथा कौतूहलेऽपि च ।' इति—(मे० पृ० ११३ श्लोकः १३) । तक्रम् = मथितम्, चतुर्थांशजलघोलम् । ''मठ्ठा'' ''छाछ'' इति च लोके । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बु निर्जलम् ।' इति—(अम० ना० लिं० पृ० ३२१ श्लोकः ५३) । क्षिप्रम् = द्रुतम्, शीघ्रम् । 'लघु क्षिप्रमरं द्रुतम् ॥' इति—(अम० ना० लिं० पृ० २७ श्लोकः ६४) । क्षुद्रम् = अल्पम् । अधमादौ वाच्यलिङ्गतैव । क्षुद्रः अधमः, क्रूरश्च । क्षुद्रा नटी, वेश्या, मधुमक्षिका च । क्रूराधमयोस्त्वाश्रयलिङ्गता । मेदिनिकारस्तु वाच्यलिङ्गतामाह—'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् ।' इति—(मे० पृ० १२४ श्लोक० १७) । कुटीरम् = ह्रस्वकुटी, जघनं च । 'कुटिर'मित्यपि । 'कुटीरं कुटिरं तथा ।' इति—(द्विरूपको० पृ० ४१२ श्लोकः ३१) । 'कुटीरं केवले रते ।' इति—(अने० सं० पृ० ६३ श्लोकः ५७६) । यादवस्तु पुंस्त्वमाह—'कुटीरस्तु कुटी पल्ली' इति—(वै० पृ० १६१ श्लोकः २७) । पञ्जरम् = काष्ठादिरचनाविशेषः । करीरम् = वंशाङ्कुरः । 'वंशाङ्कुरे करीरोऽस्त्री, वृक्षभिद्घटयोः पुमान् ।' इति—(मे० पृ० १३१ श्लोकः १२५) । शे० प्रा० ।

अस्रा–ऽस्रु श्मश्रु कसेरु जत्रु तुम्बरु च शुक्र–मभृगुसुते ।
अघ–मुत्तरीय–मृक्ष–मुडा–वक्षं चे–न्द्रिये यवसम् ॥

अस्य व्याख्या—

अस्रेति । अभृगुसुते शुक्रग्रहवर्जिते शुक्रम्, उडौ ऋक्षम्, इन्द्रिये अक्षम्, अस्रादयः

शब्दाश्चैते नपुंसकलिङ्गा भवन्ति । अस्रम्=अश्रु, शोणितं च । 'अस्रः कोणे कचे पुंसि, क्लीबमश्रुणि शोणिते ।' इति--(मे० पृ० १२३ श्लोकः ५) । अस्रु=बाष्पम्, नेत्राम्बु । 'रोदनं चास्रुमश्रु च ।' इति--(अम० ना० लिं० पृ० २३५ श्लोकः ९३) । श्मश्रु=मुखरोमाणि। 'तद्वृद्धौ (रोमवृद्धौ)श्मश्रु पुंमुखे ।' इति--(अम० ना० लिं० पृ० २३७ श्लोकः ९९) । जत्रु=ग्रीवासन्धिः । "हंसुली" इति लोके । अंसकक्षयोः सन्धिः । "सन्धी तस्यैव (स्कन्धस्य) जत्रुणी ॥' इति--(अम० ना० लिं० पृ० २२९ श्लोकः ७८) । शुक्रम्=रेतः, अक्षिरुक् च । 'रेतोऽक्षिरुग्भिदोः क्लीबम्' इति--(मे० पृ० १२९ श्लोकः ६३) । 'अभृगुसुते' इति किम् ? शुक्रः=भार्गवः । अघम्=पापम्, दुःखं च । अघं तु व्यसने दुःखे दुरिते च नपुंसकम् ।' इति—(मे० पृ० २६ श्लोकः १) । उत्तरीयम्=उपरिवासः । "अँगोछा" "दुपट्टा" "चादर" इति वा लोके । 'संव्यानमुत्तरीयं च' इति--(अम० ना० लिं० पृ० २४३ श्लोकः ११८) । ऋक्षम्=नक्षत्रम् । 'नक्षत्रे पुन्नपुंसकम् ।' इति--(मे० पृ० १६६ श्लोकः ६) । भल्लूकवचनस्य स्त्रीपुंस्त्वं चतुष्पदजातित्वात् । ऋक्षी, ऋक्षः । शे० प्रा०

बिस–साहस–बर्हा–ऽहः–किल्बिष–कल्मष–पुरीष–तूर्याणि ।
शकृता यकृता पृषता जगता चो–दश्चिता शीर्षम् ॥

अस्य व्याख्या—

बिसेति । शकृता, यकृता, पृषता, जगता, उदश्विता, सह शीर्षम्, बिसादयः शब्दाश्चैते नपुंसकलिङ्गा भवन्ति । साहसम्=अनालोचितकरणम्, बलात्कारकृतकार्यम् । दमश्च= 'साहसं तु बलात्कारकृतकार्य्ये दमेऽपि च ।' इति–(श० र० स० पृ० ३३८ पं० १०) । बर्हम्= मयूरकलापः, दलं च । 'बर्हं पिच्छे, दलेऽस्त्रियाम् ।' इति—(मे० पृ० १७५ श्लोकः ६) । अहः =दिनम्, वासरः । 'घस्रो दिनाऽहनी, वा तु क्लीबे दिवसवासरौ ।' इति--(अम० ना० लिं० पृ० ४४ श्लोकः २) । कल्मषम्=पापम् । 'पापं किल्बिषकल्मषम् ।' इति--(अम० ना० लिं० पृ० ५१ श्लोकः २३) । 'कल्मषं किल्बिषे क्लीबं, पुंसि स्यान्नरकान्तरे ।' इति च--(मे० पृ० १६७ श्लोकः ३३) । पुरीषम्=विष्ठा । "टट्टी" "मैला" इति च लोके । 'गूथं पुरीषं वर्चस्कमस्त्री, विष्ठाविषौ स्त्रियौ ।' इति--(अम० ना० लिं० पृ० २२५ श्लोकः ६८) । तूर्य्यम्= वाद्यविशेषः । 'तूर्य्योऽस्त्री, वाद्यनिर्घोषे' इति-- (वै० पृ० १४७ श्लोकः १३६) । शकृत्= विष्ठा । 'उच्चारावस्करौ शमलं शकृत् ॥' इति—(अम० ना० लिं० पृ० २२५ श्लोकः ६८) । उदश्वित्=अर्द्धजलघोलम् । "मट्ठा" "छाछ" इति च लोके । 'तक्रं ह्युदश्विन्मथितं पादाम्बवर्द्धाम्बुनिर्जलम् ॥' इति—(अम० ना० लि० पृ० ३२१ श्लोकः ५३) । शे० प्रा० ।

द्विस्वर–मसन्न–मि–सुसन्तं त्रान्तं यच्छतादिका संख्या ।
द्विस्वर–मन्नन्त–मनान्त–मकर्त्तरि कव्य–काव्ये च ॥

अस्य व्याख्या—

द्विस्वरमिति । एते द्विस्वरादयः काव्यान्ताः शब्दाः क्लीबलिङ्गाः स्युः । द्वौ स्वरौ यस्य तद् द्विस्वरम् । अस् अन्ते यस्य तद् असन्तम् । इस् च उस् च इसुसौ तौ अन्ते यस्य तद् इसुसन्तम् । त्रोऽन्ते यस्य तत् त्रान्तम् । शतमादिर्यस्या सा शतादिका संख्या । द्वौ स्वरौ यस्य तद् द्विस्वरम् । मन् अन्ते यस्य तद् मन्नन्तम् । द्विस्वरं च तद् मन्नन्तं चेति कर्मधारयः । "ङणना ह्रस्वोपधाः स्वरे द्विः" इति तस्य द्वित्वम् । अनोऽन्ते यस्य तद् अनान्तम् । अकर्त्तरीति कर्त्तुरन्यस्मिन् कारके कर्मादौ यः अनः विहित इत्यर्थः । भाववाचिनस्तु "कृद्भावः" इति वक्ष्यति । प्रसज्यप्रतिषेधेऽप्यदोष एव । तल्लक्षणमाह विश्वनाथः—'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ।' इति—(श० चिं० पृ० २६० स्तं० १ पं० १२, १३) । प्रसज्यप्रतिषेधः = निषेधान्तरम् । कव्यं च काव्यं च कव्यकाव्ये । द्विस्वरमसन्तं यथा—पयः = दुग्धम्, जलं च । 'पयः क्षीरं, पयोऽम्बु च ।' इति—(अम० ना० लिं० पृ० ४३९ श्लोकः २३३) । वयः = अवस्था, बाल्यादिः, पक्षी, यौवनं च । 'वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम् ।' इति—(मे० पृ० १७२ श्लोकः ३५) । यशः = कीर्तिः । "प्रसिद्धी" "बड़ाई" इति च लोके । इसन्तं यथा—वर्हिः = कुशम् । 'वर्हिः पुंसि हुताशने । न स्त्री कुशे' इति—(मे० पृ० १७२ श्लोकः ३६) । अर्चिः = ज्वाला, भाश्च । 'ज्वालाभासोर्न पुंस्यर्चिः' इति—(अम० ना० लिं० पृ० ४३८ श्लोकः २३०) 'अथार्चिर्मयूखशिखयोर्न ना ।' इति—(मे० पृ० १७१ श्लोकः १५) । उसन्तं यथा—अरुः = मर्म, व्रणः, क्षतं च । 'व्रणोऽस्त्रियामीर्मारुः क्लीबे' इति—(अम० ना० लिं० पृ० २२० श्लोकः ५४) । इति । शतादिका संख्या यथा—शतम्, सहस्रम्, अयुतम्, नियुतम्, अर्बुदम्, न्यर्बुदम् । इति । द्विस्वरमन्नन्तं यथा—भस्म = भूतिः, भसितम् । "राख" "खाक" इति च लोके । 'भूतिर्भसितभस्मनी ।' इति—(अम० पु० पृ० १३ प० १) । जन्म = जननम्, उत्पत्तिः । 'जनुर्जननजन्मानि' इति—(अम० ना० लिं० पृ० ५४ श्लोकः ३०) । 'जन्मशब्दोऽदन्तः पुंलिगः । क्लीबोऽपि' इत्युज्ज्वलदत्तः । अनान्तं यथा—पीयते इति पानम् = मदस्थानम्, पीतिः, भाजनम्, रक्षणं च । 'शुण्डा पानं मदस्थानम्' इति—(अम० ना० लिं० पृ० ३५१ श्लोकः ४८) । 'पानं पीतिभाजनरक्षणे ।' इति—(मे० पृ० ८३ श्लोकः १३) । भक्ष्यते इति भक्षणम् = द्रवेतरद्रव्यस्य गलाधः करणम्, न्यादः, खदनम्, खादनम् । "भखना" "खाना" इति च लोके । 'जक्षा खादनभक्षणे ।' इति—(वै० पृ० १६७ श्लोकः १०४) । 'अथ भक्षणम् ।

उपदंशोऽपदंशश्च मधुवारा मधुक्रयाः ।' इति च––(वै० पृ० १४० श्लोकः ५२) । तथा च प्रयोगः––'शणशाकं वृथा मांसं, करेण क्वथितं दधि । तर्जन्या दन्तधावश्च सद्यो गोमांस-भक्षणम् ।' इति···इति––(श० चिं० पृ० ४०० स्तं० १ पं० २७-८-९) । यात्यनेन इति यानम् = वाहनम्, गतिश्च । 'यानं स्याद्वाहने गतौ ।' इति––(मे० पृ० ८३ श्लोक १६) । सम्यक् प्रदीयते यस्मै तत् सम्प्रदानम् = दानपात्रम्, चतुर्थीकारकम्, त्यागोद्देश्यं च । अपादीयते यस्मात् तत् अपादानम् = विश्लेषोऽवधिभूतः, पञ्चमीकारकम्, यस्माद्वस्तुनो वस्त्वन्तरस्य चलनं भवति तत् । नीयतेऽस्मिन् इति नयनम् = नेत्रम्, चक्षुः, लोचनम्, प्रापणं च । 'लोचनं नयनं नेत्रम्' इति––(अम० ना० लिं० पृ० २३५ श्लोकः ९३) । वृश्च्यते इति व्रश्चनः = कुठारः । "इध्मं वृश्च्यतेऽनया अनेन वा इध्मव्रश्चनी स्त्री, इध्मव्रश्चनः पुमान्; पलाशानि शात्यन्ते अनया अनेन वा पलाशशातनी यष्टिः, पलाशशातनो दण्डः; पूर्यतेऽनया अनेन वा पूरणी घटी, पूरणो घटः; गावो दुह्यन्तेऽस्यां अस्मिन् वा गोदोहनी घटी, गोदोहनो घटः ।" इति । टानुबन्ध-लिङ्गात् सर्वत्रियत्वमस्य प्रयोगानुसारेण । अकर्त्तरीति कर्त्तृविषयस्य वाच्यलिङ्गतैव––शृणो-तीति शर्मी स्त्री, शर्मा पुमान्, शर्म नपुंसकम् । नन्दयतीति नन्दना स्त्री, नन्दनः पुमान्, नन्दनम् = कुलम् । कव्यम् = पितृतर्पणम्, पित्रन्नम् । 'हव्यकव्ये दैवपैत्रे अन्ने' इति—(अम० ना० लिं० पृ० २५७ श्लोकः २४) । काव्यम् = गद्यग्रन्थः, पद्यग्रन्थश्च । 'काव्यं ग्रन्थे, पुमाञ्शुक्रे, काव्या स्यात्पूतनाधियोः ।' इति––(मे० पृ० ११३ श्लोक० ११) । शेषं प्राग्वत् ।

धन–वदन–धनू–रक्ता–ऽन्न–रण–विवर–नयन–मांस–नामानि ।
जल––हल––जलकुसुम––विष––त्पत्तन–वन–लोह–पर्णाख्यैः ।

अस्य व्याख्या—

धनेति । धनादीनां नामानि जलादीनां नामभिः सह क्लीबलिङ्गानि स्युः । वदनम् = मुखम् । 'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।' इति––(अम० ना० लिं० पृ० २३३, श्लोकः ८९) रक्तम् = रुधिरम् । "खून" इति लोके । 'रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणि-तम् ।' इति—(अम० ना० लिं० पृ० २२३ श्लोकः ६४) । रणम् = युद्धम् । 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥ मृधमास्कन्दनं संख्यं समीकं सम्परायकम् । अस्त्रियां समरानी-करणाः कलहविग्रहौ ॥' इति––(अम० ना० लिं० पृ० २९८ श्लोकः १०३, १०४) । विवरम् = छिद्रम् । 'अथ कुहरं शुषिरं विवरं बिलम् ॥ छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ।' इति—(अम० ना० लिं० पृ० ८६ श्लोकः १, २) । जलकुसुमम् = कमलम् । 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम् । पङ्केरुहं तामरसं सारसं सरसीरुहम् ॥' इति—(अम०

ना० लिं० पृ० १०७ श्लोकः ४०) । वियत्=आकाशः । 'वियद्विष्णुपदं वा तु पुंस्याकाश-विहायसी ।' इति--(अम० ना० लिं० पृ० २९ श्लोकः २) । पत्तनम्=नगरम्, अधिष्ठानम् । 'पूः स्त्री, पुरीनगर्य्यौ वा, पत्तनं पुटभेदनम् । स्थानीयं निगमः' इति--(अम० ना० लिं० पृ० १९६ श्लोकः १) । 'पट्टन'मित्यपि । 'पट्टनं पुटभेदनम् ।' इति वाचस्पतिः' इति--(अम० सु० व्या० पृ० ११६ स्तं० २ पं० १४) । वनम्=अरण्यम् । "जंगल" इति लोके । 'अटव्यरण्यं विपिनं गहनं काननं वनम् ।' इति--(अम० ना० लिं० पृ० १२७ श्लोकः १) । लोहशब्देन सर्वं कंसादिकं गृह्यते । लोहम्=कालायसम्, अयः । 'लोहोऽस्त्री, शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी । अश्मसारः' इति--(अम० ना० लिं० पृ० ३३४ श्लोकः ९८) । कंसम्=ताम्ररङ्गमिश्रितधातुविशेषः, कांस्यम् । "कांसा" "कांसी" इति च लोके । रूप्यम्=रजतम् । "चाँदी" इति लोके । स्वर्णम्=सुवर्णम्, कनकम्, चामीकरम्, रुक्मम् । "सोना" इति लोके । कलधौतम्=हेमरूप्य । 'कलधौतं रूप्यहेम्नोः' इति--(अम० ना० लिं० पृ० ४१० श्लोकः ७६) । 'कलधौतं सुवर्णे स्याद्रजते च नपुंसकम् ।' इति--(मे० पृ० ६८ श्लोकः १९४) । ताम्रम्=शुल्बम् । "ताँबा" इति लोके । 'अथ ताम्रकम् । शुल्बं म्लेच्छमुखं ह्यष्ट-वरिष्टोन्दुम्बराणि च ।।' इति--(अम० ना० लिं० पृ० ३३४ श्लोकः ९७) । सीसम्=नागम्, सीसकम् । "सीसा" इति लोके । 'नागसीसकयोगेष्टवप्राणि' इति--(अम० ना० लिं० पृ० ३३७ श्लोकः १०५) । रङ्गम्=वङ्गम् । "राँगा" इति लोके । 'त्रपु पिच्चटम् ।। रङ्गवङ्गे' इति--(अम० ना० लिं० पृ० ३३७ श्लोकः १०५-६) । पर्णम्=पत्रम्, पलाशम् । "पत्ता" इति लोके । 'पत्रं पलाशं छदनं दलं पर्णं, छदः पुमान् ।' इति--(अम० ना० लिं० पृ० १३२ श्लोकः १४) । संग्रामः=आहवः । अलन्तत्वात् पुंलिङ्गता पूर्वविधिप्रतिषेधो न । शेषं प्रागवत् ।

फल[1]-लोपध-कृ-द्भावे समूह-भाव-क्रियासु यश्चा-ऽन्यः ।
प्रातिपदिका-ऽजिर-सुख-वट-करोट-भ-वृन्द-कृच्छाणि ।।

अस्य व्याख्या—

फलेति । फलमित्यर्थस्य ग्रहणम् । फलशब्दस्य नपुंसकत्वात् । ल उपधा यस्य स लोपधः । फलं च लोपधश्च कृच्चेति समाहारो द्वन्दः । भावे यः कृदिति भावशब्दः कृतैव सम्बध्यते । फल-लोपधाभ्यां अर्थस्य अघटनात् । स च तव्यादिर्युपर्य्यन्तः । "आद्भ्यो ण्वदरिद्राते" "शासुयुधि-

(१) पाणिनीयेऽपि--(फलजातिः) ।। फलजातिवाचो शब्दो नपुंसकं स्यात् । आमलक्याः फलम्=आमलकम् । आम्रस्य फलम्=आम्रम् ।। सि० कौ० पृ० ४०३ सू० १६३ ।

दृशिवृषिमृतां वा" (कातंत्र० ४.५.१०४,१०५) इति स कृदव्ययो भाववत् प्रकाशते। इति अस्य ग्रहणं न। समूहश्च भावश्च क्रिया च तासु यो विहितोऽन्यस्तद्धित इत्यर्थः। एते, प्रातिपदिकादयश्च नपुंसकलिङ्गा भवन्ति। फलवाचिनो यथा–बदर्य्याः फलं बदरम् = कर्कन्धूफलम्। "बेर" इति लोके। 'कोलं कुवलफेनिले ॥ सौवीरं बदरं घोण्टापि' इति—(अम० ना० लिं० पृ० १४१ श्लोकः ३६-७)। नालिकेरम् = नारिकेलफलम्। "नारियल" इति लोके। खर्जूरम् = खर्जूरफलम्। 'खर्जूरं रूप्यफलयोः, खर्जूरः कीटवृक्षयोः।' इति—(अने० सं० पृ० ६४ श्लोकः ५८२)। लोधं यथा—कुलम् = गोत्रम्, सजातीयगणः, तनुश्च। 'कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च तनौ क्लीबं, कण्टकार्य्योषधौ कुली।' इति--(मे० पृ० १४५ श्लोकः ९)। बलम् = सैन्यम्, सामर्थ्यम्, स्थौल्यं च। 'बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। बलो हलायुधे दैत्यभेदे बलिनि वायसे।' इति—(मे० पृ० १४७ श्लोकः ३७)। तालु = काकुदम्। "तालू" इति लोके। 'तालु तु काकुदम्।' इति--(अम० ना० लिं० पृ० २३४ श्लोकः ९१)। भावे कृद् यथा--समन्तात् कटो वर्त्तते, समन्तात् रावो वर्त्तते। "अभिविधौ भावे इनुण्।" योऽप्यण् तदन्तात् विहितः सोऽपि स्वार्थिकतया तल्लिङ्गं न जहाति। प्रातिपदिकम् शब्दविशेष संज्ञा। 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्', 'कृत्तद्धित समासा'श्चेति सूत्राभ्यां लक्षितं नाम। "प्रतिपदिभवम्"। ठक्प्रत्ययः। अर्थवदित्यस्य सूत्रस्यान्तरालापिकाज्ञानाय केनचित्प्रश्नः कृतः। 'धीरः कीदृग् वचो ब्रूते, को रोगी, कश्च नास्तिकः। कीदृक् चन्द्रं न पश्यन्ति तत्सूत्रं पाणिनेर्वद।' इति-- (श० चिं० पृ० ३१० स्तं० २ पं० २३, २४, २५)। वटम् = अपूपविशेषः। भम् = नक्षत्रम्। 'भं नक्षत्रे, गभस्तौ स्त्री, पुंसि स्याद् भृगुनन्दने। भवने च तथा भः स्याद् भ्रमरो भः प्रकीर्तितः।' इत्येकाक्षरः' इति--(अम० सु० व्या० पृ० ३७ स्तं० २ पं० १७,१८)। कृच्छ्रम् = कष्टम्, पापम्, सान्तपनं च। 'कृच्छ्रमंहसि। कष्टे सान्तपने' इति-- (अने० सं० पृ० ३४ श्लोकः ४१७)। अंहसि पापे यथा--'कृत्स्नानि कृच्छ्राणि रविर्लूनातु।' इत्यनेकार्थकैरवाकरकौमुदी' इति-- (अम० सु० व्या० टि० पृ० ९२ स्तं० १ पं० ४०)। ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु आकारान्तेभ्यो युर्भवति। अदरिद्रातेः। ईषत्पानः = किञ्चित्पानः, खड्गादेः संस्कार विशेषः। "थोड़ी पाण" इति लोके। ईषच्छासनः, ईषच्छासो वा = अल्पशासनः, अल्पशासयिता। इति। शे० प्रा०।

षष्ठ्यान्ता–त्संज्ञायां कन्था चो–शीनरेषु तत्पुरुषे।
आदा–वुपक्रमो–पज्ञे–स्वाम्यर्था–त्सभा–ऽराज्ञः ॥

अस्य व्याख्या—

षष्ठयन्तादिति। षष्ठयन्तात्परा कन्था तत्पुरुषे समासे उशीनरदेशे संज्ञायां विषये

नपुंसकलिङ्गे भवति । उपक्रमश्च उपज्ञा च उपक्रमोपज्ञे । गमकत्वाद् अल्पस्वरस्य परनिपातः । षष्ठचन्तात्परं उपक्रम उपज्ञा च तयोरादित्वे गम्यमाने तत्पुरुषे नपुंसकलिङ्गे भवतः। स्वाम्यर्थात्षष्ठचन्तात् राजवर्जितात् परा सभा तत्पुरुषे नपुंसकलिङ्ग इति । स्वामिसभम् = स्वामिनां सभा (तद्गृहं तत्संघो वा) । अराज्ञ इति किम्? राजसभा । (कथं 'नृपतिसभामगमत्' इति तु बाहुलकात्), नृपतिसभा = नृपतौ सभा । सप्तम्यन्तात् सभा । इति । शे० प्रा० ।

अमनुष्या–त्सभा–ऽशाला सेना–शाला–निशा वा स्युः ।
छाया च तथा नित्यं बाहुल्ये–ऽप्य–ऽव्यया–त्पन्थाः ॥

अस्य व्याख्या—

अमनुष्यादिति । मनुष्यादन्यस्मात् षष्ठचन्तात्परा सभा अशाला रूपा नपुंसकलिङ्गा भवन्ति । षष्ठ्यन्तात्पराः सेनादयश्च तत्पुरुषे विभाषया नपुंसकलिङ्गा भवेयुः । छाया च विभाषया भवेत् । बाहुल्येऽपि छाया नित्यं नपुंसकलिङ्गा भवति । अव्ययात्परः पन्थाः तत्पुरुषे नपुंसकलिङ्ग इति । मनुष्यसदृशग्रहणात् काष्ठसभा स्त्रीलिङ्गमेव । 'गोपालसभा = गोपालानां समूह इत्यर्थः । इह न भवति—अनाथसभा = अनाथकुटी इत्यर्थः । पूर्वपदस्यात्र बहुलत्वं गम्यते । अपथम्, उत्पथम् । तत्पुरुषे इति किम् ? सुपथा नगरी, उत्पथो देशः । शे० प्रा० ।

सुदिना–त्पुण्या–देका–च्चा–ऽह्नः संख्यापरो–ऽपि रात्रिश्च ।
गृह–शश–पूर्वे स्थूणो–र्णे च नपुंसकमिति समाप्तम् ॥'इति॥

अस्य व्याख्या—

सुदिनादिति । सुदिनशब्दात्पुण्यशब्दादेकशब्दाच्च परोऽह्न्शब्दः अत्प्रत्ययान्तः, संख्यापरोऽपि रात्रिशब्दः अत्प्रत्ययान्तः, नपुंसकलिङ्गो भवति । गृहं च शशश्च, तौ पूर्वौ ययोः स्थूणोर्णयोः इति गृहपूर्वा स्थूणा शशपूर्वा ऊर्णा च नपुंसकलिङ्गे भवतः । उदाहरणानि तु प्रागेवोक्तानि ।

अथेह यादवोऽपि संक्षेपतः कांश्चिन्नपुंसकलिङ्गवाचकशब्दानाह (वै० पृ० २९०-१ श्लोकः १५ तः २३ या०) ।

त्रान्त–द्व्यचका–सि–सु–स्नान्तं लोपधं युक्तयोपधम् ।
अम्बुपुष्पाणि च क्लीबे रेचकं त्व–ऽभयाफले ॥

अस्य व्याख्या—

त्रान्तेति। त्रोऽन्ते यस्य तत् त्रान्तम्, द्वौ अच्कौ स्वरौ यस्य तद् द्वयच्कम्, अस् च इस् च उस् च नश्च असिसुस्नाः। ते अन्ते यस्य तद् असिसुस्नान्तम्; त्रान्तं च द्वयच्कं च असिसुस्नान्तं चेति समाहारो द्वन्द्वः। लकार उपधा अन्त्यात्पूर्वो यस्य तद् लोपधम्, यकार उपधा अन्त्यात्पूर्वो यस्य तद् योपधम् तेन युक्तं युक्तयोपधम्। अम्बुपुष्पाणि जलपुष्पाणि, अभयाफले हरीतकीफले तु रेचकं च क्लीबे स्युः। एषामुदाहरणानि तु प्रागेवोक्तानि।

ब्रह्मोद्याद्या भावकृत्या–श्छन्दो–ऽणि त्रैष्टुभादयः।
स्मिताद्या भावनिष्ठान्ता कर्णजाहादि जाहचि ॥

अस्य व्याख्या—

ब्रह्मेति। भावे कृत्याः कृत्यप्रत्ययाः ब्रह्मोद्याद्याः, छन्दः छन्दोजातौ अणि अण्प्रत्येत्य त्रैष्टुभादयः, भावे निष्ठान्ताः स्मिताद्याः, जाहचि जाहच्प्रत्यये कर्णजहादि चैते नपुंसकलिङ्गा भवन्ति। कर्णजाहम् = कर्णमूलम्। 'तस्य पाकमूल०' इत्यादिना जाहच्प्रत्ययः स्यात्।

समूह–भाव–कर्मार्थ–तद्धिते वार्द्धकादयः।
सांराविणोपमानादि नोपान्तं भाव–संज्ञयोः ॥

अस्य व्याख्या—

समूहेति। समूहार्थे भावार्थे कर्मार्थे च तद्धिते तद्धितप्रत्यये वार्द्धकादयो नपुंसकलिङ्गा भवन्ति। वृद्धानां समूहो भावः कर्म वा 'वार्द्धकम्' इत्यादयः। भावे संज्ञायां च सांराविणोपमानादि नोपान्तं च नपुंसकलिङ्गा भवन्ति। एषामुदाहरणानि प्रागुक्तानि।

एक–द्वन्द्वा–ऽव्ययीभावाः स्यु–रितो–ऽकर्मधारये।
अनञ्–तत्पुरुषे शब्दाः कन्थो–शीनरनामसु ॥
यथा सौशमिकन्थं स्याद् बाहुल्ये तु समासभाक्।
छाया यथा खगच्छायं नृपा–ऽमर्त्यार्थिका–त्परा ॥
अराजः सभा भूभृत्सभं रक्ष सभं यथा।
न काष्ठादे–रशालार्था सैव दासी–सभं यथा ॥

एषां व्याख्या—

एकेति। यथेति। अराज इति च। एषामेकादिश्लोकानां व्याख्योदाहरणानि प्राग्वद्बोध्यानि।

उपज्ञो-पक्रमान्तं च तदादित्वे विवक्षिते ।
पाणिन्यु-पज्ञ-मित्यादि पथः संख्या-ऽव्यया-त्परः ॥
शशा-दूर्णा-गृहा-त्स्थूणा क्रिया-ऽव्यय-गुणानुगम् ।
एकत्वं चाऽस्य पुण्या-त्तु सुदिना-दप्य-हः परः ॥

अनयोर्व्याख्या—

उपज्ञेति । शाशदिति च । उभयो श्लोकयोर्व्याख्योदाहरणानि प्राग्वज्ज्ञेयानि । चन्द्रगोमिनो लिङ्गानुशासने तु 'शशोर्णं कारणं करण'मित्युक्तम् ।

कुटिलं गच्छती-त्यादि क्रियाणां तु विशेषणम् ।
नपुंसकं तु भद्रं स्व-रित्यव्ययविशेषम् ॥' इति ।

अस्य व्याख्या—

कुटिलमिति । क्रियाणां भ्वादिधातूनां अव्ययानां स्वरादिनिपातानां च यद् विशेषणं विशेष्यधर्मं तन्नपुंसकं नपुंसकलिङ्गं स्यात् । क्रियाविशेषणं यथा—कुटिलं गच्छतीत्यादि । अव्ययविशेषणं यथा—भद्रं स्वरित्यादि ।

इति नपुंसकलिङ्गानुशासनम् ॥

अथ पुंस्त्रीलिङ्गानुशासनम् ।

तत्रादौ शंखादीन् वस्त्रदशापर्य्यन्तान् पुंस्त्रीलिङ्गवाचकशब्दानाह हेमः— (अभि० सं० लिं० पृ० ६ श्लोकः ७५ तः ७९ या०) ।

पुं–स्त्री–लिङ्ग[1],–श्चतुर्दशे–ऽङ्के शङ्कु,–र्निरये च दुर्गतिः, ।
दोर्मूले कक्ष, आकरे गञ्जो, भूरुहि बाण–पिप्पलौ, ॥१॥
नाभिः प्राण्यङ्गके, प्रधि–र्नेमौ, क्वचन बलि,–र्गृहे कुटः, ।
श्रोण्यौ–षध्योः कटो, भ्रमो मोहे, पिण्डो वृन्द–गोलयोः, ॥२॥
भ–कनीनिकयो–स्तारो, भे–ऽश्लेष–हस्त–श्रवणाः, ।
कणः स्फुलिङ्गे लेशे च, वराटो रज्जु–शस्त्रयोः, ॥३॥
कुम्भः कलशौ, तरणिः समुद्रा–र्का–ऽशु–यष्टिषु, ।
भागधेयो राजदेये, मेरुजम्ब्वां सुदर्शनः, ॥४॥
करेणु––र्गज––हस्तिन्यो,––रल्याख्या––ऽपत्य[2]तद्धितः, ।
लाज–वस्त्रदशौ भूम्नी, त्याद्याः प्रत्ययभेदतः ॥५॥

अस्य व्याख्या—

पुमिति । नाभिरिति । भेति । कुम्भ इति । करेणुरिति च । एते शङ्खादयो वस्त्रदशान्ताः शब्दाः पुंस्त्रीलिङ्गा भवन्ति । एकदशशत—इत्यादिगणनायां चतुर्दशेऽङ्के शङ्कुः = संख्याविशेषः । शतादिकत्वाद् अस्य नपुंसकत्वं प्राप्तम् । कीलार्थस्य उदन्तत्वात् पुंस्त्वं सिद्धम् । 'शङ्कुः पत्रशिराजाले संख्याकीलकशम्भुषु । यादोऽस्त्रभेदयोर्मेढ्रे' इति—(अने० सं० पृ० ३ श्लोकः १८) । अयं शंकुः, इयं शंकुः इति । निरये नरके दुर्गतिः । अयं दुर्गतिः, इयं दुर्गतिः । 'निरयो दुर्गतिः स्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ९१ श्लोकः १) । अयं कक्षः, कक्षा = दोर्मूलम्, बाहुमूलम् । 'कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे ॥ स्पर्शा (र्द्धा) स्पदे, ना दोर्मूले कच्छवीरुत्तृणेषु, च ।' इति—(मे० पृ० १६६ श्लोकः ७, ८) । अयं गञ्जः, इयं

पाणिनीयेऽपि—(१) (स्त्रीपुंसयोः) ॥ अधिकारोऽयम् । सि० कौ० पृ० ४०३ सू० १७२ ।
पाणिनीयेऽपि–(२) (अपत्यतद्धिते) ॥ अयं–औपगवः, इयं–औपगवी । सि० कौ० पृ० ४०४ सू० १७६ ।

गञ्जा = आकारः, खनिः । 'गञ्जा खनौ सुरागृहे । गञ्जः स्यात्पुंसि रीढया, भाण्डागारे तु न स्त्रियाम् ।।' इति--(मे० पृ० ३० श्लोकः ८) । अयं बाणः, इयं बाणा = भूरुट्, वृक्ष-विशेषः, नीलझिण्टी । 'बाणः स्याद् गोस्तने दैत्यभेदे केवलकाण्डयोः । बाणा तु बाणमूले स्त्री, नीलझिण्टयां पुनर्द्वयोः ।।' इति--(मे० पृ० ४६ श्लोकः २७) । अयं पिप्पलः, इयं पिप्पली = भूरुट्, वृक्षविशेषः । "पीपल" इति लोके । कणा च । 'पिप्पलं सलिले वस्त्रच्छेदभेदे च, ना तरौ ।। निरर्गले पक्षिभेदे, कणायां पिप्पली मता ।' इति--(मे० पृ० १५२ श्लोकः १११-२) । अयं नाभिः, इयं नाभिः, नाभी = प्राण्यङ्गविशेषः, उदरावर्तः, तुन्दकूपी । "सूंडी" इति लोके । 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् ।। द्वयोः प्राणिप्रतीके स्यात्, स्त्रियां कस्तूरिकामदे ।' इति--(मे० पृ० १०६ श्लोकः ५, ६) । अयं प्रधिः, इयं प्रधिः = नेमिः, रथस्य चक्रान्तो भूमिस्पर्शिभागः । 'तस्यान्ते (चक्रान्ते) नेमिः स्त्री, स्यात्प्रधिः पुमान् ।' इति—(अम० ना० लिं० पृ० २८४ श्लोकः ५६) । क्वचन अयं बलिः, इयं बलिः = करः, उपहारः, प्राण्यङ्गजं च । 'करोपहारयोः पुंसि बलिः, प्राण्यङ्गजे स्त्रियाम् ।' इति--(अम० ना० लिं० पृ० ४३१ श्लोकः १९५) । अयं कुटः, इयं कुटिः = गृहम् । "घर" इति लोके । 'कुटः कोटे पुमानस्त्री घटे, स्त्रीपुंसयोर्गृहे ।।' इति—(मे० पृ० ३४ श्लोकः ६) । अयं कटः, इयं कटिः, कटी = श्रोणिः, औषधिश्च । 'कटः श्रोणौ द्वयोः पुंसि क(क) लिञ्जेऽतिशये श(शि) वे । समये गज-गण्डे च, पिप्पली(ल्यां) तु कटी मता ।' इति--(मे० पृ० ३३ श्लोकः ३, ४) । अयं भ्रमः, इयं भ्रमिः = मोहः, भ्रान्तिः । 'भ्रान्तिर्मिथ्यामतिर्भ्रमः ।।' इति--(अम० ना० लिं० पृ० ५६ श्लोकः ४) । 'भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दभ्रमणयोरपि ।' इति च—(मे० पृ० १०९ श्लोकः २०) । अयं पिण्डः, इयं पिण्डिः = वृन्दम्, गोलश्च । 'पिण्डो वृन्दे जपापुष्पे गोले बोलेऽङ्गह्लियोः । कबले, पिण्डं तु वैश्मैकदेशे जीवनायसोः । बले सान्द्रे, पिण्डचलाबूखजूर्य्यो-स्तगरेऽपि च ।' इति--(अने० सं० पृ० १२ श्लोकः १२४) । अयं तारः, इयं तारा = भम्, नक्षत्रम्, कनीनिका च । 'तारो वानरभिन्मुक्ताविशुद्ध्योः शुद्धमौक्तिके । ना, नक्षत्रेऽक्षिमध्ये च न ना, रूप्यं नपुंसकम् । स्त्री बुद्धदेवताभेदे बालिगीष्पतिभार्य्ययोः । त्रिलिङ्गोऽप्युच्चशब्दे च' इति--(मे० पृ० १२५-६ श्लोकः ४३-४) । अयं भः, इयं भा = अश्लेषः, अश्लेषा । हस्तः, हस्ता । श्रवणः, श्रवणा । 'हस्ता स्वाती श्रवणा अक्लीबे, मृगशिरा न पुंसि स्यात् । पुंसि पुनर्वसुपुष्यौ, मूलं त्वस्त्री, स्त्रियां शेषाः ।' इति--(श० चिं० पृ० १३२६ स्तं १ पं० ११-२-३-४) । अयं कणः, इयं कणा = स्फुलिङ्गः, लेशश्च । 'त्रिषु स्फुलिङ्गोऽग्निकणः' इति--(अम० ना० लिं० पृ० २४ श्लोकः ५७) । 'कणो धान्यांशलेशयोः । कणा जीरकपिप्पल्योः' इति—(अने० सं० पृ० १२ श्लोकः १३५) । अयं वराटः, इयं वराटिका = रज्जुः, शस्त्रं च । 'वराटकः पद्मबीजकोशे रज्जौ कपर्दके ।' इति--(मे० पृ० १६ श्लोकः २०२) । अयं कुम्भः,

इयं कुम्भी = कलशिः, घटी, गर्गरी । 'कुम्भः स्यात्कुम्भकर्णस्य सुते वेश्यापतौ घटे । राशिभेदे द्विपाङ्गे, च कुम्भं त्रिवृतिगुग्गुले ।' इति--(वि० प्र० पृ० १०८ श्लोकः १६)। अयं तरणिः, इयं तरणिः = सूर्यः, समुद्रः, किरणः, यष्टिश्च । 'तरणिस्तरणेऽर्केऽशौ कुमार्य्योषधिनौकयोः । यष्टावब्धौ' इति--(अने० सं० पृ० ६६ श्लोकः २१५) । अयं भागधेयः, इयं भागधेया = राजदेयः, करः, राजग्राह्यभागः, राजस्वम् । 'भागधेयः पुनः करे ॥ दायादे, भागधेयं तु भाग्ये' इति—(अने० सं० पृ० १३० श्लोकः २३४-५) । अयं सुदर्शनः इयं, सुदर्शनी, सुदर्शना = विष्णोश्चक्रम्, अमरावती, ओषधिप्रभेदश्च । 'अथ सुदर्शनः ॥ विष्णोश्चक्रे, सुदर्शन्यमरावत्यां, सुदर्शना । आज्ञायामौषधीभेदे मरुजम्ब्वां पुरीभिदि ॥' इति--(अने० सं० पृ० १२८ श्लोकः २१०-१) । अयं करेणुः, इयं करेणुः = गजः, हस्तिनी च । 'करेणुर्गजहस्तिन्योः कर्णिकारतरावपि ।' इति--(अने० सं० पृ० ६५ श्लोकः २०५) । अल्पादेव्या भ्रमरस्य नामानि अपत्यतद्धितः पुंस्त्रियोः स्युः । भ्रमरः, भ्रमरी । भृङ्गः, भृङ्गी । प्रत्ययभेदतो लाजवस्त्रदशौ भूम्नि बहुवचने पुंस्त्रीलिङ्गौ भवतः । इमे लाजाः, इमा लाजाः = अक्षताः । 'लाजः स्यादार्द्रतण्डुले । लाजास्तु भृष्टधान्ये स्युर्लाजं पुनरुशीरके ॥' इति--(अने० सं० पृ० ८ श्लोकः ७६) । 'लाजः स्यादार्द्रतण्डुले । नपुंसकमुशीरेऽथ स्त्रियां पुम्भूम्नि चाक्षते ।' इति--(मे० पृ० ३० श्लोकः १४) 'लाजाः पुम्भूम्नि चाक्षताः ।' इति च--(अम० ना० लिं० पृ० ३१८ श्लोकः ४७) । केचित्तु--अखडतण्डुला अक्षताः—इत्याहुः । लाजाः भृष्टधान्यम् । उक्तं च--'एते च व्रीहयो भृष्टास्ते लाजा इति संज्ञिताः । यवादयश्च ये भृष्टा स्ते धानाः परिकीर्तिताः ।' इति--(श० चिं० पृ० १५१ स्तं० १ पं० ११-२-३) । तथा च प्रयोगः—'अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ।' इति रघुः (२।१०) । इमे वस्त्रदशाः, इमा वस्त्रदशाः = वस्त्रान्तः । 'दशाऽवस्थादीपवर्त्त्यो र्वस्त्रान्ते भूम्नि योषिति ।' इति--(मे० पृ० १६३ श्लोकः ८) ।

अथेदानीं क्रमेण कान्तादीन् सान्तपर्य्यन्तान् पुंस्त्रीलिङ्गवाचकशब्दानाह हेमः--(अभि० सं० लिं० पृ० ६ श्लोकः ७५ तः ८६ या०) ।

शौण्डिक–चर्मप्रसेवकौ सल्लक–मल्लक–वृश्चिका अपि ।
शल्यक–घुटिकौ पिपीलिक–श्चुलुक–हुडुक्क–तुरष्क–तिन्दुकाः ॥६॥
शुङ्गोऽथ लञ्ज–भुज–शाट–सटाः सृपाटः
कीटः कुट–स्फट–घटा वरटः किलाटः ।
चोट--श्चपेट--फट शुण्ड--गुडाः सशोणाः
स्युर्वारिपर्ण–फण–गर्त्त–रथा–ऽजमोदाः ॥७॥

विधकूप–कलम्ब–जित्य–वर्द्धाः सहचर–मुद्गर–नालिकेर–हारा।
बहुकर–कृसरौ कुठार–शारौ वल्लर–शफर–मसूर–कील–रालाः ॥८॥
पटोलः कम्बलो भल्लौ दंशौ गण्डूष–वेतसौ ।
लालसो रभसः'··· ··· ···इति ।

एषां व्याख्या—

शौण्डिकेति । शुङ्ग इति । विधेति । पटोल इति च । शोणेन सहिताः शौण्डिकादयो रभसान्ताः शब्दाश्चैते पुंस्त्रीलिङ्गा भवन्ति । शौण्डिकश्च चर्मप्रसेवकश्चेतीतरेतरयोगो द्वन्द्वः । अयं शौण्डिकः, इयं शौण्डिकी = "कलवार" "कलवारिन" इति च लोके । अयं चर्मप्रसेवकः, इयं चर्मप्रसेविका = भस्त्रा, अग्निसन्दीपनार्थं चर्मनिर्मितं यंत्रम् । "भाती" "धोंकनी" इति च लोके । 'भस्त्रा चर्मप्रसेविका ।' इति–– (श० र० स० पृ० ५२ पं० ११) । अयं सल्लकः, इयं सल्लकी = वृक्षविशेषः, पशुश्च । 'गजभक्ष्या तु सुवहा सुरभी रसा ॥ महेरणा कुन्दुरुकी सल्लकी ह्लादिनीति च ।' इति–– (अम० ना० लिं० पृ० १७० श्लोकः १२३-४) । 'सल्लकी सिल्लकी ह्लादा' इति रुद्रः' इति—(अम० सु० व्या० पृ० १७० स्तं० १ पं० २२) । 'शल्लकी'त्यपि । 'श्वाविद्द्रुभेदौ शल्लक्यौ' इति रभसः' इति—(अम० ना० लिं० पृ० १७० स्तं० १ प० २२) । अयं मल्लकः, इयं मल्लिका = दीपाधारः, तैलाद्याधारविशेषः, कौशिका, नारिकेलफलनिर्मितचषकश्च । "नरेली" इति लोके । अयं वृश्चिकः, इयं वृश्चिकी = 'क्षुद्रजन्तुविशेषः । 'वृश्चिकः शूककीटे स्याद्राश्यौषध द्रुणेस्वपि ।' इति—(श० र० स० पृ० २८ पं० ८) । अयं शल्यकः, इयं शल्यकी = श्वावित्सदृशः स्थूल-लोमवान् प्राणिविशेषः । अयं घुटिकः, इयं घुटिका = पादग्रन्थः, गुल्फः । "टकुना" इति लोके । तद्ग्रन्थी घुटिके गुल्फौ' इति—(अम० ना० लिं० पृ० २२७ श्लोकः ७२) । अयं पिपीलिकः, इयं पिपीलिका = कीटभेदः । "चींटी" "चींटा" इति च लोके । 'पिपीलिका तु हारी स्यात्' इति—(त्रि० शे० पृ० २२८ श्लोकः २७) । 'शनैर्याति पिपीलिकः' इति पुंस्त्वमपि इति स्वामी । अयं चुलुकः = घनजम्बाल. । 'चुलुको घनजम्बालः' इति––(त्रि० शे० पृ० २७५ श्लोकः ५) । इयं चुलुकी = शिशुमाराकृतिमत्स्यविशेषः । अयं हुडुक्कः, इयं हुडुक्का = वाद्यभेदः, मदमत्तदात्यूहपक्षी च । 'हुडुक्को वाद्यभेदे स्यान्मत्तदात्यूहपक्षिणि ।' इति––(श० र० स० पृ० ३० पं० १७) । अयं तुरुष्कः, इयं तुरुष्की = म्लेच्छजातिविशेषः । 'तुरुष्को देशभेदे स्यादपि जात्यन्तरे मत. । तुरुष्कः सिह्लके ताम्रे तथा स्यात्पिण्डके क्वचित् ।' इति–– (श० र० स० पृ० १८ पं० ३, ४) । अयं तिन्दुकः, इयं तिन्दुकिः तिन्दुकी = वृक्षभेदः कालस्कन्ध ।

'तिन्दुकः स्फूर्जकः कालस्कन्धश्च शितिसारके ।' इति–(अम०ना० लिं० पृ० १५१ श्लोकः ३८)। शुङ्गः = वटः,आम्रातकः, पर्कटी च । 'शुङ्गो वटाम्रातकयोः,पर्कट्यामपि चास्त्रियाम् ।' इति–(मे० पृ०२३ श्लोकः २५)। शुङ्गा = नवपल्लवकोशिका । 'शुङ्गाऽस्य (पत्रस्य) कोशिका' इति–(वै०पृ० ४६ श्लोकः १७) । शुङ्गी = आम्रातः, वटः, प्लक्षश्च । 'शुंग्याम्राते वटे प्लक्षे' इति–(अने० सं० पृ० ६ श्लोकः ५०) । 'शुङ्गीवटाम्रातकयोः पर्कट्यामपि विश्रुता ।' इति—(वि० प्र० पृ० २६ श्लोकः २७) । लञ्जः = पङ्गुः, कच्छश्च । 'लञ्जः स्यात्पङ्गुकच्छयोः ।' इति—(हा० व० पृ० ४०८ श्लोकः २५५) । लञ्जा, लञ्जिका = वेश्या भुजष्या वा । 'लञ्जा-स्याद्वारयोषिति ।' इति । 'भुजिष्यायां तु लञ्जिका ।' इति च—(श० र० स० पृ० ७७ श्लोकः ९) । 'लञ्जिनी तु स्याल्लञ्जिका कलकूजिका ' इति च—(त्रि० शे० पृ० २८९ श्लोकः ५) । भुजः, भुजा = बाहुः, करश्च । 'अथो भुजा द्वयोर्बाहौ करे' इति–(मे० पृ० ३० श्लोकः १२) । शाटः, शाटिका, शाटी = पटभेदः, चोली । 'चोली तु शाटिका शाटः' इति—(वै० पृ० १६९ श्लोकः १२७) । सटः, सटा = जटा, सिंहकेसरश्च । 'सटा जटाकेसरयोः' इति—(मे० पृ० ३५ श्लोकः २९) । 'जटा जटिर्जटी जूटो जुटकं तु सटं सटा । कौटीरं जुटकं हस्तं शिखायां व्रतिनामपि ।' इति शब्दरत्नावली' इति—(श० चिं० पृ० ६९४ स्तं० २ पं० १५ तः) । सृपाटः, सृपाटी = मानं, परिमाणभेदः, रक्तधारा च । कीटः, कीटी = कृमिभ्यः किञ्चित्स्थूलं क्षुद्रजन्तुमात्रम् । कुटः कुटिः = वेश्म, गृहम् । ''घर'' इति लोके । 'कुटः कोटे पुमान्–स्त्री घटे, स्त्रीपुंसयोर्गृहे ।' इति—(मे० पृ० ३४ श्लोकः ६) । शाला, स्वल्पगृहं चेत्यन्ये । स्फटः, स्फटा = फणा । 'स्फटायां तु फणा द्वयोः ।' इति—(अम० ना० लिं० पृ० ९० श्लोकः ९) । घटः, घटी = कुम्भः, कलसः, परिमाणभेदश्च । 'कलसस्तु त्रिषु, द्वयोः । घटः, कुटनिपावस्त्री' इति—(अम० ना० लिं० पृ० ३१२ श्लोकः ३१-२) । 'घटा घटने गजसंहतौ । गोष्ठ्यां, घटस्त्विभशिरः कूटे समाधिकुम्भयोः ॥' इति च—(अने० सं० पृ० ९ श्लोकः ८९) । स्त्रियां घटी । वरटः = हंसीपतिः, गन्धोली च । वरटा = गन्धोली । वरटा, वरटी = हंसी । 'गन्धोली वरटा द्वयोः ।' इति—(अम० ना० लिं० पृ० १९७ श्लोकः २७) । ''वरडे'' इति लोके । 'वरटा वरटी हंस्योस्तत्पतौ वरटः स्मृतः ।' इति तारपालः' इति—(अम० सु० व्या० पृ० १९७ स्तं० २ पं० ११-२) । 'हंसस्य योषिद्वरटा' इति च—(अम० ना० लिं० पृ० १९६ श्लोकः २५) । किलाटः, किलाटी = क्षीरविकृतिः, कूर्चिका, दधिकूर्चिकातक्रकूर्चि-कयोः पिण्डश्च । 'किलाटः शोषितक्षीरपिण्डः सूरिभिरिष्यते ।' इति—(हा० व० पृ० ३९६ श्लोकः ५९) । 'नष्ट दुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः ।' इति कोशान्तरं च' इति—(श० चिं० पृ० ६०६ स्तं० १ पं० ९, १०) चोटः = श्मश्रु । 'श्मश्रु तु व्यञ्जनं चोटः' इति—(वै० पृ० १८१ श्लोकः १०३) । चोटी = शाटी । 'शाटी चोटी' इति—(अभि० सं० अभि० चिं० पृ० २८ श्लोकः ६७५) । शोणेन सह वर्त्तन्ते इति सशोणाः । चपेटश्च फटश्च

शुण्डश्च गुण्डश्चेतीतरेतरयोगो द्वन्द्वः। चपेटः, चपेटा, चपेटिका = विस्तृताङ्गुलिपाणिः, प्रतलः। "थप्पड़" "झापड़" "चपेटा" इति च लोके। 'पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ।' इति--(अम० ना० लिं० पृ० २३२ श्लोकः ८४)। 'खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति भाष्यं च' इति—(श० चिं० पृ० ९०५ स्तं० १ पं० २७--८--९)। फटः, फटा = फणा। 'फणा फटे' इति। 'फटा फणायां दम्भे च' इति च—(श० र० स० पृ० ८५ पं० १९)। 'स्फटायां तु फणा द्वयोः।' इति। 'द्वे अपि स्त्रीपुंसयोः' इति टीका इति च--(अम० ना० लिं० पृ० ९० श्लोकः ९)। शुण्डः = मदनिर्झरः। शुण्डा = जलहस्तिनी, मदिरा, करिहस्तश्च। 'शुण्डापि जलहस्तिन्यां मदिराकरिहस्तयोः। नलिन्यां वारयोषायां, शुण्डस्तु मदनिर्झरे।' इति--(वि० प्र० पृ० ४५ श्लोकः २४)। गुडः = इक्षुविकारः, हस्तिसन्नाह, गोलकश्च। गुडा = गुडिका, स्नुही च। 'गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्यां च कथिता गुडिकायां च योषिति।' इति—(मे० पृ० ४१ श्लोकः १०)। शोणः = नदविशेषः, अरुणश्च। शोणा शोणी = शोणवर्णयुक्ता, रक्ता, रक्तोत्पलवर्णयुक्ता स्त्री। 'शोणो नदेऽरुणे' इति--(त्रि० शे० पृ० ३३४ श्लोकः १४०)। वारिपर्णश्च। फणश्च गर्तश्च रथश्च अजमोदश्चेतीतरेतरयोगो द्वन्द्वः। वारिपर्णः = कुम्भीकः। वारिपर्णिका, वारिपर्णी = कुम्भिका, जलकुम्भिका, खमूली। "पुरइन" इति लोके। 'वारिपर्णी तु कुम्भिका।' इति। 'कुम्भीको वारिपर्णः स्यात्' इत्येके पठन्ति' इति—(अम० ना० लिं० पृ० १०७ श्लोकः ३८)। फणः, फणा = स्फटा "फण" इति लोके। 'स्फटायां तु फणा द्वयोः।' इति--(अम० ना० लिं० पृ० ९० श्लोकः ९)। गर्त्तः, गर्त्ता = अवटः, भूरन्ध्रम्। "गढा" इति लोके। 'अथ गर्त्तः स्यादवटे च कुकुन्दरे। गर्त्तस्त्रिगर्त्तभेदे स्यात्' इति—(श० र० स० पृ० ८७ पं० १२)। रथः = स्यन्दनः, वेतसश्च। रथिका = क्षुद्ररथः। रथी = शकटी। "मज्झोली" इति लोके। 'रथस्तु स्यन्दने पादे शरीरे वेतसद्रुमे।' इति—(अने० सं० पृ० १९ श्लोकः २२४)। 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च।' इति च-(मे० पृ० ७२ श्लोकः १२)। अजमोदः, अजमोदा = उग्रगन्धा। 'अजमोदा तूग्रगन्धा' इति—(अम० ना० लिं० पृ० १७७ श्लोकः १४५)। विधः, विधा = प्रकारः, गजान्नम्, ऋद्धिश्च। 'विधा गजान्ने ऋद्धौ च प्रकारे वेतने विधौ।' इति—(मे० पृ० ८० श्लोकः १७)। कूपः = जलाधारः, उदपानः। कूपिका = अम्भोगतोपलः, जलमध्यस्थितपर्वतादिः। कूपी = पात्रविशेषः। 'कूपः कूपकमृन्माने गर्त्तान्धु (म्बु) गुणवृक्षके।' इति-(मे० पृ० १०२ श्लोकः ३)। कलम्बः = कदम्बः, बाणश्च। कलम्बी = शाकभेदः। 'कलम्बी शाकभेदेऽपि (स्यात्) कदम्बशरयोः पुमान्।' इति—(मे० पृ० १०५ श्लोकः ६)। जित्यः, जित्या = हलिः, बृहद्धलम्, कृष्टसमीकरणार्थं स्थूलकाष्ठम्। वद्ध्रः, वद्ध्री = नद्ध्री, वरत्रा, चर्मरज्जुः। "तसमा" "जेर बन्द" इति च लोके। "चर्म्मबन्धनी वा"। 'नद्ध्री वद्ध्री वरत्रा

स्यात्' इति— (अम० ना० लिं० पृ० ३४८ श्लोकः ३१)। सहचरः, सहचरी=पीतझिण्टी। 'भवेत्सहचरो झिण्ट्यां द्वयो,-रनुचरे त्रिषु।' इति—(मे० पृ० १४४ श्लोकः २९९)। 'पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वयोः।' इति च--(अम० ना० लि० पृ० १५४ श्लोकः ७५)। मुद्गर, मुद्गरा, मुद्गरी=लोष्टादिभेदनम्। 'मुद्गरं कालिकाभेदे, पुंसि लोष्टादिभेदने।' इति–(मे० पृ० १३७ श्लोकः २०४)। नालिकेरः, नालिकेरी=नारिकेलः, लाङ्गली। ''नारियल'' इति लोके। ''नालिकेरस्तु लाङ्गली।' इति— (अम० ना० लिं० पृ० १८५ श्लोकः १६८)। हारः, हारा=मुक्तावलिः, मुक्तादाम, संग्रामश्च। 'हारो मुक्तावलौ युधि।' इति-- (मे० पृ० १३० श्लोकः १००)। 'क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्। क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः।' इति च व्याडिशुभाङ्कौ' इति—(अम० सु० व्या० पृ० २०५ स्तं० १ पं० २४-५)। हारी=मौक्तिकम्। 'मुक्ता मुक्ताफलं शुक्तिबीजं हारी च मौक्तिकम्।' इति शब्दरत्नावली' इति---(श० चिं० पृ० १०१० स्तं० १ पं० १७-८)। बहुकरश्च कृसरश्चेतीतरेतरयोगो द्वन्द्वः। बहुकरः=वक्रग्रीवः, उष्ट्रः। बहुकरी=उष्ट्रभार्या। कृसरः, कृसरा=तुल्यतिलान्नम, द्विदलमिश्रितौदनम्। ''खिचडी'' इति लोके। 'तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते।' इति कोशान्तरम्' इति—(श० चिं० पृ० ६७१ स्तं० २ पं० ११-२)। 'कृशरा' इत्यपि। 'कृशराऽपि तिलौदने॥' इति—(हा० व० पृ० ४०४ श्लोकः २६९) 'कृश(स)रा किशराऽपि च।' इति--(श० भे० प्र० पृ० ५ श्लोकः २१)। कुठारश्च शारश्चेतीतरेतरयोगो द्वन्द्वः। कुठारः, कुठारी=परशु,स्वधितिः। ''कुल्हाड़ा'' ''कुल्हाड़ी'' ''फर्सा'' ''फर्सी'' इति च लोके। ''द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।' इति—(अम० ना० लिं० पृ० २९४ श्लोकः ९२)। 'कुठारः परशौ मतः।' इति—(श० र० स० पृ० २६८ श्लोकः १)। 'कुठारः स्त्री च स्वधितिः परशुश्च परश्वधः। कुटाटङ्कः पर्शुः' इति रभसः' इति—(अम० सु० व्या० पृ० २९४ स्तं० २ पं० ४१-२)। शारः, शारी=अक्षोपकरणम्, द्यूतसाधनम्, खेलनी। ''गुटिका'' ''गोट'' ''सारि'' इति च लोके। वातश्च। 'शारिर्नाऽक्षोपकरणे, स्त्रियां शकुनिकान्तरे'। शारस्तु शबले वाच्यलिङ्गो, ना समीरणे। अक्षोपकरणे चापि, क्लीबं ज्ञानेऽपि वारिणि।' इति---(श० र० स० पृ० २६१ श्लोकः ३)। वल्लरश्च शफरश्च मसूरश्च कीलश्च रालश्चेतीतरेतरयोगो द्वन्द्वः। वल्लरः= शाद्वलम्, निर्झरस्थानम्, कुञ्जश्च। वल्लरिः। ङीषि दीर्घान्तेऽपि। वल्लरी=मञ्जरिः, तुलस्यादेरभिनवोद्भिद्। 'वल्लरः शाद्वले प्रोक्तो निर्झरस्थान-कुञ्जयोः। बिल्वक्षेत्रे च, मञ्जर्यां वल्लरीति प्रचक्षते।' इति—(श० र० स० पृ० २७९ पं० ५)। तथा च प्रयोगः—'व्यवृणुत वेल्लितबाहुवल्लरीका।' इति माघः' इति---(अम० सु० व्या० टि० पृ० १३२ स्तं० १ पं० ३९)। शफरः, शफरी=मत्स्यभेदः। 'शफरी तु द्वयोर्मीने' इति--(श० र० स० पृ० २८१ पं० ५)। मसूरः, मसूरा=धान्यविशेषः वेश्याप्रभेदश्च। 'मसूरा

मसुरा च स्याद् व्रीहिवेश्याप्रभेदयोः । मसूरो मसुरश्च द्वावेतौ चापि तयोर्मतौ ।' इति--(श० र० स० पृ० २७८ पं० ३, ४) । कीलः = शङ्कुः, अग्निशिखा च । 'शङ्कावपि द्वयोः कीलः' इति—(अम० ना० लिं० पृ० ४३१ श्लोकः १६७) 'कीलो लेशे, द्वयोः स्तम्भज्वालाकफोणिशङ्कुषु ।' इति—(मे० पृ० १४५ श्लोकः ८) । 'कीलः कफोणिकाघाते स्थाणौ च ज्वलनार्चिषि ।' इति च धरणिः' इति--(अम० सु० व्या० पृ० ४३१ स्तं० २ पं० १८) । कीला = कीलः, रतौ प्रतिहति-विशेषः । यदाह वात्स्यायनः—'कीला उरसी कर्त्तरी शिरसि विद्धा कपोलयोः ।' इति । 'कीलोऽग्नितेजसि । कफोणिस्तम्भयोः शङ्कौ कीला रतहतावपि ।' इति च—(अने० सं० पृ० ३९ श्लोकः ४६१) । रालः, राला = यक्षधूपः । 'अरालः सर्जवक्रयोः ।' इति । 'राल' सर्वरसोऽरालो धूपको वह्निवल्लभः ।' इति च रभसः' इति—(अम० सु० व्या० पृ० २४६ स्तं० २ पं० ७, ८) । 'रालस्तु शालनिर्यासस्तथा सर्जरसः स्मृतः । देवधूपो यक्षधूपस्तथा सर्वरसश्च सः ।' इति च—(भा० प्र० पृ० १७४ श्लोकः ४६)। पटोलः—औषधिविशेषः, कर्कच्छदः, तिक्तकः । "परवल" "पलवल" इति च लोके । पटोला, पटोलिका, पटोली = ज्यौत्स्नी । "चचेंडा" इति लोके । 'पटोलं वस्त्रभेदे, नौषधौ, ज्यौत्स्न्यां तु योषिति ।' इति—(मे० पृ० १५२ श्लोकः १०६) । 'ज्योत्स्नायां तु पटोला स्यात्पटोलं वस्त्रभिद्यपि ।' इति च--(श० र० स० पृ० ३०६ पं० १७) । कम्बलः = नागराजः । कम्बली = नागराजभार्या । 'कम्बलः क्रमिसास्नयोः । नागप्रभेदे प्रावारवैकक्ष्ये, कम्बलं जले ।' इति--(अने० सं० पृ० १०० श्लोकः ६६९) । भल्लः = ऋक्षः । भल्लिका, भल्ली = भल्लातखी । "भिलावा" इति लोके । 'भल्लः स्यात्पुंसि भल्लूके, शास्त्रभेदे तु न द्वयोः । भल्लातक्यां स्त्रियां भल्ली ।' इति—(मे० पृ० १४८ श्लोक. ४२) । दंशः = वनमक्षिका । "डांस" इति लोके । दंशी = क्षुद्रदंशः, दंशभार्या । "मशडू" इति लोके । 'दंशो वर्मणि मर्मणि । दोषे वनमक्षिकायां खण्डने भुजगक्षते ॥' इति--(अने० सं० पृ० ४५ श्लोकः ५६१) । गण्डूषश्च वेतसश्चेतीतरेतरयोगो द्वन्द्वः । गण्डूषः = मुखपूर्तिः, मुखपूरणतोयम्, इभशुण्डाग्रम् । गण्डूषा = उन्नतनाभिः, मुखपूर्तिश्च। 'गण्डूषो मुखपूर्तौ स्याद् गजहस्ताङ्गुलावपि । प्रसृतया प्रमितेऽपि स्यात् इति—(अने० सं० पृ० १०८ श्लोकः ७७५-६) । वेतसः, वेतसी = लताविशेषः, अभ्रपुष्पः, वानीरः । "वेत" इति लोके । 'अथ वेतसे ॥ रथाभ्रपुष्पविदुलशीतवानीरवञ्जुलाः ।' इति--(अम० ना० लिं० पृ० १३८ श्लोकः २९, ३०) । लालसः, लालसा = औत्सुक्यम्, तृष्णा च । 'लालसौत्सुक्यतृष्णातिरेकयाच्ञासु च द्वयोः ।' इति--(मे० पृ० १७२ श्लोकः ३४) । रभसः, रभसा = वेगः, हर्षः, विषं च । 'हर्षे वेगे च रभसः ।' इति--(श० र० स० पृ० ३३७ पं० १९) । 'रभसो विषवेगयोः ।' इति च-(वै० पृ० २४४ श्लोकः ६३) । स्त्रीत्वे तु टाबन्तः । 'उत्कण्ठशटवराटकरभगाः स्त्रीत्वे तु टाबन्ताः ॥' इति—(त्रि० शे० पृ० ३९३ श्लोकः १७) ।

अथेदानीं ह्रस्वेकारान्तान्, यथालाभं ङ्यन्तानपि उकारान्तान्, ऐकारान्तं, ओकारान्तं,

अकारान्तं च पुंस्त्रीलिङ्गवाचकशब्दानाह हेमः--(अभि० सं० लिं० पृ० ६ श्लोकः ८३ तः ८६ या०)।

.. ..र्वात–वितस्ति–कुटय–स्त्रुटिः ॥९॥
ऊर्मि[1]–शम्यौ रत्न्य–ऽरत्नी अवीचि–
कव्य–ऽण्या–ऽऽणि–श्रेणयः श्रोण्य[2]–ऽरण्यौ[3]।
पार्ष्णि–शल्यौ शाल्मलि[4]–र्यष्टि[5]–मुष्टि[6]
योनी[7]–मुन्यौ–स्वाति–गव्यूति–वस्त्यः[8] ॥१०॥
मेथि–र्मेधि–मशी[9] मषी–षुधी[10] ऋष्टिः पाटलि[11]–जाटली।
पृश्नि–स्तिथ्यऽशनी[12] मणिः[13] सृणि–र्मौलिः केलि–हली–मरीचयः[14]॥११॥
हन्वाऽऽखू कर्कन्धु[15]–सिन्धु–मृत्यु[16]–मन्वऽवट्वे–र्वारू–रु।
कन्दुः काकुः किष्कु[17]–र्बाहु[18]–गवेधू रा–गौ–र्मः ॥१२॥

पाणिनीयेऽपि--(१, २, ७) (श्रोणियोन्यूर्मयः पुंसि च) अयं श्रोणिः, इयं श्रोणिः=कटिः। अयं योनिः, इयं योनिः=भगम्, आकरः, कारणं च। अयं ऊर्मिः, इयं उर्मिः=स्वल्पतरङ्गः। सि० कौ० पृ० ३९७ सू० ८।

(३, १२) (अशनिभरण्यरणयः पुंसि च)॥ अयमियं वा अशनिः=विद्युत्, पविश्च। अयमियं वा भरणिः=नक्षत्रविशेषः। अयमियं वा अरणिः=निर्मन्थ्यदारु। सि० कौ० पृ० सू० ।

(४, ५, ६, ८, ९, ११, १४) (गोमणियष्टिमुष्टिपाटलिबस्तिशाल्मलित्रुटिमसिमरीचयः)॥ अयं गौः बलीवर्दः, इयं गौः=सौरभेयी। अयमियं वा मणिः=अश्मजातिः, रत्नम्। अयमियं वा यष्टिः=हारलता, भार्गी च। अयमियं वा मुष्टिः=बद्धपाणिः, पलपरिमाणं च। अयमियं वा पाटलिः=पाटला, पुष्पवृक्षः। अयमियं वा बस्तिः=नाभेरधोभागः, नाभिलिङ्गयोरन्तरम्। अयमियं वा शाल्मलिः=स्थिरायुः, मोचा। अयमियं वा त्रुटिः=कालमानम्, लवद्वयम्। अयमियं वा मसिः(शिः)=लिपिप्रयोजना। अयमियं वा मरीचिः=किरणः। सि० कौ० पृ० ४०३ सू० १७३।

(१०) (इषुधिः स्त्री च)॥ इषुधिशब्दः स्त्रियां पुंसि च। अयमियं वा इषुधिः=इषूणां स्थानम्, तूणीरः। सि० कौ० पृ० ३९९ सू० ४२।

(१५, १६, १७) (मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः)॥ अयमियं वा मृत्युः=मरणम्, पञ्चता। अयमियं वा सीधुः=आसवः। अयमियं वा कर्कन्धुः=बदरीवृक्षः। अयमियं वा किष्कुः=वितस्तिः। अयमियं वा कण्डुः=कण्डूया, खर्जूः। अयमियं वा रेणुः=धूलिः। सि० कौ० पृ० ४०३ सू० १७४।

(१८) (इषुबाहू स्त्रियां च)॥ चात्पुंसि। अयमियं वा इषुः=बाणः। अयमियं वा बाहुः=भुजः। सि० कौ० पृ० ३९९ सू० ४६।

तत्र विशेषः–(समासे रज्जुः पुंसि च)॥ चात्स्त्रियाम्। अयमियं वा रज्जुः=बन्धनसाधनवस्तु। उदाहरणम्—कर्कटरज्जुना, कर्कटरज्ज्वा। सि० कौ० पृ० ३९९ सू० ५३।

अस्य व्याख्या—

वर्त्तीति । ऊर्मीति । मेथीति । हन्विति च । एते वर्त्यादयो मपर्य्यन्ताः शब्दाः पुंस्त्रीलिङ्गाः स्युः । वर्तिश्च वितस्तिश्च कुटिश्चेतीतरेतरयोगो द्वन्द्वः । अयं वर्तिः, इयं वर्त्तिः = लेखः, वटिकाश्च । 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः ।' इति—(मे० पृ० ५८ श्लोकः ५५) । अयं वितस्तिः, इयं वितस्तिः = प्रमाणविशेषः, द्वादशाङ्गुलप्रमाणम् ।। "एक बित्ता" "एक बालिस्त" इति च लोके । 'अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ।' इति—(अम० ना० लिं० पृ० २३१ श्लोकः १४) । साहचर्य्याद्वितस्तिः पुंसि । स्त्रियामिति सुभूतिः । तेन पुंस्त्रियोर्वितस्तिः । 'ततोऽङ्गुष्ठकनिष्ठाभ्यां वितस्तिर्द्वादशाङ्गुलः ।' इति—(प० र० मा० पृ० ७२ पं० २) । कुटिः, कुटी = गृहम् । 'वासः, कुटी द्वयोः, शाला' इति—(अम० ना० लिं० पृ० ११८ श्लोकः ६) । 'स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदास्यां च मु(सु)रायां चित्रगुच्छके ।' इति च—(मे० पृ० ३४ श्लोकः ७) । अयं त्रुटिः, इयं त्रुटिः = कालपरिमाणम् । 'स (कालः) सूक्ष्मः स्त्री तुटिस्त्रुटिः ।' इति—(वै० पृ० २१ श्लोकः ५२) । 'त्रुटिः संशयलेशयोः । सूक्ष्मैलायां कालमाने' इति—(अने० सं० पृ० ६ श्लोकः ६२) । 'द्वयोर्निमेषयोः' इति च—(श० चिं० पृ० ११३६ स्तं० १ पं० २७) । अयं ऊर्मिः, इयं ऊर्मिः ऊर्मी = तरङ्गः, वीचिः । 'ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः । वस्त्रसङ्कोचरेखायामुत्कण्ठापीडयोरपि ।' इति—(मे० पृ० १०८ श्लोकः ३) । अयं शमिः, इयं शमी = वृक्षविशेषः, शिम्बा च । "छिमि" इति लोके । 'शमी सक्तुफलायां च शिम्बिकायां च वल्गुलौ ।' इति—(मे० पृ० ११० श्लोकः ३१) । ('शिम्बा', 'शिमिः', 'शिम्बिः' इत्यपि-)—इति च स्वामी । अयं रत्निः, इयं रत्निः = बद्धमुष्टिकरः । 'मुष्ट्या तु बद्धया । स रत्निः स्यात्' इति—(अम० ना० लिं० पृ० २३२ श्लोकः ८६) । 'रत्न्यरत्नी स्त्रियौ बद्धमुष्टितताङ्गुली' इत्यमरमाला' इति—(अम० सु० व्या० पृ० २३२ स्तं० २ पं० ११) । 'स रत्निर्विस्तृताङ्गुलिः ।' इति च—(प० र० मा० पृ० ७२ पं० १) । अयं अरत्निः, इयं अरत्निः = अरत्निहस्तः, निर्गता कनिष्ठा यस्मात्तेन मुष्टनोपलक्षितः, सप्रकोष्ठतताङ्गुलिकरः, विस्तृतकनिष्ठबद्धमुष्टिहस्तपरिमाणम्, कफोणिश्च । 'बद्धमुष्टिकरो रत्निः सोऽरत्निः प्रसृताङ्गुलिः ।' इति कोशान्तरम्' इति—(श० चिं० पृ० १६३ स्तं० २ पं० २७-८) । 'अरत्निस्तु निष्कनिष्ठेन मुष्टिना ।।' इति—(अम० ना० लिं० पृ० २३२ श्लोकः ८६) । 'अरत्निर्ना सप्रकोष्ठतताङ्गुलिकरेऽपि च ।' कफोणावपि इति—(मे० पृ० ८५ श्लोकः ३४) । 'नाऽरत्निः कफोणौ हस्ते सप्रकोष्ठे चाङ्गुलौ' इति रुद्रः' इति च—(अम० सु० व्या० पृ० २३२ स्तं० २ पं० १४-५) । अयं अवीचिः, इयं अवीचिः = अतरङ्गः, तरङ्गशून्यम्, नरकान्तरं च । 'तद्भेदास्तपना वीचिमहारौरवरौरवाः ।।' इति—(अम० ना० लिं०

पृ० ९१ श्लोकः १)। 'अवीचिस्त्वतरङ्गे नरकान्तरे।' इति–(अने० सं० पृ० ६० श्लोकः १३६)। अतरङ्गे कल्लोलरहिते यथा––'अवीचिर्निर्वाति सरसमरसीवेयमबला' इत्यादौ वाच्यलिङ्गः। इत्यनेकार्थकैरवाकरकौमुदी। नरके तु तपनसाहचर्य्यात्पुंलिङ्गः। 'अवीचिं गाहन्ते हुतवहशिखा–पूरितमपि' इति शिल्पलेखः' तथा 'सर्वधरः स्वामी पञ्जिका च' इति मुकुटः' इति––(अम० सु० व्या० टि० पृ० ९१ स्तं० १ पं० ३४ तः ३८ या०)। 'नास्ति वीचिः सुखमत्र। 'अवीचिर्नरकान्तरे।' इति––(श० र० स० पृ० ७२ पं० १०)। अयं कविः=शुक्रः, पण्डितश्च। इयं कविः, कविका, कवी=खलीनम्। "लगाम" इति लोके। 'कविर्वाल्मीकिकाव्ययोः। सूरौ काव्यकरे पुंसि, स्यात्खलीने तु योषिति।' इति—(मे० पृ० १५७ श्लोकः ४)। अयं अणिः, इयं अणिः= अक्षाग्रकीलिका। अयं आणिः, इयं आणिः=अक्षाग्रकीलिका, अश्रि सीमा च। 'अणिराणिवदक्षाग्रकीलाश्रिसीमसु द्वयोः।' इति–(मे० पृ० ४५ श्लोकः २)। अयं श्रेणिः, इयं श्रेणिः= पंक्तिः, तुल्यशिल्पिसमुदायश्च। 'श्रेणिः स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ।' इति–(मे० पृ० ४७ श्लोकः ३१)। अयं श्रोणिः, इयं श्रोणी=कटी। 'अथ कटः कटिः। श्रोणिः कलत्रं कटीरं काञ्चीपदं ककुद्मती॥' इति—(अभि० सं० अभि० चिं० पृ० २६ श्लोकः ६०७)। 'श्रोणी कथिताऽवयवान्तरे।' इति—(श० र० स० पृ० १०८ पं० ४)। अयं अरणिः, इयं अरणिः= काष्ठविशेषः, अग्न्युत्पत्तिकारणम्। 'अरणिर्वह्निमन्थे ना, द्वयोनिर्मन्थ्यदारुणि।' इति—(मे० पृ० ४७ श्लोकः ३४)। अयं पार्ष्णिः, इयं पार्ष्णिः=गुल्फयोरधःप्रदेशः, पादमूलम्, पादग्रन्थ्यधरम् सैन्यपृष्ठं च। 'पार्ष्णिः स्यादुन्मदस्त्रियाम्। स्त्रियां, द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च।' इति—(मे० पृ० ४६ श्लोकः २०)। 'पार्ष्णिः स्त्रीपुंसयोः पादमूले स्याद् ध्वजिनीकटौ।' इति च रन्तिदेवः' इति—(अम० सु० व्या० पृ० २२७ श्लोकः ७२)। शलिः, शली=श्वाविद्। "साही" "सेही" इति च लोके। 'शल्योऽन्यः श्वाविदित्युक्तः शली च शलली च सः।' इति—(रा० नि० पृ० ४०३ श्लोकः ३)। शलू(ल्य)कः शलली शली।' इति च (प० र० मा० पृ० ३७ पं० २०)। अयं शाल्मलिः, इयं शाल्मलिः=वृक्षविशेषः। "सेंबर" इति लोके। द्वीपविशेषश्च। 'शाल्मलिस्तरुभेदे स्याद् द्वीपभेदेऽपि च द्वयोः।' इति––(मे० पृ० १५५ श्लोकः १३८)। 'पिच्छिला पूरणी मोचा स्थिरायुः शाल्मलिर्द्वयोः॥' इति—(अम० ना० लिं० पृ० १४४ श्लोकः ४६) 'स्थिरायुः'—'षष्टिवर्षसहस्राणि वने तिष्ठ(जीव)ति शाल्मलिः।' इति–– (श० चिं० पृ० ५५० स्तं० २ पं० ५)। अयं यष्टिः, इयं यष्टिः––हारलता, भार्गी, मधुका, शस्त्रभेदश्च। 'यष्टिः पुंसि स्याद् भुजदण्डके। द्वयोर्हारलताभार्गीमधुकाशस्त्रभेदयोः॥' इति— (मे० पृ० ३५ श्लोकः २५)। अयं मुष्टिः, इयं मुष्टि=बद्धकरः, अङ्गुलीना सङ्कोचः। "मुट्ठी" इति लोके। अयं योनिः, इयं योनिः योनी=उत्पत्तिस्थानम्, जन्मवर्त्म, आकरः, कारणम्, तोयं च। 'योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे।' इति—(मे० पृ० ८३ श्लोकः १६)।

अयं मुनिः = मौनव्रती, तपस्वी । इयं मुनिः = तपस्विनी । 'मुनिः पुंसि वसिष्ठादौ वङ्गसेनतरौ जिने ।' इति--(मे० ृ० ८३ श्लोकः १५) । 'वाचंयमो मुनिः ।' इति--(अम० ना० लिं० पृ० २६२ श्लोकः ४२) । अयं स्वातिः, इयं स्वातिः स्वाती = नक्षत्रविशेषः, पञ्चदशनक्षत्रम् । अयं गव्यूतिः, इयं गव्यूतिः = क्रोशयुगम्, क्रोशद्वयम्, द्विसहस्त्रधनुः, गोरुतम् । 'धन्वन्तरसहस्त्रं तु क्रोशः, क्रोशद्वयं पुनः । गव्यूतं, स्त्री तु गव्यूतिर्गोरुतं गोमतं च तत् ।' इति वाचस्पतिः । 'धनुर्हस्तचतुष्टयम् ।' 'द्वाभ्यां धनुःसहस्त्राभ्यां गव्यूतिः पुंसि भाषितः ।' इति च शब्दार्णवः' इति--(अम० सु० व्या० पृ० ११५-६ स्तं० १ पं० १, २, ३) । अयं बस्तिः, इयं बस्तिः = नाभ्यधोभागः, नाभिलिङ्गयोरन्तरम्, गुदं च । 'बस्तिर्नाभेरधो द्वयोः ।।' इति--(अम० ना० लिं० पृ० २२७ श्लोकः ७३) । 'बस्तिर्द्वयोर्निरूहे नाभ्यधो, भूम्नि दशासु च ।' इति--(मे० पृ० ५८ श्लोकः ५५) । 'बस्तयो द्वयोरिति च गुदमिति दुर्गारुणो' इति-(दु० लिं० पृ० ५६ पं० ९) । 'मूत्राशयपुटे बस्तिः' इति--(प० र० मा० पृ० ४४ पं० १७) । आशयश्च पुटं च । मूत्राशयपुटे मूत्राशयः मूत्रपुटम्, इत्यर्थः । 'नाभेरधो मूत्रपुटं बस्तिर्मूत्राशयोऽपि च' इति च हैमीयनाममाला' इति—(अम० सु० व्या० टि० पृ० २२७ स्तं० २ पं० ४०-१-२) । अयं मेथिः, इयं मेथिः = मेधिकाष्ठम्, खलेवाली, खले पशुबन्धनार्थकाष्ठम् । इयं मेथी = गन्धबीजा । ''मेथी''ति प्रसिद्धशाकम् । अयं मेधिः, इयं मेधिः = खलेवाली, खले पशुबन्धनायारोपितकाष्ठम्, धान्यखले पशुबन्धनस्तम्भः । 'पुंसि मेधिः खले दारु न्यस्तं यत्पशुबन्धने ।' इति--(अम० ना० लिं० पृ० ३०६ श्लोकः १५) । मेध्यन्ते पशवोऽत्र । स्वामी तु—'मेथिः इति पठति । अयं मशिः मषिः मसिः, इयं मशी मषी मसी = कज्जलम्, मेला, पत्राञ्जनम्, लिपिसाधनविशेषः, लिपिप्रयोजना । ''स्याही'' इति लोके । 'मेला मसीजलं पत्राञ्जनं च स्यान्मसिर्द्वयोः ।' इति--(त्रि० शे० पृ० २९८ श्लोकः २७) 'वर्णिका मसी ।। मसिर्ना' इति--(त्रि० शे० पृ० २७२ श्लोकः ३, ४) । 'मेला पत्राञ्जनं मसिः ।।' इति—(हा० व० पृ० ४०६ श्लोकः १२) । मूर्धन्योपधोऽपि—'मलिनाम्बु मषी मसी ।' इति च--(अभि० सं० अभि० चि० पृ० २२ श्लोकः ४८४)। अयं इषुधिः, इयं इषुधिः = शराधारः, शराणां स्थानम् । 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः ।।' इति--(अम० ना० लिं० पृ० २९३ श्लोकः ८८) । अयं इषुः, इयं इषुः = बाणः, शरः । 'पत्री रोप, इषुर्द्वयोः ।' इति--(अम० ना० लिं० पृ० २९२ श्लोकः ८७) । अयं ऋष्टिः, इयं ऋष्टिः = खड्गः, तरवारी । ''तलवार'' इति लोके । 'ऋष्टिः खड्गस्तरवारिः, इति--(त्रि० शे० पृ० ३०० श्लोकः ५४) । अयं पाटलिः, इयं पाटलिः = वृक्षविशेषः पाटला ''पाडली'' इति लोके । 'अथ द्वयोः । पाटलिः, पाटलामोघा काचस्थाली फलेरुहा ।।' इति--(अम० ना० लिं० पृ० १४६ श्लोकः ५४) । 'अलिप्रिया विशालाग्राप्यमोघा पाटलिर्द्वयोः ।' इति च वाचस्पतिः' इति--(अम० सु० व्या० पृ० १४६

स्तं० २ पं० २५) । अयं जाटलिः झाटलिः, इयं जाटलिः झाटलिः = वृक्षविशेषः । किंशुक-वृक्षसदृशः । "मोखा" इति प्रसिद्धः । अयं पृश्निः, इयं पृश्निः = अल्पतनुः, रश्मिश्च । 'पृश्निः किरातोऽल्पतनुः' इति–(वैं० पृ० २०१ श्लोकः ५)। अयं तिथिः, इयं तिथिः तिथी = प्रतिपदादि-पञ्चदश, सामान्यतिथिः । 'तदाद्यास्तिथयो द्वयोः ।।' इति––(अम० ना० लिं० पृ० ४३ श्लोकः १) । दिनं च' इति दुर्गः । अयं अशनिः, इयं अशनिः=वज्रम्, विद्युच्च । 'अशनिः स्त्री-पुंसयोः स्याच्चञ्चलायां पवावपि ।' इति—(मे० पृ० ८५ श्लोकः ३३) । अयं मणिः, इयं मणिः = रत्नम्, अश्मजातिः, मुक्तादिकं च । 'मणिः स्त्रीपुंसयोरश्मजातौ मुक्तादिकेऽपि च ।' इति––(मे० पृ० ४६ श्लोकः २३) । अयं शृणिः सृणिः, इयं शृणिः सृणिः = अङ्कुशाऽस्त्रम्, शत्रुश्च । 'अङ्कुशोऽस्त्री, सृणिर्न षण् ।' इति—(वैं० पृ० १११ श्लोकः ८४) । अमरस्तु सृणिः स्त्रियामित्याह—'अङ्कुशोऽस्त्री सृणिः स्त्रियाम् ।।' इति––(अम० ना० लिं० पृ० २७९ श्लोकः ४१) । 'स्त्रियाम्' इत्येकदेशेन स्त्रीपुंसशब्दसमुदायो लक्ष्यते । तेन सृणेः पुंस्त्व-मपि' इति सुभूत्यादयः । स्त्रियामिति प्रायिकत्वादुक्तम्, इति तु वयम्––इति मुकुटः' इति––(अम० सु० व्या० टि० पृ० २७६ स्तं० १ पं० ३९ तः) । 'शृणि'रित्यपि । 'शृणिरङ्कुश-वाची च काशश्च तृणवाचकः ।' इति शकारभेदः' इति–(अम० सु० व्या० पृ० २७९ स्तं० १ पं० १३) । अयं मौलिः, इयं मौलिः = चूडा, मुकुटं च । 'मौलिः किरीटे धम्मिल्ले चूडा-यामनपुंसकम् ।' इति––(मे० पृ० १४८ श्लोकः ४६) । अयं केलिः, इयं केलिः केली = क्रीडा, परीहासः, पृथ्वी च । 'द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ।।' इति––(अम० ना० लिं० पृ० ८४ श्लोकः ३२) । केलिः पुंसि । भिन्नलिङ्गानां द्वन्द्वाभावात् । 'केली' इति स्त्रियामपि । 'केलीषु तद्गाद्वानगुणान्निपीय ।' इति नैषधात्––इति मुकुटः । अयं हलिः = महद्धलम् । इयं हली = कलिकारी । 'हलिर्बृहद्धले' इति––(त्रि शे० पृ० ३०१ श्लोकः २) । 'दीप्ता विशल्याऽग्निमुखी हली नक्तेन्दुपुष्पिका ।।' इति––(रा० नि० पृ० १३६ श्लोकः १७) । अयं–मरीचिः, इयं मरीचिः = किरणः, रश्मिः । 'मरीचिर्मुनिभेदे ना, गभस्तावनपुंसकम् ।' इति––(मे० पृ० २८ श्लोकः १६) । 'स्त्रीपुंसाधिकारे–त्रुटिमसिमरीचयः ।' इति लिङ्गानु-शासनम् । 'द्वयोर्मरीचिः, किरणो भानुरुस्रः करः, पदम् ।' इति शब्दार्णवः ।' इति––(अम० सु० व्या० पृ० ४२ स्तं० २ पं० ३६-७-८) । अयं हनूः, इयं हनुः = कपोलावयवः । 'हनु-र्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे' इति––(मे० पृ० ८४ श्लोकः २५) । अयं आखुः, इयं आखुः = मूषिकः, सूकरश्च । 'आखुः स्यान्मूषके' इति—(श० र० स० पृ० ५३ पं० १०) । 'आखू सूकरमूषिकौ ।' इति च–(वैं० पृ० २१४ श्लोकः ७) । अयं कर्कन्धुः, इयं–कर्कन्धूः=बदरी । "बेर" इति लोके । 'अथ द्वयोः । कर्कन्धूर्बदरी कोली' इति(—अम० ना० लिं० पृ० १४० श्लोकः ३६) । अयं सिन्धुः = समुद्रः । इयं सिन्धुः

=नदी। 'सिन्धुर्वमथुदेशाब्धिनदे ना, सरिति स्त्रियाम्।' इति--(मे० पृ० ८० श्लोकः २५)। अयं मृत्युः, इयं मृत्युः=प्राणवियोगः, मरणम्, यमश्च। 'अन्तो नाशो द्वयोर्मृत्युः' इति--(अम० ना० लिं० पृ० ३०१ श्लोकः ११६)। 'मृत्युर्ना मरणे यमे।' इति—(मे० पृ० ११६ श्लोकः ४६)। अयं मनुः=प्रजापतिः, स्वायंभुवादिः मंत्रो वा। इयं मनुः=प्रजापतिपत्नी, ओषधिविशेषः, स्पृक्का च। 'स्पृक्का च देवी पिशुना वधूश्च कोटिर्मनुर्ब्राह्मिणिका सुगन्धा।' इति--(रा० नि० पृ० १०८ श्लोकः ११३)। अयं अवटुः, इयं अवटुः=घाटा, ग्रीवापश्चाद्भागः। 'पिण्डारे त्ववटोः' इति।' घाटाऽप्यवटुरक्लीबे' इति च--(वै० पृ० १८० श्लोकः ८५)। अयं एर्वारुः, इयं एर्वारुः=कर्कटी। "काकड़ी" इति लोके। आङि एर्वारुः। 'स्यादेर्वारुस्तु कर्कटी।' इति--(रा० नि० पृ० ४२२ श्लोकः २१)। 'स्वार्थे कः'। एर्वारुकम् =कर्कटी। 'एर्वारुकं कर्कटिका' इति--(प० र० मा० पृ० ३४ पं० ९)। इर्वारुः=कर्कटी। 'उन्मत्तो धुस्तुरिर्वारुः कर्कटिः स्यात्' इति पुंस्काण्डे रत्नकोषः। दीर्घादिरपि—ईर्वारुः=कर्कटी। 'तुर्यस्वरादिरीर्वारुः कर्कट्यां कथ्यते बुधै'रिति। 'स्मृता वालुकिरीर्वारु'रिति हारावली' इति—(सि० कौ० टी० पृ० ९२ पं० ११-२-३)। अमरोऽपि--'ईर्वारुः कर्कटी स्त्रियौ॥' इति—(अम० ना० लिं० पृ० १८० श्लोकः १५५)। उर्वारुः=कर्कटी। 'उर्वारुः कर्कटी प्रोक्ता व्यालपत्रा च लोमशा।' इति धन्वन्तरिः। उर्वारुकम्=कर्कटी। 'उर्वारुकं पित्तहरं सुशीतलम्' इति धन्वन्तरिः' इति--(रा० नि० पृ० ४१ श्लोकः १७६-७)। 'उर्वारुकमिव बन्धनात्' इति च श्रुतिः' इति—(अम० सु० व्या० पृ० १८० स्तं० २ पं० २४)। अयं ऊरुः, इयं ऊरुः=जंघा, जानूपरिभागः। 'ऊरुस्त्ववयवान्तरे।' इति--(श० र० स० पृ० २५१ पं० १४)। 'सक्थि क्लीबे, पुमानूरुः' इति--(अम० ना० लिं० पृ० २२७ श्लोकः ७३)। यादवस्तु विकल्पेन पुंस्त्वमाह-'सक्थि क्लीबं, पुमान्वोरुः' इति च—(वै० पृ० १७७ श्लोकः ५९)। पक्षे स्त्री। ऊरोरुपरिभागः सक्थीति क्वचिद्भेदो दृश्यते। अयं कन्दुः, इयं कन्दुः=भर्जनपात्रम्, स्वेदनी। "कडाही" इति लोके। 'ना कन्दुर्वा, स्वेदनी स्त्रियाम्।' इति—(अम० ना० लिं० पृ० ३१२ श्लोकः ३०)। कन्दुर्वा ना विकल्पेन पुमान्, पक्षे स्त्री। अयं काकुः, इयं काकुः=वक्रोक्तिः, जिह्वा च। 'उल्लापः काकुवाक्' इति। काकुर्ध्वनिविकारः स्यात्' इति च- (अभि० सं० अभि० चि० पृ० १५ श्लोकः २७५)। 'काकुस्तु जिह्वा' इति—(त्रि० शे० पृ० २९२ श्लोकः ३१)। 'काकुः स्त्री भिन्नकण्ठोत्थः शोककोपादिवैकृतात्।' इति--(वै० पृ० ३१ श्लोकः ७)। राघवस्तु वाच्यलिङ्गत्वमाह--'त्रिलिङ्गे काकुशब्दस्तु ध्वनिवैरूप्यसम्भवे। गायकानां कण्ठदोषे, कच्चिदर्थेऽव्ययं पुनः॥' इति--(ना० मं० पृ० ३ पं० १७)। अयं किष्कुः, इयं किष्कुः=वितस्तिः, सप्रकोष्ठहस्तश्च। 'किष्कुर्द्वयोर्वितस्तौ च सप्रकोष्ठकरेऽपि च।' इति—(मे० पृ० ३ श्लोकः २३)। अयं बाहुः, इयं बाहुः

=कक्षादङ्गुल्यग्रपर्यन्तावयवविशेषः, भुजः। "बांह" इति लोके। 'द्वौ परौ द्वयोः। भुजबाहू प्रवेष्टो दोः' इति–(अम० ना० लि० पृ० २३० श्लोकः ७९, ८०)। परौ द्वौ भुजबाहुशब्दौ स्त्रीपुंसयोः। 'अयं गवेधुः, इयं गवेधुः=तृणधान्यविशेषः, आरण्यगोधूमाख्यमुत्पन्नम्। 'स्त्री गवेधुर्गवेधुका।' इति। 'गवेडु'रित्यपि।' इति–(अम० ना० लि० पृ० ३१० श्लोकः २५)। अयं राः, इयं राः=धनम्, स्वर्णम्, जलदः, शब्दश्च। 'रास्तु द्वयोर्धने स्वर्णे' इति––(ना० रा० मा० पृ० ८ पं० १३)। अयं गौः=बलीवर्दः। इयं गौः=सौरभेयी, सुरभिः। 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च।' इति—(मे० पृ० २१ श्लोकः १)। अयं मः=शिवः। इयं मा=लक्ष्मीः। 'मो यमे समयेऽपि स्याद्विषे च मधुसूदने। मा स्त्री पद्मालयायां, स्यात् पुंलिङ्गश्चन्द्रशेखरे॥' इति––(मे० पृ० १०८ श्लोकः १)।

पुरुषोत्तमोऽपि संक्षेपतः पुंस्त्रीलिङ्गवाचकशब्दानाह––(त्रि० शे० पृ० ३९२-३ श्लोकः १५, १६, १७, १८)।

अथ स्त्रीपुंसयोः केलि–र्मणि–र्योनि–र्मसि–र्मुनिः।
मरीचिः शाल्मलिः स्वातिः श्रेणि–र्मुष्टि–स्तिथिः सृणिः॥
ऊर्मि–र्गभस्ति–रशनी रै–पार्ष्णी–षुधि–राशयः।
बस्तिश्च किष्कुः कन्दुश्च रेणु–तन्वि–षु–बाहवः॥
गण्डूष–गर्ज–जागर–भुज–कील–ज्वाल–वर्त्तक–व्रीडाः ।
उत्कण्ठ–सट–वराटक–रभसाः स्त्रीत्वे तु आबन्ताः॥
शल्लको वृश्चिकः कीटः शार–स्तूणो घटः कटः ।
शफरो वेतस–श्चामी स्त्रियां ङ्यन्ताः प्रकीर्तिताः॥इति॥

एषां व्याख्या––

अथेति। अथानन्तरम्। 'स्त्रीपुंसयोः' इत्यधिकारः। एते केल्यादयः शृणिपर्य्यन्ताः शब्दाः स्त्रीपुंसयोः स्युः। ऊर्मिरिति। एते ऊर्म्यादयो बाहुपर्य्यन्ताः शब्दाः स्त्रीपुंसयोः स्युः। अयं गभस्तिः=किरणः, सूर्यश्च। इयं गभस्तिः=स्वाहा। 'गभस्तिः किरणे सूर्ये, स्वाहायां तु योषिति।' इति–– (मे० पृ० ६२ श्लोकः १०७)। 'गभस्तिः किरणे रवौ।' इति च––(ना० र० मा० पृ० ७९ पं० १०)। अयं राशिः, इयं राशिः=मेषादयः, पुञ्जश्च। 'द्वौ राशी पुञ्जमेषाद्यौ, इति––(अम० ना० लि० पृ० ४३४ श्लोकः २१४)। 'राशिर्मेषादिपुञ्जयोः।' इति च––(मे० पृ० १६३ श्लोकः १२)। अयं रेणुः, इयं रेणुः=रजः, धूलिः। 'रेणुर्द्वयोः, स्त्रियां धूलिः' इति––(अम० ना०

लिं० पृ० २९६ श्लोकः ९८) । 'रेणुः स्त्रीपुंसयोर्धूलौ, पुंलिङ्गः पर्पटे पुनः ।' इति च--(मे० पृ० ४६ श्लोकः २५) । अयं तनुः, इयं तनुः = शरीरम्, त्वक् । 'तनुर्वपुस्त्वचोः । विरलेऽल्पे कृशे' इति--(अने० सं० पृ० २३ श्लोकः २७०) । 'तनुः काये त्वचि स्त्री, स्यात्त्रिष्वल्पे विरले कृशे ।' इति--(मे० पृ० ८३ श्लोकः ९) । अर्तीत्यादिना उसि 'तनु' सान्तापि । प्रयोगश्च--'तनुषे तनुषे कम्' इति वासवदत्तायमकात्--इति मुकुटः । 'प्राणिजातेः' इत्यूङ् । ऊङि 'तनूः' तथा च प्रयोगः--'वरतनु ! सम्प्रवदन्ति कुक्कुटाः' इति भारविः, इति--मुकुटः' ॥ क्षेमेन्द्रेण तु औचित्यवचारचर्चायां यथा कुमारदासस्य 'अयि विजहीहि दृढोपगूहनं, त्यज नवसङ्गमभीरु वल्लभम् । अरुणकरोद्गम एष वर्त्तते, वरतनु ! सम्प्रवदन्ति कुक्कुटाः ॥' इत्युक्तम् ।' इति--(अम० सु० व्या० टि० पृ० २२६ स्तं० २ पं० ३८ तः ४२ या०) । गण्डूषेति । एते गण्डूषादयो रभसान्ताः शब्दाः पुंस्त्रियोः स्युः । अयं गर्जः, इयं गर्जा = ध्वनिविशेषः, मेघनादः, मत्तकरी च । 'कूजनं कूजितं गर्जा न क्लीबे, गर्जना न ना ।' इति--(वै० पृ० ३१ श्लोकः ३) । 'स्तम्बेरमो गजो गर्जः' इति च--(वै० १०९ श्लोकः ६०)। अयं जागरः, इयं जागरा = जागरणम्, निद्राभावः, कवचश्च । 'जागर्या जागरा द्वयोः ।' इति--(अम० ना० लिं० पृ० ३९२ श्लोकः १६) । अयं ज्वालः, इयं ज्वाला = अग्निशिखा, दग्धान्नम्, दाहश्च । 'वह्नेर्द्वयोर्ज्वालकीलौ' इति--(अम० ना० लिं० पृ० २४ श्लोकः ५७) । अयं वर्त्तकः = पक्षिविशेषः, अश्वखुरश्च । 'खुरेऽप्यश्वस्य वर्त्तकः ।' इति--(अम० ना० लिं० पृ० ३९८ श्लोकः ११) । इयं वर्त्तिका = पक्षिविशेषः, वर्त्तकस्य स्त्री । 'वर्त्तकस्तु खुरेऽश्वस्य, विहगे वर्त्तिका द्वयोः ।' इति--(मे० पृ० १३ श्लोकः १५४) । अयं व्रीडः, इयं व्रीडा = लज्जा । 'मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा' इति--(अम० ना० लिं० पृ० ७९ श्लोकः २३) 'व्रीडोऽक्लीबे त्रपा लज्जा, इति च रभसः' इति--(अम० सु० व्या० पृ० स्तं० २ पं० ३०) । रभसस्त्विह विशेषमाह--'गण्डूषगर्जभुजजागरहारकीलज्वालाज्झटारभसवर्त्तकगर्द्धशृङ्गाः । व्रीडादयश्च वरटश्च वराटकश्च उत्कण्ठबाणकरकाश्वसमासनाश्च ।' इति--(अम० ना० सु० व्या० पृ० ७९ स्तं० २ पं० २८, २९, ३०) । अयं हारः = मुक्तासरः, मुक्तावली, मुक्तामाला, संग्रामश्च । इयं हारा = मुक्तावली, कपिलद्राक्षा । 'हारो मुक्तावलौ युधि ॥' इति० (मे० पृ० १३० श्लोकः १००) । 'हारा मुक्तावली हारः' इति च रभसः' इति--(अम० सु० व्या० पृ० २३९ स्तं० १ पं० २५) 'अयं अज्झटः, इयं अज्झटा = ओषधिविशेषः, भूम्यामलकी, वितुन्नकः । 'अथ वितुन्नकः ॥ झटाऽमलाऽज्झटा ताली' इति--(अम० ना० लिं० पृ० १७१ श्लोकः १२६-७) । अयं गर्द्धः, इयं गर्द्धा = स्पृहा, अभिलाषातिशयः, इच्छा च । "कामना" इति लोके । अयं शृङ्गः = कूर्चशीर्षकवृक्षः, जीवकौषधिः, मुनिविशेषश्च । इयं शृङ्गिः, शृङ्गी = मत्स्यविशेषः, मद्गुरस्य प्रिया । "सींगी मच्छी" इति लोके । विषा, अतिविषा, कुण्डलादिभूषणानां स्वर्णम्, ऋषभौषधिश्च । 'शृङ्गः स्यात्कूर्चशीर्षके । स्त्री विषायां स्वर्ण-

मीनभेदयोर्ऋषभौषधौ ।' इति—(मे० पृ० २३ श्लोकः २५-६) । अयं वरटः=हंसः । वरटा, वरटी=हंसी, हंसस्य स्त्री, गन्धोली च । "वरडे" इति लोके । 'वरटा द्वयोर्वरटयां स्त्री हंस्यां तु तत्पतौ पुमान् ।' इति—(मे० पृ० ३७ श्लोकः ५०) । 'वरटी' अपि । 'वरटा वरटीहंस्योस्तत्पतौ वरटः स्मृतः ।' इति तारपालः' इति—(अम० सु० व्या० पृ० १९७ स्तं० २ पं० ११-२) । 'गन्धोली वरटा द्वयोः ।।' इति च—(अम० ना० लिं० पृ० १६७ श्लोकः २७) । अयं उत्कण्ठः=गण्डकुसुमम्, सञ्जातमदो हस्ती । 'उत्कण्ठो गण्डकुसुमम्' इति—(हा० व० पृ० ४०४ श्लोकः ६१) । शृङ्गारस्य षोडशबन्धान्तर्गतबन्धविशेषश्च । आसन इति तस्य प्रसिद्धिः । तल्लक्षणम्—'नारीपादौ च हस्तेन धारयेद् गलके पुनः । स्तनार्पितकरः कामी बन्धश्चोत्कण्ठसंज्ञकः ।' इति—(श० चिं० पृ० ३३९ स्तं० १ पं० ५ तः १० या०) । इयं उत्कण्टा=उत्कलिका, इष्टलाभे कालक्षेपासहिष्णुता, आकांक्षायां च । 'उत्कण्ठा रुहरुहिका' इति । 'आकल्पक उत्कण्ठा' इति च—(त्रि० शे० पृ० २७३, श्लोकः ६ पृ० ३१२ श्लोकः २८) । कामादिजस्मृतिश्च । 'चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः । उत्कण्ठोत्कलिके तस्मिन्, अभिध्या तूभयोरपि ।' इति च शब्दार्णवः' इति—(अम० सु० व्या० पृ० ८२ स्तं० १ पं० ३, ४, ५) । अयं करकः, इयं करका=वर्षोपलः, मेघोपलः । "ओला" इति लोके । 'करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले, न स्त्री करङ्के च कमण्डलौ ।' इति—(मे० पृ० ५ श्लोकः ५४) । अश्वः=घोटकः । "घोड़ा" इति लोके । अश्वा=वडवा । "घोड़ी" इति लोके । 'अश्वः पुंजातिभेदे च तुरगे च पुमानयम् ।' इति—(मे० पृ० १५७ श्लोकः ३) । 'अश्वस्तुरङ्गस्तुरगः' इति—(वै० पृ० १११ श्लोकः ६०) । 'वाम्यश्वावडवार्वनी ।' इति—(वै० पृ० ११२ श्लोकः १०७) । समः=विष्णुः, राशीनां संज्ञाविशेषः, मानस्य प्रकारविशेषश्च । समा=सँव्वत्सरः, अलङ्कारविशेषश्च । 'समा सँव्वत्सरे स्त्रियाम् ।' इति—(मे० पृ० ११० श्लोकः ३४) । आसनः=वृक्षविशेषः, जीवकद्रुमः । 'आसनो जीवकद्रुमे ।' इति—(मे० पृ० ८५ श्लोकः ३७) । आसना=स्थितिः । 'स्यादास्या त्वासना स्थितिः ।।' इति—(अम० ना० लिं० पृ० ३६२ श्लोकः २१) । 'आसनी' अपि । 'आसनी विपणौ स्थित्याम्' इति—(मे० पृ० ८५ श्लोकः ३७) । शेषशब्दानां व्याख्योदाहरणानि तु पूर्ववद् बोध्यानि । इमे गण्डूषादयः शब्दाः स्त्रीत्वे स्त्रीलिङ्गभावे तु टाबन्ताः टाप्प्रत्ययान्ता एवेति ज्ञेयाः । न तु ङ्यन्ता इत्यर्थः । शल्लक इति । एते शल्लकादयो वेतसान्ताः शब्दाः पुंस्त्रीलिङ्गा भवन्ति । शल्लकः 'सल्लक' इत्यपि । तूणः=बाणाधारः, स्वनामख्यात इषुधिः । तूणा=शराधारः । 'स्त्रियां तूणेषुधी उपासङ्गः' इति रत्नकोषः' इति—(अम० सु० व्या० पृ० २६३ स्तं० १ पं० ३८) । गौरादित्वात् ङीष्यपि । तूणी=नीली, निषङ्गः, शराधारश्च । 'तूणी नील्यां, निषङ्गे वा ना' इति—(मे० पृ० ४६ श्लोकः १६) । 'तूणी तु नील्यां, तूणो

निषङ्गके ।' इति च--(वि० प्र० पृ० ४६ श्लोकः २५) । शेषशब्दानां व्याख्यादयस्तु पूर्ववज्ज्ञेयाः । अमी शल्लकादयः शब्दाः स्त्रियां स्त्रीलिङ्गे ङ्यन्ता ङीप्प्रत्ययान्ताः प्रकीर्तिताः कथिताः । न टाप्प्रत्ययान्ता इत्यर्थः । तथा चामरः--(अम० ना० लिं० पृ० ४६१ श्लोकः ३७, ३८) ।

स्त्रीपुंसयो–रपत्यान्ता द्वि–चतुः––षट्पदो–रगाः ।
जातिभेदाः पुमाख्या–श्च स्त्रीयोगैः सह मल्लकः ।।
ऊर्मि–र्वराटकः स्वाति–र्वर्णको झाटलि–र्मनुः ।
मूषा सृपाटी कर्कन्धू–र्यष्टिः शाटी कटी कुटी ।।' इति ।।

अनयोर्व्याख्या--

स्त्रीति । ऊर्मिरिति च । 'स्त्रीपुंसयोः' इत्यधिकारः । अपत्यार्थे विहिता येऽणादयस्तदन्ताः सर्वे स्त्रीपुंसयोः स्युः । यथा—उपगोः अपत्यं पुमान् औपगवः । उपगोः अपत्यं स्त्री औपगवी । विदेहस्य अपत्यं पुमान् वैदेहः = जनकात्मजः । विदेहस्य अपत्यं स्त्री वैदेही = जनकात्मजा, जानकी । गर्गस्य अपत्यं पुमान् गार्ग्यः = गर्गात्मजः । गर्गस्यापत्यं स्त्री गार्गी = गर्गात्मजा । द्विचतुःषट्पदोरगाः । द्विपद-चतुष्पद-षट्पदवाचिनः, उरगवाचिनश्च जाति (भेदा.) विशेषाः स्त्रीपुंसयोः स्युः । तत्र द्विपदजातिभेदो यथा—मानुषः पुमान्, मानुषी स्त्री । ब्राह्मणः पुमान्, ब्राह्मणी स्त्री । विप्रः पुमान्, विप्रा स्त्री । क्षत्रियः पुमान्, क्षत्रिया स्त्री । वैश्यः पुमान्, वैश्या स्त्री । शूद्रः पुमान्, शूद्रा स्त्री । अजादित्वात् टाप् । 'शूद्रा चामहत्पूर्वा जातिः' (वा० ४।१।४) इत्यनेन टाप् बोध्यः । बकः, बकी = पक्षिविशेषः । "बगुला" "बगुली" इति च लोके । हंसः, हंसी = पक्षिविशेषः । मयूरः, मयूरी = पक्षिविशेषः । "मोर" इति लोके । सारसः, सारसी = पक्षिविशेष. । चतुष्पदभेदो यथा--मृगः, मृगी = वन्यपशुविशेषः । "मृग" इति लोके । हस्ती, हस्तिनी = वन्यपशुविशेषः । "हाथी" "हथिनी" इति च लोके । सिंहः, सिंही = वन्यपशुविशेषः । "शेर" सिंहिनी" इति च लोके । हयः, हयी = ग्राम्यपशुविशेषः । "घोड़ा" "घोड़ी" इति च लोके । गर्दभः, गर्दभी = ग्राम्यपशुविशेषः । "गधा" "गधी" इति च लोके । कूर्मः, कूर्मी = जलजन्तुविशेषः । "कछुवा" "कछुवी" इति च लोके । षट्पदभेदो यथा--मधुकरः, मधुकरी । भृङ्गः, भृङ्गी । भ्रमरः, भ्रमरी = सपक्षकीटविशेषः । "भौंरा" "भँवरी" इति च लोके । उरगः, उरगी = सर्पः । "साँप" "साँपिन" इति च लोके । नागः, नागी = सर्पः, सर्पजातिविशेषश्च । 'जातेरस्त्रीविषयात्'—(४।१।६३) इति ङीष् । अबाधिता इत्येव । बाधिता इति किम् ? मक्षिका । 'वर्वणा मक्षिका नीला' इति । शिवा, 'स्त्रियां शिवा' इति । लूता, 'लूता स्त्री' इति । जातिवाचिनः स्त्रीपुंसयोः

स्युः । द्रुणः, द्रुणी = कीटविशेषः । "बिच्छू" इति लोके । मत्स्यः, मत्स्यी = जलजन्तुविशेषः । "मछली" इति लोके । केचित्तु षट्पदादिभिरस्यैकवाक्यतां वदन्ति । पुमाख्याः (पुरुषाख्याः) पुन्नामानि स्त्रीयोगैः सह वर्तमानाः स्त्रीपुंसयोः स्युः । इन्द्रः, इन्द्राणी = देवराजः, देवराज्ञी । ब्राह्मणः ब्राह्मणी = विप्रः, विप्रपत्नी । मातुर्भ्राता मातुलः = "मामा" इति लोके । तस्य स्त्री मातुली = "मामी" इति लोके । पुंसि वर्त्तमानो मातुलः । स्त्रीयोगात् स्त्रीत्वेऽपि वर्त्तते । शूद्रस्य स्त्री शूद्री = शूद्राणी । वर्णकः, वर्णका = लेपनम् । "उबटन" इति लोके । 'वर्णकश्चारणे, स्त्री तु चन्दने, च विलेपने । द्वयो,-र्नील्यादिषु स्त्री स्यादुत्कर्षे काञ्चनस्य च ।' इति—(मे० पृ० १३ श्लोकः १५३) । रभसस्तु पुन्नपुंसकत्वमाह—'विलेपने चन्दने च वर्णकं पुन्नपुंसकम् ।' इति—(अम० सु० व्या० पृ० ४६१ स्तं० २ पं० १९, २०) । मूषः, मूषा = तेजसावर्त्तनी, स्वर्णाद्यावर्त्तनपात्रम्, स्वर्णादिविलेपनभाण्डम् । "घरिया" इति लोके । 'तेजसावर्त्तनी मूषा' इति--(अम० ना० लिं० पृ० ३४८ श्लोकः ३३) । 'मूषा त्वावर्त्तनी मूषी' इति च शब्दार्णवः' इति--(अम० सु० व्या० पृ० ३४८ स्तं० २ पं० २५-६) । शे० प्रा० ।

तथा च यादवः--(वै० पृ० २९१ श्लोक २४-५-६-७) ।

स्त्रीप्राण्यर्थाः स्त्रियां, पुंसि पुंप्राण्यर्था, विना त्वि–ह ।
स्त्रीत्वेनो–क्तै–स्तथा–ऽपत्येऽणादि, ष्वुन्नादि शिल्पिनि ॥

अस्य व्याख्या—

स्त्रीति । इह तु स्त्रीत्वेन स्त्रीलिङ्गतया उक्तैः कथितैः विना स्त्रीप्राण्यर्थाः स्त्रीप्राणि–वाचकाः शब्दाः स्त्रियां स्त्रीलिङ्गे स्युः । एवं पुंप्राण्यर्थाः पुरुषप्राणिवाचकाः शब्दाः पुंसि पुंलिङ्गे स्युः । तथा अपत्ये तोके तनयदुहित्रोरित्यर्थः । यत् अणादि अण्प्रत्ययप्रभृति, शिल्पिनि कारौ ष्वुन्नादि च तत्सर्वं स्त्रीपुंसयोः स्युः ।

"क्वचि-द्रश्मि–मयूखां–ऽशु–घृणि–धृष्णि–गभस्तयः ।
सृपाटी त्रिसरा सूर्मिः सुषुम्णा यष्टि–रिङ्गुदी ॥
कलम्बी शल्लकी मल्ली वरटा जाटलिः कुटी ।
शाटी रेणु–हरेणू–रु–जलूका–कोलि – धूलयः ॥
उत्कठा कङ्कती कन्दू–र्वितस्ति रयि–रञ्जलिः ।
कूपस्य च त्रिका व्रीडा प्रेंखोलिः फलकी कटी ॥"इति ।

एषां व्याख्या—

क्वचिदिति । कलम्बीति । उत्कण्ठेति च । रश्मिश्च मयूखश्च अंशुश्च घृणिश्च धृष्णिश्च गभस्तिश्चेतीतरेतरयोगो द्वन्द्वः । एते रश्म्यादयो गभस्त्यन्ता रश्मिवाचकशब्दाः क्वचित् कदाचित् स्त्रीपुंसयो स्युः । अयं रश्मिः, इयं रश्मिः = किरणः । इत्यादि। त्रिसरः, त्रिसरा = कृसरा । "खिचड़ी" इति लोके । 'तुल्यौ तिलान्ते कृसरत्रिसरौ ।' इति—(अभि० सं० अभि० चिं० पृ० १६ श्लोकः ३६८) । अयं सूर्मिः, इयं सूर्मिः सूर्मीः = लोहप्रतिमा । 'सूर्मी स्थूणायः प्रतिमा' इति—(अम० ना० लिं० पृ० ३४६ श्लोकः ३५) । 'सूर्मिस्थूणान्यलोहजा ।' इति च—(वै० पृ० १३७ श्लोकः २२) । सुषुम्णः = सूर्यकिरणः । सूषुम्णा = नाडीविशेषः, इडापिङ्गलयोर्मध्ये वर्त्तमाना पृष्ठवंशान्तर्गता नाडी सुषुम्णेत्युच्यते। इङ्गुदः, इङ्गुदी = तापसतरुः । "इँगुआ" "हिंगोटा" इति च विख्यातस्तापसद्रुमः । 'अथ द्वयोः।। इङ्गुदी, तापसतरुः' इति—(अम० ना० लिं० पृ० १४४ श्लोकः ४५-६) । इङ्गुदाज्जातेरिति ङीष् । कलम्बः, कलम्बा, कलम्बी = शाकविशेषः, उपोदकी, नालिकाशाकम् । "नाली" "करेंवु" इति च लोके । 'उपोदकी कलम्बी च पिच्छिला पिच्छिलच्छदा ।' इति—(रा० नि० पृ० ३५३ श्लोकः ७४) । 'अस्य (शाकस्य) तु नालिका।। कडम्बश्च कलम्बश्च' इति— (अम० ना० लिं० पृ० ३१४ श्लोकः ३४-५) । 'कलम्बी शाकभेदेस्यात्कदम्बशरयोः पुमान् ।' इति-(मे० पृ० १०५ श्लोकः ६)। 'कलम्बः सायके नीपे, नालीशाके कलम्ब्यपि ।' इति च-(वि०प्र०पृ० १०७ श्लोकः ६)। मल्लः = बाहुयोधी । मल्ली = बाहुयोधिनः पत्नी । 'मल्ल पात्रे कपोले च मत्स्यभेदे बलीयसि ।' इति-(मे० पृ० १४८ श्लोकः ४४)। अयं हरेणुः = सतीनः, कलायः । "मटर" इति लोके । इयं हरेणुः = रेणुका, भस्मगन्धिनी, कुलयोषिच्च। 'हरेणुर्ना सतीने, स्त्री रेणुकाकुलयोषितोः ।' इति-(मे० पृ० ५१ श्लोकः ८६) । जलूकः, जलूका = जलजन्तुविशेषः, जलौका, रक्तपा, जलोरगी । 'रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ।' इति-(अम० ना० लिं० पृ० १०१ श्लोकः २२)। 'जलौकापि जलोका स्याज्जलूका जलजन्तुका ।' इति तारपालः' इति—(अम० सु० व्या० पृ १०१ स्तं० २ पं० ९, १०) । सान्तोऽपि। 'जलोरगी जलौका तु जलौका च जलौकसि ।' इति च संसारावर्तः ' इत्यनेन बहुवचनं प्रायिकम्' इति--(अम० सु० व्या० पृ० १०१ स्तं० २ पं० ८, ६) । अयं कोलिः, इयं कोलिः = बदरी । "बेर" इति लोके । दीर्घान्तोऽपिः कोली । 'अथ द्वयोः । ककन्धू,र्बदरी कोली' इति—(अम० ना० लिं० पृ० १४० श्लोकः ३६) । 'कोली कोलिश्च कर्कन्ध्वाम्' इति च-- (सि० कौ० पृ० ४० श्लोकः ४३६) । कङ्कतः, कङ्कतिका, कङ्कती = प्रसाधनी, केशमार्जनी ।। "कङ्घी" इति। "कंघी" इति च लोके। 'प्रसाधनी कङ्कतिका' इति-- (अम० ना० लिं० पृ० २४९ श्लोकः १३६) । 'कङ्कती तु प्रसाधनी' इति स्त्रीकाण्डेऽमरमाला । 'कङ्कतं तु प्रसाधनम्' इति क्लीब-

काण्डे च' इति-- (अम० सु० व्या० पृ० २५० स्तं० १ पं० ७, ८)। 'केसप्रसाधनद्रव्ये तथा कंकतिका मता।' इति। 'केशप्रसाधनद्रव्ये कङ्कती समुदाहृता।' इति च— (श० र० स० पृ० १४० पं० १०)। अयं रयिः, इयं रयिः = अन्नन्, जलं च। अयं अञ्जलिः, इयं अञ्जलिः = हस्तसम्पुटं मिलितप्रसृति, कुडवपरिमाणं च। 'अञ्जलिस्तु पुमान् हस्तसम्पुटे कुडवेऽपि च।' इति— (मे० पृ० १४९ श्लोकः ६०)। त्रिकः, त्रिकाः = कूपनेमिः, कूपान्ते रज्ज्वादि धारणयंत्रम्।' 'त्रिका कूपस्य नेमौ स्या,त्त्रिकं पृष्ठाधरे त्रये।' इति--(मे० पृ० ३ श्लोकः २६)। अयं प्रेंखोलिः, इयं प्रेखोलिः = दोला, दोलनम्। 'प्रेंखोलनं तु प्रेंखोलं प्रेंखो रेंखोलनाद्यपि।' इति--(वै० पृ० ११५ श्लोकः १३६)। फलकः, फलकी = मत्स्यभेदः। 'फलकी मत्स्यभेदे ना, वाच्यवत्फलकान्विते।' इति—(मे० पृ० ९७ श्लोकः ९७)। शेषशब्दानां व्याख्योदहरणानि प्रागुक्तानि।

दुर्गसिंहोऽपि क्रमरहितान् कान्तादीन् पुंस्त्रीलिङ्गवाचकशब्दानाह-- (दु० लिं० पृ० ३८-९ श्लोकः ८०-१-२)।

सल्लक–वृश्चिक–पिटक–कुटि–वराटक–मल्लक–कट–यष्टि–घटाः।
शाट–किट–सृपाट–मरीचि–मुष्टि–किष्कु–मणि–तरणि–तिथि ॥
अण्य–रणि–श्रेणि–स्वाति–बस्ति–रेणु–मुनि–योनि––कर्कन्धु ।
सिन्धिव–षुधि–मन्व–शनि–मृत्यु–कन्दर–कलम्ब––शालमलयः ॥
द्वि–चतु–ष्पद–भ्रमर–वरट–नाम मूषे–षु–वाह्व–ऽहि सदंशम् ।
पाटलि–जाटल्यू–र्मि स्त्री–नर–लिङ्गा इति समाप्ताः॥' इति।

एषां व्याख्या—

सल्लकेति। सल्लकश्च वृश्चिकश्च पिटकश्च कुटिश्च वराटकश्च मल्लकश्च कटश्च यष्टिश्च घटश्चेतीतरेतरयोगे द्वन्द्वः एते सल्लकादयः शब्दाः स्त्रीनरलिङ्गा भवन्ति। वक्ष्यति स्त्रीनरलिङ्गाः समाप्ताः। इति, तेनायं सम्बन्धः सिद्धो भवति। पिटकः, पिटका = नलादिरचितभाण्डविशेषः, कण्डोलः। "पेटी" "पिटार" इति च लोके। 'पिटकः स्यात्तु विस्फोटे मञ्जूषायामपीष्यते।' इति--(अने० सं० पृ० ५४ श्लोकः ६५)। 'पिटकस्त्रिषु विस्फोटे, मञ्जूषायां पुनः पुमान्।' इति--(मे० पृ० १० श्लोकः १२०)। स्त्रियां पिटका। 'पेटकः' इत्यपि। 'पिटकः पेटकस्तथा।' इति—(द्वि० को० पृ० ४१३ श्लोकः ४६) 'पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके।' इति च--(वि० प्र० पृ० १० श्लोकः १०३)। शाटश्च किटश्च

सृपाटश्च मरीचिश्च मुष्टिश्च किष्कुश्च मणिश्च तरणिश्च तिथिश्चेति समाहारो द्वन्द्वः । एते शाटादयः शब्दाः स्त्रीनरलिङ्गा भवन्ति । अणीति च । अणिश्च अरणिश्च श्रेणिश्च स्वातिश्च बस्तिश्च रेणुश्च मुनिश्च योनिश्च कर्कन्धूश्चेति समाहारो द्वन्द्वः । सिन्धुश्च इषुधिश्च मनुश्च अशनिश्च मृत्युश्च कन्दरश्च कलम्बश्च शाल्मलिश्चेतीतरेतरयोगो द्वन्द्वः । एते अण्यादयः शाल्मल्यन्ताः शब्दाः स्त्रीनरलिङ्गा स्युः । कन्दरः कन्दरा—कृत्रिमगृहाकारविवरम्, दरी । 'दरी तु कन्दरो वा स्त्री' इति--(अम० ना० लिं० पृ० १२६ श्लोकः ६) । पक्षे कन्दरा । 'कन्दरोऽङ्कुशे । विवरे च गुहायां च' इति--(अने० सं० पृ० ९२ श्लोकः ५६२-३) । स्त्रियां टाप् । तथा च प्रयोगः-- 'कन्दरासु तरुणीरिह नयति रविः' इति माघः-- इति मुकुटः' इति--(अम० सु० व्या० टि० पृ० १२६ स्तं० १ पं० ४१-२) । शेषशब्दानां व्याख्यादयः प्राग्वद् बोध्याः । द्वीति । द्वे चत्वारि च पदानि येषां ते द्विचतुष्पदाः । द्विचतुष्पदाश्च भ्रमरश्च वरटश्च तेषां नाम संज्ञा । मूषश्च इषुश्च बाहुश्च अहिश्चेति समाहारो द्वन्द्वः । सह दंशेन वर्त्तते इति संदशम् पाटलिश्च जाटलिश्च ऊर्मिश्चेति समाहारो द्वन्द्वः। एते स्त्रीनरलिङ्गाः स्युः । द्विपदानां मनुष्याणां पक्षिणां च नाम । चतुष्पदानां हस्त्यादीनां कूर्म्मादीनां च नाम । जातिवचनात् नित्यं स्त्रीत्वं प्राप्तम् । षट्पदानां भ्रमदीनां वरटादीनां च नाम । शिल्पिनां नाम । ते तु यथा--'तक्षा च तन्तुवायश्च नापितो रजकस्तथा । पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः ॥' इति--(अम० सु० व्या० पृ० ३४० स्तं० १ पं० ३२-३) । अपि च--'मालाकारः कर्मकारः शंखकारः कुविन्दकः । कुम्भकारः षडेते शिल्पिनां वराः ॥ सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च । पतितास्ते ब्रह्मशापादजात्या वर्णसङ्कराः ॥' इति च—(श० चिं० पृ० ५६७ स्तं० १ पं० ५ तः १३ या०) । सुवर्णकारः सुवर्णकारी, कलादः कलादी । "सुनार" "सुनारिन" इति च लोके । 'नाडिन्धमः स्वर्णकारः कलादो रुक्मकारके ।' इति—(अम० ना० लिं० पृ० ३४१ श्लोकः ८) अन्तावसायी अन्तावसायिनी, नापितः नापिती । "नाई" "नाइन" । "नाऊ" "हजाम" इति च लोके । 'क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः ।' इति—(अम० ना० लिं० पृ० ३४१ श्लोकः १०) । तक्षणी तक्षा = रथकारः । "सुतार" "बढ़ई" इति च लोके। 'तक्षा तु वर्द्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।' इति—(अम० ना० लिं० पृ० ३४१ श्लोकः ९) । 'तन्तुवायी तन्तुवायः = तंत्रवायः, कुविन्दः । "कोली" "तांती" इति च लोके। 'तन्तुवायः कुविन्दः स्यात्' इति--(अम० ना० लिं० पृ० ३४० श्लोकः ६) । रजकी रजकः = निर्णेजकः । "धोबिन" "धोबी" इति च लोके । 'निर्णेजकः स्याद्रजकः' इति--(अम० ना० लिं० पृ० ३४२ श्लोकः १०) । चर्मकारी चर्मकारः = पादूकृत् । "चमारिन" "चमार" इति च लोके । 'पादूकृच्चर्मकरः स्यात्' इति--(अम० ना० लिं० पृ० ३४१ श्लोकः ७) इति द्विपदजातित्वात् । मूषी मूषः = प्राणिविशेषः । "चूही" "चूहा" इति च लोके । 'मूषकश्चाखुरुन्दुरुः ।' इति-(प० र०

मा० पृ० ३५ पं० २०) । इयमहिः अयमहिः = सर्पः । ''सांपिन'' ''सांप'' इति च लोके ।' 'अहिर्वृत्रासुरे सर्पे' इति--(मे० पृ० १७५ श्लोकः २) । दंशी दंशः = क्षुद्रजन्तुविशेषः । ''छोटी वनमक्खी'' इति लोके । 'दंशस्तु वनमक्षिका ।' दंशी तज्जातिरल्पा स्यात् इति--(अम० ना० लि० पृ० १५७ श्लोकः २७)। 'दंशः कीटविशेषे च वर्मदंशनयोः पुमान् ।' इति--(मे० पृ० १६३ श्लोकः ७) । शेषं प्राग्वत् ।

॥ इति पुंस्त्रीलिङ्गानुशासनम् ॥

अथ पुन्नपुंसकलिङ्गानुशासनम् ।

तत्राऽऽदौ अब्जादीन् कुकूलपर्यन्तान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ६ श्लोकः ८७-८) ।

पुन्नपुंसकलिङ्गो–ऽब्जः शङ्खे, पद्मो–ऽब्ज–संख्ययोः।
कंसो–ऽयसि, कुशे बर्हि, बालो ह्रीबेर–केशयोः ।।१।।
द्वापरः संशये, छेदे पिप्पलो, विष्टर–स्तरौ ।
अब्दो वर्षे, दर–स्त्रासे, कुकूल–स्तुषपावके ।।२।।

अनयोर्व्याख्या—

पुमिति। 'पुन्नपुंसकलिङ्गः' इत्यधिकारः । शंखे शंखार्थे अब्जः अब्जशब्दः पुन्नपुंसकलिङ्गः स्यात् । एवं अब्जसंख्ययो अब्जार्थे संख्याविशेषार्थे च पद्मः । अयसि लोहविशेषे कंसः । कुशे बर्हिः । ह्रीबेरकेशयोः ह्रीबरार्थे केशार्थे च बालः । संशये द्वापरः । छेदे पिप्पलः । तरौ विष्टरः । वर्षे अब्दः । त्रासे दरः । तुषपावके कुकूलश्चैते शब्दाः उक्तार्थेषु पुन्नपुंसकलिङ्गा भवन्ति । अब्जः, अब्जम् = शंखः । 'अब्जोऽस्त्री शंखे, ना निचुले धन्वन्तरौ च हिमकिरणे । क्लीबं पद्मे' इति–(मे० पृ० ३० श्लोकः ३) । पद्मः, पद्मम् = अब्जम्, नलिनम्, अरविन्दम्, कमलम्, तामरसम्, राजीवम् । 'वसन्ते शीतभीताश्च कोकिलस्य वने रुतम् । अन्तर्जलगताः पद्माः श्रोतुकामारिवोत्थिता ।' इति—(श० चिं० पृ० ४१ स्तं० २ पं० १२ तः १६ या०) । संख्याविशेषः, दशार्बुदम्, निधिप्रभेदः, व्यूहविशेषः, गजास्यविन्दुवृन्दम्, पद्मकम्, पद्मकाष्ठौषधिश्च । 'पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे । ना नागे, स्त्री फञ्जिकाश्रीचार्वाटीपन्नगीषु च ।' इति—(मे० पृ० १०९ श्लोकः १८) । 'पद्मोऽस्त्रियां महापद्मः शंखो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ।' इति च शब्दार्णवः' इति—(अम० सु० व्या० पृ० २९ स्तं० २ पं० १३-४) । कंसः, कंसम् = तैजसद्रव्यम्,

---

पाणिनीयेऽपि—(१) (पुन्नपुंसकयोः) ॥ अधिकारोऽयम् । सि० कौ० पृ० ४०४ सू० १७७ ।

(२) (कंसं चाप्राणिनि) ॥ अप्राणिनि कंसं पुन्नपुंसके स्यात् । अयं–कंसः, इदं–कंसम् = भाजनम् । अयश्च । "कंसोऽस्त्री पानभाजनम्" इत्यमरः ।' प्राणिनि तु कंसः = उग्रसेनपुत्रः, मथुराधिपः । सि० कौ० पृ० ४०१ सू० ९८ ।

लोहविशेषः, कांस्यम्, परिमाणविशेषश्च । 'कंसोऽस्त्री तैजसद्रव्ये कांस्ये माने,ऽसुरे तु ना ।' इति-- (मे० पृ० १७० श्लोकः २) । बर्हिः(स्)=कुशः । 'बर्हिः पुंसि हुताशने । न स्त्री कुशे' इति (मे० पृ० १७२ श्लोकः ३६) । बालः, बालम्=ह्रीबेरम्, केशश्च । 'बालो ना कुन्तलेऽश्वस्य गजस्यापि च(करिणश्चापि) बालधौ । नारिकेरे (ले), हरिद्रायां मल्लिकाभिद्यपि स्त्रियाम् ।। वाच्यलिङ्गोऽर्भके मूर्खे, ह्रीबेरे पुन्नपुंसकम् ।' इति--(मे० पृ० १४७ श्लोकः ३९) । 'बालो मूर्खेऽर्भके, व्यालग्राहावश्वेभपुच्छयोः । ह्रीबेरकेशयोः' इति च—(ना० मं० पृ० ७८ पं० ७,८) । द्वापरः, द्वापरम्=संशयः, युगं च । 'द्वापरौ युगसंशयौ ।' इति--(अम० ना० लिं० पृ० ४२५ श्लोकः १६२) । 'द्वापरं (रः) संशये युगे ।' इति च— (मे० पृ० १३४ श्लोकः १६८) । पिप्पलः, पिप्पलम्=वस्त्रच्छेदविशेषः । 'पिप्पलं सलिले वस्त्रच्छेदभेदे च, ना तरौ ।' इति— (मे० पृ० १५३ श्लोकः १११) । विष्टरः, विष्टरम्=तरुः, वृक्षः । 'विष्टरः कुशमुष्टौ स्यादासने च महीरुहे ।' इति— (मे० पृ० १३८ श्लोकः २१४) । अब्दः, अब्दम्=वर्षम् । 'अब्दः सँव्वत्सरे वारिवाहमुस्तकयोः पुमान् ।' इति--(मे० पृ० ७४ श्लोकः २) । दरः, दरम्=त्रासः । 'दरोऽस्त्री साध्वसे गर्ते' इति--(मे० पृ० १२६ श्लोकः ४६) । कुकूलः, कुकूलम्=तुषपावकः । 'कुकूलं शङ्कुभिः कीर्णे श्वभ्रे, ना तु तुषानले ।।' इति--(वै० पृ० २५८ श्लोकः २४) ।

अथ सम्प्रति जन्यादीन् सम्परायपर्य्यन्तान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ६ श्लोकः ८९) ।

परीवाद–पर्य्यङ्कयो–र्जन्य–तल्पौ
तपो–धर्म–वत्सानि माघो–ष्ण–हृत्सु ।
वट–स्तुल्यता–गोल–भक्ष्येषु वर्णः
सितादि–स्वराद्यो रणे सम्परायः ।।३।।

अस्य व्याख्या—

परीवादेति । परीवादपर्य्यङ्कयोर्यथासंख्येन जन्यतल्पौ, पुन्नपुंसकलिङ्गौ भवतः । यथा— परीवादे जन्यम् । पर्यङ्के तल्पम् । एवं माघोष्णहृत्सु क्रमेण तपो घर्मवत्सानि पुन्नपुंसकलिङ्गे स्युः । यथा--माघेतपाः । उष्णे घर्मः । हृदि वत्सम् । तुल्यतागोलभक्ष्येषु वटः । सितादिस्वराद्योः वर्णः । रणे सम्परायश्चैते शब्दा उक्तार्थेषु पुन्नपुंसकलिङ्गा भवन्ति । जन्यः, जन्यम्=परीवादः । 'जन्यं हट्टे परीवादे संग्रामे च नपुंसकम् । जन्या मातृवयस्यायां, जन्यः स्याज्जनके पुमान् ।' इति--(मे० पृ० ११४ श्लोकः २५-६) । तल्पः, तल्पम्=पर्यङ्कः । 'तल्पमट्टे कलत्रे च शय-

नीये च न द्वयोः ।' इति—(मे० पृ० १०२ श्लोकः ६) । तपाः, तपः = माघः । 'तपो लोकान्तरेऽपि च ॥ चान्द्रायणादौ धर्मे च, पुमान् शिशिरमाघयोः ।' इति— (मे० पृ० १७१ श्लोकः २३) । घर्मः, घर्मम् = उष्णः । 'घर्म्मः स्यादातपे ग्रीष्मेऽप्यूष्म (ऽप्युष्ण) स्वेदाम्भसोरपि ।' इति— (मे० पृ० १०९ श्लोकः १२) । वत्सः, वत्सम् = पुत्रः, वत्सरश्च । 'वत्सः पुत्रादिवर्षयोः । तर्णके नोरसि क्लीबम्' इति—(मे० पृ० १७० श्लोकः ११०) । वटः, वटम् = तुल्यता, गोलम्, भक्ष्यं च । 'वटो वृक्षे गुणे गोले साम्ये भक्ष्यवराटयोः ।' इति—(अने० ति० पृ० ३१ श्लोकः २८४) । वर्णः, वर्णम् = सितादिः, स्वरादिश्च । 'वर्णो विप्रादिके कीर्तौ द्युतौ गीतक्रमे व्रते । शुक्लादिस्तुतिवेषेषु चित्राक्षरकुथास्वपि ॥ अङ्गरागे गुणे रूपे भेदे तालान्तरे शरे । स्वर्णे, वर्णं कुङ्कुमे तु स्यात्' इति--(अने० लिं० पृ० ३० श्लोकः २६७) । सम्परायः, सम्परायम् = रणम् । 'सम्परायो मुखे चापि संग्रामोत्तरकालयोः ।' इति--(अने० ति० पृ० ८३ श्लोकः १९२) ।

अथाधुना सैन्धवादीन् एकरात्रपर्यन्तान् पुन्नपुंसकलिङ्गवाचक शब्दानाह, हेमः-- (अभि० सं० लिं० पृ० ७ श्लोकः ९०-१-२-३) ।

सैन्धवो लवणे, भूतः प्रेते, तमो विधुतुन्दे ।
स्व-दायौ कस्वरे, कृच्छ्रं व्रते, शुक्रोऽग्नि-मासयोः ॥४॥
कर्पूर-स्वर्णयो-श्चन्द्र, उडा-वृक्ष-श्छदे दलः ।
धर्म्मः स्वभावे, रुचको भूषाभि-र्मातुलुङ्गयोः ॥५॥
पाताले वाडवो, वध्रः सीसे, आमलकः फले ।
पिट-जङ्गल-सत्त्वानि पिटका-मांस-जन्तुषु ॥६॥
मधु-पिण्डौ सुरा-तन्वो-र्मध्योऽवलग्न-मध्ययोः ।
एका-द्रात्रः समाहारे तथा' ··· ··· । इति ।

एषां व्याख्या—

सैन्धव इति । लवणे सैन्धवः । प्रेते भूतः । विधुन्तुदे तमः । कस्वरे स्वदायौ । व्रते कृच्छ्रम् । अग्निमासयोः शुक्रश्चैते पुन्नपुंसकलिङ्गा भवन्ति । कर्पूरेति । कर्पूरस्वर्णयोः चन्द्रः । उडौ ऋक्षः ।

पाणिनीयेऽपि--(१) (म द्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च) एतानि नपुंसके । चात्पुंसि स्युः । मद्गुः, मद्गु= । अयं मधुः, इदं मधु=सुरा । सीधुः शीधुः, सीधु शीधु=आसवः । सानुः, सानु= पर्वतस्य समभूभागे । कमण्डलुः, कमण्डलु=करकः, कुण्डी, सन्न्यासिनां मृत्काष्ठादिमयं पात्रम् । सि० कौ० पृ० ३९९ सू० ५५ ।

छदे दलः । स्वभावे धर्मः । भूषाभिन्मातुलुङ्गयो रुचकश्चैते पुन्नपुंसकलिङ्गा भवन्ति । पाताल इति । पाताले वाडवः । सीसे वर्द्धः । फले आमलकः । पिटकामांसजन्तुषु क्रमेण पिटजंगलसत्त्वानि चैते शब्दाः पुन्नपुंसकलिङ्गा भवन्ति । मध्विति । सुरातन्वोः मधुपिण्डौ । शेवालमध्ययोः नाम । एकात् रात्रः, तथा समाहारे चैते पुन्नपुंसकलिङ्गाः स्युः । सैन्धवः, सैन्धवम् = लवणम् । 'सैन्धवो लवणे न स्त्री, हये ना, सिन्धुजे त्रिषु ।' इति—(ना० र० मा० पृ० १०७ पं० १७) । भूतः, भूतम् = प्रेतः । 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबं, त्रिषूचिते । प्राप्ते वृ(वि)त्ते समे सत्ये, देवयोन्यन्तरे तु ना । कुमारेऽपि' इति—(मे० पृ० ५७ श्लोकः ४१)। तमाः, तमः = विधुन्तुदः । 'तमो ध्वान्ते गुणे शोके क्लीबं, वा ना विधुन्तुदे ।' इति— (मे० पृ० १७१ श्लोकः २४) । स्वः, स्वम् = कस्वरम्, धनम् । दायः, दायम् = कस्वरम्, धनम् । कृच्छ्रः, कृच्छ्रम् = व्रतविशेषः । 'कृच्छ्रमाख्यातमाभीले पापसान्तपनादिनोः ।' इति—(मे० पृ० १२४ श्लोकः १६) । शुक्रः, शुक्रम् = अग्निः, ज्येष्ठमासश्च । 'शुक्रो हुताशने मासभेदे दैत्यगुरौ सिते । शुक्रं नेत्रगदे बीजे' इति—(अने० ति० पृ० ३५ श्लोकः ३२४) । चन्द्रः, चन्द्रम्—कर्पूरः, स्वर्णं च । 'चन्द्रः सुवर्णे कर्पूरे मेचके रजनीपतौ । कम्पिल्ये सलिले काम्ये' इति—(अने० ति० पृ० १६ श्लोकः १११) । ऋक्षः, ऋक्षम् = नक्षत्रम् । 'भल्लूके शोणके चक्षो, नक्षत्रे पुन्नपुँसकम् ।' इति—(त्रि० शे० पृ० ३७८ श्लोकः ४३६) । 'ऋक्षं धिष्ण्ये, भवेदृक्षो भल्लूके स्यात्' इति च—(अने० ति० पृ० ९ श्लोकः ३५) । दलः, दलम् = छदः, भागश्च । 'अर्द्धे पत्रे छदे दलम् ।' इति–(त्रि० शे० पृ० ३७२ श्लोकः ३९७) । 'दलमुत्सेधखण्डयोः । शस्त्री-छदेऽप्यपद्रव्ये पत्रेऽपि' इति—(मे० पृ० १४७ श्लोकः २६) । 'दलो भागे, दलं छदे ।' इति च—(वै० पृ० २३३ श्लोकः ३९) । धर्मः, धर्मम् = स्वभावः । 'धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ । अहिंसोपनिबन्न्याये, ना धनुर्यमसोमपे ।' इति—(मे० पृ० १०९ श्लोकः १६) । 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ ।' इति च—(ना० मं० पृ० ५८-९ पं० २१-२) । रुचकः, रुचकम् = भूषाभिद्, मातुलुङ्गश्च । 'रुचको बीजपूरे च निष्के दन्तकपोतयोः । न द्वयो सर्जिका-क्षारेऽप्यश्वाभरणमाल्ययोः । सौवर्चलेऽपि मङ्गल्यद्रव्ये चाप्युत्कटे (ऽपिकटके) ऽपि च ।' इति—(मे० पृ० १२ श्लोकः १४७) । 'रुचकं सर्जिकाक्षारे रोचनाहृद्यगन्धयोः । रुवौ लुङ्गे च रुचकः' इति—(शि० को० पृ० ५ श्लोक० ४६-७) । 'सौवर्चलं बीजपुरं मङ्गल्यद्रव्यकं तथा । ग्रीवाभरणकं चैव चतुर्षु रुचकं स्मृतम् ।' इति धन्वन्तरिः' इति—(रा० नि० पृ० ४४१ श्लोकः २) । 'सौवर्चलं मातुलुङ्गं शिलाचन्दनपेषणी । ग्रीवाभरणकं चैषु चतुर्षु रुचकं स्मृतम् ।' इति ग्रन्थान्तराच्च' इति—(अम० सु० व्या० पृ० १५५ स्तं० २ पं० २२-३) । वाडवः, वाडवम् = पातालम् । 'वाडवं करणे स्त्रीणां घोटकौघे नपुंसकम् । पाताले न स्त्रियाम् ।' इति—(मे० पृ० १६१ श्लोकः ५०) । वर्द्धः, वर्द्धम् = सीसम् । 'अस्त्री वर्द्धं त्रपुवरत्रयोः ।' इति–(मे० पृ० १२८ श्लोकः ८२) । 'वर्द्धः सीसवरत्रयोः ।' इति च—(अने० सं० पृ० ३७ श्लोकः ४६५) । आमलकः, आमलकम् = फलम्

धात्रीफलम् । 'धात्रीफलं त्वामलकम्' इति--(श० र० स० पृ० ३२ पं० १३) । पिटः, पिटम् = पिटका, विस्फोटः । 'मञ्जूषायां तु पिटको, विस्फोटे पिटका (को) मता ।' इति--(श० र० स० पृ० २१ पं० ७) । 'पिटं चालः' इति---(त्रि० शे० पृ० २८० श्लोकः २) । 'अथ कण्डोलः पिटकः पिटः ।' इति—(वै० पृ० १६४ श्लोकः ६४) । यादवस्तु त्रयीत्याह—'विस्फोटः पिटका त्रयी ।' इति—(वै० पृ० १८३ श्लोकः १२३) । जंगलः, जंगलम् = मांसम् । 'जङ्गलं निर्जनस्थाने त्रिलिङ्ग्यां, पिशितेऽस्त्रियाम् ।' इति—(मे० पृ० १५१ श्लोकः ९३) । सत्त्वः, सत्त्वम् = जन्तुः । 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।' इति—(अम० ना० लिं० पृ० ४३४ श्लोकः २१३) । मधुः, मधु = सुरा, मधूलश्च । 'मधु पुष्परसे क्षौद्रे मद्ये, ना तु मधुद्रुमे ।।' इति-(मे०पृ० ७९ श्लोकः ११) । 'मधूलं, तु मधुर्नस्त्री' इति च--(वै० पृ० १३४ श्लोकः १३४) । तनुः, तनु = पिण्डः । 'पिण्डो वृत्ते तनौ गुडे ।' इति-(वै० पृ० २३२ श्लोकः ३५) । मध्यः, मध्यम् = अवलग्नम्, मध्यं च । एकरात्रः, एकरात्रम् । एकाचासौ रात्रिश्च एकरात्रम् । द्विरात्रः, द्विरात्रम् । द्वयोः रात्र्योः समाहारः । त्रिरात्रः त्रिरात्रम् । तिसृणां रात्रीणां समाहारः ।

अथ सम्प्रति सक्रमान् कान्तादीन् घान्तान्तान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः । (अभि० सं० लिं० पृ० ७ श्लोकः ६३ तः ६८ या०) ।

— — —सूतंक-कूलकौ ।।७।।
वैनीतक-भ्रमरकौ मरको वलीक-
वल्मीक-वल्क-पुलकाः फरक-व्यलीकौ ।
किञ्जल्क-कल्क-मणिक-स्तवकाऽवतङ्क-
वर्चस्क-चूचुक-तडाक-तटाक-तङ्काः ।।८।।
वालकः फलक--माल--कालका
मूलक--स्तिलक---पङ्क---पातकाः ।

पाणिनीयेऽपि-(१) (कोपधः) (कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च) ।। चात्पुंसि । एतानि पुन्नपुंसके स्युरित्यर्थः । अयं शुष्कः, इदं शुष्कम् = अनार्द्र निस्सारो वा । भाण्डकः, भाण्डकम् = भाजनविशेषः । "कटोरा" इति लोके । पिण्डकः, पिण्डकम् = श्राद्धे विशेषद्रव्यनिर्मितविल्वाकारं पितृदेयमन्नम् । शण्डकः=दैत्यपुरोहितः, शण्डकम् = अब्जादिसमूहः । पिटकः = पुस्तकादीनां मञ्जूषा, पेटकम् = चालः, छदिः । तालकः = कर्णभूषणविशेषः, तालकम् = द्वारपिधानसाधनयंत्रम् । पुलाकः, पुलाकम् = कदन्नम्, ओदनं च । शेषशब्दानां व्याख्या तु हैमादितो बोध्या । सि० कौ० पृ० ३९९ सू० ६२ ।

कोरकः करक–कन्दुका–ऽन्दुका–
ऽनीक–मिष्क–चषका विशेषकः ॥९॥
शाटक–कण्टक–टङ्क–विटङ्का
मञ्चक–मेचक–नाक–पिनाकाः ।
पुस्तक–मस्तक–मुस्तक–शाका
वर्णक–मोदक–मूषिक–मुष्काः॥१०॥
चण्डातक–श्चरक–रोचक–कञ्चुकानि
मस्तिष्क–यावक–करण्डक–तण्डकानि ।
आतङ्क–शूक–सरकाः कटकः सशुल्कः
पिण्याक–झर्झरक–हंसक–शंख–पुंखाः ॥११॥
नख–मुख–मधिकाङ्गः संयुगः पद्मरागो
भग–युग–मथ टङ्गो–द्योग–शृङ्गा निदाघः ।

अस्य व्याख्या–

सूतकेति । वैनीतकेति । बालक इति । शाटकेति । चण्डातक इति । नखेति च । शुल्केन सह वर्त्तते सशुल्कः । इह नखमुखं भगयुगं च विहाय सर्वत्रेतरेतरयोगो द्वन्द्वः । नख-मुखे भगयुगे च समाहारो द्वन्द्वः । एते सूतकादयो निदाघान्ताः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति । कूलकः, कूलकम् =स्तूपः । 'कूलकं न स्त्रियां स्तूपे, पुंसि स्यात्कृमिपर्वते ।' इति—(मे० पृ० ७ श्लोकः ७३) । वैनीतकः ,वैनीतकम् =परम्परावाहनम् । 'परम्परावाहनं यत्तद्वैनीतकमस्त्रि-याम् ।' इति--(वै० पृ० ११५ श्लोकः १३७) । भ्रमरकः, भ्रमरकम् =ललाटे लम्बमानालकाः, भ्रामरम्, माक्षिकं च । 'ते ललाटे भ्रमरकाः कुरुला भ्रमरालकाः ॥' इति । 'भ्रामरं तु भ्रमरकं क्षौद्रं सारघमाक्षिके ।' इति च—(वै० पृ० १८१ श्लोकः ९९) । मरकः, करकम् = घनप्राणिमरणम्, मारकः । "मारी" इति लोके । 'मरकः स्यान्महामार्य्याम्' इति—(श० र० स० पृ› २३ पं० १६) । वलीकः, वलीकम् =चोलान्तः, पटलप्रान्तः । 'नीव्रं (ध्रं) वलीकं चोलान्ते' इति--(वै० पृ० १६२ श्लोकः ३७) । 'वलीकनीध्रे (व्रे) पटलप्रान्ते' इति च (अम० ना० लिं०पृ०श्लोकः) । वल्मीकः, वल्मीकम् =पिपीलिकाकृतो मृत्सञ्चयविशेषः । 'वल्मीको रोगभेदे, च नाकौ च पुन्नपुंसकम् ।' इति—(मे० पृ० ११ श्लोकः १२८) । वल्कः, वल्कम् =

पाणिनीयेऽपि--(१) (शृङ्गार्घनिदाघोघमशल्यदृढाः) ॥ एते पुन्नपुंसकयोः स्युः । अय अर्घः, इदं अर्घम् = मूल्यम् । पूजाविशेषश्च । शेष० व्या० है० बो० । सि० कौ० पृ० ४०४ सू० १७९ ।

वल्कलम् । 'वल्कं वल्कलमस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० १३१ श्लोकः १२) । 'वल्कं वल्कलशल्कयोः ।' इति च---(मे० पृ० ४ श्लोकः ३४) । पुलकः, पुलकम् = प्रस्तर-विशेषः, पर्वतीयमृत्तिकाविशेषः, कङ्कुष्ठं च । 'कृमिप्रभेदे रोमाञ्चे पुलकं प्रस्तरे विदुः ।' इति--(अने० सम्० पृ० ३३ श्लोकः ३७३) । 'पुलकः कृमिप्रभेदे प्रस्तरभेदे च मणिदोषे ।। रोमाञ्चे हरिताले गजान्नपिण्डे च गन्धर्वे ।' इति---(मे० पृ० १० श्लोकः १२१-२) । फरकः, फरकम् = चर्म, चर्मावरणम् । "ढाल" "फरि" इति च लोके । काष्ठासनं च । तलयोरभेदः । 'फलकोऽस्त्री फलं चर्म' इति---(अम० ना० लिं० पृ० २९४ श्लोकः ९०) । 'फलकी चन्दने स्त्री, न स्त्री दार्वासनचर्म्मणोः ।' इति च--(वै० पृ० २६१ श्लोकः ६०) । व्यलीकः, व्यलीकम् = नागरः, षिङ्गः, अप्रियम्, पीडनं च । 'दुःखे विलक्षे व्यलीकमप्रियाकार्ययोस्तु ना ।।' इति---(वै० पृ० २६३ श्लोकः ७९) । 'व्यलीकं च प्रतारणम् ।।' इति च--(मे० पृ० १९४ श्लोकः ३५) । 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीडने । ना नागरे' इति च---(मे० पृ० १३ श्लोकः १५५) । किञ्जल्कः, किञ्जल्कम् = पुष्परेणुः, पुष्परजः, । 'किञ्जल्कः केसरे, खे क्ली' इति---(वै० पृ० २५६ श्लोकः ३१) । 'पुष्परेणौ च किञ्जल्कः' इति । 'किञ्जल्कः केसरोऽस्त्रियाम् ।' इति च--(अम० ना० लिं० पृ० १०८ श्लोकः ४३) । इह साहचर्य्यात् किञ्जल्कोऽप्यस्त्रियां स्यात् । कल्कः, कल्कम् = घृततैलादिशेषः, दम्भः, विभीतकद्रुश्च । 'कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके ।' इति---(मे० पृ० २ श्लोकः १६) । मणिकः, मणिकम् = अलिञ्जरः, महाकुम्भः । "माट" इति लोके । 'मणिकः स्यादलिञ्जरम् ।' इति---(वै० पृ० १६३ श्लोकः ५६) । 'अलिञ्जरे तु मणिकः' इति च--(श० र० स० पृ० २३ पं० १५) । स्तवकः, स्तवकम् = गुच्छकः, पुष्पकलिकादिकदम्बः, पुष्पादिसंघातः । 'स्याद्गुत्स(च्छ) कस्तुस्तबकः' इति--(अम० ना० लिं० पृ० १३३ श्लोकः १६) । 'गुच्छो गुलुञ्छः स्तवको गुच्छकः कुसुमोच्चयः ।' इति च--(रा० नि० पृ० ३२६ श्लोकः २७) । अवतङ्कः, अवतङ्कम् = स्वल्पभयम् अल्पदरम् । वर्चस्कः, वर्चस्कम् = विष्ठा, शकृत् । 'उच्चारो, विण् न ना, गूथो वर्चस्को, मलमस्त्रियाम् ।' इति--(वै० पृ० १८२ श्लोकः ११६) । 'वर्चस्कं तु पुरीषे स्यात्' इति च--(श० र० स० पृ० २७ श्लोकः १) । इहोभयोः कोशयोर्भिन्नलिङ्गस्तेनायं पुन्नपुंसकलिङ्गो ज्ञेयः । चूचकः, चूचकम् = कुचाग्रभागः । 'चूचको ना, कुचाननम् ।' इति रत्नकोशः' इति---(अम० सु० व्या० पृ० २२९ स्तं १ पं० ३९, ४०) । अमरस्तु क्लीबत्वमाह--'चूचुकं तु कुचाग्रं स्यात्' इति--(अम० ना० लिं० पृ० २२९ श्लोकः ७७) । अतश्चूचुकशब्दः पुन्नपुंसकलिङ्गो बोध्यः । तडाकः, तडाकम् । तटाकः, तटाकम् । 'तडागः' 'तडागम्' इत्यपि । एते जलाधारविशेषे पद्माकरे । यंत्रकूटके च पुन्नपुंसकलिङ्गाः स्युरित्यर्थः । 'तडागोऽस्त्री जलाधारविशेषे यंत्रकूट (प) के ।' इति--(मे० पृ० २४ श्लोकः ३४) । 'पद्माकरस्तडागोऽस्त्री' इति च--(अम० ना० लिं० पृ० १०३ श्लोकः २८) ।

तङ्कः, तङ्कम् = भयम्, दुःखेन जीवनं च। 'तङ्कोऽस्त्री भीर्भिया भीतिः साध्वसं भयनं भयम्।' इति--(वै० पृ० ९८ श्लोकः १८५)। वालकः, वालकम् = पारिहार्य्यः। 'वालकोऽस्त्री पारिहार्य्ये त्रिषु स्यादङ्गुरीयकम्।' इति— (मे० पृ० १३ श्लोकः १५८)। फलकः, फलकम् = चर्म, चर्मावरणम्, काष्ठासनं च। 'फलकी चन्दने स्त्री, न स्त्री दार्वासनचर्म्मणोः।' इति— (मे० पृ० ९७ श्लोकः ९७)। मालकः, मालकम् = ग्रामान्तरालाटवी। अलकः, अलकम् = चूर्णकुन्तलः, कुटिलकेशः। 'अलका कुबेरपुर्य्या-मस्त्रियां चूर्णकुन्तले।' इति--(मे० पृ० ४ श्लोकः ४१)। मूलकः, मूलकम् = भूमिजद्रव्यविशेषः। 'हरिपर्णे मूलकोऽस्त्री, सेकिमं बुस्तिका न षण्।' इति—(वै० पृ० ५७ श्लोकः १५५)। 'मूलकं पर्णमूलके।' इति च--(श० र० स० पृ० २४ श्लोकः १२)। तिलकः, तिलकम् = ललाटे कस्तूर्य्यादिना कृततिलकम्। 'तमालपत्रतिलकचित्रकाणि विशेषकम्। द्वितीयं च तुरीयं च न स्त्रियाम्' इति—(अम० ना० लिं० पृ० २४५ श्लोकः १२३)। 'अत्र द्वितीयं तिलकमिति तुरीयं विशेषकमिति च द्वे न स्त्रियां किन्तु पुन्नपुंसकयोः' इति टीका। 'तिलको द्रुमरोगाश्वभेदेषु तिलकालके। क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु विशेषके।' इति च-- (मे० पृ० ६ श्लोकः १००)। पङ्कः, पङ्कम् = कर्दमः, पापं च। 'पङ्कोऽस्त्री कर्दमे पापे' इति— (मे० पृ० ३ श्लोकः २९)। पातकः, पातकम् = ब्रह्महत्यादि, नरकसाधनम्, पापम्। 'पापं तु पातकम्' इति-(त्रि० शे० पृ० २७१ श्लोकः ११)। 'दुरितं पातकं पापम्' इति च--(वै० पृ० ९७ श्लोकः १६८)। कोरकः, कोरकम् = कुड्मलः, कक्कोलकम्, मृणालम्, बिसं च। 'कोरकोऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः।' इति--(मे० पृ० ७ श्लोकः ७५)। तथा च प्रयोगः--'समुपहरन् विचकार कोरकाणि' इति माघः--इति मुकुटः' इति--(अम० सु० व्या० टि० पृ० १३३ स्तं० २ पं० ४०)। यादवस्तु पुंस्त्वमाह--'कलिका कोरकश्च' इति— (वै० पृ० ४६ श्लोकः १९)। इह कोरकस्य पुंस्त्वं प्रचुरप्रयोगदर्शनादुक्तम्। करकः, करकम् = कमण्डलुः। 'करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च। द्वयोर्मेघो (वर्षो) त्पले, न स्त्री करङ्के च कमण्डलौ।' इति-(मे० पृ० ५ श्लोकः ५४)। कन्दुकः, कन्दुकम् = गेन्दुकः। "गेंद" इति लोके। 'कन्दुकः क्रीडनीये स्यात्' इति—(श० र० स० पृ० १० पं० ३)। अन्दुकः, अन्दुकम् = हस्तिपाद-बन्धननिगडः। 'प्राची तु शृंखला हिञ्जीरोऽस्त्री स्यादन्दुकश्च सः।' इति--(त्रि० शे० पृ० २९२ श्लोकः ३३)। 'अन्दुकः कन्दुकं प्रोक्तो, निगडे च मतोऽस्त्रियाम्।' इति च--(श० र० स० पृ० ७ पं० १६)। अनीकः, अनीकम् = युद्धम्, सैन्य च। 'चक्रं चानीकमस्त्रियाम्' इति--(अम० ना० लिं० पृ० २८९ श्लोकः ७८)। 'अनीकोऽस्त्री रणे सैन्ये' इति—(मे० पृ० ४ श्लोकः ४२)। निष्कः, निष्कम् = सुवर्णाष्टशतम् पलम्, उरोभूषणं च। 'निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः। वक्षोऽलङ्करणे हेमपात्रे हेमपलेऽपि च।' इति--(मे० पृ० ३ श्लोकः २८)। चषकः, चषकम् = सुरापात्रम्, मधु, मद्यप्रभेदश्च। 'चषकोऽस्त्री सुरापात्रे मधुमद्यप्रभेदयोः।' इति-(मे० पृ० ८ श्लोकः

८६) । विशेषकः, विशेषकम् = ललाटे कस्तूर्य्यादिना कृततिलकम्। 'न स्त्रियां तु विशेषके ।' इति--(मे० पृ० १७ श्लोकः २१४) । शाटकः, शाटकम् = वस्त्रविशेषः । "साड़ी" इति लोके । 'सिचयप्रोथशाटकाः ।' इति--(त्रि० शे० पृ० २९२ श्लोकः ३४) । कण्टकः, कण्टकम् = विल्वादीनामवयवविशेषः । "काँटा" इति लोके । सूच्यग्रम्, क्षुद्रशत्रुः मत्स्यादिकीकसम्, ज्योतिश्शास्त्रे भावानां संज्ञाविशेषश्च। 'कण्टको न स्त्रियां क्षुद्रशत्रौ मत्स्यादिकीकसे ।' इति —(मे० पृ० ५ श्लोकः ५८) । टङ्कः, टङ्कम् = खनित्रम् । "कुदाल" इति लोके। टङ्कनम्, नीलकपित्थश्च। 'टङ्को नीलकपित्थे च खनित्रे, टङ्कनेऽस्त्रियाम् ।' इति-- (मे० पृ० ३ श्लोकः २४) । विटङ्कः, विटङ्कम् = गृहप्रान्ते रचितपक्षिस्थानम्, कपोतपालिका, कपोतपाल्यादिन्यासविशेषः । 'कपोतपालिकायां तु विटङ्क इति गद्यते ।' इति-- (श० र० स० पृ० २८ पं० ३) । मञ्चकः, मञ्चकम् = शयनविशेषः, खट्वा, इन्द्रकोषः, उच्चमण्डपश्च । 'आसन्दी मञ्चकः खट्वाऽपाश्रयो मत्तवारणम्। शय्या पर्य्यङ्कपल्यङ्कौ शयनं शयनीयवत् ।' इति--(वै० पृ० १७२ श्लोकः १६४) । 'इन्द्रकोषास्तु मञ्चकः।' इति--(त्रि० शे० पृ० २८० श्लोकः ४) । मेचकः, मेचकम्=वर्णविशेषः, श्यामः । 'मेचकः शिखिचन्द्रके । स्रोतेऽञ्जनेऽन्धकारे च श्यामले च निगद्यते ।' इति--(श० र० स० पृ० २४ पं० १३) । नाकः, नाकम् = स्वर्गः, आकाशम्, ब्रह्मलोकं च । 'नाकः स्वर्गान्तरिक्षयोः ।' इति--(वै० पृ० ३ श्लोकः १) । 'नाको व्योम्नि च त्रिदिवेऽपि च ।' इति--(श० र० स० पृ० ४ पं० ५) । पिनाकः, पिनाकम् = रुद्रायुधविशेषः । 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः ।' इति--(मे० पृ० १० श्लोकः १२०) । पुस्तकः, पुस्तकम् = लिखितपत्रसञ्चयः, लिखितग्रन्थो मुद्रितग्रन्थो वा । "पोथी" इति लोके । सिन्दूरादेर्दारवभाजनं च । 'पुस्तकं लेखपत्रे स्यात्' इति--(श० र० स० पृ० २२ पं० ४) । 'अस्त्री तु पुस्तकं सिन्दूरादेर्दारवभाजने ।' इति च (वै० पृ० १६७ श्लोकः १०९) । मस्तकः, मस्तकम् = शीर्षम्, शिरः । 'उत्तमाङ्गः शिरः शीर्षं, मूर्धा ना, मस्तकोऽस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० २३६ श्लोकः ९५) । मुस्तकः, मुस्तकम् = ओषधिविशेषः । 'मोथा" इति लोके । 'कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० १८२ श्लोकः १५९) । शाकः, शाकम् = भक्ष्यविशेषः । "भाजी" इति लोके । हरितकम् । 'शाको द्वीपान्तरेऽपि च । शक्तौ द्रुमविशेषे च पुमान्, हरितकेऽस्त्रियाम् ।' इति—(मे० पृ० ४ श्लोकः ३६) । वर्णकः, वर्णकम् = चन्दनम्, विलेपनं च । 'वर्णकश्चारणे स्त्री तु चन्दने च विलेपने । द्वयोर्नील्यादिषु, स्त्री स्यादुत्कर्षे काञ्च(कथ)नस्य च ।' इति--(मे० पृ० १३ श्लोकः १५३) । मोदकः, मोदकम् = भक्ष्यविशेषः । "लड्डू" इति लोके । 'मोदकः खाद्यभेदेऽस्त्री, हर्ष(र्षु)के पुनरन्यवत् ।' इति—(मे० पृ० १२ श्लोकः १४२) । मूषिकः, मूषकः, मूषिकम्, मूषकम् = आखुः, उन्दुरुः । "चूहा" "चूही" इति च लोके । 'उन्दुरुर्मूषिकोऽप्याखुः' इति—

(अम० ना० लिं० पृ० १९१ श्लोकः १२)। 'भद्रमूषिक आसन्दी कुन्दुरुन्दुरुन्दरः। मूषको वज्रदशनः क्रमः काण्डो बिलेशयः।' इति च वाचस्पतिः' इति--(अम० सु० व्या० पृ० १९१ स्तं० १ पं० १२-२)। मुष्कः, मुष्कम्=अण्डकोशः। 'अस्त्रियो मुष्ककोशाण्डा फलको वृषणोऽण्डुकः।' इति--(वै० पृ० १७८ श्लोकः ६३)। चण्डातकः, चण्डातकम्=अर्द्धोरुकम्, वरस्त्रीणामर्द्धोरुपर्य्यंतं वस्त्रम्। ''लहंगा'' इति लोके। अर्द्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम्।' इति--(अम० ना० लिं० पृ० २४३ श्लोकः ११९)। 'चण्डातकमस्त्रियाम्' इत्यपि पाठः। 'अर्द्धोरुकं वरस्त्रीणां वासश्चण्डातकः स्मृतः।' इति पुंस्काण्डे बोपालितात्पुंलिङ्गोऽपि' इति—(अम० सु० व्या० पृ० २४३ स्तं० २ पं० २०, २१)। चरकः, चरकम्=शास्त्रविशेषः, चरकमुनिप्रणीतवैद्यकग्रन्थः। 'चरको ग्रन्थभेदे स्याच्चरकः स्थावरेतरे।' इति—(श० र० स० पृ० १५ पं० ४)। रोचकः, रोचकम्=अवदंशः, बुभुक्षा, हस्तिकर्णश्च। 'हस्तिकर्णस्तु रोचकः।' इति—(वै० पृ० १६६ श्लोकः १२९)। कञ्चुकः, कञ्चुकम्=वारबाणः, चोलकाकृतिसन्नाहः। 'कञ्चुको वारबाणोऽस्त्री' इति—(अम० ना० लिं० पृ० २८६ श्लोकः ६३)। साहचर्य्यात्कञ्चुकोऽपि पुन्नपुंसकलिङ्गः। 'अथ कञ्चुकः। निर्मोके चोलके वारबाणे' इति च—(त्रि० शे० पृ० ३१४ श्लोकः १३)। मस्तिष्कः, मस्तिष्कम्=मस्तुलुङ्गः, गोर्दम्, मस्तकस्थघृताकारस्नेहः। 'मस्तिष्कं मस्तुलुङ्गके।' इति—(श० र० स० पृ० २४ पं० ४)। 'मस्तिष्कं गोर्दं किट्टं, मलोऽस्त्रियाम्।' इति च—(अम० ना० लिं० पृ० २२४ श्लोकः ६५)। यावकः, यावकम्=कुल्माषः। 'कुल्माषोऽर्द्धस्विन्नो यवादिः' इति स्वामी। शूकशून्यो यवादिरिति रक्षितादयः। 'स्याद्यावकस्तु कुल्मासः' इति—(अम० ना० लिं० पृ० ३०७ श्लोकः १८)। 'यवान्नेऽपि तु यावकः।' इति च—(श० र० स० पृ० २५ श्लोकः २)। करण्डकः, करण्डकम्=पुष्पादीनामाधारविशेषः, वंशादिरचितो भाण्डविशेषः। ''करण्डी'' ''कँडी'' इति च लोके। तण्डकः, तण्डकम्=गृहदारुः। छन्दोगब्राह्मणग्रन्थविशेषः, वृक्षस्कन्धः, खञ्जनः, फेनश्च। 'गृहदारौ तण्डकोऽस्त्री समासप्रायवाचि च।' इति--(त्रि० शे० पृ० ३१६ श्लोकः २५)। 'तण्डकः, खञ्जने फेने' इति--(हा० व० पृ० ४०८ श्लोकः २५६)। 'अथ तण्डकः। खञ्जरीटे तरुस्कन्धे फेने मन्दिरदारुणि।' इति च—(अने० ति० पृ० ५० श्लोकः १३०)। आतङ्कः, आतङ्कम्=रोगः, सन्तापः, इष्टवियोगजस्तापः, मुरजध्वनिः, शङ्का च। 'आन्तको रुजि सन्तापे मुरजध्वनिशङ्कयोः।' इति--(अने० ति० पृ० ४० श्लोकः २०)। शूकः, शूकम्=तीक्ष्णाग्रधान्यम्, धान्यादेः सूची। 'शूकोऽस्त्री शुङ्गदलयोः' इति--(मे० पृ० ४ श्लोकः ३८)। 'शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे' इति—(अम० ना० लिं० पृ० ३०९ श्लोकः २३)। श्लक्ष्णं कृशं च तत् तीक्ष्णं च तदग्रं च। 'शूकोऽनुक्रोशशुङ्गयोः।' इति च--(वि० प्र० पृ० ५ श्लोकः ३६)। सरकः, सरकम्=मद्यपानम्। 'मद्यपान-

पात्रम्' इति मुकुटः । 'सरकः शीधुपानेक्षुशीधुनोर्मद्यभाजने ।' इत्यजयः । 'सरकोप्यनुतर्षणम् ।' इति--(अम० ना० लिं० पृ० ३५१ श्लोकः ४३) । अपि शब्दात्सरकोऽप्यस्त्री । 'सरकं वा नाऽनुतर्षो ना' इति रत्नकोषः । 'अनुतर्षः' अपि । 'चषकश्चानुतर्षश्च सरकश्च' इति च भागुरिः' इति—(अम० सु० व्या० पृ० ३५१ स्तं० २ पं० ३१ तः ३७ या०) । कटकः, कटकम् = पर्वतनितम्बः, दन्तिदन्तमण्डनं च । 'कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनां दन्तमण्डने । सामुद्रलवणे राजधानीवलययोरपि ।' इति—(मे० पृ० ५ श्लोकः ५६) । शुल्कः, शुल्कम् = घट्टादिदेयः, वरादथग्रहः, मार्गादिदण्डमानं च । 'शुल्कं घट्टादिदेये, स्याद्वरादर्थग्रहेऽस्त्रियाम् ।' इति--(मे० पृ० ४ श्लोकः ३८) । पिण्याकः, पिण्याकम् = श्च्युततैलकल्कविशेषः, तिलकल्कः । 'पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाल्हीकसिल्हके ।' इति--(मे० पृ० १० श्लोकः ११९) । झर्झरकः, झर्झरकम् = कलियुगम् । 'पुष्यो झर्झरकः कलिः ।' इति--(वै० पृ० २४ श्लोकः ९२) । झर्झरीकः, झर्झरीकम् = शरीरम्, तनुः । इति--(श० चिं० पृ० १०२६ स्तं० पं०, १०) । हंसकः, हंसकम् = पादकटकः, शब्दरहितपादभूषणम्, मानसौकाश्च । 'हंसकं पादकटके, हंसको मानसौकसि । यतौ सदाशिवेऽपि स्यात्' इति--(श० र० स० पृ० ३० पं० ११) । शंखः, शंखम् = कम्बुः । 'शंखः कम्बौ न योषित्' इति--(मे० पृ० २० श्लोकः ५) । पुंखः, पुंखम् = शरमूलम्, शरस्य पिच्छम् । 'पुंखस्तु शरमूले स्यात्' इति--(श० र० स० पृ० ५३ पं० १४) । नखः, नखम् = कररुहम् । 'नखी स्त्रीपुंस(क्लीब)योः शुक्तौ, नरे पुंखन्नपुंसकम् ।' इति--(मे० पृ० २० श्लोकः २) । 'पुनर्भवः कररुहो, नखोऽस्त्री नखरोऽस्त्रियाम् ।' इति च--(अम० ना० लिं० पृ० २३१ श्लोकः ८३) । मुखः, मुखम् = वदनम्, आननम्, मुखबिलम् । 'प्राक् खनो मुडुदात्तश्च ततोऽच्च प्रत्ययो भवेत् । प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधाः ।' इति निरुक्तम् । 'मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः ।' इति--(अने० सं० पृ० ४ श्लोकः २४) । अधिकाङ्गः, अधिकाङ्गम् = सारसतम् । "कमरपट्टी" इति लोके । 'यत्तु मध्येसकञ्चुकाः । बध्नन्ति तत्सारसनमधिकाङ्गः' इति—(अम० ना० लिं० पृ० २८६ श्लोकः ६३) । क्वचित्तु 'सारसनाधिपाङ्गे' इति पाठः । यत्कात्यः--'अधिपाङ्गं सारसनम्' इति । दुर्गस्तु--'तच्च सारसनं ज्ञेयं धिपाङ्गं च निबन्धनम् ।' इति । 'अधिकाङ्गं सारसनं मध्ये धार्यं सकण्टकैः ।' इति--(वै० पृ० ११७ श्लोकः १५६) । इहामरः पुंस्त्वं, यादवस्तु क्लीबत्वं पठति, अतएव पुन्नपुंसकलिङ्गो बोध्यः । संयुगः, संयुगम् = युद्धम्, आयोधनम्, प्रहरणक्रिया । 'सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगाः ।' इति--(अम० ना० लिं० पृ० २९८ श्लोकः १०५) । पद्मरागः, पद्मरागम् = रक्तवर्णमणिविशेषः, माणिक्यम् । "माणक" इति लोके । 'शोणरत्नं लोहितकः पद्मरागः' इति--(अम० ना० लिं० पृ० ३३२ श्लोकः ९२) । भगः, भगम् = रविः, योनिश्च । 'भगं श्रीर्योनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु । महात्म्यैश्वर्य्ययत्नेषु धर्मे मोक्षे च, ना रवौ ।' इति--(मे० पृ० २२ श्लोकः १२) । युगः, युगम् = रथहलाद्यङ्गम् । "जूआ" इति लोके । युग्मं च । 'युगो रथहलाद्यङ्गे, न

द्वयोस्तु कृतादिषु । युग्मे हस्तचतुष्केऽपि वृद्धिनामौषधेऽपि च।' इति--(मे० पृ० २३ श्लोकः १७)। टङ्कः, टङ्कम्=खनित्रकम्, खड्गभेदः, जंघायां च । टङ्कोऽस्त्री स्यात् खनित्रके। खड्गभेदे च जंघायाम्' इति--(मे० पृ० २२ श्लोकः ५)। उद्योगः, उद्योगम्=उद्यमः, यत्नः, चेष्टाः, पराक्रमः। 'उद्योगः प्रौढिमात्रेऽपि' इति--(श० र० स० पृ० ६३ पं० १४)। शृङ्गः, शृङ्गम्=विषाणम्। "सींग" इति लोके । कूर्चशीर्षकं च। 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयंत्रके । विषाणोत्कर्षयोश्चाथ शृङ्गः कूर्चकशीर्षके।' इति--(मे० पृ० २३ श्लोकः २५-६)। निदाघः, निदाघम्=ग्रीष्मकालः, उष्णम्, स्वेदजलं च । 'निदाघो ग्रीष्मकाले स्यादुष्णस्वेदाम्बुनोरपि ।' इति--(मे० पृ० २६ श्लोकः ८)।

अथाधुना चान्तादीन् बान्तान्तान् क्रमसहितान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लि० पृ० ७, ८ श्लोका ९८ तः १०८ या०)।

क्रकच–कवच–कूर्चा-ऽर्धर्च–पुच्छो–ञ्छ–कच्छा :
व्रज[1]–मुटज–निकुञ्जौ कुञ्ज–मूर्जा–ऽम्बुजौ च ॥१२॥

ध्वज–मलयज–कूटा[2]: कालकूटा–ऽऽरकूटौ
कवट–कपट–खेटाः कर्पटः पिष्ट–लोष्टौ ।
नट–निकट–किरीटाः कर्वटः कुक्कुटा–ऽट्टौ
कुट–यकुट–विटानि यङ्कटः कोट्ट–कुष्ठौ ॥१३॥

कमठो वारुण्ड–खण्ड–षण्डा
निगडा–ऽऽक्रीड–नड–प्रकाण्ड–काण्डाः ।
कोदण्ड–तरण्ड–मण्ड–मुण्डा
दण्डा[3]–ऽण्डौ दृढ–वारबाण[4]–बाणाः ॥१४॥

पाणिनीयेऽपि—(१) (व्रजकुञ्जकुथकूर्चप्रस्थदर्पाभर्धर्चदर्भपुच्छाः) ॥ एते पुन्नपुंसकयोः स्युः। कुथः, कुथम्=वर्णकम्बलः। दर्पः, दर्पम्=अहङ्कारः। अर्भः, अर्भम्=शिशुः, कुशश्च। दर्भः, दर्भम्=कुशाख्यशष्पम्। शे० उ०। सि० कौ० पृ० ४०४ सू० २८०।

(२) (टोप :) ॥ (कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च) ॥ एतानि नपुंसके। चात्पुंसि स्युः। कवाटः, कवाटम्=कपाटः। कीटः, कीटम्=क्षुद्रजन्तुः। शे० उ०। सि० कौ० पृ० ३९९ सू० ६५।

पाणिनीयेऽपि--(३) (दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुकाशङ्कुशकुलिशाः) ॥ एते पुन्नपुंसयोः स्युः। शवः, शवम्=मृतशरीरम्। कुशः=रामसुतः। "कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले।" इति विश्वः। शलाका वाची तु स्त्रियाम्। तथा च जनपदादिसूत्रेणायो विकारे ङीषि कुशी। दारुणि तु टापा–कुशा। "बनस्पत्याः

कार्षापण–श्रवण–पक्वण–कङ्कणानि
द्रोणा–ऽपराह्ण–चरणानि तृणं सुवर्णम् ।
स्वर्ण–व्रणौ वृषण–भूषण–दूषणानि
भाण–स्तथा किण–रण–प्रवणानि चूर्णः ॥१५॥

तोरण–पूर्त्त–निकेत–निवाताः
पारत–मन्त–युत–प्रयुतानि ।
क्ष्वेडित–मक्षत–दैवत–वृत्तै–
रावत–लोहित–हस्त–शतानि ॥१६॥

व्रतो–पवीतौ पलितो वसन्त–
ध्वान्ता–ऽयुत–द्यूत–घृतानि पुस्तः ।
शुद्धान्त–बुस्तौ रजतो मुहूर्त्त–
द्वियूथ–यूथानि वरूथ–गूथौ ॥१७॥

प्रस्थं तीर्थं प्रोथ–मलिन्दः
ककुदः कुकुदा–ऽष्टापद–कुन्दाः ।

स्थ ता मा याति" श्रुतिः । अतः क्रमीति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च—"हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दः" इति । तत्र शारीरिकभाष्येऽप्येवम् । एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते "आच्छन्दः" इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपरः इति विभावनीयं बहुश्रुतैः ॥ कुशम्=जलम् । शे० उ० । सि० कौ पृ० ४०४ सू० १२८ ।

(४) (णोऽधः) ॥ (कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचर्णतृणानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । विषाणः, विषाणम्=पशुशृङ्गम् । शे० उ० । सि० कौ० पृ० ४०० सू० ६६ ।

(५) (बाणकाण्डौ नपुंसके च) ॥ एतौ नपुंसके । चात्पुंसि स्तः । व्या० उ० । सि० कौ० पृ० ३९९ सू० ४७ ।

(१) (द्रोणाढकौ नपुंसके च) ॥ एतौ नपुंसके । चात्पुंसि स्तः । व्या० उ० । सि० कौ० पृ० ४०१ सू० १०३ ।

(२) (शतायुतप्रयुताः पुंसि च) ॥ एते पुंसि । चान्नपुंसके स्युः । व्या० उ० । सि०कौ०पृ० ४०२ सू० १४६ ।

(३) (घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः) ॥ एते पुन्नपुंसकयोः स्युः । क्ष्वेलितः, क्ष्वेलितम्=सिंहनादविशेषः । शे० उ० । सि० कौ० पृ० ४०४ सू० १७८ ।

(४) (तीर्थप्रोथयूथगाथानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । गाथः, गाथम्= । शे० उ० । सि० कौ० पृ० ४०० सू ७२ ।

गुद–दोहद–कुमुद–च्छद–कन्दा–
ऽर्बुद–सौध–मथो–त्सेध–कबंन्धौ ॥१८॥
श्राद्धा–ऽऽयुधा–ऽन्धौ–षध–गन्धमादन–
प्रस्फोटना लग्न–पिधान–चन्दनाः ।
वितान–राजादन–शिश्न–यौवनाः
पीनो–दपाना–ऽसन–केतना–ऽशनाः ॥१९॥
नलिन–पुलिन–मौना वर्द्धमानः समानौ–
दन–दिन–शतमाना हायन–स्थान–मानाः ।
धन–निधन–विमाना–स्ताडन–स्तेन–वस्ना
भवन–भुवन–यानो–द्यान–वातायनानि ॥२०॥
अभिधान–द्वीपिनौ निपानः
शयनं लशुन–रसोन–गृञ्जनानि ।
खलिन–खलीना–ऽनुमान–दीपा[3]ः
कुणप–कुतपा–ऽऽवाप–चाप–शूर्पाः ॥२१॥
स्तूपो–डुपौ विटप–मण्डप–शष्प–बाष्प–
द्वीपानि विष्टप–निपौ शफ–डिम्ब–बिम्बाः ।

एषां व्याख्या—

क्रकचेति । ध्वजेति । कमठ इति । कार्षापणेति । तोरणेति । व्रतेति । प्रस्थमिति ।

पाणिनीयेऽपि––(१) (कबन्धौषधायुधान्ताः) ॥ एते पुन्नपुंसकयोः स्युः । व्या० उ० । सि० कौ० पृ० ४०४ सू० १८१ ।

(२) (नोपधः) ॥ (मा यानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । आलानः, आलानम् = करिणो बन्धनस्तम्भः, गजबन्धनरज्जुश्च । वसनः, वसनम् = छादनम्, वस्त्रम्, निवासः, स्त्रीकटिभूषणं च । विभावनः, विभावनम् = निष्पत्तिः । संभावनः, संभावनम् । शे० उ० । सि० कौ० पृ० ४०० सू० ७५ ।

(३) (पोपधः) ॥ (शूर्पकुतपकुणपदीपविटपानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । व्या० उ० । सि० कौ० पृ० ४०० सू० ७८ ।

श्राद्धेति। नलिनेति। अभिधानेति। स्तूपेति च। इह गुदादीन् सौधान्तान् हित्वा ऋकचादिषु बिम्बान्तेषु शेषेषु इतरेतरयोगो द्वन्द्वः। गुदादिषु सौधान्तेषु तु समाहारो द्वन्द्वः। एते ऋकचादयो बिम्बान्ताः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। ऋकचः, ऋकचम् = करपत्रम्। "आरा" इति लोके। 'ऋकचः करपत्रेऽस्त्री, ग्रन्थिलाख्यतरौ पुमान्।' इति—(मे० पृ० २८ श्लोकः १४)। काष्ठादिविदारणशस्त्रमेतत्। "करोत" इत्यपि लोके। कवचः, कवचम् = सन्नाहः, तनुत्रम्। "बख्तर" "झिलिम" वा इति लोके। 'उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम्।' इति—(अम० ना० लिं० पृ० २८६ श्लोकः ६४)। 'कवचो गर्दभाण्डे च सन्नाहे पटहेऽपि च।' इति च-(मे० पृ० २८ श्लोकः १३)। कूर्चः, कूर्चम् = भ्रुवोर्मध्यम्, दीर्घश्मश्रु, कैतवं च। 'कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे।' इति—(मे० पृ० २७ श्लोकः ३)। अर्धर्चः, अर्धर्चम् = ऋचोऽर्द्धम्। अर्धं चासौ ऋक् च समासान्तोऽत्। "आधी ऋचा" इति लोके। 'अर्धर्चादिगणे प्रोक्तम् सर्वं नृक्लीबलिङ्गकम्।' इति—(वै० पृ० २९१ श्लोकः २८)। पुच्छः, पुच्छम् = लाङ्गूलः, पश्चात्प्रदेशश्च। 'पुच्छः पश्चात्प्रदेशे, स्याल्लाङ्गूले पुच्छमिष्यते।' इति—(मे० पृ० २९ श्लोकः ५)। 'पुच्छोऽस्त्री लूमलाङ्गूले' इति च—(अम० ना० लिं० पृ० २८२ श्लोकः ५०)। उञ्छः, उञ्छम् = मुनिवृत्तिः, धान्यकणोच्चयः, उञ्छशीलम्, ऋतम्, एकैकगुडकोच्चयनमुञ्छः। 'उञ्छस्तु मुनिवृत्तौ स्यात्' इति—(श० र० स० पृ० ७४ पं० ७)। कच्छः, कच्छम् = पार्श्वम्, कक्षा। "काच्छ" इति भाषाप्रसिद्धं परिधानाञ्चलम्। 'जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः॥' इति—(अम० ना० लिं० पृ० ११३ श्लोकः १०)। 'कच्छो द्रुभेदे नौकाङ्गेऽनूपप्राये तटेऽपि च। कच्छास्तु देशे, कच्छा स्यात्परिधानापराञ्चले। चीर्य्यां वाराह्याम्' इति—(अने० सं० पृ० ६ श्लोकः ६३)। 'त्रिषु' इत्यस्य बाधनार्थं 'पुंसि' इति। 'कच्छमनूपम्' इति च बोपालितः' इति—(अम० सु० व्या० पृ० ११३ स्तं० २ पं० २६)। परिधानापराञ्चले यथा—'प्रलम्बकच्छाः किल दाक्षिणात्याः' इति। अत्र स्मृतिः—'वामे पृष्ठे तथा नाभौ कक्षात्रयमुदाहृतम्। एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः।' इति—(श० चिं० पृ० ४५६ स्तं० २ पं० ११तः)। चीरी = पक्षिविशेषः। वाराही = वराहाक्रान्ता ओषधी। इत्यनेकार्थकैरवाकरकौमुदी' इति—(अम० सु० व्या० टि० पृ० ११३ स्तं० २ पं० ३८)। व्रजः, व्रजम् = निवहः, गोष्ठम्, पन्थाश्च। 'व्रजो गोष्ठाध्ववृन्देषु' इति—(मे० पृ० ३० श्लोकः १५)। उटजः, उटजम् = तापसपर्णकुटी, मुनीनां तृणपर्णादिरचितालयः, पर्णशाला। 'मुनीनां तु पर्णशालोटजोऽस्त्रियाम्।' इति—(अम० ना० लिं० पृ० ११८ श्लोकः ६)। 'उटस्तृणपर्णादिः' इति देशीकोशः' इति—(अम० सु० व्या० पृ० ११८ स्तं० २ पं० ३५)। तथा च प्रयोगः—'सौधजालमुटजेषु विस्मृतम्' इति रघुः—इति मुकुटः' इति—(अम० सु० व्या० टि० पृ० ११८ स्तं २ पं० ४१)। निकुञ्जः, निकुञ्जम् = लतादिपिहितस्थलम्, वृक्षवृतान्तरम्। 'निकुञ्जोऽस्त्री कुञ्जो

वृक्षवृतान्तरे।' इति--(वै० पृ० ४१ श्लोकः १०)। 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे॥' इति च--(अम० ना० लिं० पृ० १२७ श्लोकः ८)। कुञ्जः, कुञ्जम्=गह्वरम्, समन्ताल्लतादिभिराच्छादितस्थानविशेषः, हस्तिहनुश्च। 'कुञ्जोऽस्त्रियां निकुञ्जे च हनौ दन्ते च दन्तिनाम्।' इति--(मे० पृ० ३० श्लोकः ६)। ऊर्जः, ऊर्जम्=कार्तिकमासः, जलं च। 'अथोर्जः कार्तिकिकबलोत्साहेषु कीर्तितः। ऊर्जं जले भवेत् क्लीबम्' इति--(श० र० स० पृ० ७६ पं० २, ३)। अम्बुजः, अम्बुजम्=कमलम्, निचुलश्च। 'अम्बुजो निचुले पुंसि, कमले तु नपुंसकम्।' इति--(मे० पृ० ३१ श्लोकः १९)। ध्वजः, ध्वजम्=चिह्नविशेषः, पताका च। 'ध्वजः स्याच्छौण्डिके पुमान्। न स्त्रियां तु पताकायां खट्वाङ्गे मेढ्रचिह्नयोः।' इति--(मे० पृ० ३० श्लोकः १०)। मलयजः, मलयजम्=चन्दनम्। 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्।' इति--(अम० ना० लिं० पृ० २४७ श्लोकः १३१)। कूटः, कूटम्=निश्चलः, राशिश्च। 'कूटोऽस्त्री निश्चले राशौ सीरावयवयंत्रयोः। मायाद्रिशृङ्गयोस्तुच्छे लौहमुद्गरदम्भयोः। अनृतेऽपि' इति--(श० र० स० पृ० ८४ पं० ३)। कालकूटः, कालकूटम्=स्थावरे तीव्रविषविशेषः। 'पुंसि क्लीबे च काकोल-कालकूटहलाहलाः।' इति--(अम० ना० लिं० पृ० ९० श्लोकः १०)। आरकूटः, आरकूटम्=पित्तलम्। ''पीतल'' इति लोके। 'रीतिः स्त्रियामारकूटो न स्त्रियाम्' इति-- (अम० ना० लिं० पृ० ३३३ श्लोकः ९७)। कवटः, कवटम्= । कपटः, कपटम्=व्याजः, दम्भः, छद्म। 'कपटोऽस्त्री, व्याजदम्भोपधयश्छद्मकैतवे।' इति--(अम० ना० लिं० पृ० ८२ श्लोकः ३०)। खेटः, खेटम्=चर्म, अल्पपुरं च। 'खेटः कफे ग्रामभेदे चर्मण्यस्त्र्यर्वति त्रिषु।' इति--(मे० पृ० ३४ श्लोकः १०)। 'पुरेऽल्पे खेटमस्त्रियाम्।' इति च--(वै० पृ० २३२ श्लोकः २४)। कर्पटः, कर्पटम्=वस्त्रविशेषः, प्रस्वेदादिमार्जनार्थहस्तस्थवस्त्रखण्डम्। 'समौ नक्तककर्पटौ।' इति--(अम० ना० लिं० पृ० २४२ श्लोकः ११५)। 'कर्पटं त्वथ वासासि।' इति च--(श० र० स० पृ० ८८ पं० ३)। पिष्टः, पिष्टम्=अपूपः, सीसकम्, मानविशेषः, आढकः, कल्कश्च। 'नागं बहुमलं चीनं पिष्टं योगेष्टसीसकम्।' इति--(प० र० मा० पृ० २३ पं० ६)। 'पिष्टं कल्को विनीयश्च' इति--(प० र० मा पृ० ३९ पं० २३)। 'पात्रं शूर्पावरं पिष्टं सेहिका आढकोऽस्त्रियाम्।' इति--(वै० पृ० १९० श्लोकः ५५)। लोष्टः, लोष्टम्=मृत्संस्थानविशेषः, मृत्तिकाखण्डम्। 'लोष्टानि लेष्टवः पुंसि' इति--(अम० ना० लिं० पृ० ३०५ श्लोकः १२)। पुंस्यपि। 'लेष्टुः षण्ढेऽपि लोष्टः स्यात्' इति च बोपालितः' इति--(अम० सु० व्या० पृ० ३०५ स्तं० १ पं० १२-३)। नटः, नटम्=नर्तकविशेषः। 'रङ्गावतारी शैलूषो नटो भरतभारतौ।' इति वाचस्पतिः' इति--(अम० सु० व्या० पृ० ३४२ स्तं० २ पं० १२)। 'नटी नल्यौषधे स्त्री स्यात्, शैलूषाशोकयोः पुमान्।' इति च--(मे० पृ० ३४ श्लोकः १९)। निकटः, निकटम्=समीपम्। 'समीपे निकटासन्नसन्निकृष्टसनीडवत्।' इति--(अम० ना०

लिं० पृ० ३७१ श्लोकः ६६)। किरीटः, किरीटम् = मुकुटम्, शिरोभूषणम्। 'अथ मुकुटं किरीटं पुन्नपुंसकम्।' इति--(अम० ना० लिं० पृ० २३८ श्लोकः १०२)। कर्वटः, कर्वटम् = द्विशतग्राममध्ये मनोरमस्थानम्। 'कर्वटोऽस्त्री द्रोणमुखं पट्टनं पुटभेदनम्।' इति--(वै० पृ० १५९ श्लोकः ३)। कुक्कुटः, कुक्कुटम् = ताम्रचूडः, चरणायुधः। ''मुर्गा'' इति लोके। 'कुक्कुटचनृतचर्य्यायां, पुंसि स्याच्चरणायुधे॥' इति—(मे० पृ० ३६ श्लोकः ३८)। अट्टः, अट्टम् = हर्म्यपृष्ठोपरिनिकेतनम्, क्षौमम्। ''अटारी'' इति लोके। ओदनं च। ''भात'' इति लोके। 'अट्टं भक्ते च शुष्के, ना क्षौमेऽत्यर्थे गृहान्तरे।' इति—(मे० पृ० ३३ श्लोकः १)। 'स्यादट्टः क्षोममस्त्रियाम्।' इति--(अम० ना० लिं० पृ० १२० श्लोकः १२)। 'क्षौमः' अपि। साहचर्य्यादट्टोऽप्यस्त्रियाम्। अट्टोऽट्टालिका। कुटः, कुटम्—घटः, हलाङ्गविशेषश्च। 'कुटः कोटे पुमा,-नस्त्री घटे, स्त्रीपुंसयोर्गृहे।' इति—(मे० पृ० ३४ श्लोकः ६)। यकुटः, जकुटः, यकुटम्, जकुटम् = मलयः, श्वा, वार्त्ताकुपुष्पं च। 'जकुटं वार्त्ताकुपुष्पे, जकुटो मलये शुनि।' इति--(मे० पृ० ३६ श्लोकः ४२)। 'वार्त्ताकुपुष्पे जकुटं, पुंसि स्यान्मलये शुनि।' इति च—(श० र० स० पृ० ८९ पं० ३)। विटः, विटम् = धूर्त्तः, महाधूर्त्तः, पर्वतः, लवणं च। 'वातपुत्रे विटधरौ' इति। 'विटोऽद्रौ लवणे षिङ्गे मूषिके खदिरेऽपि च।' इति च—(हा० व० पृ० ४०७ श्लोकः २२८)। त्र्यङ्कटः, त्र्यङ्गटः, त्र्यङ्कटम्, त्र्यङ्गटम् = शिक्यभेदः, धौताञ्जनी च। त्र्यङ्कटं शिक्यभेदेऽपि धौताञ्जन्यां च न द्वयोः।' इति—(मे० पृ० ३६ श्लोकः ४३)। 'त्र्यङ्गटं शिक्यभेदे स्याद् धौताञ्जन्यामपि स्मृतम्।' इति च--(अने० सं० पृ० ६१ श्लोकः १६०)। कोट्टः, कोट्टम् = गिर्य्यादिभिर्दुर्गमं पुरम्। ''किल्ला'' ''गढ'' ''कोट'' इति च भाषाप्रसिद्धं राज्ञां वासस्थानम्। 'कोट्टारघट्टहट्टाश्च' इति पुंस्काण्डेऽमरः' इति--(अम० ना० लिं० पृ० ४५४ श्लोकः १८)। हैमस्तु पुंस्काण्डे पठति क्लीबलिङ्गं तथा चाह--'स्कन्धावारो राजधानी कोट्टदुर्गे पुनः समे।' इति--(अभि० सं० अभि० चिं० पृ० ३८ श्लोकः ९७३)। कुष्ठः, कुष्ठम् = रोगः, गन्धद्रव्यविशेषश्च। 'अथ कुष्ठं भेषजरोगयोः।' इति--(अने० ति० पृ० १२ श्लोकः ७३)। 'कुष्ठं रोगे पुष्करेऽस्त्री' इति--(मे० पृ० ३९ श्लोकः ३)। 'गदे च कुष्ठमस्त्री स्यात्' इति च--(ना० र० मा० पृ० २१ श्लोकः १९)। कमठः, कमठम् = कच्छपः, भाण्डभेदश्च। 'कमठः कच्छपे पुंसि, भाण्डभेदे नपुंसकम्।' इति--(मे० पृ० ३९ श्लोकः १२)। वारुण्डः, वारुण्डम् = सेकपात्रम्, नौस्थजलनिःसारणभाजनम्, नेत्रमलम्, कर्णमलं च। 'वारुण्डी द्वारपिण्ड्यां स्त्री, फणिनां राजके पुमान्। न स्त्रियां सेकपात्रे च मलेऽक्ष्णः श्रवणस्य च।' इति--(मे० पृ० ४३ श्लोकः ३३)। खण्डः, खण्डम् = शकलम्, अर्द्धम्, इक्षुविकारविशेषश्च। 'खण्डोऽस्त्री शकले, नेक्षुविकारमणिदोषयोः। खण्डः पानान्तरे भेदे' इति--(मे० पृ० ४१ श्लोकः ७, ८)। षण्डः, षण्डम् = पद्मादिसंघातः। 'षण्डं पद्मादिसंघाते न स्त्री स्याद् गोपतौ पुमान्।' इति—(मे० पृ०

४२ श्लोकः २६)। निगडः, निगडम् = बन्धनविशेषः। 'अन्दुको निगडोऽस्त्री स्यात्' इति—(अम० ना० लिं० पृ० २७८ श्लोकः ४१)। आक्रीडः, आक्रीडम् = उद्यानम्, राज्ञः क्रीडासाधनं साधारणं वनम्, लीलास्थानं च। 'ज्ञेयमाक्रीडमुद्यानम्' इत्यमरमाला।' इति—(अम० सु० व्या० पृ० १२८ स्तं० १ पं० ५, ६)। अमरस्तु पुंस्त्वं प्राह--'पुमानाक्रीड, उद्यानं राज्ञः साधारणं वनम्।' इति च--(अम० ना० लिं० पृ० १२८ श्लोकः ३)। नडः, नडम् = तृणभेदः, धमनः, अन्तरविवरम्। 'नलः' इति ख्यातः। 'नडस्तु धमनः पोटगलः' इति--(अम० ना० लिं० पृ० १८३ श्लोकः १६२)। 'तृणभेदे नडो मतः॥ नलवच्छब्दभेदज्ञैः' इति च--(श० र० स० पृ० ६७ पं० १८-९)। प्रकाण्डः, प्रकाण्डम् = प्रशस्तवाचकम्, तरोर्मूलमारभ्य शाखापर्यन्तभागः, तरोर्मूलस्कन्धयोरन्तरं च। 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ। प्रशस्तवाचकान्यमूनि' इति—(अम० ना० लिं० पृ० ५३ श्लोकः २७)। 'प्रकाण्डः' पुंस्यपि। 'अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयोः।' इति रभसः' इति—(अम० सु० व्या० पृ० ५३ स्तं० २ पं० २०-१)। 'अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः।' इति---(अम० ना० लिं० पृ० १३० श्लोकः १०)। 'प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तरोः। शस्त' इति च—(मे० पृ० ४२ श्लोकः ३१)। काण्डः, काण्डम् = शरः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु।' इति--(अम० ना० लिं० पृ० ४०४ श्लोकः ४३)। 'काण्डः स्तम्बे तरुस्कन्धे बाणेऽवसरनीरयोः। कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम्।' इति—(मे० पृ० ४० श्लोकः २, ३)। 'काण्डं चावसरे बाणे नाले स्कन्धे च शाखिनाम्। स्तम्बे रहसि वर्गे च' इति च धरणिः' इति--(अम० सु० व्या० पृ० ४०४ स्तं० २ पं० ११-२)। कोदण्डः, कोदण्डम् = नीवृद्विशेषो भूम्नि, शरश्च। 'अथ कोदण्डं चापे ना नीवृदन्तरे। भूम्नि' इति--(मे० पृ० ४२ श्लोकः २८) 'कोदण्डं कार्मुके देशभेदभूतलयोरपि।' इति च--(अने० सं० पृ० ६३ श्लोकः १८३)। तरण्डः, तरण्डम् = नौका ''नाव'' इति लोके। 'तरण्डो बडिशीसूत्रबद्धकाष्ठादिके प्लवे। नौकायामपि न स्त्री स्यात्' इति—(मे० पृ० ४२ श्लोकः २९)। मण्डः, मण्डम् = भक्तादेर्निर्यासः, सारम्, पिच्छं च। 'सर्वरसाग्रे मण्डमस्त्रियाम्।' इति—(अम० ना० लिं० पृ० ३१६ श्लोकः ४९)। 'मण्डः पञ्चाङ्गुले शाकभेदे क्लीबं तु मस्तुनि। आमलक्यां स्त्रियां मण्डाऽथाऽस्त्रियां सारपिच्छयोः।' इति च—(मे० पृ० ४२ श्लोकः २१)। मुण्डः, मुण्डम् = शिरः, मूर्धा। 'मुण्डो दैत्यान्तरे राहुग्रहे ना, मुण्डिते त्रिषु। मुण्डा मुण्डीरिकायां स्यात्स्त्रिया,--मस्त्री तु मूर्धनि।' इति--(मे० पृ० ४२ श्लोकः २२)। दण्डः, दण्डम् = लगुडः, दमनार्थो निग्रहः। 'दण्डोऽस्त्री लगुडे' इति--(मे० पृ० ४१ श्लोकः १५)। 'दण्डो यमे मानभेदे लगुडे दमसैन्ययोः। व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि। अभिमाने ग्रहे दण्डश्चण्डांशोः पारिपार्श्वके।' इति च--(वि० प्र० पृ० ४४ श्लोकः १२)। अण्डः, अण्डम् = पक्ष्यादिप्रसवः, पेशीकोशः। ''अण्डा'' इति लोके। मुष्कश्च। 'अस्त्रियो मुष्ककोशाण्डाः' इति--(वै० पृ०

१७८ श्लोकः ६३) । दृढः, दृढम् = अविनष्टः । 'दृढः प्रगाढे स्थूले च नितान्ते बलवत्यपि ।' इति--(श० र० स० पृ० १०१ पं० १७) । 'दृढः शक्ते भृशे स्थूले' इति--(अने० सं० पृ० १२ श्लोकः १३१) । 'दृढं स्थूले नितान्ते च प्रगाढे बलवत्यपि ।' इति च--(मे० पृ० ४३ श्लोकः २) । वारबाणः, वारबाणम् = कञ्चुकम् । 'कञ्चुको वारबाणोऽस्त्री यत्तु मध्ये सकञ्चुकाः ।' इति—(अम० ना० लि० पृ० २८६ श्लोकः ६३) । अयं चोलकाकृतिसन्नाहः । बाणः, बाणम् = शरः, पुष्पविशेषश्च । 'बाणः स्याद्गोस्तने दैत्यभेदे केवलकाण्डयोः । बाणा तु बाणमूले स्त्री, नीलझिण्टचां पुनर्द्वयोः ।' इति--(मे० पृ० ४६ श्लोकः २७) । 'बाणो वृक्षान्तरे शरे । शरस्यावयवे दैत्ये कथाकादम्बरीकृति ।' इति च--(अने० ति० पृ० ३० श्लोकः २६८) । कार्षापणः, कार्षापणम् = कार्षिकः, रजतरूप्यम्, रूप्यमानम् । 'कार्षापण. कार्षिकः स्यात्' इति--(अम० ना० लिं० पृ० ३३१ श्लोकः ८८) । 'कार्षापणोऽस्त्री कार्षिके पणषोडशकेऽपि च ।' इति च--(मे० पृ० ५१ श्लोकः ९३) । श्रवणः, श्रवणम् = कर्णः । "कान" इति लोके । 'कर्णे पुन्नपुंसकयोः । श्रवणावनिलस्य च' इति दर्शनात् । 'न स्त्रियां श्रवणः कर्णः' इति हेमनाममालाभिधानम्' इति च--(श० चिं० पृ० ६३१ स्तं २ पं० ११-२-३) । पक्वणः, पक्वणम् = भिल्लग्रामः, अन्त्यजालयश्च । 'पक्वणः शवरावासे' इति--(श० र० स० पृ० ११३ पं० ११) । 'पक्वणोऽस्त्र्यन्त्यजालयः ।' इति च--(वै० पृ० १३८ श्लोकः ३२) । कङ्कणः, कङ्कणम् = करभूषणम् । 'कङ्कणं करभूषणम् ।' इति—(अम० ना० लिं० पृ० २४० श्लोकः १०८) । पुंस्यपि । 'कङ्कणो ना प्रतीसरः' इति रत्नकोशः' इति--(अम० सु० व्या० पृ० २४० स्तं० १ पं० २३) । 'कङ्कणं मण्डने हस्तसूत्रे च भुजभूषणे ।' इति च--(अने० ति० पृ० ४६ श्लोकः ८२) । द्रोणः, द्रोणम् = परिमाणविशेषः, आढकः । 'द्रोणोऽस्त्रियामाढके स्यादाढकानां(दि)चतुष्टये ।' इति--(मे० पृ० ४६ श्लोकः १७) । अपराह्णः, अपराह्णम् = दिनस्यापरभागः, दिनान्तांशः । 'सायाह्नोऽप्यपराह्णोऽस्त्री' इति--(वै० पृ० २२ श्लोकः ६५) । चरणः, चरणम् = पादः । "पैर" इति लोके । 'चरणोऽस्त्री बह्वृचादौ मूले गोत्रे पदेऽपि च । भ्रमणे भक्षणे चा(वा)पि नपुंसक उदाहृतः ।' इति--(मे० पृ० ४८ श्लोकः ४८) । तृणः, तृणम् = शष्पम्, तृणमात्रम्, तृणविशेषो नडादिः । 'तृणं तु यवसे मतम् । इति—(श० र० स० पृ० १०५ पं० १६) । सुवर्णः, स्वर्णः, सुवर्णम्, स्वर्णम् = कनकम् । "सोना" इति लोके । हेम्नोऽक्षः, कर्षः । अशीतिरक्तिकापरिमितं स्वर्णं च । 'सुवर्णो ना स्वर्णकर्षे सुवर्णाख्यमरवान्तरे । स्त्री कृष्णागुरुणि, क्लीबे काञ्चने हरिचन्दने ।' इति—(मे० पृ० ५१ श्लोकः ८४) । व्रणः, व्रणम् = क्षतम् । "घाव" इति लोके । 'व्रणः क्षते निगदितः' इति—(श० र० स० पृ० १०७ पं० ६) । 'व्रणोऽस्त्रीयामीर्ममरुः क्लीबे' इति—(अम० ना० लिं० पृ० २२० श्लोकः ५४) । 'व्रणोऽपीर्मो-

ऽपि न स्त्रियौ ।' इति च—(वै० पृ० १२२ श्लोकः २१७) । वृषणः, वृषणम् = अण्डः, अण्डकोशः । 'तथाण्डे वृषणो मतः ।' इति—(श० र० स० पृ० ११६ पं० ३) । माधवस्तु क्लीबलिङ्गमाचष्टे—'मुष्कमण्डमपानं च वृषणं फलकोशकम् ।' इति च—(प० र० मा० पृ० २६ पं० २१) । भूषणः, भूषणम् = अलङ्कारः । "गहना" इति लोके । 'भूषणं स्यादलङ्कारे' इति—(श० र० स० पृ० ११४ पं० ७) । 'अलङ्कारस्त्वाभरणं भूषणम्' इति च—(वै० पृ० १६६ श्लोकः १३३) । दूषणः, दूषणम् = राक्षसविशेषः, खरसेनापतिः, दोषश्च । भाणः, भाणम् = नाटकभेदः, नाटकादिदशरूपकान्तर्गतरूपकविशेषः । 'भाणो नाटकभेदे स्यात्' इति—(श० र० स० पृ० १०६ श्लोकः १६) । 'नाटकं नाटिका भाणः' इति च—(वै० पृ० १४४ श्लोकः० १००) । किणः, किणम् = मांसग्रन्थिभेदः, शुष्कव्रणः, स तु खनित्रदण्डादिसंघर्षणात्करतलादौ स्पष्टः । निघर्षणजन्यथाचिह्नम् व्रणजं चिह्नं वा । "घट्टा" इति लोके । 'किणो रूढं वृणस्थाने' इति । 'वेतालासनमित्येतदेकाङ्गुष्ठग्रहात्किणः ।' इति च—(वै० पृ० १२२ श्लोकः २१७) । रणः, रणम् = युद्धम् । "लड़ाई" इति लोके । 'रणः कोणे क्वणे पुंसि, समरे पुन्नपुंसकम् ।' इति—(मे० पृ० ४६ श्लोकः २५) । प्रवणः, प्रवणम् = चतुष्पथम्, क्रमनिम्नभूभागश्च । 'प्रवणो दक्षिणे प्रह्वे क्रमनिम्ने चतुष्पथे ।' इति—(वै० पृ० २६१ श्लोकः ५३) । 'प्रवणः क्रमनिम्नोर्व्यां प्रह्वे, ना तु चतुष्पथे ।।' इति—(अम० ना० लिं० पृ० ४०६ श्लोकः ५६) । 'प्रवणः क्रमनिम्नोर्व्यां प्रह्वे च स्याच्चतुष्पथे । आयत्ते च तथा क्षी(क्ष)णे प्रगुणे समुदाहृतः ।' इति धरणिः' इति—(अम० सु० व्या० पृ० ४०६ स्तं० २ पं० २१-२) । 'प्रवणो ना चतुष्पथे । क्रमनिम्नमहीभागोदारप्रह्वेषु च त्रिषु ।' इति च—(मे० पृ० ४६ श्लोकः ५९) । चूर्णः, चूर्णम् = धूलिः, क्षारभेदः, वासयुक्तिश्च । 'चूर्णानि वासयोगाः स्युः' इति—(अम० ना० लिं० पृ० २४८ श्लोकः १३४) । वासे सुगन्धिकरणे योगा उपायाः, पिष्टरजः । 'चूर्णो धूलौ क्षारभेदे, चूर्णानि वासयुक्तिषु ।' इति—(मे० पृ० ४५ श्लोकः १२) । 'चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा ।' इति च—(अने० समु० पृ० ३४ श्लोकः ३८०) । तोरणः, तोरणम् = निर्यूहः, बहिर्द्वारम्, द्वारबन्धः, कन्धरा, पादपान्तरं च । 'तोरणोऽस्त्री बहिर्द्वारम्' इति—(अम० ना० लिं० पृ० १२२ श्लोकः १६) । 'तोरणं द्वारबन्धे स्यात्तोरणः पादपान्तरे ।' इति—(श० र० स० पृ० १११ पं० १५) । 'कन्धरा तोरणं कण्ठी' इति च—(हा० व० पृ० ४०४ श्लोकः ७४) । पूर्तः, पूर्तम् = खातादिकर्म, पूरितं च । 'खातादौ पूरिते पूर्तम्' इति—(त्रि० शे० पृ० ३३८ श्लोकः १६९) । 'पूर्तं खातादिकर्मणि ।' इति—(अम० ना० लिं० पृ० २५९ श्लोकः २८) । 'पूर्तं त्रिषु पूरिते स्यात्, क्लीबं खातादिकर्मणि ।' इति—(मे० पृ० ५६ श्लोकः ३६) । निकेतः, निकेतम् = गृहम् । "घर" इति लोके । 'निकेतं सदने मतम् ।' इति—(श० र० स० पृ० १४५ श्लोकः १०) । निवातः, निवातम् = दृढसन्नाहः, शस्त्राभेद्यवर्म, वातरहिताश्रयश्च ।

'निवातावाश्रयावातौ शस्त्राभद्यं च वर्म यत् ।' इति--(अम० ना० लिं० पृ० ४११ श्लोकः ८४)। 'निवातो दृढसन्नाहे वातशून्येऽपि चाश्रये।' इति च—(मे० पृ० ६३ श्लोकः ११६)। पारतः, पारतम्=पारदः। "पारा" इति लोके। 'रसेन्द्रः पारदः प्रोक्तः पारतोऽपि निगद्यते।' इति– (अम० सु० व्या० पृ० ३३५ स्तं० १ पं० १९, २०)। क्लीबेऽपि। 'पारदं पारतम्' इति च-- (श० भे० प्र० पृ० ५ श्लोकः २०)। अन्तः, अन्तम्=अवसानम्, शेषम्। 'अन्तं स्वरूपे नाशे ना, न स्त्री शेषे,-ऽन्तिके त्रिषु।' इति--(मे० पृ० ५४ श्लोकः २)। 'अथाऽस्त्रियाम्। अन्तो जघन्यं चरमम्' इति च--(अम० ना० लिं० पृ० ३७६ श्लोकः ८१)। युतः, युतम्=युक्तम्, अपृथग्भूतम्, हस्तचतुष्टयं च। 'युतं हस्तचतुष्टये। स्त्री न्याययोषितो–र्युवित,–र्युतो युक्ते-ऽपृथग्गते।' इति--(श० र० स० पृ० १३१ श्लोकः ८, ९)। प्रयुतः, प्रयुतम्=दशलक्षाणि। 'शतं सहस्र-मयुतं निपुतं प्रयुतार्ऽबुदे। व्यत्यासेन तु दृश्येते नियुतप्रयुते क्वचित्। 'प्रयुतनियुते' इत्यर्थः। इति-- (वै० पृ० १८८ श्लोकः ३०)। शब्दार्थचिन्तामणौ तु तथैव दृश्येते। क्ष्वेडितः, क्ष्वेडितम्= सिंहनादविशेषः। 'क्ष्वडितं सिंहनादे स्यात्' इति--(श० र० स० पृ० १५७ पं० १६)। 'नादोऽस्य (सिंहस्य) चुक्कारः क्ष्वेडितं च तत्।' इति च--(त्रि० शे० पृ० २८६ श्लोकः २)। अक्षतः, अक्षतम्=लाजाः, भृष्टव्रीह्यादयः। केचित्तु--अखण्डतण्डुला अक्षताः–इत्याहुः। 'अक्षतं न द्वयोः पण्डे लाजेषु, त्रिष्वहिंसिते। यवेऽपि क्वचित्' इति--(मे० पृ० ६० श्लोकः ८०)। 'अक्षताश्चापि लाजेषु तण्डुलादावहिंसिते।' इति-- (श० र० स० पृ० १३६ पं० ११)। 'क्ल्यक्षतं तण्डुले धान्ये, न ना लाजेषु, ना यवे।' इति च--(वै० पृ० २५८ श्लोकः १४)। दैवतः, दैवतम्=देवता। 'वृन्दारका, दैवतानि पुंसि वा, देवताः स्त्रियाम्।' इति--(अम० ना० लिं० पृ० ५ श्लोकः ९)। वृत्तः, वृत्तम्=पद्यम्, वृत्तिः, चारित्रम्, शीलम्, वेदबोधिताचारस्य परिपालनम्, छन्दश्च। 'वृत्तोऽधी-तेऽप्यतीतेऽपि वर्त्तुलेऽपि मृते वृते। वृत्तेऽन्यलिङ्गं (त्रिलिङ्गं), वा क्लीबे छन्दचारित्रवृत्तिषु।' इति—(मे० पृ० ५८ श्लोकः ६१)। पक्षे पुंसि। 'वृत्तं पद्ये चरित्रे, त्रिष्वतीते दृढनिस्तले।।' इति—(अम० ना० लिं० पृ० ४१० श्लोकः ७८)। 'आचारो वृत्तचारित्रचरित्रचरणानि च।' इति। 'वर्त्तुलं निस्तलं वृत्तं सुवृत्तं परिमण्डलम्।' इति। 'वृत्तं स्वरूपे चरिते वृत्तौ छन्दोविधासु च। त्रिष्वतीतदृढाधीतवर्त्तुलेषु' इति च—(वै० पृ० २३६ श्लोकः ७६)। ऐरावतः, ऐरावतम्= इन्द्रहस्ती, महेन्द्रस्य ऋजुदीर्घशरासनं च। 'ऐरावतोऽभ्रमातङ्गे नारङ्गे लकुचद्रुमे। नागभेदे च पुंसि स्याद्, विद्युत्त द्वयोः स्त्रियाम्। नपुंसकं महेन्द्रस्य ऋजुदीर्घशरासने।' इति—(मे० पृ० ६८ श्लोकः १९२)। लोहितः, लोहितम्=शोणितम्, रक्तवर्णः, कुङ्कुमं च। 'लोहितं रक्तगोशीर्षे कुङ्कुमे रक्तचन्दने। पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वति।' इति--(मे० पृ० ६५ श्लोकः १४८)। 'लोहितो मङ्गले नदे। वर्णभेदे, लोहितं तु कुङ्कुमे रक्तचन्दने।' इति च—(अने० सं० पृ० ७३ श्लोकः ३१०)। हस्तः, हस्तम्=करः। "हाथ" इति लोके। 'हस्तः करे करिकरे सप्रकोष्ठकरेऽपि

च। ऋक्षे केशात्परो व्राते' इति—(मे० पृ० ५६ श्लोकः ७५)। क्लीबेऽपि। 'हस्तं चर्मप्रसेविकायाम्' इति शब्दार्थचिन्तामणौ दृश्यते। शतः, शतम् = संख्याविशेषः। "सौ" इति लोके। नक्षत्रविशेषश्च। 'शतं संख्यान्तरे' इति—(श० र० स० पृ० १३३ पं० १२)। 'शतं सहस्रमयुतं नियुतं प्रयुतं मतम्। स्त्री कोटिरर्बुदमिति क्रमाद् दशगुणोत्तरम्।' इति च रत्नकोशः' इति—(अम० सु० व्या० पृ० ४५७ स्तं० २ पं० ३६ तः) व्रतः, व्रतम् = तपः, ब्रह्मचर्यादिनियमः। कृच्छ्रं चान्द्रायणादिकं च। 'तपो व्रतोऽस्त्री कृच्छ्रोऽस्त्री तच्च चान्द्रायणादिकम्।' इति—(वै० पृ० ९४ श्लोकः १३६)। उपवीतः, उपवीतम् = यज्ञसूत्रम्, उत्तरीयम्। "जनेऊ" इति लोके। 'उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे।' इति—(अम० ना० लिं० पृ० २६५ श्लोकः ४९)। 'उपवीतमुत्तरीये' इति—(श० र० स० पृ० १६० पं० ३)। 'यज्ञोपवीतमुपवीते ब्रह्मसूत्रोत्तरीययोः।' इति च—(वै० पृ० २७४ श्लोक० १७)। पलितः, पलितम् = पक्वकेशः, केशपाकः, शैलजम्, कर्दमश्च। 'पलितं शैलजे तापे केशपाके च कर्दमे।' इति—(मे० पृ० ६३ श्लोकः १२३)। 'पलितं जरसा शौक्ल्यं केशादौ' इति—(अम० ना० लिं० पृ० २१५ श्लोकः ४१)। 'केशादिशौक्ल्ये पलितं शैलेये, ना तु कर्दमे।' इति च—(वै० पृ० २६१ श्लोकः ५२)। वसन्तः, वसन्तम् = ऋतुविशेषः, देवपुत्रविशेषश्च। 'वसन्त ऋतुभिद्यपि।' इति—(श० र० स० पृ० १५२ श्लोकः ९)। ध्वान्तः, ध्वान्तम् = गाढान्धकारः। 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।' इति—(अम० ना० लिं० पृ० ८७ श्लोकः ३)। साहचर्यादस्त्रियाम्। 'ध्वान्तं गाढेऽन्धतमसि' इति च—(श० र० स० पृ० १२८ पं० ५)। अयुतः, अयुतम् = दशसहस्राणि। 'दश हजार' इति लोके। 'शतं सहस्रमयुतम् ...।' इति—(वै० पृ० १८८ श्लोकः २८)। द्यूतः, द्यूतम् = दुरोदरम्, द्यूतक्रीडनम्। "जुआ" "खेल" इति लोके। 'द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि॥' इति—(अम० ना० लिं० पृ० ३५२ श्लोकः ४४)। घृतः, घृतम् = आज्यम्, सर्पिः। 'घी" इति लोके। 'तच्च लिङ्गान्तरेऽनुक्तं सर्वमुक्तं घृतादि च। तत्र केचिद् घृतादीनां पुंस्त्वाद्यं वैदिकं विदुः॥' इति—(वै० पृ० २६१ श्लोकः २८-९)। कोशान्तरेऽप्येवमुक्तम्। पुस्तः, पुस्तम् = लेप्यादिकर्मविशेषः, पुस्तकं च। 'पुस्तं क्लीबे पुस्तके च लेप्यादिशिल्पकर्मणि।' इति—(श० र० स० पृ० १२६ श्लोकः १४)। शुद्धान्तः, शुद्धान्तम् = राज्ञां स्त्र्यागारम्, अन्तःपुरम्, अवरोधनम्। राज्ञो रहः कक्षान्तरम्, भूपतेः गुह्यकक्षाभेदश्च। 'कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्वगोचरे।' इति—(अम० ना० लिं० पृ० ४०८ श्लोकः ६६)। 'शुद्धान्तोऽन्तःपुरे गुह्यकक्षाभेदे च भूपतेः।' इति चाजयः' इति—(अम० सु० व्या० पृ० ४०८ स्तं० १ पं० २२-३)। बुस्तः, बुस्तम् = मांसशष्कुली, पक्वमांसविशेषः, भृष्टं मांसम्, स्थालीभृष्टमांसम्, मांसपिण्डविशेषः, पनसादिफलस्यासारभागश्च। 'वुस्तं दन्तोष्ठचादि' इत्येके। रजतः, रजतम् = रूप्यम्, श्वेतं च। 'रजतं

त्रिषु शुक्ले स्यात्, क्लीबं हारे च दुर्वर्णे ।' इति--(मे० पृ० ६४ श्लोकः १४४) 'श्वेतं रूप्येऽपि' इति— (अम० ना० लिं० पृ० ४१० श्लोकः ७९) । 'अथ रजतं शोणिते ह्रदे । श्वेते हारेऽपि' इति च—(वै० पृ० २६२ श्लोकः ७०) । मुहूर्त्तः, मुहूर्त्तम् = द्वादशक्षणात्मकः कालः, घटिकाद्वयम् । 'ते (क्षणाः) तु मुहूर्त्तो द्वादशास्त्रियाम् ।।' इति—(अम० ना० लिं० पृ० ४७ श्लोकः ११) । यूथः, यूथम् = पशुसमूहः । 'संघसंघातपुञ्जौघसार्थयूथकदम्बकाः ।' इति भागुरिः' इति--(अम० सु० व्या० पृ० २०२ स्तं० १ पं० ३५–६) । 'यूथं तिरश्चां पुन्नपुंसकम् ।।' इति--(अम० ना० लिं० पृ० २०२ श्लोकः ४१) । 'यूथं तिर्यक्समूहेऽस्त्री, पुष्पभेदे च योषिति ।' इति च--(मे० पृ० ७२ श्लोकः ११) । वरूथः, वरूथम् = रथगुप्तिः, परप्रहारणाभिघातरक्षार्थं रथसन्नाहवदावरणम्, चर्म, वेश्म च । 'वरूथो रथगुप्तौ स्याद् वरूथं चर्मवेश्मनोः ।' इति—(मे० पृ० ७३ श्लोकः २१) । गूथः, गूथम् = विष्ठा । 'गूथं पुरीषं वर्च्चस्कमस्त्री, विष्ठाविषे स्त्रियौ ।' इति--(अम० ना० लिं० पृ० २२५ श्लोकः ६८) । प्रस्थः, प्रस्थम् = सानुः, पर्वतसमभूभागः, मानभेदश्च । 'स्नुः प्रस्थः सानुरस्त्रियौ ।' इति--(अम० ना० लिं० पृ० १२५ श्लोकः ५) । 'प्रस्थोऽस्त्रियां मानभेदे सानावत्युच्चवस्तुनि ।' इति च--(मे० पृ० ७२ श्लोकः ९) । तीर्थः, तीर्थम् = घटः, अवतारः, नद्यादौ स्नानाद्यर्थमवतरणस्थानम्, पुष्करिण्यादि, पुण्यक्षेत्रम्, पुण्यस्थानं च । 'घट्टोऽवतारस्तीर्थोऽस्त्री' इति । 'तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वम्भसि पावने । पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः ।' इति च--(वै० पृ० २२५ श्लोकः १३) । 'निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ ।।' इति—(अम० ना० लिं० पृ० ४१२ श्लोकः ८६) । 'निपानं जलावतारः ।' 'निदानमुपायः' इति मुकुटः । 'तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमंत्रिषु ।' इति च--(मे० पृ० ७२ श्लोकः ७) । प्रोथः, प्रोथम् = अश्वस्य घोणा, नासिका, अश्वादेर्घोणान्तरं च । ''नथुन'' इति लोके । 'घोणा तु प्रोथमस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २८२ श्लोकः ४९) । 'प्रोथोऽस्त्री हयघोणायां, ना कटचा,—मध्वगे त्रिषु ।' इति च—(मे० पृ० ७२ श्लोकः १०) । अलिन्दः, अलिन्दम् = प्रघाणः, बहिर्द्वारप्रकोष्ठः, द्वारप्रकोष्ठाद्बहिर्द्वाराग्रवर्तिचतुष्कम्, द्वारबहिर्भागश्च । 'प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके ।।' इति—(अम० ना० लिं० पृ० १२० श्लोकः १२) । अगारैकदेशे प्रघाणः प्रघणश्च । 'गृहैकदेश आलिन्द प्रघाणः प्रघणस्तथा ।' इत्यमरमाला' इति—(अम० सु० व्या० पृ० स्तं २ पं० ६, ७) । प्रघणोऽलिन्दके ताम्रकलशे लोहमुद्गरे ।' इति च—(अने० सं० पृ० ६६ श्लोकः २२४) । ककुदः, ककुदम् = प्रधानम्, वरम्, श्रेष्ठम्, राजचिह्नम्, श्वेतच्छत्रादिः, वृषाङ्गम्, वृषांसस्थस्थूलमांसपिण्डः, पर्वताग्रभागश्च । 'प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० ४१३ श्लोकः ९२) । 'ककुद्वत्ककुदं श्रेष्ठे वृषाङ्गे राजलक्ष्मणि ।' इति

च--(वि० प्र० पृ० ८० श्लोकः ३२)। कुकुदः, कुकुदम्=वरायादरपूर्वकं अलङ्कृतकन्यादाता, परिणेत्रे आदरपूर्वकमलङ्कृतां कन्यां यो ददाति स कुकुदः। 'कुकुद' इत्यपि। 'सत्कृत्याल-ङ्कृतां कन्यां यो ददाति स कुकुदः।' इति--(अम० ना० लिं० पृ० ३५६ श्लोकः १४)। अष्टापदः, अष्टापदम्=सुवर्णम्, चतुरङ्गादिद्यूतफलकं च। 'अष्टापदोऽस्त्री कनके शारीणां फलकेऽपि च। अष्टापदी चन्द्रवल्ल्यां, शरभे मर्कटे पुमान्।' इति--(मे० पृ० ७७ श्लोकः ४४)। शारीणां फलं पट्टः। शारीणां खेलनाधरपट्टः। कुन्दः, कुन्दम्=पुष्पविशेषः, माघ्यम्। 'कुन्दो माघ्येऽस्त्री, मुकुन्दभ्रमिनिध्यन्तरेषु ना।' इति--(मे० पृ० ७४ श्लोकः ३)। 'माघ्यं कुन्दम्' इति--(अम० ना० लिं० पृ० १५३ श्लोकः ७३)। पुंस्त्वमपि। 'माघ्यः कुन्दः कुरुण्टकः।' इति च पुंस्काण्डे रत्नकोष' इति--(अम० सु० व्या० पृ० १५३ स्तं० २ पं० ३)। गुदः, गुदम्=अपानम्। 'गुदं त्वपानं, पायुर्ना' इति--(अम० ना० लिं० पृ० २२७ श्लोकः ७३)। दोहदः, दोहदम्=गर्भः, गर्भिण्या अभिलाषः, लालसा च। 'दोहदो गर्भलक्षणे। अभिलाषे तथा गर्भे' इति--(अने० सं० पृ० ७७ श्लोकः ३६०)। कुमुदः, कुमुदम्=कैरवम्, दिग्गजविशेषश्च। 'वामनः कुमुदोऽञ्जनः।' इति। 'अस्मिन्' सिते कुमुदकैरवे॥' इति च--(अम० ना० लिं० पृ० १०७ श्लोकः ३७)। 'कुमुदं कैरवे, ना तु दिग्गजे भुजगे कपौ।' इति च-- (ना० र० मा० पृ० ८६ पं० १३)। छदः, छदम् =पक्षिपक्षम्। ''पंख'' इति लोके। 'गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम्।' इति--(अम० ना० लि० पृ० २०० श्लोकः ३६)। 'गरुतौ पक्षौ छदौ। पक्षसी च स्मृतौ पक्षौ' इति शुभाङ्कः' इति--(अम० सु० व्या० पृ० २०० स्तं० १ पं० ९)। क्लीबेऽपि। 'गरुत्पक्षौ नरौ छदम्।' इति च क्लीबकाण्डे बोपालितः' इति-- (अम० सु० व्या० पृ० २०० स्तं० १ पं० १२)। कन्दः, कन्दम्=मूलविशेषः, सस्यमूलम्, सूरणश्च। 'कन्दोऽस्त्री सूरणे सस्यमूले जलधरे पुमान्।' इति--(मे० पृ० ७४ श्लोकः ३)। अर्बुदः, अर्बुदम्=संख्याविशेषः, दशकोटयः। 'अर्बुदो मांसपरुसि, दशकोटिषु न स्त्रियाम्।' इति--(मे० पृ० ७५ श्लोकः १६)। सौधः, सौधम्=धवलगृहम्, राजसदनम्। 'सौधोऽस्त्री राजसदनम्' इति--(अम० ना० लिं० पृ० ११६ श्लोकः १०)। उत्सेधः, उत्सेधम्=वृक्षपर्वताद्यारोहः, उच्छ्रयः। "वृक्षादि की ऊँचाई" इति लोके। 'उत्सेधस्तूच्छ्रये न स्त्री, क्लीबं संहननेऽपि च।' इति--(मे० पृ० ८० श्लोकः २९)। कबन्धः, कबन्धम्=शिरोरहितकायः। 'कबन्धोऽस्त्री क्रियायुक्तव्यपमूर्धकलेवरे। क्लीबं जले, पुंस्युदरे राहु-रक्षोविशेषयोः।' 'कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्' इत्यपि पाठः। श्राद्धः, श्राद्धम्=पितृ-क्रिया, शास्त्रतः पितृकर्म। 'श्राद्धं तत्कर्म शास्त्रतः।' इति--(अम० ना० लिं० पृ० २५९ श्लोकः ३१)। 'श्राद्धं श्रद्धान्विते त्रिषु। हव्यकव्यविधौ क्लीबम्' इति--(मे० पृ० ८० श्लोकः १९)। 'श्राद्धः श्रद्धालुरास्तिकः।' इति। 'श्राद्धं तु पितृभोजनम्।' इति च--(वै० पृ० ८८ श्लोकः ६४)।

'श्राद्धं निवापे, श्रद्धालौ त्रिषु' इति—(त्रि० शे० पृ० ३४६ श्लोकः २२४)। निवापे पित्रुद्देशेन दाने, पित्रादिभ्यः श्रद्धया देये द्रव्ये च। 'श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते।' इति टीका। यैस्तु श्राद्धशब्दः अणन्तो व्युत्पाद्यते श्रद्धा अस्यास्तीति स वाच्यलिङ्ग एव—श्राद्धो नरः, श्राद्धा स्त्री, श्राद्धं कुलमिति। आयुधः, आयुधम्=शस्त्रमात्रम्, प्रहरणमात्रम्। 'आयुधं तु प्रहरणं शस्त्रमस्त्रम्' इति—(अम० ना० लिं० पृ० २९१ श्लोकः ८२)। अन्धः, अन्धम्=तिमिरम्, अदृक् च। "अन्धा" इति लोके। 'अन्धोऽदृक्' इति—(अम० ना० लिं० पृ० २२२ श्लोकः ६१)। 'अन्धश्चक्षुर्विहीने स्यादन्धं तु तिमिरे मतम्।' इति—(श० र० स० पृ० १८० पं० २)। 'अन्धं स्यात्तिमिरे क्लीबं, चक्षुर्हीनेऽभिधेयवत्।' इति—(मे० पृ० ७६ श्लोकः ३)। 'अन्धोऽचक्षुस्तमोऽप्यन्धम्' इति च—(वै० पृ० २३० श्लोकः ६)। औषधः, औषधम्=भेषजम्, रोगनाशकद्रव्यम्, रोगहृत्त्वेन द्रव्यमात्रविवक्षायामौषधप्रयोगः, तेन घृततैलादिकमप्यौषधशब्दवाच्यमिति ज्ञेयम्। 'औषधं तु भिषग्जितम्।' इति—(त्रि० शे० पृ० २९० श्लोकः १३)। गन्धमादनः, गन्धमादनम्=पर्वतविशेषः। 'स्याद् गन्धमादनो भृङ्गे गन्धके वानरान्तरे। स्त्री सुरायां, नगे न स्त्री' इति—(मे० पृ० १०० श्लोकः १३४)। प्रस्फोटनः, प्रस्फोटनम्=शूर्पम्। "सूप" इति लोके। ताडनम्, विकाशनम्, पचनं च। 'प्रस्फोटनं विकसने शूर्पे स्यात्ताडनेऽपि च।' इति—(श० र० स० पृ० २०५ पं० ६)। लग्नः, लग्नम्=मेषादिराशीनामुदयः, मत्तहस्ती, स्तुतिपाठकश्च। 'लग्नं राश्युदये क्लीबं, सक्तलज्जितयोस्त्रिषु।' इति—(मे० पृ० ८४ श्लोकः १८)। 'लग्नो मदकलो मत्तः' इति—(वै० पृ० १०९ श्लोकः ६८)। 'लग्नाः प्रातर्गेयाः स्तुतिवृताः।' इति च—(त्रि० शे० पृ० ३०१ श्लोकः ५६)। पिधानः, पिधानम्=संवरणम्, तिरोधानम्, अन्तर्धानम्। 'अपिधानतिरोधानपिधानाच्छादनानि च।' इति—(अम० ना० लिं० पृ० ३४ श्लोकः १३)। चन्दनः, चन्दनम्=मलयजः। 'चन्दनी तु नदीभिदि। चन्दनोऽस्त्री मलयजे, भद्रकाल्यां नपुंसकम्।' इति—(मे० पृ० ६७ श्लोकः ६०)। वितानः, वितानम्=विस्तारः, उल्लोचः। "चन्दोया" इति लोके। यज्ञश्च। 'वितानो यज्ञ उल्लोचे विस्तारे पुन्नपुंसकम्। क्लीबं वृत्तविशेषे स्यात्, त्रिलिङ्गो मत्त(न्द)तुच्छयोः।' इति—(मे० पृ० ९२ श्लोकः २६)। राजादनः, राजादनम्=फलाध्यक्षः, क्षीरिका। "खिरिणी" खिन्नी" इति च लोके। पियालश्च। "चिरौंजी" इति लोके। 'राजादनः फलाध्यक्षः' इति। 'राजादनं पियालः स्यात्' इति च—(अम० ना० लिं० पृ० १४० श्लोकः ३५)। 'राजादनं पियाले, ना क्षीरिकायां पलाशके।' इति च—(वै० पृ० २७८ श्लोकः २१)। शिश्नः, शिश्नम्=लिङ्गम्। 'शिश्नो मेढ्रं मेहनशेफसी।' इति—(अम० ना० लिं० पृ० २२८ श्लोकः ७६)। 'नपुंसकेऽपि।' 'शङ्कुर्मेढ्रः शेफकोशौ शिश्नं मेहनशेफसी।' इति च—(वै० पृ० १७८ श्लोकः ५१)। यौवनः, यौवनम्=द्वितीयं वयः। "जवानी" इति लोके। 'तारुण्यं यौवनं समे।' इति—(अम० ना० लिं० पृ० २१५ श्लोकः ४०)।

आपीनः, आपीनम् = ऊधः, क्षीराशयः, कूपश्च । 'ऊधस्तु क्लीबमापीनं समौ' इति—(अम० ना० लिं० पृ० ३२६ श्लोकः ७३) । 'पुंस्यपि' । 'आपीनः, अन्धुः, कूपः' इति च बोपदेवः' इति—(श० चिं० पृ० २७० स्तं २ पं० २०) । उदपानः, उदपानम् = कूपः । "कुआँ" इति लोके । 'उदपानं तु पुंसि वा ।' इति—(अम० ना० लिं० पृ० १०३ श्लोकः २६) । 'प्रदरस्तूदपानोऽस्त्री' इति च—(वै० पृ० १५४ श्लोकः ६) । आसनः, आसनम् = उपवेशनम्, स्थितिः, पीठम्, द्विरदस्कन्धदेशः, जीवकद्रुमश्च । 'आसनं द्विरदस्कन्धे पीठे यात्रानिवर्त्तने । आसनी विपणौ स्थित्यामासनो ना जीवकद्रुमे ।' इति—(श० र० स० पृ० १९१ पं० २) । केतनः, केतनम् = गृहम्, निमंत्रणम्, ध्वजः, कृत्यम्, स्थानं च । 'केतनं तु गृहे केतौ कृत्ये चापि निमंत्रणे ।' इति—(श० र० स० पृ० १९२ पं० १३) । अशनः, असनः, अशनम्, असनम् = वृक्षविशेषः, जीवकद्रुमः, क्षेपणं च । 'असनं क्षेपणे क्लीबं, पुंसि स्याज्जीवकद्रुमे ।' इति—(मे० पृ० ८४ श्लोकः २९) । नलिनः, नलिनम् = पद्मम्, कमलम्, प्राचीनामलकं च । 'सहस्रपत्रं नलिनं शतपत्रं कुशेशयम् ।' इति—(वै० पृ० १५७ श्लोकः ३८) । 'नलिनं नलिकातोयाम्बुजेषु' इति । 'नलिनी पद्मिनीव्योमनिम्नगाकमलाकरे । नपुंसकं नीलिकायां, न पुंसि सरसीरुहे ॥' इति च—(मे० पृ० ८८ श्लोकः ८२) । पुलिनः, पुलिनम् = सैकतम्, वालुकामयतटम्, तोयोत्थिततटम्, जलादचिरोत्थिततटम् । "चडा" "टापू" इति च लोके । द्वीपश्च । 'तोयोत्थितं तत्पुलिनम्' इति—(अम० ना० लिं० पृ० ९६ श्लोकः ६) । 'पुलिनं द्वीपमुच्यते ।' इति च कोशान्तरम्' इति—(अम० सु० व्या० पृ० ९६ स्तं० १ पं० १४-५) । मौनः, मौनम् = वाङ्नियमः, अभाषणम्, तूष्णीम्, तूष्णीकाम्, शब्दराहित्यम् । 'मौनं वाङ्नियमः' इति—(श० र० स० पृ० १८८ पं० १३) । 'अथ मौनमभाषणम् ।' इति—(अम० ना० लिं० पृ० २६१ श्लोकः ३६) । वर्द्धमानः, वर्द्धमानम् = शरावः, एरण्डः, प्रश्नभेदः, विष्णुः, भूषणम्, देशविशेषश्च । 'वर्द्धमानः शरावे स्यादेरण्डे भूषणेऽपि च ।' इति—(वै० पृ० २६८ श्लोकः ४४) । 'वर्द्धमानः प्रश्नभेदे शरावैरण्डविष्णुषु ।' इति च—(मे० पृ० ९८ श्लोकः १०५) । समानः, समानम् = हृन्नाभिसर्वसन्धिवृत्तौ वायुविशेषः । 'समानं सत्समैकेषु त्रिषु, ना नाभिमारुते ।' इति—(मे० पृ० ९३ श्लोकः ४६) । 'समानाः सत्समैके स्युः' इति च—(अम० ना० लिं० पृ० ४१८ श्लोकः १२७) । ओदनः, ओदनम् = भक्ष्यविशेषः, भक्तम् । "भात" इति लोके । 'ओदनं न स्त्रियां भक्ते, बालायामोदनी स्त्रियाम् ।' इति—(मे० पृ० ८५ श्लोकः ४३) । दिनः, दिनम् = दिवसः । 'दिनं त्वहनि न स्त्रियाम् ।' इति—(श० र० स० पृ० १८७ पं० ११) । शतं मानानि अस्य, शतमानः, शतमानम् = रूप्यपलम्, दशरूप्यधरणानि, विंशत्यधिकरक्तिकाशतत्रयप्रमाणम्, इत्यर्थः । 'धरणानि दश ज्ञेयः, शतमानस्तु राजतः ।' इति मनुः' इति—(श० चिं० पृ० ५०७ स्तं० २ पं० २२-३) । भूभागविशेषश्च । हायनः, हायनम् = संवत्, वर्षम् । "साल" इति

लोके । 'हायनोऽस्त्री, शरत्समाः ।' इति--(अम० ना० लिं० पृ० ५० श्लोकः २०) । 'हायनो न स्त्रियां वर्षे, पुंस्यर्चिर्व्रीहिभेदयोः ।' इति च--(मे० पृ० ६४ श्लोकः ५८) । स्थानः, स्थानम्=आश्रयः, स्थितिश्च । 'स्थानं स्यादाश्रये स्थितौ ।' इति--(वै० पृ० २२७ श्लोकः ३६) । 'अवकाशे स्थितौ स्थानम्' इति—(अम० ना० लिं० पृ० ४१७ श्लोकः ११७) । 'स्थानं सादृश्येऽवकाशे स्थितौ वृद्धिक्षयेतरे ।' इति च--(मे० पृ० ८४ श्लोकः २३) । मानः, मानम्=दर्पः, चित्तोन्नतिः, ग्रहः, प्रमाणम्, प्रस्थादिश्च । 'मानश्चित्तोन्नतौ ग्रहे । क्लीबं प्रमाणे प्रस्थादौ' इति--(मे० पृ० ८३ श्लोकः १४) । 'मानश्चित्तासमुन्नतिः' इति । 'मानं तुलाङ्गुलिप्रस्थैः' इति च--(अम० ना० लिं० पृ० ३३० श्लोकः ८५) । धनः, धनम्= द्रव्यम्, वित्तम्, गोधनं च । 'धनं तु गोधने वित्ते' इति--(मे० पृ० ८३ श्लोकः १२) । निधनः, निधनम्=विनाशः, कुलं च । 'निधनं स्यात्कुले नाशे' इति--(मे० पृ० ८८ श्लोकः ८३) । 'मरणं, निधनोऽस्त्रियाम् ।।' इति च--(अम० ना० लिं० पृ० ३०१ श्लोकः ११६) । विमानः, विमानम्=रथविशेषः, आकाशयानम्, यानमात्रं च । 'व्योमयानं विमानोऽस्त्री' इति—(अम० ना० लिं० पृ० २० श्लोकः ४८) । 'विमानो व्योमयाने च सार्व(सप्त) भौमगृहेऽपि च। घोटके यानमात्रे च पुन्नपुंसकयोर्मतः ।' इति च—(मे० पृ० ९२ श्लोकः ३०) । ताडनः, ताडनम्=आघातः, हननम् । 'हननं ताडनं समे ।' इति--(वै० पृ० १८९ श्लोकः ३६) । स्तेनः, स्तेनम्=चौरः, तस्करः, स्तेयम्, चौर्यं च । 'स्तेनः शङ्कितवर्णकः ।' इति—(हा० व० पृ० ४०२ श्लोकः १२८) । 'स्तेनो रात्रिचरो दस्युर्मोषिकः पारिपन्थिकः ।' इति च--(वै० पृ० १४० श्लोकः ५६) । वस्नः, वस्नम्=मूल्यम्, अवक्रयः, वेतनम्, कटि-भूषणम्, लवणविशेषश्च । 'वस्नस्त्ववक्रये पुंसि, वेतने स्यान्नपुंसकम् ।' इति--(मे० पृ० ८४ श्लोकः १८) । 'वस्नं स्याद्वेतने मूल्ये वसनद्रव्ययोरपि ।' इति--(श० र० स० पृ० १८९ श्लोकः ५) । 'वस्नोऽर्घोऽवक्रयो मूल्यम्' इति । 'रौमकं तु रुमाभवम् । वस्नं च' इति च-- (वै० पृ० १२८ श्लोकः ७०) । भवनः, भवनम्=गृहम्, भावः, श्वा च । 'भवनं स्याद्गृहे भावे' इति—(मे० पृ० ९० श्लोकः १) । 'कौलेयकोऽस्थिरवादश्च भवनो भलुहोऽपि च ।' इति । 'अगारं भवनं धाम' इति च--(वै० पृ० १६० श्लोकः १७) । भुवनः, भुवनम्=लोकः । 'भुवनं वि(पि)ष्टपेऽपि स्यात्सलिले गगने जने ।' इति-- (मे० पृ० ६० श्लोकः २) । 'भुवनं, पिष्टपः पुमान् ।' इति च बोपालितः' इति--(अम० सु० व्या० पृ० ११२ स्तं० १ पं० ३२) । यानः, यानम्=वाहनम्, गतिश्च । 'यानं स्याद् वाहने गतौ ।' इति--(मे० पृ० १३ श्लोकः १६) । उद्यानः, उद्यानम्=वनभेदः, आरामः, उपवनम् । ''बाग'' ''बगीचा'' ''पार्क'' इति च लोके । निःसरणम्, बहिर्गमनम्, प्रयोजनम्, आक्रीडम्, उद्गमश्च । 'उद्यानं वनभेदे स्यान्निःसृतौ च प्रयोजने ।' इति धरणिः' इति—

(अम० सु० व्या० पृ० ४१७ स्तं० १ पं० १०-१) । 'ज्ञेययात्रीडमुद्यानम्' इति चामरमाला' इति--((अम० सु० व्या० पृ० १२८ पं० ६) । वातायनः, वातायनम् = गवाक्षः, जालकः। ''झरोखा'' इति लोके। अश्वश्च । 'वातायनश्चैकशफः' इति । 'वातायनं गृहाक्षं स्याद्वधूट-शयनं तथा ।' इति च--(त्रि० शे० पृ० २८१ श्लोकः ६) । 'वातायनं गवाक्षः स्यात्' इति च-(अम० ना० लिं० पृ० ११६ श्लोकः ६)। अभिधानः, अभिधानम् = नाम, संज्ञा, शब्दकोषः, कथनं च । 'शब्दाभिलापौ त्वभिधाभिधानं वाचको ध्वनिः । ह्रासः कुहरितश्च' इति-- (त्रि० शे० पृ० २७१ श्लोकः १) । 'कृत्तद्धितसमासानामभिधानं नियामकम्।' इति च बोपदेवः' इति--(श० चिं० पृ० १३३ स्तं० २ पं० ५, ६) । द्वीपी, द्विपिनः, द्विपि, द्विपिनम् = व्याघ्र । "बघेरा" इति लोके। चित्रकश्च । ''चीता'' इति लोके। 'शार्दूलद्विपिनौ व्याघ्रे' इति--(अम० ना० लिं० पृ० १८६ श्लोकः १) । निपानः, निपानम् = उपकूपजलाशयः, कूपसमीपरचितजला-धारः । "प्याऊ" "चरही" इति वा लोके । दोहनी च । 'आहावस्तु निपानं स्यादुपकूपजलाशये।' इति--(अम० ना० लिं० पृ० १०३ श्लोकः २६) । 'पारी तु दोहनी । निपानं, स्त्री गवी तुम्बा निलिम्पा रोहिणी च सा।' इति च—(त्रि० शे० पृ० ३०३ श्लोकः १६) । शयनः, शयनम् = तूलकादिः। मुकुटस्तु--शय्यामात्रम्, निद्रा, मैथुनं च । 'शयनं तु मतं स्वापशय्ययोः सुरतेऽपि च।' इति--(श० र० स० पृ० २०० पं० ५) । 'शय्यायां शयनं न, स्त्री, निद्रासुरतयोर्नपुंम्।' इति च--(वै० पृ० २६३ श्लोकः ८५) । लशुनः, रसोनः, लशुनम्, रसोनम् = गृञ्जनः। "लहशुन" इति लोके। 'खञ्जोऽरिष्टो गृह्योच्छिष्टो रसनो गृञ्जनः कटुः । कायाङ्गं लशुनं दिव्यं महाकन्दामृतोद्भवे ।' इति—(वै० पृ० ६२ श्लोकः २०४) । 'उभौ पुंस्यपि'। 'रसोनो लशुनो रिष्टो म्लेछकन्दो महौषधम्।' इति च--(भा० प्र० पृ० १६१ श्लोकः २०२) । इह पाठान्तरं दृश्यते । गृञ्जनः, गृञ्जनम् = लशुनम्, विषदग्धपशुमांसं च। 'विषदग्धपशोर्मांसे क्लीवं, पुंसि रसोनके।' इति—(मे० पृ० ८७ श्लोकः ५८) । खलिनः, खलीनः, खलिनम्, खलीनम् = कविका । "लगाम" "कडिआली" इति च लोके। 'कविका तु खलीनोऽस्त्री' इति--(अम० ना० लिं० पृ० २८२ श्लोकः ४९) । 'खलिनी खलमेलके । खलीनमश्वावरणे मुखगे लोहनि-र्मिते । ताडपत्र्यां च खलिनी' इति---(श० र० स० पृ० १६२ पं० १६-७) । 'खलिनं च खलीनं च' इति च—(द्वि० को० पृ० ४१३ श्लोकः ५४) । यल्लक्ष्यम्--'खलिनं हयाय दद्यात्' इति—(श० चिं० पृ० ७५५ स्तं० २ पं० १५-६) । अनुमानः, अनुमानम् = अनुमा, व्याप्तिदर्शनेन व्यापकनिश्चयः, वितर्कणं च । 'अनुमा त्वनुमानं स्यात्' इति— (त्रि० शे० पृ० ३१० श्लोकः ११) । 'अनुमानं वितर्कणे ।' इति च-(श० र० स० पृ० २०२ पं० १०) । 'वितर्कणम्' इति ऊहः संशयः विपरीततर्को वा । दीपः, दीपम् = प्रकाशविशेषः, वर्तिस्थज्वलदग्निशिखा । "रोशनी" "चिराग" "दिया" इति च लोके। दीपस्तु स्नेहाशः कज्जलध्वजः। दशेन्धनो

गृहमणि—दोषातिलक इत्यपि ।' इति— (त्रि० शे० पृ० २९३ श्लोकः ४२)। कुणपः, कुणपम् = शवः । । "लाश" "मुर्दा" इति वा लोके । पूयं च । "पीव" इति लोके । 'कुणपस्तु शवोऽस्त्रियाम् ।' इति। 'पूयं तु कुणपं दूष्यम' इति च—(वै० पृ० १२२ श्लोकः २१६) । 'कुणपः शवमस्त्रियाम् ।' इति च—(अम० ना० लिं० पृ० ३०१ श्लोकः ११८) । कुतपः, कुतपम् = छागरोममयो वस्त्रविशेषः, दिनस्याष्टमोंऽशश्च । 'अंशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २५९ श्लोकः ३१)। अंशशब्दोऽत्र मुहूर्त्तपरः । 'मुहूर्त्तात्सप्तमादूर्ध्वं मुहूर्त्तान्नवमादधः । स कालः कुतपो ज्ञेय' इत्युक्तेः ।' 'दिवसस्याष्टमे भागे मन्दीभवति भास्करे । स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ।' इति शातातपः । क्लीबे तु कुतपम् । शब्दरत्नावल्यां तु 'कुतुप' इति द्व्युकारोऽपि ।' इति—(अम० अम० वि० टी० पृ० १७३ पं० १७ तः २० या०) । 'कुतपोऽस्त्रियां दौहित्रे वाद्ये छागजकम्बले । कुशे दिनस्याष्टमांशे, ना सूर्ये' इति—(मे० पृ० १०३ श्लोकः १६)। 'कुतपो भागिनेयेऽर्के विप्रेऽग्नावतिथौ गवि । अस्त्री त्वह्नोऽष्टमे भागे तिलेषु च्छागकम्बले ।' इति च—(वै० पृ० २५९ श्लोकः २६-३०)। आवापः, आवापम् = आलवालम्, वृक्षमूलसेकार्थं स्वल्पजलखातम् । "थाल्हा" इति लोके । पानभेदः, प्रक्षेपः, भाण्डपच(व)नम्, आपाकश्च । "आवा" इति लोके । 'आवापो न्यास आवाले' इति—(वै० पृ० २३९ श्लोकः ६) । 'आवापः शत्रुचिन्तायां प्रक्षेपावालयोरपि ।' इति—(ना० र० मा० पृ० ६२ पं० १९) । 'आवापो भाण्डपच(व)ने परिक्षेपालवालयोः ।' इति च—(मे० पृ० १०२ श्लोकः १४)। चापः, चापम् = धनुः, शरासनम् । "धनुष" इति लोके । 'अथास्त्रियौ । धनुश्चापौ' इति—(अम० ना० लिं० पृ० २६१ श्लोकः ८३) । शूर्पः, शूर्पम् = प्रस्फोटनम् । "सूप" इति लोके । मानविशेषश्च । 'प्रस्फोटनं शूर्पमस्त्री' इति—(अम० ना० लिं० पृ० ३१० श्लोकः २६) । स्तूपः, स्तूपम् = वायुः, रणः, उच्छ्रायः, समुच्छ्रायः, मृदादिकूटः, राशीकृतमृत्तिकादिः, वटकादिश्च । 'घृतादिकृतकूटः' इति मुकुटः । 'स्तूपा वायुरणोच्छ्रायाः' इति च—(वै० पृ० २१९ श्लोकः ६७)। उडुपः, उडुपम् = जलतरणोचितघटितकाष्ठानां सञ्चयविशेषः, प्लवः, कोलः, भेलः, चर्मावनद्धं यानपात्रम्, चन्द्रश्च । 'उडुपः प्लवचन्द्रयोः ।' इति—(श० र० स० पृ० २१२ पं० ५) । 'उडुपश्चन्द्रभेलयोः ।' इति धरणिः' इति—(अम० सु० व्या० पृ० ९७ स्तं० १ पं० ४) । 'क्लीबेऽपि ।' 'उडुपं तु प्लवः कोलः' इति च—(अम० ना० लिं० पृ० ९७ श्लोकः ११) । विटपः, विटपम् = लतासमुदायविशेषः, शाखापल्लवसमुदायः, विस्तारः, गुल्मः, शाखा, पल्लवश्च । 'विस्तारो विटपोऽस्त्रियाम् ।' इति । 'स्तम्बेऽपि विटपोऽस्त्रियाम् ।' इति च—(अम० ना० लिं० पृ० ४१९ श्लोकः १३१) । 'स्कन्धादूर्ध्वं तरोः शाखा कटप्रो विटपो मतः ।' इति कात्यः । 'शाखायां पल्लवे स्तम्बे विस्तारे विटपोऽस्त्रियाम् ।' इति च रभसः' इति—(अम० सु० व्या० पृ० १३३ स्तं० १ पं० १६) । मण्डपः, मण्डपम् = गृहादेर्विन्यासविशेषः, जनाश्रयः, जनविश्रामगृहं च । 'मण्डपोऽस्त्री जनाश्रयः ।' इति—

(अम० ना० लिं० पृ० ११६ श्लोकः ९)। 'मण्टप' इत्यपि। 'मण्टपोऽस्त्री जनाश्रयः।' इति च—(वै० पृ० १६१ श्लोकः २८)। शष्पः, शष्पम् = बालतृणम्। "खर" इति लोके। प्रतिभाहानिश्च। 'अथ शष्पं बालतृणे स्मृतम्। पुंसि स्यात्प्रतिभाहानौ' इति—(मे० पृ० १०२ श्लोकः ११)। 'शष्पं बालतृणं शादः' इति च—(वै० पृ० ७४ श्लोकः २३५)। बाष्पः, बाष्पम् = नेत्रजलम्, अम्बुधूमः, ऊष्मा च। "भाप" इति लोके। 'बाष्पमूष्माश्रु' इति—(अम० ना० लिं० पृ० ४१६ श्लोकः १३०)। 'वाष्पं मेदिन्यामन्तःस्थादौ पठ्यते। अत एव गोवर्द्धनाचार्येरपि 'वाष्पाकुलम्' (५२८) इत्यार्याऽन्तःस्थादिव्रज्यायां लिखिता। हैमे तु स्पर्शादौ पठ्यते। वैजयन्त्यां तु पवर्गादौ पुलिङ्गे पठ्यते। 'बाष्पोऽश्रुण्यम्बुधूमे च' इति च—(वै० पृ० २१७ श्लोकः ४०)। द्वीपः, द्वीपम् = द्विधा गता आपो यत्र, जलमध्यस्थस्थलम्, अन्तरीपम्। "टापू" इति लोके। पुराणप्रसिद्धा जम्ब्वादयः सप्त द्वीपाश्च। 'द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्।' इति—(अम० ना० लिं० पृ० ९६ श्लोकः ८)। 'अस्त्री द्वीपोऽन्तरीपं क्ली' इति च—(वै० पृ० १५६ श्लोकः ३३)। विष्टपः, विष्टपम् = भुवनम्, जगत्। 'पिष्टपः' इत्यपि। 'अथो जगती लोको। विष्टपं भुवनं जगत्।' इति—(अम० ना० लिं० पृ० ११२ श्लोकः ६)। 'पुंस्यपि'। 'भुवनं पिष्टपः पुमान्।' इति च बोपालितः' इति—(अम० सु० व्या० पृ० ११२ स्तं० १ पं० ३२)। निपः, निपम् = कलशः, घटः। "कलसा" "घड़ा" इति च लोके। 'घटः कुटानिपावस्त्री' इति—(अम० ना० लिं० पृ० ३१२ श्लोकः ३२)। शफः, शफम् = गवादीनां खुरः, तरूणां मूलम्, सुगन्धिद्रव्यविशेषः, नखम्, कोलदलं च। 'शफं क्लीबे खुरः पुमान्' इति। 'शफं मूले तरूणां स्याद् गवादीनां खुरेऽपि च।' इति च—(अम० ना० लिं० पृ० २८२ श्लोकः ४९)। 'पुंस्यपि'। 'खुरः शफः' इति च—(वै० पृ० ७१ श्लोकः ७४)। डिम्बः, डिम्बम् = डमरः, अशस्त्रकलहः, विप्लवः, भयध्वनिः, अण्डश्च। 'डिम्बो, डमरविप्लवौ।' इति—(अम० ना० लिं० पृ० ३९१ श्लोकः १४)। 'डिम्बः प्लीहखगाण्डयोः।' इति—(वै० पृ० २१६ श्लोक २४)। 'नपुंसकेऽपि'। 'श्रृगालिका च डिम्बं च डमरं विद्रवोऽपि च।' इति। (भीत्या पलायनम्)। 'डिम्बं भये च कलले फुप्फुसे च प्रचक्षते।' इति च—(हा० व० पृ० ४०८ श्लोकः २४४)। बिम्बः, बिम्बम् = मण्डलम्। 'बिम्बोऽस्त्री, मण्डलं त्रिषु।' इति—(अम० ना० लिं० पृ० ३५ श्लोकः १५)। 'बिम्बस्तु प्रतिबिम्बे स्या,-न्मण्डले पुन्नपुंसकम्।' इति च—(मे० पृ० १०५ श्लोकः ७)।

अथाधुना भान्तादीन् क्षान्तान्तान् क्रमसहितान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ८ श्लोकः १०८ तः १२१ या०)।

जम्भः[1] कुसुम्भ–ककुभौ कलभो निभो–ऽर्म[2]–
संक्राम–संक्रम–ललाम–हिमानि हेमः ॥२२॥

उद्यम–कामो–द्दामा–ऽऽश्रम–कुट्टिम–कुसुम–सङ्गमा गुल्मः ।
क्षेम–क्षौमौ कम्बलिर्वाह्यो[3] मैरेय–तूर्य्यौ च ॥२३॥

पूया–ऽजन्य–प्रमय–समया राजसूयो हिरण्या–
ऽरण्ये संख्यं मलय–वलयौ वाजपेयः कषायः ।

शल्यं कुल्या–ऽव्यय–कवियव–द्गोमयं पा(फा)रिहार्य्यः
पारावारो[4] नखर–शिखर–क्षेत्र–वस्त्रो–पवस्त्राः ॥२४॥

अलिञ्जरः कूवर–कूर–वेर–
नीहार–हिञ्जीर–सहस्र[5]–मेढ्राः ।
संसार–सीरौ[6] तुवर–श्च सूत्र–
भृङ्गार–पण्ड्रा–ऽन्तर–कर्णपूराः ॥२५॥

पाणिनीयेऽपि—(१) (भोपधः) ॥ (जृम्भं नपुंसके च) ॥ इदं नपुंसके । चात्पुंसि स्यात् । व्या० उ० । सि० कौ० पृ० ४०० सू० ८१ ।

(२) (मोपधः) ॥ (संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । संग्रामः, संग्रामम्=रणम् । अन्यत्र—(आहवसंग्रामौ) एतौ पुंसि स्तः । होमः, होमम्=यज्ञे हविर्ज्वलनम् । शे० उ० । सि० कौ० पृ० ४०३ सू० १६१ ।

(३) (योपधः) ॥ (गोमयकषायमलयान्वयाव्ययानि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । अन्वयः, अन्वयम्=वंशः, शब्दानामर्थानुकूलोपस्थापनं च । शे० उ० । सि० कौ० पृ० ४०० सू० ८७ ।

(४) (रोपधः) ॥ (चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च) ॥ एतानि नपुंसके । चात्पुंसि स्युः । सारः=बलम्, स्थिरांशश्च । सारम्=जलम्, धनम्, बलम्, न्याय्यः, नवनीतं च । भृङ्गारः=कनकालुका, स्वर्णघटितजलपात्रम्, भृङ्गराजश्च । भृङ्गारम्= काञ्चानम्, लवङ्गं च । मन्दारः=सुरद्रुमविशेषः । मन्दारम्=सुरद्रुमपुष्पम् । शे० उ० । सि० कौ० पृ० ४०० सू ९१ ।

(५) (सहस्रः क्वचित्) ॥ अयं क्वचिन्नपुंसके स्यात् । सहस्रः, सहस्रम्=दशशतम् । सि० कौ० पृ० ४०२ सू० १४९ ।

(६) सीरः, सीरम्=हलम् । अन्यत्र–(सीरार्थोदनाः पुंसि) । एते पुंसि स्युः । सि० कौ० पृ० ४०२ सू० १३९ ।

नेत्रं वक्त्रं[1]–पवित्र–पत्रं[2]–समरो–शीरा–ऽन्धकारा वरः,
केदार–प्रवरौ कुलीर–शिशिरा–वाडम्बरो गह्वरः ।
क्षीरं कोटर–चक्र–चक्रि–तिमिरा–ऽङ्गारा–स्तुषारः शरो,
भ्राष्ट्रो पल्वर-राष्ट्र-तक्र-जठरा ऽऽर्द्राः कुञ्जरः पञ्जरः ॥२६॥
कर्पूर–नूपुर–कुटीर–विहार–वार–
कान्तार–तोमर–दुरोदर–वासराणि ।
कासार–केसर–करीर–शरीर–जीर–
मञ्जीर–शेखर–युगन्धर–वज्र–वप्राः ॥२७॥
आलवाल[3]–पल–भाल–पलालाः
पल्वलः खल–चषाल- विशालाः ।
शूल–मूल–मुकुला–स्तल–तैलौ
तूल–कुड्मल–तमाल–कपालाः ॥२८॥
कवल–प्रवाल–बल–शम्बलो–त्पलो–
पल–शील–शैल–शकला–ऽङ्गुला–ऽञ्चलाः ।
कमलं[4] मलं मुशल–साल–कुण्डलाः
कललं नलं निगल–नील–मङ्गलाः ॥२९॥
काकोल–हलाहलौ हलं कोलाहल–कङ्काल–वल्कलाः ।
सौवर्चल–धूमले फलं हालाहल–जम्बाल–खण्डलाः ॥३०॥

पाणिनीयेऽपि—(१) (वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च) ॥ एतानि पुंसि। चान्नपुंसके स्युः । एषां व्याख्या तु हैमादितो बोध्या । सि० कौ० पृ० ४०२ सू० १४०।

(२) (पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च) । एते पुंसि ॥ चान्नपुंसके स्युः । व्या० उ० । सि० कौ० पृ० ४०३ सू० १५८।

(३) (लोपधः) । (शीलनूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालबालनिगलपलालबिडालखिलशूलाः पुंसि च) ॥ एते पुंसि । चान्नपुंसके स्युः । पललः=यातुधानम् । पललम्=मांसम्, पङ्कम्, तिलचूर्णं च । बिडालः, बिडालम्=मार्जारः, ... । खिलः, खिलम्=हलादिनाऽऽकृष्टभूमिः । शे० उ० । सि० कौ० पृ० ४०२ सू० १४४।

(४) (पद्मकमलोत्पलानि पुंसि च) ॥ एतानि पुंसि । चान्नपुंसके स्युः । पद्मादयः शब्दाः, कुसुमाभिधायित्वेऽपि द्विलिङ्गा स्युः। अमरोऽप्याह—"वा पुंसि पद्मं नलिनम्" इति। एवं च अर्धर्चादिसूत्र तु । "जलजे पद्मं नपुंसकमेव" इति वृत्तिग्रन्थो मतान्तरेण नेयः। व्या० उ० । सि० कौ० पृ० ४०३ सू० १६०।

लाङ्गल--गरला--विन्द्रनील--गाण्डीव--गाण्डिवाः ।
उल्वः पारशवः पार्श्वा-ऽपूर्व-त्रिदिव-ताण्डवम् ॥३१॥
निष्ठेव-प्रग्रीव-शराव-रावा भाव-क्लीब-शवानि ।
दैवं: पूर्वः पल्लव-नल्वौ पाशं कुलिशं कर्कश-कोशौ ॥३२॥
आकाश-काश-कणिशा-ऽङ्कुश-शेषं-वेषो-
ष्णीषा-म्बरीष-विष-रोहिष-माष-मेषाः ।
प्रत्यूष--यूष--मथ कोष--करीष--कर्ष-
वर्षा-ऽऽमिषा रसं-वुसे-क्थस-चिक्कसा-श्च ॥३३॥
कर्पास आसो दिवसा-ऽवतंस-
वीतंस-मांसाः पनसो-पवासौ ।
निर्य्यास-मासौ चमसां-ऽस-कंस-
स्नेहानि बर्हो गृह-गेह-लोहाः ॥३४॥
पुण्याह-देहौ पटह-स्तनूरुहौ
लक्षः·················॥इति॥

एषां व्याख्या—

जम्भ इति। उद्यमेति। पूयेति। आलिञ्जर इति। नेत्रमिति। कर्पूरेति। आलवालेति। कवलेति। काकोलेति। लाङ्गलेति। निष्ठेवेति। आकाशेति। कर्पास इति। पुण्याहेति च। कुल्यादौ पार्श्वादौ प्रत्यूषादौ च समाहारो द्वन्द्वः। अन्यत्रेतरेतरयोगो द्वन्द्वो बोध्यः। जम्भः, जम्भम्=

पाणिनीयेऽपि—(१) (दैवं पुंसि च)॥ एतत्पुंसि। चान्नपुंसके स्यात्। व्या० उ०। सि० कौ० पृ० ४०३ सू० १६८।

(२) (षोपधः)॥ (यूषकरीषमिषविषवर्षाणि नपुंसके च)॥ एतानि नपुंसके। चात्पुंसि स्युः। मिषः= स्पर्द्धनम्। मिषम्=व्याजः। शे० उ०। सि० कौ० पृ० ४०० सू० ९४।

(३) (सोपधः)॥ (चमसांसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च)॥ एतानि नपुंसके। चात्पुंसि स्युः। कार्पासः=तुण्डिकेरी, वस्त्रयोनिः। कार्पासम्=कार्पासीफलम्। कासः, कासम्=रोगविशेषः। वासः=वेश्म, गृहम्। वासम्= । शे० उ०। सि० कौ० पृ० ४०१ सू० ९७।

तत्र विशेषः—वसुः=मयूखः, अग्निः, कुबेरश्च। वसु=धनम्। 'वसुर्मयूखाग्निधनाधिपेषु' इति। सि० कौ० पृ० ३९९ पं०। १९। एष पाठो विश्वप्रकाशस्येति।

(४) (गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च)॥ एते पुन्नपुंसकयोः स्युः। मेहः= । पट्टः, पट्टम्=वस्त्रविशेषः, राजाज्ञालेखनसाधनं च। शे० उ०। सि० कौ० पृ० ४०४ सू० १८३।

दानवविशेषः । दन्तः, दम्भः, जम्बीरः, अंशः, हनुः, तूणश्च । 'जम्भा दम्भजम्बीरदानवाः । दन्तेऽपि च पुमानेव, भक्ष्यवाचिषु स त्रिषु ।' इति—(ना० र० मा० पृ० ३८ पं० ११) । 'जम्भः स्याद्दानवान्तरे । दन्तभोजनयोरंशे हनौ जम्बीरतूणयोः ।' इति च—(अने० सं० पृ० २६ श्लोकः ३१२) । कुसुम्भः, कुसुम्भम् = महारजनवृक्षस्य पुष्पम् । "कसूंभा" इति लोके । करकः, कमण्डलुः । 'स्यान्महारजने क्लीबं कुसुम्भं, करके पुमान् ।' इति—(अम० ना० लिं० पृ० ४२० श्लोकः १३६) । 'महारजने पुष्पभेदे। येन रक्तं वस्त्रं कौसुम्भम्, करके कमण्डलौ' इति टीका। सुवर्णं च। 'कुसुम्भं हेमनि महारजने, ना कमण्डलौ ।' इति च--(मे० पृ० १०७ श्लोकः १५)। ककुभः, ककुभम् = वीणाङ्गम्, प्रसेवकः, वीणादण्डाधःस्थं शब्दगाम्भीर्याय दारुमयं भाण्डं यच्चर्म्मणा छाद्यते सः, रागविशेषः, अर्ज्जुनवृक्षश्च । 'वीणाप्रसेवे ककुभो रागभेदेऽर्ज्जुनद्रुमे ।' इति--(त्रि० शे० पृ० ३५५ श्लोकः २८५) । 'ककुभस्त्विन्द्रवृक्षे स्याद्, दिक्षु पक्षिण्यपि द्वयोः ।' इति च—(ना० मं० पृ० ५७ पं० १०) । कलभः, कलभम् = करिपोतः, करिशावकः, धत्तूरवृक्षश्च । 'त्रिंशद्वर्षस्तु कलभः' इति-- (वै० पृ० १०९ श्लोकः ६६) । 'पञ्चवर्षपर्य्यन्तः करिणः शावकः' इति सुभूतिः । 'द्विपार्भके समुद्दिष्टः करिशावक इत्ययम् ।' इति- (श० र० स० पृ० ४७ पं० १४) । 'कलभः करिशावकः ।' इति च--(अम० ना० लिं० पृ० २७६ श्लोकः ३५) । निभः, निभम् = व्याजः, सादृश्यं च । 'निभस्तु कथितो व्याजे पुंलिङ्गः, सदृशे त्रिषु ।' इति—(मे० पृ० १०६ श्लोकः ६) । 'क्लीबेऽपि' । 'सादृश्ये सन्निभं निभम् ।' इति । 'प्रकारः सन्निभं निभम् ।' इति । 'व्याजो मिषं छलं छद्म निभं च कपटोऽस्त्रियाम् ।' इति च—(वै० पृ० ९९ श्लोकः १९५) । अर्मः, अर्मम् = रोगविशेषः, चक्षूरोगभेदः । संक्रामः, सांक्रमः, संक्रामम्, संक्रमम् = दुर्गसञ्चरः, दुर्गद्वारे फलकादिनिर्मितः सञ्चारमार्गः, जलसञ्चारयंत्रकं च । 'संक्रमः क्रमेण पुंसि, न स्त्री स्याद् दुर्गसञ्चरे ।' इति-(मे० पृ० ११२ श्लोकः ५४) । 'अस्त्री तु संक्रमो दुर्गसञ्चरः ।' इति--(अम० ना० लिं० पृ० ३९३ श्लोकः २५) । 'संक्रमः क्रमणे सम्यग्वारिसञ्चारयंत्रके ।' इति—(श० र० स० पृ० २३० पं० ४) । ललामः, ललामम् = प्रभावः, पौरुषम्, ध्वजः, लाञ्छनं च । 'ललामोऽस्त्री ललामाऽपि प्रभावे पौरुषे ध्वजे । श्रेष्ठे भूषापुण्ड्रशृङ्गपुच्छचिह्नाश्वलिङ्गिषु ।' इति--(वै० पृ० २६२ श्लोकः ७२) । 'प्रधानध्वजशृङ्गेषु पुण्ड्रवालधिलक्ष्मसु । भूषावाजिप्रभावेषु ललामं स्याल्ललाम च ।' इति च रुद्रः । पुण्ड्मश्वादीनां ललाटचित्रम् । 'अश्वो वाजी । भूषा सामीप्यादश्वस्यैव ।' इति—(अम० सु० व्या० पृ० ४२१ स्तं० २ श्लोकः १४३) । हिमः, हिमम् = तुहिनम्, तुषारः । "पाला" "कोहरा" "ठंड" "बर्फ" इति च लोके । मलयोद्भवं, चन्दनं च । 'हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गः' इति—(मे० पृ० ११० श्लोकः ३८) । 'पुंस्यपि' । 'सेभ्यः सीमो हिमोऽपि च ।' इति—(वै० पृ० १९६ श्लोकः ७) । 'हिमाः कर्पूरचन्दनद्रुचन्द्रहेमन्तर्त्तुहिमालयपर्वताः ।

हिमे खबाष्परजनीजले च' इति च—(श० चिं० पृ० १०१८ स्तं० १ पं० १३-४-५)। हेमः, हेमम् = माषकपरिमाणम् ।' इति वैद्यकपरिभाषा । 'हेम्नी काञ्चनवेतने ।' इति च--(वै० पृ० २२७ श्लोकः ३७) । उद्यमः, उद्यमम् = उत्साहः, समुद्योगश्च । 'उद्यमः स्यात्समुद्योगे' इति--(श० र० स० पृ० २२८ पं० ७) । 'गुरणमुद्यमे ।।' इति च—(अम० ना० लिं० पृ० ३९० श्लोकः ११) । गुरणं भाराद्युद्यमनम् । कामः, कामम् =स्मरः, कामदेवः, इच्छा, अनुरागः, रेतः, निकामम्, काम्यम्, अनुमतिश्च । 'कामः स्मरेच्छयोः पुमान् । रेतस्यपि निकामे च काम्येऽपि स्यान्नपुंसकम् ।' इति--(मे० पृ० १०८ श्लोकः ५) । उद्दामः, उद्दामम् = प्रचेताः, वरुणः, छन्दोविशेषश्च । 'प्रचेता यादसान्नाथः प्रत्यगाशापतिस्तथा । जलभूषण उद्दाम' इति—(वै० पृ० १२ श्लोकः ४६) । 'वशेऽनर्गलमुद्दाममुच्छृङ्खलमयंत्रितम् ।' इति च--(वै० पृ० २१२ श्लोकः १३२) । आश्रमः, आश्रमम् = ब्रह्मचारी, गृही, वानप्रस्थः, भिक्षुः, वनम्, मठः, स्थानम्, मुनीनां वासस्थानं च । 'ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्री' इति--(अम० ना० लिं० पृ० २५१ श्लोकः ३, ४) । ।'आश्रमो ब्रह्मचर्य्यादौ वानप्रस्थे वने मठे । अस्त्रियाम्' इति च—(मे० पृ० १११ श्लोकः ३९) । कुट्टिमः, कुट्टिमम् = संस्कृत-भूमिविशेषः, भित्तिभेदः । "फरसबन्दी" इति ख्याता । स्वल्पगहम्, कुटीरः, गर्भागारम्, मणिभूमिः, रत्नस्य खनिः, सुधाघटितभूतलम्, बद्धभूमिः । "नींव" "कुरसी" इति च लोके । दाडिमद्रुमश्च । 'कुट्टिमोऽस्त्री बद्धभूमिः ।' इति—(वै० पृ० १६१ श्लोकः ३२) । 'कुट्टिमं त्वस्य बद्धभूः ।' इति--(अभि० सं० अभि० चि० पृ० ३९ श्लोकः ९९२) । 'मणीनां कुट्टि-मानि बद्धभूमिकानि ।' इति । 'कुट्टिमोऽस्त्री निबद्धा भूः' इति च कोशान्तरम्' इति--(अम० अम० त्रि० टी० पृ० २७१ श्लोकः ३४) । कुसुमः, कुसुमम् = पुष्पम्, फलम्, स्त्रीरजः, नेत्र-रोगश्च । 'कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः ।' इति—(मे० पृ० १११ श्लोकः ४१) । सङ्गमः, सङ्गमम् = सङ्गतिः, संयोगः, समागमः । "मेल–मिलाप" इति लोके । 'मेलके सङ्ग-सङ्गमौ ।' इति—(अम० ना० लिं० पृ० ३९४ श्लोकः २६) । 'ना मेलः, सङ्गमो ना वा' इति चामरमाला । 'पक्षे क्लीबमपि' । इति--(अम० सु० व्या० पृ० ३९५ स्तं० १ पं० ४) । गुल्मः, गुल्मम् = प्रकाण्डम्, उपस्करणम्, रोगश्च । 'गुल्मः सेनाघट्टभिदोः सेनारक्षणरुग्भिदोः । स्तम्बे, स्त्रियामामलक्येलावल्ली (नी) वस्त्रवेश्मसु ।' इति--(मे० पृ० १०९ श्लोकः ११) । 'गुल्मः स्तम्बे प्लीह्नि घट्टसैन्ययोः सैन्यरक्षणे ।' इति च—(वि० प्र० पृ० १११ श्लोकः १३) । रुग्, उदररोगः, स्तम्बोऽप्रकाण्डः । क्षेमः, क्षेमम् = शुभम्, कुशलम् । 'कुशलं क्षेममस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ५२ श्लोकः २६) । 'जानीयान्मङ्गलं क्षेमं क्षेमं लब्धार्थ-रक्षणम् । चूडायां ना, शुभे न स्त्री, कात्यायन्यां च योषिति ।' इति च—(मे० पृ० १०८ श्लोकः ८) । क्षौमः, क्षौमम् = दुकूलम्, सूक्ष्मवासः, अट्टश्च । "अट्टा" "अट्टारी" इति लोके ।

'क्षौममट्टे दुकूलेऽस्त्री, क्षौमं वल्कलजांशुके । शणजेऽतसीजे ' इति—(मे० पृ० १०८ श्लोकः ९) । इह सर्वे वक्ष्यमाणा अबाधिता अदन्ता यान्ता यकारोपधत्वात्पुंस्यपि स्युः । कम्बलिवाह्यः, कम्बलिवाह्यम् = वृषवाह्यशकटम्, शकटिका, गंत्री । 'गंत्री कम्बलिवाह्यकम् ।' इति—(अम० ना० लिं० पृ० २८३ श्लोकः ५२)। मैरेयः, मैरेयम् = मद्यविशेषः, इक्षुशाकादिजन्यो मद्यविशेषश्च । 'मैरेयमासवो धात्रीधातकीगुडवारिभिः ।' इति—(वै० पृ० १४० श्लोकः ४९) । 'शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् । (रसिकस्तु सः) । मैरेयो (य) धातकीपुष्पगुडधान्या (ना) म्लसंयुतः (तम्) ।' इति च—(प० र० मा० पृ० ६९ पं० ६, ७) । तूर्य्यः, तूर्य्यम् = वाद्यम्, वाद्यप्रभेदश्च । 'तूर्य्योऽस्त्री वाद्यनिर्घोषे' इति—(वै० पृ० १४७ श्लोकः १३६) । पूयः, पूयम् = पक्वव्रणादिसम्भवघनीभूतशुक्लवर्णविकृतरक्तम्, क्षतजम्, मलजम् । "पीप" "पीव" "राध" इति च लोके । 'पूयं तु कृणपं दूष्यम्' इति—(वै० पृ० १८२ श्लोकः ११८) । अजन्यः, अजन्यम् = शुभाशुभसूचकमहाभूतविकारः, उत्पातः । 'उपलिङ्गं त्वरिष्टं स्यादजन्यं डिम्बविप्लवौ ।' इति—(वै० पृ० ९८ श्लोकः १९०) । 'अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ।' इति च—(अम० ना० लिं० पृ० २९९ श्लोकः १०९) । प्रमयः, प्रमयम् = वधः, मारणम् । "मारना" इति लोके । समयः, समयम् = 'समयस्तु क्रियाकारे सङ्केते चरिते सताम् । सिद्धान्ते शपथे काले' इति—(वै० पृ० २४५ श्लोकः ८२) । राजसूयः, राजसूयम् = राज्ञा कर्त्तव्यो यज्ञविशेषः, नृपाध्वरः, ऋतुराजः । 'राजसूयो नृपाध्वरः ॥ क्रतूत्तमश्च' इति—(त्रि० शे० पृ० २९४ श्लोकः ५, ६) । हिरण्यः, हिरण्यम् = स्वर्णम्, द्रव्यम्, रेतश्च । 'हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयोः । अक्षये मानभेदे च स्यादकुप्ये नपुंसकम् ।' इति—(मे० पृ० १२१ श्लोकः ११४) । अरण्यः, अरण्यम् = काननम्, वनम् । "जंगल" इति लोके । शब्दचन्द्रिकायां तु पुंसि कट्फलवृक्षवाचको दृश्यते । 'अटव्यरण्यं विपिनं गहनं काननं वनम् ।' इति—(अम० ना० लिं० पृ० १२७ श्लोकः १) । संख्यः, संख्यम् = युद्धम्, प्रहरणक्रिया । 'संख्यमाहवे । संख्यैकादौ विचारे च' इति—(अने० सं० पृ० ३२ श्लोकः ३८९) । मलयः, मलयम् = पर्वतविशेषः, उद्यानं च । 'उद्याने मलयं, ना तु गिर्य्यंशगिरिभेदयोः ।' इति—(वै० पृ० २६२ श्लोकः ६३) । 'चन्दनाद्रिस्तु मलयः' इति—(त्रि० शे० पृ० २८१ श्लोकः ३) । 'मदनो मलयो द्रुमे ।' इति च—(श० भे० प्र० पृ० ५ श्लोकः २६) । वलयः, वलयम् = हस्ताभरणविशेषः, कङ्कणम् । 'वलयः कण्ठरोगे ना, कङ्कणे पुन्नपुंसकम् ।' इति—(मे० पृ० ११९ श्लोकः ९६) । वाजपेयः, वाजपेयम् = यज्ञविशेषः, वाजमन्नं, पैष्टी सुरा, पेयमत्र । अन्नसुराप्रधानो यागविशेषः । एषोऽर्धर्चादिः । कषायः, कषायम् = अङ्गरागः, रसविशेषश्च । "कसैला" "काढा" इति वा लोके । 'कषायो रसभेदेऽपि निर्य्यासे च विलेपने । अङ्गरागे च न स्त्री स्यात्, सुरभौ लोहिते त्रिषु ।' इति—(मे० पृ० ११८ श्लोकः ७७) । शल्यः, शल्यम् = वंशादीनां शलाकाविशेषः, शङ्कुः । 'शल्यं तु न स्त्रियां शङ्कौ, क्लीबं क्ष्वेडेषु तोमरे । मदनद्रुश्वाविधोर्ना' इति—(मे० पृ० ११७ श्लोकः ५७) । कुल्यः, कुल्यम् =

अस्थि, जलपथम्, मान्यं च । 'कुल्यं स्यात्कीकसेऽप्यष्टद्रोणीशूर्पामिषेषु च । कुल्या पयःप्रणाल्यां च नद्यां जीवन्तिकौषधौ । कुलोद्भवे कुलहिते त्रिषु, मान्ये पुनः पुमान् ।' इति--(मे० पृ० ११४ श्लोकः १४) । 'कुल्या नदी, कुल्यमस्थि, कुल्या वारिप्रणालिका ।' इति च धरणिः' इति--(अम० सु० व्या० पृ० १०५ स्तं० २ पं० २१-२) । अव्ययः, अव्ययम् = असंख्यशब्दविशेषः । 'अव्ययोऽस्त्री शब्दभेदे, ना विष्णौ,-निर्व्यये त्रिषु ।' इति--(मे० पृ० ११८ श्लोकः ७१) । कवियः, कवियम् = अश्वमुखबन्धनम् । "लगाम" इति लोके । 'नार्य्यां कवी, खलीनं कवियं वा ना, तुरङ्गमुखभाण्डम् ।' इति बोपालितः' इति—(अम० सु० व्या० पृ० ४६१ स्तं० १ पं० ४) । पक्षे कवियः । 'कवियोऽस्त्री खलीनोऽस्त्री, पञ्चाङ्गी कविका कवी ।' इति --(वै० पृ० ११३ श्लोकः ११३) । गोमयः, गोमयम् = गोःपुरीषम्, गोःशकृत् । "गोबर" इति लोके । 'गोविट् गोमयमस्त्रियाम् ।' इति-- (अम० ना० लिं० पृ० ३५० श्लोकः ५०) । पारिहार्य्यः, पारिहार्य्यम् = आवापकः । "कङ्कण" "कड़ा" "पहुंची" इति वा लोके । 'आपावकः पारिहार्य्यं' इति--(अम० ना० लिं० पृ० २३९ श्लोकः १०७) । 'क्लीबेऽपि' । 'आवापकं पारिहार्य्यं वलयं कटकोऽस्त्रियाम् ।' इति च-- (वै० पृ० १७० श्लोकः १४४) । पारावारः, पारावारम् = समुद्रः, तटद्वयं च । 'पारावारः समुद्रे ना, तटद्वये नपुंसकम् ।' इति-- (मे० पृ० १४३ श्लोकः २८१) । नखरः, नखरम् = नखः, करण्टकः, कररुहः, पुनर्भवः । 'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २३१ श्लोकः ८३) । अमरमालायां तु वाचकलिङ्गत्वमाह-- 'नखरं त्रिषु' इति--(अम० सु० व्या० पृ० २३१ स्तं० २ पं० २४) । शिखरः, शिखरम् = द्रुमाग्रम्, अद्रिशृङ्गं च । 'शिरोऽग्रं शिखरं वा ना' इति--(अम० ना० लिं० पृ० १३१ श्लोकः १२) । 'कूटोऽस्त्री शिखरं शृङ्गम्' इति च--(अम० ना० लिं० पृ० १२५ श्लोकः ४) । 'अस्त्री' इति पूर्वोत्तराभ्यां सम्बध्यते । 'शिखरोऽस्त्री द्रुमाग्रे चाद्रिशृङ्गपुलकाग्रयोः । पक्वदाडिमबीजाभ' इति--(मे० पृ० १३९ श्लोकः २२६) । क्षेत्रः, क्षेत्रम् = केदारः । "खेत" इति लोके । शरीरं च । 'क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः ।' इति-- (मे० पृ० १२४ श्लोकः २०) । 'पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रम्' इति च—(अम० ना० लिं० पृ० ३११ श्लोकः ४) । रोपधत्वात्पुंस्यपि । एवं सर्वत्र बोध्यम् । वस्त्रः, वस्त्रम् = वसनम् । "कपड़ा" इति लोके । 'वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ॥' इति--(अम० ना० लिं० पृ० २४२ श्लोकः ११५) । उपवस्त्रः, उपवस्त्रम् = उपवसनम्, वस्त्रसादृश्यम् । अलिञ्जरः, अलिञ्जरम् = महाकुम्भः । "माट" इति लोके । 'अलिञ्जरः स्यान्मणिकः' इति-- (अम० ना० लिं० पृ० ३१२ श्लोकः ३१) । 'क्लीबेऽपि ।' 'मणिकः स्यादलिञ्जरम् ।' इति च--(वै० पृ० १६३ श्लोकः ५६) । 'अलञ्जरः' इत्यपि । कूबरः, कूबरम् = युगन्धरः, युगकाष्ठबन्धनस्थानम्, यत्र रथस्य युगकाष्ठमासज्यते सः, अथवा यत्र रथस्याश्वा बध्यन्ते सः । 'दांडी" इति ख्यातः ।

युगं बोढुर्बन्धनकाष्ठं धारयतीति युगन्धरः। "जुआ" इति लोके। कूबरस्त्रिषु चारौ, ना कुब्जके-ऽस्त्री युगन्धरे।' इति—(मे० पृ० १३३ श्लोकः १४१)। कूरः, कूरम् = अन्नम्, भक्तम्। "भात" इति लोके।'कूरं भक्तं प्रमादनम्।' इति–(वै० पृ० १६५ श्लोकः ७५)। बेरः, बेरम् = शरीरम्, वार्त्ताकुः, कुङ्कुमं च। 'बेरं कलेवरे क्लीबं वार्ताकौ कुङ्कुमेऽपि च'। इति-(मे० पृ० १२ श्लोकः ८५)। नीहारः, नीहारम् = अवश्यायः, हिमम्, तुषारः। "धुवारा" इति लोके। 'अवश्यायस्तु नीहारः' इति–(अम० ना० लिं० पृ० ३६ श्लोकः १८)। हिञ्जीरः, हिञ्जीरम् = हस्तिपाद बन्धः। 'हिञ्जीरश्च पादपाशः' इति—(अभि० सं० अभि० चिं० पृ० ४७ श्लोकः १२२९)। सहस्रः सहस्रम् = दशशतानि। "हजार" इति लोके।'शतं सहस्रयुतम्' इति-(वै० पृ० १८८ श्लोकः २८) मेढ्रः, मेढ्रम् = शिश्नः। 'मेढ्रं तु शेफसि क्लीबमीरितम्।' इति–(श० र० स० पृ० २५८ पं० २५) 'पुस्यपि'। शङ्कुर्मेढ्रः शेफकेशो' इति च—(वै० पृ० १७८ श्लोकः ६१)। संसारः, संसारम् = भवः दुःखलोकः। 'दुःखलोको भवश्चैव संसारः कष्टका(चा)रकः।' इति—(त्रि० शे० पृ० २७३ श्लोकः ११)। सीरः, सीरम् = हलम्। 'सीरोऽर्कहलयोः पुंसि' इति—(मे० पृ० १२९ श्लोकः ९८)। 'क्लीबेऽपि'। 'हलं गोदारणं सीरम्' इति च—(वै० पृ० १२५ श्लोकः २७)। तुवरः, तुवरम् = कषायरसः। "कसैला" "काढा" इति च लोके। 'तुवरस्तु कषायोऽस्त्री' अस्त्रीत्युभयान्वयि। इति—(अम० ना० लिं० पृ० ५८ श्लोकः ९)। 'अमी तुवराद्याः षडपि रसमात्रे वर्त्तमानाः पुंसि। तद्वत्सु रसवत्सु वर्त्तमानास्त्रिषु वाच्यलिङ्गा इत्यर्थः। तुवरकषायौ नपुंसकावपि अस्त्रीत्युक्तत्वात्' इति टीका। 'तुवरस्तु कषाये स्यात्काक्षयाढक्योस्तुवर्य्यपि।' इति—(मे० पृ० १३४ श्लोकः १६४)। दीर्घादिरपि। 'नरेऽश्मश्रुणिशृङ्गाभ्यां रहिते गवि तूवरः। काले प्राप्ते कषाये च रसे पुंव्यञ्जने च्युते।' इत्युत्पलिनी। 'नापि कषायस्तु(स्तू)वरः' इति बोपालितः। पुंसि कषायस्तूवरम्' इति क्लीबकाण्डे रत्नकोषः। 'कुवरस्तु कषायोऽस्त्री' इत्येके पठन्ति।' इति च—(अम० सु० व्या० पृ० ५९ स्तं० १, २ पं० ३६ तः)। सूत्रः, सूत्रम् = तन्तुः। "सूत" इति लोके। सूत्रणं च। 'सूत्राणि, नरि तन्तवः।' इति—(अम० ना० लिं० पृ० ३४७ श्लोकः २८)। 'सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः।' इति च—(अने० सं० पृ० ३९ श्लोकः ४८१)। हारावल्यां संहतोऽपि—'सूत्रमेव सूत्रतन्तुः' इति—(हा० व० पृ० ४०४ श्लोकः १६९)। 'पत्रपात्रपवित्रसूत्रच्छत्राः' पुंसि चेति पुंस्त्वमपि।' शृङ्गारः, शृङ्गारम् = सुरतम्, लवङ्गं च। 'शृङ्गारः सुरते नाट्यरसे च गजमण्डने। नपुंसकं लवङ्गेऽपि नागसम्भवचूर्णयोः।' इति—(मे० पृ० १३९ श्लोकः २३०)। पुण्ड्रः, पुण्ड्रम् = इक्षुभेदः। "पौंडा" इति लोके। पुण्डरीकम्, सिताम्भोजं च। 'पुण्ड्रोऽतिमुक्तके चित्रे क्रमौ दैत्येक्षुभेदयोः। पुंभूम्नि देशभेदे, स्यात्पुण्डरीके नपुंसकम्।' इति—(श० र० स० पृ० २५७ पं० ६)। अन्तरः, अन्तरम् = मध्यम्। 'अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्यात्मसदृशेषु।' इति—(मे० पृ० १३० श्लोकः १०६)। कर्णपूरः, कर्णपूरम् =

अवतंसः, शिरोभूषाभेदः, उत्तंसः, कल्हारम्, सौगन्धिकम्, श्वेतोत्पलं च। 'कर्णपूरोऽवतंसे ना, क्लीं सौगन्धिक उत्पले ।' इति—(वै० पृ० २७७ श्लोकः ६) । 'कर्णपूरः शिरीषे स्यान्नीलोत्पलावतंसयोः ।' इति च--(मे० पृ० १४१ श्लोकः २५४) । नेत्रः, नेत्रम् = नयनम्, परिधानविशेषः, वस्त्रभेदः, मन्थगुणः, द्रुममूलं च। 'नेत्रं नाड्यां तरोर्मूले वस्त्रे दृशि मथो गुणो ।' इति--(वै० पृ० २२५ श्लोकः १७)। 'नेत्रं वस्त्रविशेषः स्यात्' इति मञ्जरी। 'पुंस्यपि' । 'नेत्रं वस्त्रविशेषश्च नेत्रं चक्षुरुदाहृतम्। परिवर्त्तगुणो नेत्रो, नेत्रः कस्तूरिकामृगः ।' इति च--(अने० ध्व० मं० पृ० ५ श्लोकः ४०) । वक्त्रः, वक्त्रम् = मुखम्, वृत्तभेदः, पथ्यावक्त्रं च। 'वक्त्रं मुखे वृत्तभेदे' इति—(मे० पृ० १२८ श्लोकः ८३) । पवित्रः, पवित्रम् = कुशम्, जलम्, पावनम्, वर्षणम्, अग्नि, हरिः, तिलकवृक्षः, पुत्रजीवतरुश्च । 'पवित्रोऽग्नौ हरौ पूते, क्ली तु ताम्रेऽप्सु गोमये। मंत्रे दध्नि ब्रह्मसूत्रे हेम्न्यर्थे कलशे कुशे ।' इति—(वै० पृ० २६१ श्लोकः ५८) । पत्रः, पत्रम् = वाहनम्, पर्णं च । 'पत्रं तु वाहने पर्णे क्षुरिकागरुतोरपि ।' इति--(वै० पृ० २२५ श्लोकः २०) । समरः, समरम् = रणः, युद्धम् । 'संग्रामः समरोऽस्त्री' इति--(वै० पृ० १२१ श्लोकः २०६) । उशीरः, उशीरम् = वीरणीमूलम्, नलदम्। "खस" इति लोके। 'स्याद्वीरणं वीरतृणं मूलेऽस्योशीरमस्त्रियाम् ।' इति--(वै० पृ० ६४ श्लोकः २३१) । अन्धकारः, अन्धकारम् = आतनिश्चान्धकारोऽस्त्री तत्तु सन्तमसं यदि। परितः' इति—(वै० पृ० २२ श्लोकः ६२) । वरः, वरम् = जामाता, मनागिष्टं च। 'वरो ना रूपजामात्रोर्देवादेरीप्सिते वृतौ। त्रिष्वग्र्ये, क्ली मनागिष्टे' इति--(वै० पृ० २३६ श्लोकः ७२) । केदारः, केदारम् = क्षेत्रविशेषः । "खेत" "क्यार" इति च लोके। 'केदारेऽद्रौ शिवे क्षेत्रे भूमिभेदाऽऽलवालयोः ।' इति—(मे० पृ० १३३ श्लोकः १४३) । प्रवरः, प्रवरम् = सन्ततिः, गोत्रम् । 'प्रवरं सन्ततौ गोत्रे क्लीबं श्रेष्ठे तु वाच्यवत् ।' इति--(मे० पृ० १३५ श्लोकः १७६) । 'पुंस्यपि'। शालिविशेषः । 'प्रवरः शालियष्टिकः ।' इति । मुद्गविशेषश्च । 'कृष्णे प्रवरवासन्तौ' इति च--(वै० पृ० १२६ श्लोकः ३७) । कुलीरः, कुलीरम् = कर्कटः । "काँकडा" इति लोके । राशिविशेषः, कर्कटराशिश्च । 'कुलीरः स्यात्कर्कटके राशिभेदे च गद्यते ।' इति--(श० र० स० पृ० २६८ पं० १५) । 'कुलिरः' इत्यपि । शिशिरः, शिशिरम् = ऋतुविशेषः, आद्यर्त्तुः, माघफाल्गुनमासौ । 'शिशिरो ना हिमे, न स्त्री ऋतुभेदे, जडे त्रिषु ।' इति—(मे० पृ० १३९ श्लोकः २२७) । आडम्बरः, आडम्बरम् = तूर्य्यस्वनः आनकः, पटहः, युद्धपटहः । "दमदमा" "ढोल" इति च लोके। पक्ष्म, संरम्भः, कोपः, गजगर्जितं च । 'आडम्बरोऽस्त्री संरम्भे पटहे गजगर्जिते ।' इति—(वै० पृ० २७७ श्लोकः ४) । गह्वरः, गह्वरम् = गुहा, दम्भ, वनम्, विषमस्थानम्, लतादिपिहितस्थलं च । 'गह्वरं कन्दरे दम्भे' इति--(वै० पृ० २५१ श्लोकः १५) । 'पुंस्यपि'। 'गह्वरम् । 'गुहागहनदम्भेषु, निकुञ्जे तु पुमानयम् ।' इति च--(मे० पृ० ११३ श्लोकः १४८) ।

क्षीरः, क्षीरम् = पानीयम्, दुग्धं च। ''दूध'' इति लोके। 'क्षीरं पानीयदुग्धयोः।' इति—(अने० सं० पृ० ३४ श्लोकः ३१४)। 'क्षीरं देहजमम्बु च।' इति च—(वै० पृ० २२४ श्लोकः ४)। कोटरः, कोटरम् = वृक्षस्थितगह्वरम्, निष्कुहम्। 'निष्कुटः, कोटरो न स्त्री' इति—(वै० पृ० ४६ श्लोकः १४)। चक्रः, चक्रम् = पक्षिविशेषः, कोकः, चक्रवाकः। ''चकवा'' इति लोके। रथाङ्गम्, राष्ट्रम्, कुम्भकारोपकरणं च। ''चाक'' इति लोके। 'चक्रः कोके पुमान्, क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे कुम्भकारोपकरणास्त्रयोः। जलावर्तेऽपि' इति—(मे० पृ० १२५ श्लोकः ३१)। चुक्रः, चुक्रम् = अम्लः, अम्लवेतसः, वृक्षाम्लम् शाकाम्लम्, तिन्तिडीकं च। 'चुक्रं वृक्षाम्ले, चाङ्गेर्य्यां स्त्री पुंस्यम्लेऽम्लवेतसे।' इति—(मे० पृ० १२५ श्लोकः ३६)। तिमिरः, तिमिरम् = तमः, ध्वान्तम्, नेत्रामयान्तरं च। 'तिमिरं ध्वान्ते नेत्रामयान्तरे।' इति—(मे० पृ० १३४ श्लोकः १६२)। अङ्गारः, अङ्गारम् = उल्मुकम्, वह्निदग्धशकलम्, अर्धदग्धकाष्ठम्। 'अङ्गारमुल्मुके न स्त्री, पुंलिङ्गस्तु महीसुते।' इति—(मे० पृ० १३० श्लोकः १०८)। तुषारः, तुषारम् = हिमम्। ''वर्फ'' इति लोके। देशविशेषः, शीकरः, जलकणः, हिमभेदः, कर्पूरभेदश्च। 'तुषारो हिमदेशयोः। शीकरे हिमभेदे च' इति—(अने० सं० पृ० ९५ श्लोकः ५९६)। शरः, शरम् = बाणः, जलं च। 'शरस्तु तेजने बाणे दध्यग्रे ना, शरं जले।' इति— (मे० पृ० १२९ श्लोकः ८६)। भ्राष्ट्रः, भ्राष्ट्रम् = अम्बरीषम्, भर्जनपात्रम्। ''भडसां'' ''भाड़'' ''कड़ाह'' इति च लोके। 'क्लीबेऽम्बरीषं, भ्राष्ट्रो ना।' इति—(अम० ना० लिं० पृ० ३१२ श्लोकः ३०)। तक्रः, तक्रम् = चतुर्थांशजलसंयुतं दधि, मथितम्, दण्डाहतम्, गोरसजम्, कालसेयम्। ''मठा'' ''छाछ'' इति च लोके। 'अथ घोलः पादाम्बुसंयुते। तक्रं कट्वरमर्शोघ्नम्।' इति—(वै० पृ० १३५ श्लोकः १४९)। जठरः, जठरम् = उदरम्, कुक्षिः। 'जठरो न स्त्रियां कुक्षौ, बद्धकक्ख (वृद्धकर्क) टयोस्त्रिषु।' इति— (मे० पृ० १३४ श्लोकः १५६)। आर्द्रः, आर्द्रम् = शृङ्गवेरम्। ''अदरख'' इति लोके। 'कटुभङ्गं शृङ्गवेरमार्द्रमार्द्रकमस्त्रियौ।' इति— (वै० पृ० ६२ श्लोकः २१४)। कुञ्जरः, कुञ्जरम् = हस्ती, केशश्च। 'कुञ्जरोऽनेकपे केशे।' इति— (मे० पृ० १३२ श्लोकः १३८)। पञ्जरः, पञ्जरम् = शरीरम्, देहास्थिसमूहः, कङ्कालम्, कलियुगम्। 'गवां नीराजनाविधिः' इति सारस्वताभिधानम्' इति राधाकान्तदेवः।' इति—(श० चिं० पृ० १९ स्तं० २ पं० १८ तः २१ या०)। कायास्थिवृन्दम्, शरीरास्थिपञ्जरम्, शालारम्, पक्ष्यादिबन्धनागारम्। ''पिंजरा'' इति लोके। कुलायः, नीडम्, पक्षिनिलयश्च। ''घोंसला'' ''कोल'' इति च लोके। 'कुलायस्तु पञ्जरं नीडमस्त्रियाम्।' इति— (वै० पृ० ३० श्लोकः ४९)। 'यावन्मध्यं बहुधा पाञ्जरान्नावगाहते' इति दमयन्ती श्लेषादकारवान्।' इति (अम० सु० व्या० टि० पृ० ४५९ स्तं० २ पं० ४२)। क्वचित् 'पिञ्जर' मित्यपि पाठो दृश्यते। पिञ्जरः, पिञ्जरम् =

अश्वान्तरम्, पीतं च । 'पिञ्जरोऽश्वान्तरे, पीते क्लीबं, स्वर्णे च वाच्यवत् ।' इति—(मे० पृ० १३६ श्लोकः १८५)। कर्पूरः, कर्पूरम्=चन्द्रभस्म, वेधकः। "कपूर" इति लोके। 'वे(रे)णुसारस्तु (रेणुकावर्ण) कर्पूरश्चन्द्रभस्म हिमाह्वयम्। वेधकः' इति—(त्रि० शे० पृ० २९३ श्लोकः ३९, ४०)। 'अथ कर्पूरमस्त्रियाम्। घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका॥' इति च—(अम० ना० लिं० पृ० २४७ श्लोकः १३०)। नूपुरः, नुपूरम्=मञ्जीरः। "पैजनियां" इति लोके। मतान्तरे तु पादकटकः। "कड़ा" इति लोके। 'मञ्जीरो नूपूरोऽस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २४० श्लोकः १०९)। 'मञ्जीरोऽस्त्री सनूपुरः ।' इति रसभः' इति—(अम० सु० व्या० पृ० २४१ स्तं० १ पं० ६)। 'मञ्जीरो नूपुरोऽस्त्रियौ।' इति—(वै० पृ० १७० श्लोकः १४५)। 'नूपुरः पादकटके त्वस्त्रियां परिकीर्तितः।' इति च—(श० र० स० पृ० २७४ पं० ७)। कुटीरः, कुटीरम्=कर्कटः, कुलीरः, गृहम्, ह्रस्वा कुटी, क्षुद्रगृहं च। "झोंपड़ी" "झूंपड़ी" "कुटिया" इति च लोके। 'कुटीरौ कर्कटालयौ ।' इति—(ना० र० मा० पृ० ९९ पं० २)। 'क्लीबेऽपि।' 'कुटीरं क्षुद्रगेहे स्यात्' इति—(ना० मं० पृ० ७२ पं० २०)। 'कुटिरमित्यपि।' 'कुटीरं कुटिरं तथा॥' इति च—(द्वि० को० पृ० ४१२ श्लोकः ३१)। 'विहारः, विहारम्=भिक्षुस्थानम्, सौगतावासः, क्रीडा, लीला, क्रीडार्थं पद्भ्यां सञ्चरणं च। विहारः सौगतावासे क्रीडायाम्' इति—(वै० पृ० २४४ श्लोकः १६८)। 'विहारस्तु परिक्रमः॥' इति च—(अम० ना० लिं० पृ० ३६१ श्लोकः १६)। वारः, वारम्=परिपाटीः, आवृत्तिः सूर्यादिवासरः, मदिरापात्रं च। 'वारः सूर्यादिदिवसे, वारोऽवसरवृन्दयोः। कुब्जवृक्षे हरे द्वारे, वारं मद्यस्य भाजने ।' इति—(वि० प्र० पृ० १२६ श्लोकः १७)। 'वारः सूर्यादिवासरे। महेश्वरावसरयोर्वृन्दे कुब्जाख्यपादपे। वारं तु मदिरापात्रे' इति च—(अने० सं० पृ० ३७ श्लोकः ४६६-७)। कान्तारः, कान्तारम्=महारण्यम्, वनम्, बिलम्, दुर्गमवर्त्म च। 'कान्तारोऽस्त्री महारण्ये बिले दुर्गमवर्त्मनि। पुंसि स्यादिक्षुभेदे' इति—(मे० पृ० १३२ श्लोकः १३४)। तोमरः, तोमरन्=आयुधविशेषः, शर्वला। "गँडासा" "शावली" इति वा लोके। हस्तक्षेप्यमशल्यदण्डः। "रायबांस" इति लोके। स्थूलाग्रगदा च। 'शर्वला तोमरोऽस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २९५ श्लोकः ९३)। 'सर्वला' इत्यपि। 'तोमरस्त्वायुधभिदि' इति च—(श० र० स० पृ० २७२ श्लोकः १०)। दुरोदरः, दुरोदरम्=द्यूतकारः, पणः, द्यूतं च। 'दुरोदरो द्यूतकारे पणे, द्यूते दुरोदरम् ।' इति—(अम० ना० लिं० पृ० ४२६ श्लोकः १७१)। 'दुरोदरं द्यूतकारे, द्यूताक्षपणयोः पुमान् । इति। 'दुरोदरं द्यूतभेदे, द्यूतकृत्पणयोः पुमान् ।' इति पाठान्तरम्' इति च—(मे० पृ० १४२ श्लोकः २६७)।' 'आश्रित्य दुर्गं गिरिकन्दरोदरं क्रीडन्त्यमुष्मिन् सततं दरोदरम् ।' इति यमकान्निरुकारोऽपि' इति गोवर्धनः—इति मुकुटपीयूषे' इति—(अम० सु० व्या० टि० पृ० ४२६ स्तं० २ पं० ३८-९)। वासरः, वासरम्=

दिवसः, दिनम् । 'वा तु क्लीबे दिवसवासरौ ।' इति--(अम० ना० लिं० पृ० ४८ श्लोकः २) । पक्षे वासरम् । 'वासरस्तु पुमान् रागविशेषे, दिवसेऽस्त्रियाम् ।' इति--(मे० पृ० १३८ श्लोकः २१३) । कासारः, कासारम्=सरोवरः । ''तालाब'' इति लोके । पक्वान्न-विशेषश्च । तत्र नपुंसकलिङ्गः । ''कसार'' इति लोके । 'कासारः सरसी सरः ।' इति--(अम० ना० लिं० पृ० १०३ श्लोकः २८) । 'कासारः स्यात्सरोवरे ।' इति—(श० र० स० पृ० २६७ पं० १५) । केसरः, केसरम्=किञ्जल्कः । ''फूल की धूली'' इति लोके । 'किञ्जल्कः केसरोऽस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० १०८ श्लोकः ४३) । 'केसरं हिङ्गुनि क्लीबं, किञ्जल्के न स्त्रियां, पुमान् । सिंहच्छटायां पुन्नागे बकुले नागकेसरे ।' इति च—(मे० पृ० १३३ श्लोकः १४२) । रभसस्तु हिङ्गुनि द्वयोरित्याह । करीरः, करीरम्=वंशाङ्कुरः । 'वंशाङ्कुरे करीरोऽस्त्री' इति--(मे० पृ० १३१ श्लोकः १२५) । 'वंशाङ्कुरे करीरोऽस्त्री, तरुभेदे घटे च ना ।।' इति च—(अम० ना० लिं० पृ० ४२७ श्लोकः १७३) । शरीरः, शरीरम्='शरीरं करणं सिनम् ।' इति—(वै० पृ० १७७ श्लोकः ५२) । 'शरीरं वर्ष्मणि स्मृतम् ।' इति च--(श० र० स० पृ० २८१ पं० १०) । जीरः, जीरम्=जीरकः, अजाजी, खड्गश्च । 'जीरस्तु जरणे खड्गे' इति---(मे० पृ० १२५ श्लोकः ३९) । 'मञ्जीरः, मञ्जीरम्=नूपुरः । ''पायजेब'' इति लोके । 'मञ्जीरोऽस्त्री सनूपुरः । ' इति रभसः' इति--(अम० सु० व्या० पृ० २४१ स्तं० १ पं० ६) । 'मञ्जीरो नूपुरोऽस्त्रियौ ।' इति च—(वै० पृ० १७० श्लोकः १४५) । शेखरः, शेखरम्=शिरोभूषणम्, शिखास्थमाल्यं च । 'अथापीडेऽवतंसोत्तंसशेखराः । केशेषु गर्भकं माल्यम्' इति—(वै० पृ० १७१ श्लोकः १५४-५) । 'क्लीबेऽपि । 'लवङ्गकलिका दिव्यं लवङ्गं शेखरं लवम् ।' इति च—(रा० नि० पृ० १०४ श्लोकः ८४) । युगन्धरः, युगन्धरम्=कूबरः । ''जुआँ'' इति लोके । युगकाष्ठबन्धनस्थानम् । 'कूबरस्तु युगन्धरः ।' इति--(अम० ना० लिं० पृ० २८४ श्लो०: ५७) । [१]वज्रः, वज्रम्=कुलिशम्, इन्द्रास्त्रम् । 'ह्लादिनी वज्रमस्त्री स्यात्' इति—(अम० ना० लिं० पृ० २० श्लोकः ४७) । 'अस्त्रियौ वज्रकुलिशौ' इति संसारावर्तः' इति--(अम० सु० व्या० पृ० २० स्तं० १ पं० २८, २९) । 'वज्रं स्याद् बाल(ध)के धात्र्यां क्लीबं, योगान्तरे पुमान् । वज्रा स्नुह्यां गुडूच्यां च, वज्री स्नुह्यन्तरे स्मृता । दम्भोलौ हीरकेऽप्यस्त्री' इति च-- (मे० पृ० १२८ श्लोकः ८१-२) । वप्रः, वप्रम्=क्षेत्रम् । ''खेत'' इति लोके । रेणुः, चयः, तटं च । 'वप्रस्ताते पुमा,-नस्त्री रेणौ क्षेत्रे चये तटे । इति—(मे० पृ०

(१) अस्योदाहरणं वामनीयटीकायाम्--''स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रून् स्वरतोऽपराधात् ।।'' तथा--(''जान्वञ्चिताततिहिममलीमसशाटकानां मित्रादपि प्रथमयाचितभाटकानाम् । पुत्रादपि प्रियतमैकवराटकानां । वज्रं दिवः पततु मूर्ध्नि किराटकानाम् ।। इति । पृ० १२ पं० ६ तः ।

१२८ श्लोकः ८२) । आलवालः, आलवालम् = वृक्षमूलकृतजलाधारः, वृक्षादिमूले समन्ततोऽम्भसो धारणार्थं यद्वेष्टनं तत् । 'आधारस्त्वम्भसां यत्र धारणम् । स्यादालवालमावालमावापः' इति— (अम० ना० लिं० पृ० १०४ श्लोकः २९) । पलः, पलम् = मांसम्, उन्मानं च । 'पलमुन्मान-मांसयोः ।' इति-–(मे० पृ० १४७ श्लोकः २६) । रुद्रहेमौ च । भालः, भालम् = ललाटम् । "माथा" इति लोके । 'भालं तेजोललटायोः ।' इति-–(मे० पृ० १४८ श्लोकः ४२) । पलालः, पलालम् = सकाण्डोऽगृहीतफलत्वान्निष्फलः, निष्फलं तृणादिकाण्डम्, सस्यशुष्कधान्यनालः । "पुआल" "पयार" इति च लोके । 'नाडी नालं च काण्डोऽस्य पलालोऽस्त्री स निष्फलः ।' इति-–(अम० ना० लिं० पृ० ३०९ श्लोकः २२) । 'पलालोऽस्त्री, कर्णिका स्त्री' इति च-–(वै० पृ० १२८ श्लोकः ६४) । पल्वलः, पल्वलम् = क्षुद्रसरः, अल्पसरः, वेशन्तः । 'वेशन्तः पल्वलं चाल्पसरः' इति-– (अम० ना० लिं० पृ० १०३ श्लोकः २८) । 'वेशन्तः पल्वलोऽस्त्री' इति च वाचस्पतिः' इति—(अम० सु० व्या० पृ० १०४ स्तं० १ पं० ३, ४) । खलः, खलम् = सूर्य्यः, तमालवृक्षः, धत्तूरवृक्षश्चैषु पुंलिङ्गः । खलाधानम्, सस्यमर्दनस्थानम्, कल्कम्, भूश्चैषु क्लीबलिङ्गः स्यात् । 'अथ खलं सस्य-स्थाने, शठे त्रिषु ।' इति-–(त्रि० शे० पृ० ३७१ श्लोकः ३९०) । 'खलधानं पुनः खलः ।' इति । 'छिन्नं दधि बुसं रूक्षं खलं सेव्यं च निःसरे ।' इति । 'खलं भूस्थानकल्केषु, खलो नीचः, खलेत्वरी ।' इति च-–(वै० पृ० २३२ श्लोकः २५) । चषालः, चषालम् = यज्ञपात्रम्, यज्ञीयपशुबन्धनार्थं यूपमध्ये देयो वलयाकारः काष्ठमयो लोहमयो वा पदार्थश्च । 'यूपमध्यं समादानं, यूपाग्रं तर्म न स्त्रियाम् । कटकेऽस्य चषालोऽस्त्री, मूले तूपरमक्षते ।' इति-–(वै० पृ० ९१ श्लोकः १०४-५) । विशालः, विशालम् = आविकः, उरभ्रः, मृगप्रभेदः, पक्षिविशेषः, नृपान्तरम्, वृक्षविशेषश्च । 'विशालस्त्वाविकोरभ्रौ' इति-–(वै० पृ० १६६ श्लोकः १२६) । 'विशाला त्विन्द्रवारुण्यामुज्ज-यिन्यां तु योषिति । नृपवृक्ष(मृगपक्षि)भिदोः पुंसि, विशाले त्वभिधेयवत् ।' इति च—(मे० पृ० १५४ श्लोकः १३३) । शूलः, शूलम् = रोगविशेषः, प्रहरणविशेषः, आयुधं च । 'शूलोऽस्त्री रोग आयुधे । मृत्युकेतनयोगेषु, शूला स्यात्पण्ययोषिति ।' इति—(मे० पृ० १४८ श्लोकः ५३) । मूलः, मूलम् = नक्षत्रविशेषः, एकोनविंशतिनक्षत्रम्, पार्श्वम्, अन्तिकम्, प्रतिष्ठा च । 'मूलं शिफाद्ययोः । मूलवित्तेऽन्तिके, वा ना भे' इति । 'मूलं शिफाद्ययोः । भे निकुञ्जेऽन्तिके वा ना' इति पाठान्तरम्' इति—(मे० पृ० १४८ श्लोकः ४५) । 'हस्तास्वातिश्रवणा अक्लीबे, मृगशिरो नपुंसि स्यात् । पुंसि पुनर्वसुतिष्यौ, मूलं त्वस्त्री, स्त्रियां शेषाः ।' इति च कोशान्तरम्' इति-–(श० चिं० पृ० १३२६ स्तं० १ पं० ११-२ ३-४) । मुकुलः, मुकुलम् = कुड्मलः, ईषद्विकाशोन्मुखकलिका, आत्मा, शरीरं च । 'कुड्मलो मुकुलोऽस्त्रियाम् ॥' इति-–(अम० ना० लि० पृ० १३४ श्लोकः १६) । तलः, तलम् = अधोभागः, अनूर्ध्वम्, मूलम्, महीतलम्, स्वरूपं च । 'अधः स्वरूपयोरस्त्री तलम्' इति-–(अम०

ना० लिं० पृ० ४३२ श्लोकः २०२)। 'स्वरूपेऽश्वस्तलोऽस्त्रियाम्। क्ली तुल्यदेशे।' इति च--(वै० पृ० २३२ श्लोकः ३५)। तैलः, तैलम् = तिलादीनां विकारः, स्नेहः, म्रक्षणम्। 'कल्कं स्नेहे तिलानां तैलं स्यादन्येषां नामपूर्वकम्।' इति--(वै० पृ० १३४ श्लोकः १३७)। 'तैलं कल्के तिलस्नेहे' इति च--(शि० को० पृ० ४० श्लोकः ४४२)। तूलः, तूलम् = पिचुः, उन्मानं च। 'तूलं स्याद् ब्रह्मदारुणि। आकाशे च पिचौ न स्त्री' इति—(मे० पृ० १४६ श्लोकः २५-६)। 'पुंलिङ्गस्तु पिचौ तूलः, क्लीबं स्याद् ब्रह्मदारुणि।' इति च रुद्रः' इति--(अम० सु० व्या० पृ० १४३ स्तं० १ पं० ५)। 'पिचुतूलः' इति--रभसात्संघातोऽपि' इति--(अम० सु० व्या० पृ० ३३७ स्तं० २ पं० २१)। कुड्मलः, कुड्मलम् = ईषद्विकाशोन्मुखकलिका। 'अथ कुड्मलो मुकुलोऽस्त्रियौ।' इति--(वै० पृ० ४६ श्लोकः १९)। तमालः, तमालम् = वृक्षविशेषः, कालस्कन्धवृक्षः। 'कालस्कन्धे तमालोऽस्त्री' इति--(वै० पृ० ५२ श्लोकः ८७)। 'तमालस्तिलके कालस्कन्धे च वरुणद्रुमे।' इति च--(शि० को० पृ० ४२ श्लोकः ४५९)। कपालः, कपालम् = कर्परः, मूर्धोर्ध्वास्थि। "खोपरी" "खोपड़ी" इति लोके। घटादीनामवयवविशेषश्च। 'स्यात्कर्परः कपालोऽस्त्री' इति--(अम० ना० लिं० पृ० २२५ श्लोकः ६८)। 'कपालोऽस्त्री-शिरोऽस्थिन स्याद् घटादेः शकले व्रजे।' इति च--(मे० पृ० १५० श्लोकः ७२)। कवलः, कवलम् = ग्रासः। "कौर" इति लोके। 'कबल कबतो ग्रासः' इति—(वै० पृ० १६७ श्लोकः १०१)। अमरस्तु वकारमध्यः पुंस्त्वमपीत्याह--'ग्रासस्तु कवलः पुमान्॥' इति च--(अम० ना० लिं० पृ० ३२१ श्लोकः ५४)। लोपधत्वान् क्लीबलिङ्गोऽपि। 'प्रवालः, प्रवालम् = विद्रुमः। "मूंगा" इति लोके। नवकिसलयविशेषश्च। 'अथ विद्रुमः पुंसि, प्रवालं पुन्नपुंसकम्' इति। 'प्रवालमङ्कुरेऽप्यस्त्री' इति च—(अम० ना० लिं० पृ० ४३२ श्लोकः २०४)। 'प्रवालोऽस्त्री किसलये वीणादण्डे च विद्रुमे।' इति—(मे० पृ० १५२ श्लोकः १०७)। 'प्रवालोऽस्त्री किसले विद्रुमद्रुमे।' इति च--(शि० को० पृ० ४२ श्लोकः ४६३)। प्रवालशब्द ओष्ठमध्योऽपि स्यादिति केचिदिच्छन्ति। बलः, बलम् = बलदेवः, दैत्यप्रभेदः, वायस, गन्धरस, रूपम्, रेतः, स्थाम, सैन्यं च। 'बलं रूपेऽस्थनि स्थौल्ये शक्तिरेतश्चमूषु च। बलो रामे बलाढ्ये च' इति--(वै० पृ० २३४ श्लोकः ५४-५)। 'बलं गन्धरसे रूपे स्थामनि स्थौल्यसैन्ययोः। पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च। बलयुक्तेऽन्यलिङ्गः स्याद् बला वाटचालके स्त्रियाम्।' इति च--(मे० पृ० १४७ श्लोकः ३७-८)। शम्बलः, शम्बलम् = पाथेयम्, कूलम्, मत्सरश्च। 'शम्बलोऽस्त्री सम्बलवत्कूलपाथेयमत्सरे।' इति—(मे० पृ० १५४ श्लोकः १३५)। उत्पलः, उत्पलम् = नीलकमलम्, कुष्ठौषधिः, जलसम्भवविशेषः, जलजपुष्पमात्रं च। 'उत्पला तुष-पर्पटयां, क्लीबं कुष्ठप्रसूनयोः' इति--(मे० पृ० १४९ श्लोकः ६२)। 'रोगाख्यं पाक-लोत्पले।' इति। 'उद्दण्डपालनदलद्रेकराजीवकोत्पलाः।' इति च---(वै० पृ० १३१

श्लोकः ९९)। 'उत्पलं पुष्करे कुष्ठे' इति--(शि० को० पृ० ४१ श्लोकः ४४६)। 'चन्द्राब्जे चोत्पलं कुष्ठे' इति च—(रा० नि० पृ० ४२३ श्लोकः ८)। उपलः, उपलम्=शिला, अश्मा, प्रस्तरः। 'शर्करायां दृषत्पुत्रे स्त्र्य,-स्त्र्यश्मन्यु-पलो मणौ।' इति--(वै० पृ० २५८ श्लोकः १७)। शीलः, शीलम्=चरितम्, सद्वृत्तम्, स्वभावश्च। 'शीलं वृत्त-स्वभावयोः।' इति--(वै० पृ० २२६ श्लोकः ३३)। शैलः, शैलम्=पर्वतः, शैलेयम्, तार्क्ष्य-शैलम्, रसाञ्जनम्, शिलाजतु च। 'शैलो भूभृति, शैलं तु शैलेये तार्क्ष्यशैलके।' इति—(मे० पृ० १४९ श्लोकः ५६)। शकलः, शकलम्=खण्डम्। 'भित्तं शकलखण्डे वा पुंस्य,-र्द्धोऽर्द्धं समेंऽशके।' इति--(अम० ना० लिं० पृ० ३५ श्लोकः १६)। 'शकले खण्डवल्कले।' इति-(वै० पृ० २५२ श्लोकः ३४)। अङ्गुलः, अङ्गुलम्=अष्टसंख्ययवोदरमानम्। 'अङ्गुलोऽस्त्री यवा अष्टौ' इति--(वै० पृ० ३९ श्लोकः ५२)। अञ्चलः, अञ्चलम्=वस्त्रान्तः। "आंचर" "आंचल" इति वा लोके। एकशफांघ्रिको बन्धश्च। 'एकशफांघ्रिकं बन्धमाहुर्दामाञ्चलं बुधाः।' इति--(हा० व० पृ०३९९ श्लोकः ६१)। 'वस्त्रान्तस्त्वञ्चलः' इति च-(वै० पृ० १६९ श्लोकः १३१)। कमलः, कमलम्=पद्मम्, सलिलम्, मृगप्रभेदः, कुरङ्गश्च। 'कमलं सलिले ताम्रे जलजे क्लो(व्यो)म्नि भेषजे (भूषणे)। मृगभेदे तु कमलः, कमला श्रीवरस्त्रियोः।' इति—(मे० पृ० १४९ श्लोकः ६५)। 'स्यात्कुरङ्गेऽपि कमलः' इति--(अम० ना० लिं० पृ० ४३१ श्लोकः १९४)। मलः, मलम्=किल्बिषम्, पापम्, विट्, कलङ्कश्च। 'पापे पुरीषे किट्टे च मलमस्त्री' इति--(ना० र० मा० पृ० ५४ पं० १२)। मुशलः, मुसलः, मुशलम्, मुसलम्=आयुधविशेषः, क्षोदनविशेषः, अयोग्रम्, कण्डनीयदण्डश्च। "मूसर" "मूसल" इति वा लोके। 'अयोनिर्मुसलोऽस्त्री स्यात्' इति--(वै० पृ० १६४ श्लोकः ६५)। सालः, सालम्=वृक्षमात्रम्, प्राकारः, सर्जवृक्षः "सखू" इति लोके। धूनकश्च। 'सालः पादपमात्रे स्यात्प्राकारे सर्जपादपे।' इति—(मे० पृ० १४९ श्लोकः ५५)। धूनकार्थे तु क्लीबलिङ्गो बोध्यः। 'पुंसि भूरुहमात्रेऽपि सालो वरणसर्ज-योः।' इति रसभः' इति—(अम० सु० व्या० पृ० १४३ स्तं० २ पं० ३३-४)। 'तालव्योऽपि, 'तालव्यो नृपझषयोः शालो, वृक्षे वृतौ द्रुभेदे च। तालव्यदन्त्य उक्तस्तथा स्त्रियां वृक्षशाखायाम्।' इत्यूष्मविवेकः।' इति—(अम० सु० व्या० पृ० ११७ स्तं० २ पं० ७, ८)। 'शालोऽक्षिपीलुके॥ सर्जे चारेऽपि।' इति च--(शि० को० पृ० ४०, ४१ श्लोकः ४४६-७)। कुण्डलः, कुण्डलम्=कर्णाभरणाविशेषः। 'कुण्डलो दीर्घनिर्वंशे' इति। 'कुण्डलं कर्णवेष्टनम्।' इति च--(वै० पृ० ११७ श्लोकः १६३)। 'कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि च। काञ्चनद्रुगुडूच्योः स्त्री' इति च--(मे० पृ० १५१ श्लोकः ८२-३)। कललः, कललम्=कलनम्, शुक्रशोणितसंघातः, शुक्र-शोणितादेरीषद्घनपरिणामः, गर्भवेष्टनचर्म, जरायुश्च। 'उल्वं कललोऽस्त्रियाम्।' इति-(अम० ना० लिं० पृ० २१४ श्लोकः ३८)। 'जरायु कललं चोल्बम्' इति च-- (ना० र० मा० पृ० ४४

पं० ५)। नलः, नलम् = नडः, पोटगलः, पद्मं च। 'नलः पोटगले राज्ञि पितृदेवे कपीश्वरे। कमलेऽपि च, नट्यां च, क्रमेण क्लीबयोषितोः।' इति-(मे० पृ० १४७ श्लोकः २७)। निगलः, निगलम् = शृंखलः, हस्तिनिगडः। "बेडी" इति ख्यातः। 'अन्दुको निगलो न स्त्री, भिदुरं, शृंखला त्रयी।' इति--(वै० पृ० ११० श्लोकः ८३)। 'डलयोरेकत्वम्।' 'निगडः' इत्यपि। 'अथ शृंखला। अन्दुको निगडोऽस्त्री स्यात्' इति च--(अम० ना० लिं० पृ० २७८ श्लोकः ४१)। नीलः, नीलम् = निधिः, पर्वतः, वानरविशेषः, नीलरक्तं च। 'नीलं तु नीलरक्ते, ना निध्यद्रिवानरान्तरे।' इति--(मे० पृ० १४७ श्लोकः २९)। मङ्गलः, मङ्गलम् = भौमग्रहः, कल्याणं च। 'मङ्गला सितदूर्वायामुमायां, पुंसि भूमिजे। नपुंसकं तु कल्याणे, पुंसि सर्वार्थरक्षणे।' इति—(मे० पृ० १५३ श्लोकः १२०)। काकोलः, काकोलम् = विषविशेषः। 'पुंसि क्लीबे च काकोलकालकूटहलाहलाः।' इति--(अम० ना० लिं० पृ० ९० श्लोकः १०)। 'काकोलं नरकान्तरे। ना कुलाले द्रोणकाके, विषभेदे तु न स्त्रियाम्।' इति च--(मे० पृ० १५० श्लोकः ७४)। हलाहलः, हलाहलम् = विषविशेषः। 'पुंसि क्लीबे च काकोलकालकूटहलाहलः।' इति--(अम० ना० लिं० पृ० ९० श्लोकः १०)। हलः, हलम् = लाङ्गलम्, गोदारणम्, सीरम्। 'हल गोदारणं सीरम्' इति-(वै० पृ० १२५ श्लोकः २७)। कोलाहलः, कोलाहलम् = कलकलः, बहुभिः कृतोऽस्पष्टशब्दः। 'कोलाहलः, कलकलः' इति—(अम० ना० लिं० पृ० ७१ श्लोकः २५)। 'कोलाहल कलकलस्तथा सर्जरसेऽपि च।' इति च—(श० र० स० पृ० ३११ पं० १४)। कङ्कालः, कङ्कालम् = करङ्कः, अस्थिपञ्जरम्। 'कङ्कालोऽस्त्री तनोरस्थि करङ्कोऽप्यस्थिपञ्जरम्।' इति--(वै० पृ० १८२ श्लोकः ११४)। वल्कलः, कलकलम् = वृक्षादीनां त्वक्। "छाल" इति लोके। 'वल्कं वल्कलमस्त्रियाम्।' इति--(अम० ना० लिं० पृ० १३१ श्लोकः १२)। सौवर्चलः, सौवर्चलम् = सर्जिकाक्षारः, लवणान्तरं च। 'अथ सौवर्चलं सर्जक्षारे च लवणान्तरे।' इति--(मे० पृ० १५७ श्लोकः १६६)। धूमलः, धूमलम् = देवतार्चनवाद्यम्। 'देवतार्चनतूर्ये तु धूमलोऽस्त्री' इति--(वै० पृ० १४७ श्लोकः १३८)। फलः, फलम् = हेतुसमुत्थम्, प्रयोजनम्, कुसुमादिसम्भवसस्यम्, वृक्षादीनां फलम्, जातीफलं च। 'प्रसवः पिप्पलं सस्यं फलम्' इति--(वै० पृ० ४६ श्लोकः २०)। 'फलं हेतुसमुत्थे स्यात्फलके व्युष्टिलाभयोः। जातीफलेऽपि कक्कोले सस्यबाणाग्रयोरपि।' इति च--(वि० प्र० पृ० १४९ श्लोकः २)। हालाहलः, हालाहलम् = विषप्रभेदः। 'हलाहल ब्रह्मसृर्पे ज्येष्ठिकायां विषेऽस्त्रियाम्। हालाहलो विषे कीटे' इति—(श० र० स० पृ० ३१४ पं० ९)। जम्बालः, जम्बालम् = पङ्कः, कर्दमः। "कीचड़" इति लोके। 'निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ।' इति--(अम० ना० लिं० पृ० ९६ श्लोकः ९)। 'जम्बालः शैवले पङ्के' इति च-(मे० पृ० १५१ श्लोकः ९१)। खण्डलः, खण्डलम् = छिद्रवस्त्रैश्चीरम्। 'छिद्रवस्त्रैश्चीरं खण्डलमस्त्रियाम्।' इति-(वै०पृ० १६९ श्लोकः १३०)। लाङ्गलः, लाङ्गलम् = कुसुमविशेषः, भूमिकर्षणयंत्रविशेषः, गोदारणम्, लिङ्गं च। 'लाङ्गली तोयपिप्पल्यां,

क्लीबं तु कुसुमान्तरे । गोदारणे तृणराजगृहदारुविशेषयोः ।' इति--(मे० पृ० १५४ श्लोकः १२८)। 'लिङ्गं तु लाङ्गलं शेफः' इति च-(त्रि० शे० पृ० २६१ श्लोकः २३)। गरलः, गरलम् = विषम्, वृक्षविशेषः, कैडर्य्यश्च। 'गरलं तु विषं क्ष्वेलः' इति। 'राढः कैडर्य्यो विषपुष्पकः। काकर्दश्छर्दनश्चीनो गरलः कण्टकीति च ।' इति च--(वै० पृ० ४९ श्लोकः ५०)। इन्द्रनीलः, इन्द्रनीलम् = अश्मसारः, मरकतमणिः। "पन्ना" इति लोके। 'अश्मसारस्त्विन्द्रनीलः' इति--(त्रि० शे० पृ० ३०४ श्लोकः २९)। 'क्लीबेऽपि।' 'इन्द्रनीलं महानीलम्' इति च—(वै० पृ० ४४ श्लोकः ४०)। गाण्डीवः, गाण्डिवः, गाण्डीवम्, गाण्डिवम् = धनुर्मात्रम्, अर्जुनधनुश्च। 'गाण्डीवो गाण्डिवश्चास्त्री कार्मुकेऽर्जुनकार्मुके ।' इति--(मे० पृ० १६० श्लोकः ३६)। 'कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसकौ।' इति--(अम० ना० लिं० पृ० २६१ श्लोकः ८४) 'जिष्णोर्धनुषि, कोदण्डे, गाण्डीवं गाण्डिवं तथा।' इति च--(अने० समु० पृ० ५२ श्लोकः ५८९)। कोदण्डो धनुर्मात्रेऽपि। उल्वः, उल्वम् = कलकलः, शुक्रशोणितसंघातः, जरायुः, गर्भवेष्टनचर्म, गर्त्तं च। 'गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियाम्।' इति--(अम० ना० लिं० पृ० २१४ श्लोकः ३८)। पारशवः, पारशवम् = निषादः, परस्त्रीपुत्रः, लोहम्, शस्त्रं च। 'पारशवः पुमान्। परस्त्रीतनये शस्त्रे द्विजाच्छूद्रासुतेऽपि च।' इति—(मे० पृ० १६२ श्लोकः ६०)। पार्श्वः, पार्श्वम् = शरीरैकदेशः, कक्षाऽधोभागः, चक्रोपान्तम्, पर्शुगणः, अन्तिकं च। 'पार्श्वं कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च।' इति--(मे० पृ० १५८ श्लोकः १८)। 'न क्ली कक्षा बाहुमूलं पार्श्वमस्त्री तयोरधः।' इति च--(वै० पृ० १७८ श्लोकः ६६)। अपूर्वः, अपूर्वम् = न विद्यते पूर्वं कारणं यस्य सः परमात्मा तस्मिन् पुंलिङ्गः। यागावान्तर व्यापारो यागावान्तरकर्म वा तस्मिन् नपुंसकलिङ्गः। त्रिदिवः, त्रिदिवम् = स्वर्गः खम्, नभः, सुखं च। 'त्रिदिवा सरिदन्तरे। पुंसि स्वर्गे' इति—(मे० पृ० १६० श्लोकः ३७)। 'त्रिदिवो व्योम्नि दिव्यपि।' इति--(वै० पृ० २४१ श्लोकः २९)। 'क्लीबेऽपि'। 'त्रिदिवं तु सुखे स्वर्गे, स्वर्णद्यां त्रिदिवा मता।' इति च--(श० र० स० पृ० ३२० श्लोकः ६)। ताण्डवः, ताण्डवम् = नृत्यम्, नाट्यम्, तृणभेदश्च। 'ताण्डवोऽस्त्री तृणान्तरे। भवेदुद्धतनृत्ये च' इति--(मे० पृ० १६० श्लोकः ३६)। निष्ठेवः, निष्ठेवम् = मुखेन श्लेष्मनिरसनम्। 'निष्ठीवोऽस्त्री निष्ठीवनमपि निष्ठेवनं च निष्ठ्यूतिः।' इति--(वै० पृ० १९५ श्लोकः ३६)। प्रग्रीवः, प्रग्रीवम् = वास्तुनिमित्तकारणम्, वातायनम्। "झरोखा" इति लोके। मुखशाला। "खिड़की" इति लोके। वृक्षशीर्षकं वा। एवं कलशः, ग्रीवा, प्रासादश्च। 'प्रग्रीवमस्त्री कलशे ग्रीवाप्रासादयोरपि।' इति--(वै० पृ० २६१ श्लोकः ५६)। शरावः, शरावम् = वर्द्धमानाख्यम्। "सेरवा" "कसवा" "ढकना" "मलैया" "कसोरा" इति वा लोके। 'अस्त्री शरावो वर्द्धमानकः।' इति--(अम० ना० लिं० पृ० ३१३ श्लोक ३२)। 'सरावः' दन्त्यादिरपि--इति मुकुटश्च।

रावः, रावम् = शब्दः, ध्वनिः । 'रवो नादः स्वनिर्घोषः संव्याङ्भ्यो राव आरवः ।' इति— (अभि० सं० अभि० चिं० पृ० ५३ श्लोकः १४००) । भावः, भावम् = स्वभावः, शब्दविषयेऽभिप्रायः, आत्मा, योनिश्च । 'भावः पदार्थो धर्मः स्यात्सत्त्वं तत्त्वं च वस्तु च ।' इति । 'भावो गौरविते जन्तौ पदार्थेऽभिनयान्तरे ।' इति च—(त्रि० शे० पृ० ३७६ श्लोकः ४२०) । 'आत्मा भावो मनो भावो भावः सत्ता भवोऽपि च । भावः पूज्यात्मको लोकः पदार्थो भाव उच्यते ।' इति च—(अने० ध्व० मं० पृ० २ श्लोकः १३) । 'वोपधमदन्तम् ।' इति दुर्गः । वोपधत्वात् क्लीबलिङ्गोऽपि । क्लीबः, क्लीबम् = नपुंसकम् । "हिजड़ा" इति लोके । 'अस्त्री नपुंसके क्लीबं, वाच्यलिङ्गस्त्वदिक्रमे ।' इति रुद्रः' इति—(अम० सु० व्या० पृ० ४३४ स्तं० २ पं० १४) । 'पुंस्यपि ।' 'तृतीया प्रकृतिः शण्डः क्लीबः पण्डो नपुंसकम् ।' इति च—(अम० ना० लिं० पृ० २१५ श्लोकः ३९) । शवः, शवम् = मृतशरीरम्, पानीयं च । 'शवः स्यात्कुणपे पुमान् । नपुंसकं तु पानीये' इति—(मे० पृ० १५९ श्लोकः २४) । 'कुणपस्तु शवोऽस्त्रियाम् ।' इति च—(वै० पृ० १२२ श्लोकः २१६) दैवः, दैवम् = विवाहविशेषः, विधिः, प्राक्तनशुभाशुभकर्म । 'दैवं भाग्ये च नियतौ देवसम्बन्धवत्यपि ।' इति—(श० र० स० पृ० ३१६ पं० १६) । पूर्वः, पूर्वम् = कारणम्, पूर्वभावि, अतिक्रान्तश्च । 'पुमांसः पूर्वजाः पूर्वं प्राक् पूर्वमग्रतः ।' इति—(अने० समु० पृ० ३९ श्लोकः ४३७) । 'प्राक् पूर्वमग्रतः' इति धरणिः' इति—(अम० सु० व्या० पृ० ४२० स्तं० १ पं० ४) । 'पूर्वोऽन्यलिङ्गः प्रागाह, पुंबहुत्वेऽपि पूर्वजान् ।' इति—(अम० ना० लिं० पृ० ४२० श्लोकः १३४) । 'पूर्वे तु पूर्वजेषु स्युः पूर्वः, प्रागाद्ययोस्त्रिषु ।' इति च—(मे० पृ० १०५ श्लोकः ६) । पल्लवः, पल्लवम् = किसलयम् । "नये पत्ते" इति लोके । 'पल्लवोऽस्त्री किसलयम्' इति—(अम० ना० लिं० पृ० १३२ श्लोकः १४) । 'पल्लवोऽस्त्री किसलयं किसलोऽपि नवे दले ।' इति । 'पल्लवं त्वस्त्री प्रकोष्ठेऽप्यतिविस्तृतौ ।' इति च—(वै० पृ० २६१ श्लोकः ५८) । 'पुंसि क्लीबे च पल्लवः ।' इति व्याडिः' इति—(अम० सु० व्या० पृ० १३२ स्तं० २ पं० ३४-५) । 'पल्लवोऽस्त्री किसलये विटपे विस्तरे वले ।' इति—(मे० पृ० १६० श्लोक. ३९) । हेमस्तु पुंसीत्याह—'पल्लवः किसले बले । विटपे विस्तरेऽलक्तरागे शृङ्गारषिङ्गयोः ।' इति च—(अने० सं० पृ० १०६ श्लोकः ७४१, ७४२) । नल्वः, नल्वम् = किष्कुचतुःशतम् । 'नल्वः किष्कुचतुःशतम् ।' इति—(हा० व० पृ० ४०६ श्लोकः १९७) । अमरश्च । 'नल्वौ विंशं हस्तशतम्' इति मुकुटः । 'क्लीबेऽपि' । 'नल्वं हस्तशतम्' इति कात्यः । 'नल्वं विंशहस्तशतम्' इति च भट्टक्षीर–स्वामी' इति—(अम० सु० व्या० टि० पृ० ११६ स्तं० १ पं० ४०-१) । पाशः, पाशम् = कलापार्थः, बन्धनम्, पक्ष्यादिबन्धनं च । 'पाशः कचान्ते संघार्थः, कर्णान्ते शोभनार्थकः । छात्राद्यन्ते च निन्दार्थः, पाशः पक्ष्यादिबन्धने ।' इति—(त्रि० शे० पृ० ३७७ श्लोकः ४२८) । कुलिशः, कुलिशम् = शम्बः, वज्रम्, इन्द्रास्त्रम्, दम्भोलिः । 'कुलिशो न स्त्री दम्भोलौ, ना जषान्तरे ।' इति—(मे० पृ० १६४ श्लोकः २०) । व्याडिस्तु नपुंसकलिङ्ग-

माचष्टे । भट्टिकाव्ये पुंस्त्वमपि दृश्यते । 'निरस्तोदग्रधाराग्रः कुलिशो मम वक्षसि । अभिन्नं शतधात्मानं मन्यते बलिनं बली ।' इति च—(दु० लिं० पृ० ३७ पं० १४-५) । कर्कशः, कर्कशम् = काशमर्दः, इक्षुः, काम्पिल्यश्च । 'कर्कशः काशमर्देक्षुकाम्पिल्येष्वप्यसौ पुमान् ।' इति—(मे० पृ० १६३ श्लोकः १८) । कोशः, कोशम् = हिरण्यम्, धनम्, अर्थसंघातः, शब्दादिसंग्रहश्च । 'कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोशेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ।' इति—(मे० पृ० १६२ श्लोक. ६) । दिव्ये शपथे, शब्दादिसंग्रहेऽमरादौ । आकाशः, आकाशम् = नभः । 'वा तु पुंस्याकाशविहायसी ।' इति—(अम० ना० लिं० पृ० २९ श्लोकः २) । 'मेघवर्त्म चाकाशमस्त्रियाम् ।' इति—(वै० पृ० १७ श्लोकः २) । काशः, काशम् =कुशं, तृणभेदः, इक्षुगन्धा, पोटगलः । "कास" इति लोके । 'अथो काशमस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० १८३ श्लोकः १६२) । 'काशी वाराणसीपुरे । न स्त्रियां तृणभेदे स्यात्' इति—(मे० पृ० १६२ श्लोकः ३) । 'काशस्तृणे रोगभेदे' इति—(अने० सं० पृ० ४४ श्लोकः ५५७) । 'काशी काशश्च तृणवाचकः' इति शभेदः । कणिशः, कणिशम् = धान्यमञ्जरी । "बाली" "बाल" इति च लोके । 'कणिशं धान्यमञ्जरी ।' इति—(वै० पृ० १२८ श्लोकः ६४) । 'पुंस्यपि ।' सस्यस्य मञ्जरी निर्गतनूतनशिरः कणिशम् । कणाः सन्त्यस्य कणिशम् । 'कणिशो धान्यशीर्षके ।' इति रत्नकोशः' इति—(अम० स० व्या० पृ० ३०८ स्तं० २ पं० १०-१) । अङ्कुशः, अङ्कुशम् = सृणिः, गजवारणम् । 'अङ्कुशोऽस्त्री, सृणिः स्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २७९ श्लोकः ४१) । शेषः, शेषम् = उपयुक्तेतरम्, अवशिष्ठम् । "बचा हुआ" इति लोके । 'शेषो नाऽनन्तसीरिणोः । उपयुक्ततरे त्वस्त्री,' इति—(त्रि० शे० पृ० ३७९ श्लोकः ४४१) । 'शेषः सङ्कर्षणे वधे । अनन्ते ना, प्रसादेन स्वनिर्मल्यापर्णे स्त्रियाम् । उपयुक्ततरे न स्त्री' इति च—(मे० पृ० १६७ श्लोकः २८) । वेषः, वेषम् = वेशः, प्रसाधनम्, अलङ्काररचनाकृतशोभा । "शृङ्गार" "सजावट" इति वा लोके । 'आकल्पवेषो नेपथ्यं प्रतिकर्म प्रसाधनम् ॥' इति—(अम० ना० लिं० पृ० २३७ श्लोकः ९९) । 'तालव्यशान्तोऽपि' । 'वेशो वेषश्च कथितः' इति—(श० भे० प्र० पृ० ४ श्लोकः १७) । 'वेशो वेश्यागृहे गृहे । नेपथ्ये च' इति च—(मे० पृ० १६३ श्लोकः १४) । उष्णीषः, उष्णीषम् = शिरोवेष्टः, चोलोण्डुकः, शिरोवेष्टनम् । "पगड़ी" इति लोके । किरीटः, लक्षणान्तरं च । 'शिरसि सिगुष्णीषमस्त्री स्यात्' इति—(वै० पृ० १६८ श्लोक. १२४) । 'उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तरे ।' इति—(मे० पृ० १६७ श्लोकः ३२) । अम्बरीषः, अम्बरीषम् = भ्राष्ट्रः, भर्जनम् । "कड़ाह" इति लोके । नृपान्तरे च । 'भ्राष्ट्रः पुंस्य,–म्बरीषोऽस्त्री' इति । 'अम्बरीषं रणे वर्षे तृणे, नाऽर्ककिशोरयोः ।' इति च—(वै० पृ० २७७ श्लोकः ३) । 'अम्बरीषं रणे भ्राष्ट्रे क्लीबं, पुंसि नृपान्तरे ॥ नरकस्य प्रभेदे च किशोरे भास्करेऽपि च ।' इति च—(मे० पृ० १६९ श्लोकः ४८-९) । विषः, विषम् = क्ष्वेडः, शृङ्गादिद्रव्यविशेषः, गरलम् । "जहर" इति लोके । जलं च । 'विषमप्सु च ।' इति—(अम० ना० लिं०

पृ० ४३६ श्लोकः २२३)। 'विषं तु गरले तोये' इति––(वि० प्र० पृ० १७१ श्लोकः २)। 'विषं जलेऽतिविषायां स्त्रियां, क्ष्वेडे तु न स्त्रियाम्।' इति च––(मे० पृ० १६७ श्लोकः २५)। 'गरले विषमम्भसि च, स्त्रियामतिविषायाम्', इत्यूष्मविवेकान्मूर्धन्यान्तम्। 'पुंसि क्लीबे च' इति विषेणापि सम्बध्यते—इति केचित्––(अम० सु० व्या० पृ० ९० स्तं० १ पं० ३७-८-९)। रोहिषः, रौहिषः, रोहिषम, रौहिषम् = मृगविशेषः, हरिणान्तरम्, मत्स्यभेदः, कत्तृणम्, रक्तकत्तृणं च। "रोहिस" इति ख्याततृणविशेषः। 'रौहिषं रक्तकत्तृणे, मत्स्यभेदे मृगे च ना।' इति––(वै० पृ० २६५ श्लोकः ७१)। 'रौहिषं कत्तृणे क्लीबं पुंसि स्याद्धरिणान्तरे।' इति—(मे० पृ० १६८ श्लोकः ४५)। 'कत्तृणे रौहिषं क्लीबं, पुंलिङ्गो हरिणान्तरे।' इति च मूर्धन्यान्ते रभसः' इति––(अम० सु० व्या० पृ० १८५ स्तं० १ पं० १०, ११)। माषः, माषम् = परिमाणविशेषः, व्रीहिप्रभेदः, मांसलः, धान्यवीरश्च। "उड़द" इति लोके। 'माषो व्रीह्यन्तरे मूर्खे मानत्वग्दोष-भेदयोः।' इति––(मे० पृ० १६७ श्लोकः २१)। 'मूर्खः पुरीषलो माषः' इति––(त्रि० शे० पृ० ३०२ श्लोकः ५)। 'मूर्खे माने फले माषः' इति च––(त्रि० शे० पृ० ३७९ पृ० ४४०)। मेषः, मेषम् = मेढ्रः, मेण्ढकः, मेण्ढ्रकः। "मेंढा" इति लोके। भैषज्यप्रभेदः, राशि-विशेषश्च। 'मेषो राश्यन्तरे हुडे। भैषज्यभिदि' इति––(मे० पृ० १६७ श्लोकः २१)। प्रत्यूषः, प्रत्यूषम् = अहर्मुखम्, वसुश्च। 'प्रत्यूषोऽहर्मुखे वसौ।' इति—(मे० पृ० १६८ श्लोकः ४०)। 'क्लीबेऽपि'। 'व्युष्टं विभातं प्रत्यूषं सांयात्रिकमहर्मुखम्।' इति च— (वै० पृ० २२ श्लोकः ६८)। मांसादिरसविशेषः। 'यूषोऽस्त्री, युः पुमान् रसे।' इति—(वै० पृ० १६७ श्लोकः १००)। कोषः, कोषम् = धनसञ्चयः। "खजाना" इति लोके। साम्प्रतं तु "बैंक" इति नाम्ना प्रसिद्धः। शब्दादिसंग्रहश्च। 'कोशः कोषः' इति—(श० भे० प्र० पृ० ४ श्लोकः १६)। 'कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोषे(शे)ऽर्थसंघाते पेश्यां शब्दादिसंग्रहे।' इति च—(मे० पृ० १६२ श्लोकः ६)। करीषः, करीषम्—गोमयाग्निः। 'शुष्कगोमयसंघात' इत्येके। 'तत्तु (गोमयं) शुष्कं करीषोऽस्त्री' इति––(अम० ना० लिं० पृ० ३२० श्लोकः ५१)। 'दोहलं तु करीषोऽस्त्री' इति च––(वै० पृ० ७० श्लोकः ६१)। कर्षः, कर्षम् = मानप्रभेदः, पलचतुर्थो भागः। 'ते षोडशाक्षः कर्षोऽस्त्री' इति––(अम० ना० लिं० पृ० ३३० श्लोकः ८६)। 'कर्षो ना कर्षणे, मानप्रभेदे पुन्नपुंसकम्।' इति च—(मे० पृ० १६६ श्लोकः ८)। वर्षः, वर्षम् = सँवत्सरः, भारतादिः, जम्बूद्वीपः, वृष्टिः, बोलश्च। 'स्याद् वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्।' इति––(अम० ना० लिं० पृ० ४३६ श्लोकः २२४)। 'वर्षोऽस्त्री भारतादौ च जम्बूद्वीपाब्दवृष्टिषु। प्रावृट्काले स्त्रियां भूम्नि' इति––(मे० पृ० १६७ श्लोकः २४)। 'अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति वर्षणम्।' इति शब्दार्णवः' इति—(अम० सु० व्या० पृ० ३३ स्तं० २ पं० १७-८)। 'पुन्नपुंसकयोर्वर्षं जम्बूद्वीपाब्दवृष्टिषु।'

इति च रुद्रः' इति—(अम० सु० व्या० पृ० ११२ स्तं० २ पं० १०-१) । आमिषः, आमिषम् = मांसम्, भोग्यवस्तु, सम्भोगः, उत्कोचश्च । 'आमिषं पुन्नपुंसकम् । भोग्यवस्तुनिसम्भोगेऽप्युत्कोचे पललेऽपि च ।' इति–(मे० पृ० १६७ श्लोकः ३१) । रसः, रसम् = मधुरादिः, शृङ्गारादिः, विषम्, वीर्य्यम्, रागश्च । 'मांसे द्रवे चेक्षुरसे पारदे मधुरादिषु । जले रागे (बालरोगे) विषे नीरे रसो नवसु वक्ष्यते ।' इति—(भा० प्र० पृ० ३८५ श्लोकः ४) । 'रसो सूते विषे बले । स्त्री रास्नाशल्लकीपाठाद्राक्षामूर्वामुदीषु च ।' इति—(शि० को० पृ० ४८ श्लोकः ५२६, ५२७) । 'रसं तु पारदे बोले, रसः पारदचर्मणोः ।' इति च—(रा० नि० पृ० ४२५ श्लोकः ५२) । बुसः, बुषः, बुसम्, बुषम् = पलालादिक्षोदः, कडङ्गरः । "भूस" भूसा" इति वा लोके । 'बुसं दन्त्यमिति-धातुप्रदीपः। 'बुषवेषतुषारतोषाः' इति षभेदान्मूर्धन्यान्तमपि। 'कडङ्गरो बुसं क्लीबे' इति—(अम० ना० लिं० पृ० ३०९ श्लोकः २२) । 'छिन्नं दधि बुसं रूक्षं खलं सेव्यं च निःशरे ।' इति । (दधिविशेषः) 'पुंस्यपि ।' 'कडङ्गरो बुसः' इति च—(वै० पृ० १२८ श्लोकः ६४) । हरदत्तस्तु 'कडङ्करः' इति प्राह । इक्कसः, इक्कसम् =
चिक्कसः, चिक्कसम् = यवान्तविशेषः, यवचूर्णम् । 'चिक्कसो यवचूर्णके ।' इति—(वै० पृ० १६४ श्लोकः ६८) । 'यवक्षोदे तु चिक्कसः ।' इति—(अभि० सं० अभि० चिं० पृ० २० श्लोकः ४०२) । कर्पासः, कर्पासम् = तूलकारणम्, वस्त्रयोनिभेदः, तूलफलः, तपनी, आच्छादनफलः । "कपास" "रूई" इति च लोके । 'कर्पासस्तु बादरः स्यात्पिचव्य-स्तूलकं पिचुः ॥' इति—(अभि० सं० अभि० चिं० पृ० ४५ श्लोकः ११३९) । 'तूलः पिचुः पिचुः तूलम्' इति च—(त्रि० शे० पृ० ३०५ श्लोकः ११) । आसः, आसम् = धनुः, चापः । "धनुस" इति लोके । 'अस्त्रियौ चापधनुषावासेष्वासौ धनुर्द्रुणम् ।' इति—(वै० पृ० ११८ श्लोकः १७२) । दिवसः, दिवसम् = दिनम् । 'वा तु क्लीबे दिवसवासरौ ।' इति—(अम० ना० लिं० पृ० ४४ श्लोकः २) । अवतंसः, अवतंसम् = शेखरम्, शिरोभूषणम् । "मुकुट" "पगड़ी" इति वा लोके । कर्णभूषणं च । 'अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे ।' इति—(मे० पृ० १७३ श्लोकः ४८) । वीतंसः, वीतंसम् = मृगाणां पक्षिणामपि बन्धनोपायः, मृगपक्षि-णांबन्धनोपकरणम् । "जाल" "पाश" इति च लोके । 'वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम् ।' इति—(अम० ना० लिं० पृ० ३४६ श्लोकः २६) । 'वितंसः' इत्यपि । 'वितंसः पक्षिबन्धनम् ।' इति—(वै० पृ० १३९ श्लोकः ४१) । मांसः, मांसम् = पिशितम् । "गोश्त" इति लोके । 'पिशितं पललं मांसं क्रव्यसामिषमुद्यसम् ।' इति—(हा० व० पृ० ३९९ श्लोकः ५५) । पनसः, पनसम् = फलवृक्षविशेषः, कण्टकिफलः । "कटहल" "फनस" इति च लोके । 'पनसः कण्टकिफले कण्टके वनरान्तरे । स्त्रियां रोगप्रभेदे, स्यात्' इति—(मे० पृ० १७२ श्लोकः २७) । उपवासः, उपवासम् = भोजनादेर्विच्छेदः, उपवस्तम्, अहोरात्रभोजनाभावः । "व्रत" "कड़ाका"

"निराहार" इति च लोके। 'औपवस्तं तूपवासः।' इति--(अम० ना० लि० पृ० २६१ श्लोकः ३८)। निर्यासः, निर्यासम् = वृक्षादेर्निस्यन्दः, वृक्षद्रवः। "गोंद" "सार" इति वा लोके। 'निर्यासो वेष्टकस्तथा।' इति—(प० र० मा० पृ० ३९ पं० २६)। 'निर्यासो लसिका काण्ड-सत्त्वसाराभिधानकम् ।' इति च—(प० मु० व० पृ० ४८ पं० ७)। मासः, मासम् = काल-परिमाणविशेषः, पक्षद्वयात्मकः कालः। 'मासः पक्षद्वयोर्मतः।' इति--(श० र० स० पृ० ३३५ श्लोकः ११)। 'मासस्तु तावुभौ॥' इति च--(अम० ना० लिं० पृ० ४७ श्लोकः १२)। तौ उभौ शुक्लकृष्णौ। चमसः, चमसम् = यज्ञपात्रविशेषः। 'चमसो यज्ञपात्रस्य भेदोऽस्त्री, पिष्टके स्त्रियाम् ।' इति--(मे० पृ० १७१ श्लोकः २१)। अंसः, अंसम् = शरीरैकदेशः, स्कन्धः। "कंधा" इति लोके। 'स्कन्धो दोश्शिखरोंऽसो स्त्री' इति--(वै० पृ० १७८ श्लोकः ७१)। कंसः, कंसम् = लोहविशेषः, तैजसद्रव्यम्, ताम्ररङ्गमिश्रितधातुविशेषः, कांस्यम। "कांसा" "कांसी" इति वा लोके। परिमाणविशेषः,आढकपरिमाणं, मानं च। 'कंसोऽस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे(नृपान्तरे) तु ना।' इति--(मे० पृ० १७० श्लोकः २)। स्नेहः, स्नेहम् = द्रवः, तैलादिरसद्रव्यम्, हार्दम्, सौहार्दम्, सौहृदयम्, प्रेम च। 'स्नेहोऽस्त्री प्रेम सौहार्दम्' इति। 'स्नेहोऽस्त्री पिच्छिले रसे' इति। 'स्नेहोऽस्त्री द्रवहार्दयोः।' इति च--(वै० पृ० २३८ श्लोकः ९९)। बर्हः, बर्हम् = मयूरपिच्छम्, दलं च। 'बर्हं पिच्छे दलेऽस्त्रियाम्।' इति--(मे० पृ० १७५ श्लोकः ६)। गृहः, गृहम् = वासः, वेश्म, गृहम्। "घर" इति लोके। कलत्रं च। "औरत" इति लोके। 'गृहं गृहाश्च पुंर्भूम्नि कलत्रेऽपि च सद्मनि।' इति--(मे० पृ० १७५ श्लोकः ५)। केचित्तु-गृहिण्येव गृहमित्याहुः-'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते।' इति--(श० चिं० पृ० ८२८ स्तं० १ पं० १८ तः २० या०)। गेहः, गेहम् = इष्टकादिरचितं वासस्थानम्, मन्दिरम्, सद्मम्, वेश्म। "घर" इति लोके। 'गेहमस्त्री, शालासभे स्त्रियाम् ।' इति वाचस्पतिः' इति—(अम० सु० व्या० पृ० ११८ स्तं० १ पं० ५)। 'न नोदवसितं, न स्त्री गेहं, पुंभूम्नि वा गृहम्।' इति च–(वै० पृ० १६० श्लोकः १९)। तथा च प्रयोगः—'कालागुरुप्रततधूपवहाश्च गेहाः।' इति–(दु० लिं० पृ० ३५-६ पं० २१,१)। लोहः, लोहम् = अयःप्रभृतिद्रव्यविशेषः, कालायसम्। 'लोहोस्त्री शस्त्रके लोहे जोङ्गके सर्वतैजसे।' इति—(मे० पृ० १७५ श्लोकः ८)। पुण्याहः, पुण्याहम् = सुदिनम्, शोभनदिवसः, मङ्गलं च। 'पुण्याहमह्नि पुण्योंऽशः' इति--(वै० पृ० २२ श्लोकः ६७)। देहः, देहम् = शरीरम्। 'कायो देहः क्लीबपुंसोः' इति–(अम० ना० लिं० पृ० २२६ श्लोकः ७१) 'देहः कलेवरे' इति च—(श० र० स० पृ० ३४१ पं० ३)। पटहः, पटहम् = वाद्यविशेषः, आनकः। 'पटहो ना समारम्भे, आनके पुन्नपुंसकम्।' इति--(मे० पृ० १७६ श्लोकः १९)। तनूरुहः, तनूरुहम् = पुत्रः, लोम, रोम। "रोंगटा" इति लोके। पक्षश्च। "पंख" इति लोके। 'तनूरुहं मतं लोम्नि, पतत्रेऽपि तथाविधम्।' इति--(श० र० स० पृ० ३४४ पं० ४)। 'तनूरुहस्तु पुत्रे गरुति

लोम्नि च।' इति च––(अने० सं० पृ० १३९ श्लोकः ३५५)। लक्षः, लक्षम् = छागः, लक्ष्यम्, शरव्यं च। "वेध" "निशाना" "ध्येय" इति च लोके। 'लक्ष तु लक्षणं लक्ष्यमभिसन्धानमासिकम्। वेध्यं शरव्यं न नरि' इति। 'पुंस्यपि।' 'छागे तु करुणो लक्षो मल्लिका कुसुमप्रियः।' इति च—(वै० पृ० ४७ श्लोकः ३५)। करुणः = "करणा नींबू" इति प्रसिद्धो वृक्षविशेषः, करुणरसश्च। यथा—'एको रसः करुण एव ···।' इति भवभूतिः' इति॥

अथ साम्प्रतमिकारान्तमुकारान्तांश्च दोःशब्दसहितान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ८ श्लोकः १२१-२)।

'··· ··· अररि–स्थाणु–कमण्डलूनि ।
चाटु–श्चटु–र्जन्तु कशिप्व–णु–स्तथा
जीवातु––कुस्तुम्बुरु––जानु––सानु ॥३५॥
कम्बु शङ्कु–र्दार्व–गुरु–वास्तु–पलाण्डु
हिङ्गुः शिग्रु–र्दो–स्तितउः सीधु' ··· ॥

अस्य व्याख्या—

अररीति। कम्बुरिति च। इहारर्य्यादा इतरेतरयोगो द्वन्द्वः। जीवात्वादो दार्वादो च समाहारो द्वन्द्वः। एतेऽरर्य्यादयः सीध्वन्ताः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। अररिः, अररि = कपाटम्, कवाटम्। "किंवाड" इति लोके। 'कपाटश्च कवाटश्च त्रिषु, स्यादररं न ना।' इति वाचस्पतिः' इति––(अम० सु० व्या० पृ० १२२ स्तं० २ पं० १६)। 'अररं छदकपाटयोः ॥' इति––(मे० पृ० १३० श्लोकः ११०)। 'अररिः' इदन्तोऽपि। 'अररं पुनः। कपाटोऽररिः कवाटः' इति च––(अभि० सं० अभि० चि० पृ० ३६ श्लोकः १००६)। तथा च कथिताभ्युदये––'प्रेयन्तेऽमी परमररयो हर्म्यवातायनानाम्।' इति मुकुटः' इति––(अम० सु० व्या० टि० पृ० १२२ स्तं० २ पं० ४०-१)। स्थाणुः, स्थाणु = ध्रुवः, शङ्कुः, शाखापत्रादिरहिततरुः, छिन्नद्रुमशिर ऊर्ध्वकाष्ठमेव। 'स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुवे' इति––(मे० पृ० ४७ श्लोकः ३२)। 'स्थाणुर्वा ना, ध्रुवः शङ्कुः' इति च––(अम० ना० लिं० पृ० १२९ श्लोकः ८)। कमण्डलुः, कमण्डलु = पात्रविशेषः, करकम्, ऋषिपात्रम्। 'अस्त्री कमण्डलुः, कुण्डी' इति—(अम० ना० लिं० पृ० २६४ श्लोकः ४६)। 'कमण्डलुः स्यात्करके न स्त्री, ना प्लक्षपादपे।' इति––(मे० पृ० १५६ श्लोकः १५१)। चाटुः, चाटु = चटुः, प्रियवाक्यम्, प्रियप्रायम्। 'चटु चाटु प्रिये वाक्ये चाटुकारे, चटुः पुमान्। व्रतिनामासने चापि' इति––(श० र० स० पृ० ८४ पं० १६)। 'चटुश्चाटुः' इति च––(श० भे० प्र० पृ० ४ श्लोकः १२)।

चटु:, चटु = प्रियवाक्यम्, उदरं च। 'चटुश्चाटौ पिचिण्डे च व्रतिनामासने पुमान् ।' इति--(मे० पृ० ३४ श्लोक: १३)। 'चटुश्चाटुश्च राजादिस्तुतौ पशुपिचिण्डके ।' इति--(वै० पृ० २१५ श्लोक: २३)। 'देहांशे वर्णने चटु:।' इति—(त्रि० शे० पृ० ३२७ श्लोक: ९६)। तत्रैव क्लीबलिङ्गोऽपि। 'प्रियवाक् चटुचाटुनी ।' इति च--(त्रि० शे० पृ० ३११श्लोक: १६)। जन्तु:, जन्तु = प्राणी, जननशील:। 'जन्तुर्जन्यमात्रे' इति--(श० र० स० पृ० १२६ पं० १६)। कशिपु:, कशिपु = शय्या, भक्तम्, भोज्यम्, आच्छादनम्, वस्त्रम्, एकोक्तया भक्ताच्छादने, भोज्यवस्त्रे च। 'अस्त्री कशिपु शय्यायां वस्त्रेऽन्ते तद्द्वयेऽपि च।' इति--(वै० पृ० २५८ श्लोक: २०)। 'कशिपु त्वन्नमाच्छादनं द्वयम् ॥' इति--(अम० ना० लिं० पृ० ४१६ श्लोक: १३०)। 'एकोक्तया कशिपुर्भक्ताच्छादने च द्वयो: पृथक् ।' इति च--(वि० प्र० पृ० १०५ श्लोक: १८)। अणु:, अणु = व्रीहिविशेष:। "चीणा" इति लोके। लवणविशेषश्च। 'अणु-र्व्रीहिविशेषे स्यात्पुंसि, सूक्ष्मेऽभिधेयवत् ।' इति—(मे० पृ० ४५ श्लोक: २)। 'क्लीबेऽपि'। 'भोजनीयं कटकटमणु प्रवर वारिजे ।' इति च—(वै० पृ० १३२ श्लोक: ११९)। जीवातु:, जीवातु = भक्तम्, अन्नम्, जीवितम्, प्राणनम्, जीवनौषधम्, मृतसञ्जीवनौषधं च। 'जीवातु-रस्त्रियां भक्ते जीविते जीवनौषधे ।' इति--(मे० पृ० ६२ श्लोक: ११२)। कुस्तुम्बुरु:, कुस्तुम्बुरु = धन्याकम्। "धनियाँ" इति लोके। 'कुस्तुम्बुरु धनीयकम् ।' इति रभस:' इति—(अम० सु० व्या० पृ० ३१५ स्तं० १ पं० ३७)। 'पुंस्यपि।' कुस्तुम्बुरुश्चावलिका' इति च--(रा० नि० पृ० ८२ श्लोक: ६७)। जानु:, जानु = जानूरुसन्धि:, अष्ठीवान्। "घूटनू" इति लोके। 'जानूरुपर्वाष्ठीवदस्त्रियाम् ।' इति—(अम० ना० लिं० पृ० २२७ श्लोक: ७२)। 'अस्त्रियाम्' इति त्रिभि: सम्बध्यते। (समस्त्वात्)। सानु:, सानु = पर्वतैकदेश:, पर्वतसम-भूभाग:, वनं च। 'सानुरस्त्री वने प्रस्थे वात्यामार्गाग्रकोविदे ।' इति--(मे० पृ० ८४ श्लोक: २२)। 'स्नु: प्रस्थ: सानुरस्त्रियौ' इति--(अम० ना० लिं० पृ० १२५ श्लोक: ५)। 'सानु: शृङ्गे बुधे मार्गे वात्यायां पल्लवे वने ।' इति च--(वि० प्र० पृ० ८६ श्लोक: १९)। कम्बु:, कम्बु = शंख: 'कम्बु: शंखेऽस्त्रियां, पुंसि शम्बूके वलये गजे ।' इति--(मे० पृ० १०४ श्लोक: २)। शङ्कु:, शङ्कु = अप्राणिगोचर:, कील:, संख्याविशेषश्च। शतादिकत्वादस्य नपुंसकत्वं प्राप्तम्। कीलार्थस्य उदन्तत्वात् पुंस्त्वं सिद्धम्। 'अस्त्री शङ्कुरप्राणिगोचर: ।' इति–(वै० पृ० २९१ श्लोक: ३०)। दारु:, दारु = 'पुन्नपुंसकयोर्दारु:' इति--(त्रि० शे० पृ० ३८८ श्लोक: ८)। 'दारु स्यात्पित्तले काष्ठे देवदारौ नपुंसकम् ।' इति--(मे० पृ० १२६ श्लोक: ४७)। अगुरु:, अगुरु = कालागुरु। 'कालागुर्वगुरु' इति--(अम० ना० लिं० पृ० २४६ श्लोक: १२७)। 'कालागुर्वप्यगुरूच्यते'--इति सुभूति:' इति--(अम० सु० व्या० पृ० २४६ स्तं० १ पं० ३१-२)। 'अगुरु प्रवरं लोहं क्रिमिजग्धमनार्यजम् ।' इति शाश्वत:' इति--(अम०

सु० व्या० पृ० २४६ स्तं० १ पं० २८)। 'कुस्तुम्बुरुक धान्याकमगुरु वा पुंसि लघुनाम च।' इति बोपालित:' इति--(अम० सु० व्या० पृ० २४६ स्तं० १ पं० १६) । 'कर्पूरागुरुकस्तूरीकक्कोल-घुसृणानि च। एकीकृतमिदं सर्वं यक्षकर्दम इष्यते।' इति व्याडि:' इति--(अम० सु० व्या० पृ० २४६ स्तं० १ पं० ८, ९)। 'अगुरु इत्यपि।' 'कुङ्कुमागुरुकस्तूरीकर्पूरं चन्दनं तथा । महासुगन्धमित्युक्तं नामतो यक्षकर्दम: ।' इति धन्वन्तरि:' इति--(रा० नि० पृ० ३०४ श्लोक: ४५) । 'कर्पूरागरुकस्तूरीकक्कोलैर्यक्षकर्दम:।' इति-(अम० ना० लिं० पृ० २४८ श्लोक: १३३)। 'अगुर्वगरु राजार्हम्' इति। 'अगुरुस्त्वगरौ लघौ । शिंशिपायाम्' इति च—(अने० सं० पृ० ९२ श्लोक: ५५३) । वास्तु:, वास्तु =देवविशेष:, गृहम्, गृहभूश्च । 'वेश्मभूर्वास्तुरस्त्रियाम्।' इति—(अम० ना० लिं० पृ० १२३ श्लोक: १९) । वेश्मभू: = गृहरचनावच्छिन्नभूमि: । 'वास्त्वस्त्री गृहभूपुर्य्योर्गृहे सीमसुरङ्गयो: ।' इति च—(वै० पृ० २३६ श्लोक: ८०) । पलाण्डु:, पलाण्डु = सुकन्दक:, मुखदूषण: । "कांदा" इति। "प्याज" इति च लोके। 'पलाण्डुस्तु सुकन्दक: ।' इति—(अम० ना० लिं० पृ० १७८ श्लोक: १४७)। 'हिङ्गु:, हिङ्गु = मूलविशेषस्य निर्यास:, सूपधूपनम्, रामठम्। "हींग" इति लोके । 'बाह्लीकं हिङ्गु रामठम् ।' इति—(अम० ना० लिं० पृ० ३१६ श्लोक: ४०) । 'पुंस्यपि ।' 'हिङ्गौ तु भूतनाशनम् ।' इति च--(अ० सं० अभि० चिं० प० पृ० ४ श्लोक: १०२) । शिग्रु:, शिग्रु = शाकमात्रम्, शोभाञ्जनश्च । "सहेजँन" इति लोके। 'शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचका: ।' इति--(अम० ना० लिं० पृ० १३८ श्लोक: ३१) । दो:, दो: = भुज:, बाहु:। "भुजा" इति । "बाँह" इति च लोके। 'दोर्नस्त्री, करयोर्णिर्ना' इति--(वै० पृ० १७८ श्लोक: ७१)। 'दोर्दोषा च भुजो बाहु: पाणिर्हस्त: करस्तथा ।' इति—धनञ्जय:' इति--(अम० सु० व्या० पृ० २३० स्तं० २ पं० १०) । तितउ:, तितउ = चालनी । "चलनी" इति लोके। 'चालनी तितउ: पुमान् ।' इति--(अम० ना० लिं० पृ० ३१० श्लोक: २६)। 'न स्त्री तितउ चालनी' इति--(त्रि० शे० पृ० ३०२ श्लोक: ५)। यादवश्च--'चालनं तितउ: प्रोक्तम्' इति क्लीबकाण्डे रत्नकोश:' इति---(अम० सु० व्या० पृ० ३१० स्तं० १, २ पं० ४१-१) । 'क्षुद्रच्छिद्रशतोपेतं चालनं तितउ: स्मृत:।' इति च कात्य: । 'तितउ: पुंसि क्लीबे च पृथगुच्चारणे द्वयो: । सामर्थ्याद् गुणो न,' इति गुणाभाव: । सीधु:, शीधु:, सीधु, शीधु = इक्षुरस:, मद्यं च। 'मैरेयमासव: शीधु:' इति--(अम० ना० लिं० पृ० ३५१ श्लोक: ४१) । 'शीधु कश्यमिरा कल्या' इति। 'पक्वैरिक्षुरसैरस्त्री शीधु: पक्वरस: शिव: ।' इति च--(वै० पृ० १३९ श्लोक: ४७) । 'पुन्नपुंसकयोर्दारुजीवातुस्थाणुशीधव: ।' इति--(त्रि० शे० पृ० ३८८ श्लोक: ८) । यद्यपि 'शीधुरिक्षुरसै: पक्वैरपक्वैरासवो भवेत् । मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम् ।' इति च (प० र० मा० पृ० ६९ पं० ६, ७) ।

अथेदानीं भूमप्रभृतीन् महिमपर्य्यन्तान् व्यञ्जनान्तान् पुन्नपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० स० लिं० पृ० ८ श्लोक० १२२) ।

... ... अथ भूमा ।

वेम प्रेम ब्रह्म गरु–ल्लोम–विहायः
कर्मा–ऽष्ठीव–त्पक्ष्म धनु–र्नाम–महिम्नी ॥३६॥इति ॥

अस्य व्याख्या—

अथेति । इह नामादौ इतरेतरयोगो द्वन्द्वः । एते भूमादयो महिमान्ताः शब्दाः पुन्नपुंसकलिंगा भवन्ति । भूमा, भूम = बहुत्वम् । भूमा, महान्, निरतिशयम्, बहु' इति पर्यायाः । इति भाष्यम् । शब्दोऽयं पुंलिङ्गवाचकः; किन्तु द्विस्वरमन्नन्तत्वात् क्लीबलिङ्गोऽपि । वेमा, वेम = वस्त्रव्यूतिदण्डः, वायदण्डः, वापदण्डः । "राछ" इति लोके । 'पुंसि वेमा वाप(य)-दण्डः' इति––(अम० ना० लिं० पृ० ३४६ श्लोकः २८) । 'वेमा ना वानदण्डकः ।' इति––(वै० पृ० १३६ श्लोकः ८) । 'वेम इत्यपि ।' 'वायदण्डः पुंसि वेमा, वेमो ना, वेम न द्वयोः ।' इति च शब्दरत्नावली' इति––(श० चिं० पृ० ४३९ स्तं० १ पं० १३-४) । प्रेमा, प्रेम = प्रियत्वम्, स्नेहः, नर्म च । 'प्रेमा ना वासवे वाते, प्रेमाऽस्त्री स्नेहनर्म्मणोः ।' इति––(मे० पृ० ८९ श्लोकः ९४) । । ब्रह्मा, ब्रह्म = प्रजापतिः, ब्रह्मा, तत्त्वम्, तपः, वेदश्च । 'वेदस्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः । ' इति––(अम० ना० लिं० पृ० ४१६ श्लोकः ११४) । 'ब्रह्म तत्त्वतपोवेदे न द्वयोः, पुंसि वेधसि । ऋत्विग्यागभिदोर्विप्रे' इति––(मे० पृ० ८९ श्लोकः ९६) । गरुत्, गरुत् = पक्षः । "पंख" इति लोके । सुवर्णं च । तकारान्तोऽयं शब्दः । 'छदः पक्षो गरुद्वाजश्छदनं च तनूरुहम् ।' इति––(वै० पृ० ३० श्लोकः ४९) । लोमा, लोम = तनूरुहम् । "रोवां" "रोंगटा" इति च लोके । 'तनूरुहं रोम लोम' इति––(अम० ना० लिं० पृ० २३७ श्लोकः ९९) । विहायाः, विहायः = आकाशम् । 'वा तु पुंस्याकाशविहायसी ।' इति––(अम० ना० लिं० पृ० २९ श्लोकः २) । 'विदुर्विहायसं व्योम पक्षिणश्च विहायसः ।' इति––(अने० समु० पृ० ३३ श्लोकः ३६५) । 'विहायाः शकुनौ पुंसि' गगने पुन्नपुंसकम् ।' इति––(मे० पृ० १७४ श्लोकः ६३) । अयं कर्मा, इदं कर्म = क्रिया, व्याप्यम्, साधनम्, यजनं च । 'क्रियायजनयोः कर्म' इति––(वै० पृ० २२४ श्लोकः ४) ।

पाणिनीयेऽपि––(१) (ब्रह्मन् पुंसि च) ॥ एतत्पुंसि । चान्नपुंसके स्यात् । अयं– ब्रह्मा, इदं ब्रह्म = प्रजापतिः, वेधाः । सि० कौ० पृ० ४०३ सू० १५१ ।

'कर्माऽस्त्री व्याप्यक्रिययोः ।' इति च--(मे० पृ० ८६ श्लोकः ४७)। अष्ठीवान्, अष्ठीवत् = जानु। "घुटनू" इति लोके। मत्वन्तोऽयं शब्दः। 'जानूरुपर्वाष्ठीवदस्त्रियाम् ।' इति--(अम० ना० लिं० पृ० २२७ श्लोकः ७२)। पक्ष्मा, पक्ष्म = चक्षूरोम। 'चक्षूरोमाणि पक्ष्माणि' इति--(प० र० मा० पृ० ४२ पं० २०)। 'पक्ष्म पक्षे च सूत्रांशे किञ्जल्के नेत्ररोमणि ।' इति—(श० र० स० पृ० २२४ पं० १३)। धनुः, धनुः = शरासनम्, चापः। "धनुस" इति लोके। 'अथाऽस्त्रियौ। धनुश्चापौ' इति--(अम० ना० लिं० पृ० २९० श्लोकः ८३)। 'धनुः पियाले ना, न स्त्री राशिभेदे शरासने। धनुर्धरे त्रिषु' इति सान्तेषु—(मे० पृ० १७१ श्लोकः २६)। नैषधे तूदन्तोऽपि दृश्यते। 'धनुः पुमान् पियालद्रौ राशिभेदे शरासने ।' इति नान्तेषु—(मे० पृ० ८३ श्लोकः ११)। नामा, नाम = सञ्ज्ञा, अभिधानम्। 'नामधेयं च नाम च ।' इति--(अम० ना० लिं० पृ० ६६ श्लोकः ८)। महिमा, महिम = महत्त्वम्। "बड़ाई" "कीर्ति" इति लोके। 'घृतप्रयुतैरावतवसन्तककुदौषधमधुमहिमानि।" इति--(दु० लि० पृ० ३१ श्लोकः ६२)।

अथाधुना क्रमरहितान् मालकादीन् पुन्नपुंसकलिङ्गवाचकशब्दानाह दुर्गः--(दु० लिं० पृ० २९ तः ३८ या० श्लोकः ५८ तः ७९ या०)।

मालक–सरका–ऽनीकाः पुस्तक–मस्तक–चरक–चषक–निष्काः।
पिण्याक–शूक--मोदक—मञ्चक—नट–पङ्क—कल्कानि ॥

अस्य व्याख्या—

मालकेति। मालकादौ पुस्तकादौ पिण्याकादौ च इतरेतरयोगो द्वन्द्वः। एते मालकादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। वक्ष्यते "उभयलिङ्गा इति समाप्ताः।" इति, तेनायं सम्बन्धः सिद्धो भवति। तथा स्त्रीनपुंसकेष्वपि बोद्धव्यम्। एतेषां मालकादिशब्दानां व्याख्योदाहरणानि प्रागुक्तानि :

वल्मीक–शाक–शाटक–पिनाक–मूषिक–करण्डकं शुल्कम् ।
करक–नख–तण्डक–शकट–कर्पट–पातक–किरीट–पटाः ॥

अस्य व्याख्या—

वल्मीकेति। वल्मीकादौ करण्डकान्ते समाहारो द्वन्द्वः। अपरार्द्धे तु इतरेतरयोगो द्वन्द्वः। एते वल्मीकादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। शकटः, शकटम् = अनः, बलीवर्दादिवाह्योद्वहनविशेषः। 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इति--(अम० ना० लिं० पृ० २८३

श्लोकः ५२)। प्रयोगश्च—'शकटः शाकिनी गावो यानमस्कदनं स्वनम्। अनूपः पर्वतो राजा दुर्भिक्षे नववृत्तयः।' इति—(अम० सु० व्या० पृ० २८३ स्तं० १ पं० ३०-१-२)। पटः, शोभनवस्त्रम्, वस्त्रं च। 'सुचेलकः पटोऽस्त्री' इति—(अम० ना० लिं० पृ० २४२ श्लोकः ११६)। 'पटोऽस्त्री कर्पटः शाटः सिचयप्रोतलक्तकाः।' इति रभसः' इति—(अम० सु० व्या० पृ० २४२ स्तं० २ पं० २८-९)। 'पटश्चित्रपटे वस्त्रेऽस्त्री, प्रियालद्रुमे पुमान्।' इति च—(मे० पृ० २५ श्लोकः १६)। शेषं प्राग्वत्।

निकट–कट–कपट–कूटा भूषण–कुट–कुञ्ज–कुष्ठ–नड–मुष्का।
द्रोण—क्ष्वेडित—तीर्थ—प्रोथा—ऽष्टापद—कबन्धानि ॥

अस्य व्याख्या—

निकटेति। निकटादौ भूषणादौ द्रोणादौ च इतरेतरयोगो द्वन्द्वः। एते निकटादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। कटः, कटम् = आसनविशेषः। "चटाई" इति लोके। 'कटः किलिञ्जः' इति। 'क्लीबेऽपि।' 'विश्वभेषजं सिहलं कटम्।' इति च—(वै० पृ० १२९ श्लोकः ७५)। शे० प्रा०।

शृङ्गो-द्योग-तडाग-क्रकच-ध्वज-पुच्छ-कूर्च–कवचानि।
अर्बुद—यौवन—भुवनं सौधं सीधु व्रतं सक्तुः ॥

अस्य व्याख्या—

शृङ्गेति। शृङ्गादौ इतरेतरयोगो द्वन्द्वः। अपरार्द्धे तु अर्बुदादौ समाहारो द्वन्द्वः। एते शृङ्गादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। तडागः, तडागम् = जलाधारविशेषः। 'पद्माकरस्तडागोऽस्त्री' इति—(अम० ना० लिं० पृ० १०३ श्लोकः २८)। 'तडागस्तु जलाधारविशेषे यंत्रकूप(ट)के।' इति च—(मे० पृ० २४ श्लोकः ३४)। 'तडाकः' इति कश्चित्। (तटाकः, तटागः) इत्येके। सक्तुः, सक्तु = यवादिविकारः। 'चक्षुष्याः सक्तवः कणाः।' इति—(वै० पृ० १६४ श्लोकः ७०)। 'सक्तुश्चूर्णक आपूप्यः' इति च—(त्रि० शे० पृ० ३०३ श्लोकः १५)। शे० प्रा०।

द्यूत–प्रयुतै–रावत–वसन्त–ककुदौ–षध–मधु–महिमानि।
पुस्तं बुस्तं हस्तं वास्तु च मुस्तं–व्रजं रजतम् ॥

पाणिनीयेऽपि—(१) (सक्तुर्नपुंसके च)॥ अयं नपुंसके। चात्पुंसि स्यात्। अयं सक्तुः, इदं सक्तु= भृष्टयवादिचूर्णकम्। सि० कौ० पृ० ३९९ सू० ५८।

अस्य व्याख्या—

द्यूतेति। द्यूतादा इतरेतरयोगो द्वन्द्वः। एते द्यूतादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। मधुः, मधु = मृद्वीकादिमद्यम्, मधूलम्। 'मधु माध्वीकमद्ययोः।' इति—(अम० ना० लि० पृ० ३५१ श्लोकः ४१)। 'मधूलं तु मधुर्न स्त्री' इति। 'क्षौद्रादौ तद्रसेऽप्यस्त्री, ना वसन्ते रसेऽसुरे। चैत्रे मधूके, क्ली त्वप्सु मद्ये पुष्परसे मधु।' इति च—(वै० पृ० २३५ श्लोकः ६१)। मुस्तः, मुस्तम् = ओषधिविशेषः, अब्दः। "मोथा" इति लोके। विषविशेषश्च। 'मेघाख्यं मुस्तकं मुस्तम्' इति—(प० मु० व० पृ० ४ पं० १८)। 'मुस्तः कुष्ठो मेषशृङ्गः' इति—(वै० पृ० १५० श्लोकः २५)। 'कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्।' इति च—(अम० ना० लिं० पृ० १८२ श्लोकः १५९)। शेषं प्राग्वत्।

कार्षापण–व्रण–स्थाणु-बाण–तृण–चरण–तोरण–रणानि।
शत–लोहित–घृत–वृत्तानि गूथ–यूथा–ऽयुतं मण्डम्॥

अस्य व्याख्या—

कार्षापणेति। कार्षापणादौ शतादौ चेतरेतरयोगो द्वन्द्वः। गूथादौ तु समाहारो द्वन्द्वः। एते कार्षापणादयः शब्दाः पुन्नपुंसकलिङ्गा स्युः। स्थाणुः छिन्नशाखो वृक्षः। लोहितं शोणितम्। गुणवचनस्य तु वाच्यलिङ्गता। लोहितो गौः, लोहिता शाटिः, लोहितं वस्त्रम्। घृतः, घृतम् = आज्यम्। "घी" इति लोके। जलं च। 'घृतमाज्ये जले क्लीबं, प्रदीप्ते त्वभिधेयवत्।' इति—(मे० पृ० ५५ श्लोकः १७)। वृत्तः, वृत्तम् = वृत्तं, शीलं, निस्तलं च। निस्तलं इति वर्त्तुलम्। शे० प्रा०।

खण्डं मुण्डं कुण्डं काण्डं दण्डं सुवर्ण–वर्णे च।
चन्दन-मोदन–मसनं विमान–धन–भवन–मुद्यानम्॥

अस्य व्याख्या—

खण्डमिति। सुवर्णादौ इतरेतरयोगो द्वन्द्वः। विमानादौ तु समाहारो द्वन्द्वः। एते खण्डादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। खण्डः = इक्षुविकारविशेषः, शकलं च। खण्डनक्रियावाचिनस्तु वाच्यलिङ्गता। खण्डो घटः, खण्डा घटी, खण्डं कुलम्। मुण्डः शिरः गुणवचनस्य तु द्रव्ये वर्तमानस्य वाच्यलिङ्गतैव। यथा—मुण्डनगुणयोगात् मुण्डः पुमान्, मुण्डा स्त्री, मुण्डं कुलम्। कुण्डः, कुण्डम् = जीवति भर्त्तरि परजातः। अग्निहवनाधारविशेषश्च। 'अमृते (पत्यौ) जारजः कुण्डः' इति—(अम० ना० लिं० पृ० २१४ श्लोकः ३६)। 'कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलौ, जारात्पतिवत्नीसुते पुमान्।' इति च—(मे० पृ० ४० श्लोकः ४)। कुण्डः, कुण्डी, कुण्डम् = भाजनविशेषः। स्त्रियां रूढः। पुन्नपुंसकयोः दुर्गः। शे० प्रा०।

निधनं पिधान–मभिधानं मानं दिन–वलीन–नालानि ।
पुलिनं नलिनं स्तेनं शयना–ऽऽसन–यान–निगडानि ॥

अस्य व्याख्या—

निधनमिति । दिनादौ शयनादौ चेतरेतरयोगो द्वन्द्वः । एते निधनादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । नालः, नालम् = पद्मादीनां दण्डः, जलनिर्गमश्च । 'नालं नाला पद्मदण्डे' इति––(शि० को० पृ० ४० श्लोकः ४४३) । 'नाल काण्डे मृणाल च, नाली शाककलम्बके ।' इति च—(अने० सं० पृ० ४० श्लोकः ५०६) । शे० प्रा० ।

मण्डप–कुतप–द्वीपा दीप–विटप–शूर्प–जम्बु–बिम्बानि ।
आश्रम–सङ्क्रम–सङ्गम–हिम–कर्म–ब्रह्म–लोमानि ॥

अस्य व्याख्या—

मण्डपेति । मण्डपादौ दीपादा अपरार्द्धे तु आश्रमादौ चेतरेतरयोगो द्वन्द्वः । एते मण्डपादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । जम्बुः, जम्बु = वृक्षविशेषः । 'अथ जम्बूः स्त्री, जम्बु जाम्बवम् ।' इति––(वै० पृ० ४६ श्लोकः २२) । बिम्बः, बिम्बम् = मण्डलम्, आकृतिश्च । 'बिम्बोऽत्री, मण्डलं त्रिषु ।' इति––(अम० ना० लिं० पृ० ३५ श्लोकः १५)। 'बिम्बस्तु प्रतिबिम्बे, स्यान्मण्डले पुन्नपुंसकम् । बिम्बिकायाः फले क्लीबं, कृकलासे पुनः पुमान् ।' इति–(मे० पृ० १०५ श्लोकः ७) । 'बिम्बोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु । प्रतिबिम्बे तत्प्रकृतौ, क्लीबे तु बिम्बिकाफले ।' इति च–(वै० पृ० २३४ श्लोकः ५५) । शे० प्रा० ।

गुल्मो–ऽर्मो–द्यम–कुट्टिम–दाडिम–मध्य–मलया–ऽम्बुज–क्षेमाः ।
चक्र—मरण्यं कुल्यं शल्यं गोमय—कषायौ च ॥

अस्य व्याख्या—

गुल्मेति । अर्मादौ अपरार्द्धे तु गोमयादौ चेतरेतरयोगो द्वन्द्वः । एते गुल्मादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । दाडिमः, दाडिमम् = वृक्षविशेषः, दाडिमवृक्षः । 'समौ करकदाडिमौ ।।' इति–(अम० ना० लिं० पृ० १५० श्लोकः ६४) । 'दाडिमस्तु त्रिलिङ्गः, स्यादेलायां करके त्रिषु ।' इति–(मे० पृ० १११ श्लोकः ४४) । 'दाडिम्बोऽपि ।' 'दाडिम्बसारपिण्डीरस्वाद्वम्लशुकवल्लभाः ।' इति च रभसः' इति––(अम० सु० व्या० पृ० १५० स्तं० १ पं० ३२) । मध्यः, मध्यम् = अन्तरम् । "बीच" इति लोके । देहमध्यभागः, विलग्नम्, अवलग्नम्, मध्यमम् । 'मध्यमं चावलग्नं च मध्योऽस्त्री' इति––(अम० ना० लिं० पृ० २३० श्लोकः ७९)। 'मध्योऽवलग्नं विलग्नं मध्यमः ।' इति नाममाला'

इति——(अम० सु० व्या० पृ० २३० स्तं० १ पं० २६)। 'मध्यं विलग्ने न स्त्री स्यान्न्यायेऽन्तरेऽधये त्रिषु।' इति——(मे० पृ० ११६ श्लोकः ४४)। 'न्याय्यावलग्नयोर्मध्यमन्तरे चाधमे त्रिषु।' इति च रभसः' इति——(अम० सु० व्या० पृ० ४२५ स्तं० १ पं० ८)। शे० प्रा०।

समय-कविय-वलया-ऽव्यय-दारु-प्रतिसर-युगन्धर-क्षीरम्।
सूत्रं छत्रं वक्त्रं वस्त्रं पत्रं पवित्रं च॥

अस्य व्याख्या——

समयेति। समयादौ समाहारो द्वन्द्वः। एते समयादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। छत्रः, छत्रम्=आतपत्रम्। "छाता" इति लोके। 'छत्रं स्यादातपत्रम्' इति——(वै० पृ० १०५ श्लोकः १६)। 'छत्रं पुटोटजम्' इति च——(त्रि० शे० पृ० २९९ श्लोकः ३२)। शे० प्रा०।

नेत्रं वज्रं वप्रं राष्ट्रं वासर–शरीर–तिमिराणि।
कुञ्जर–समरो–शीरा विहार–वारा–ऽन्धकाराणि॥

अस्य व्याख्या——

नेत्रमिति। वासरादा अपरार्द्धे तु कुञ्जरादौ विहारादौ चेतरेतरयोगो द्वन्द्वः। एते नेत्रादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। शे० प्रा०।

अङ्गार–शिखर–तोमर–सहस्र–पार्श्वं शराव–गाण्डीवौ।
काशा–ऽऽकाश–कुशा–अङ्कुश–कोश–प्रग्रीव–पात्रीवाः॥

अस्य व्याख्या—

अङ्गारेति। अङ्गारादौ समाहारो द्वन्द्वः। शरावादौ अपरार्द्धे काशादौ चेतरेतरयोगो द्वन्द्वः। एतेऽङ्गारादय. शब्दाः पुन्नपुंसकलिङ्गाः स्युः। शिखरः, शिखरम्=अग्रम्, द्रुमाग्रम्, पर्वताग्रम्, पुलकाग्रं च। 'शिरोऽग्रं शिखरं वा ना' इति। 'कूटोऽस्त्री शिखरं शृङ्गम्' इति च——(अम० ना० लिं० पृ० १२५ श्लोकः ४)। 'अस्त्री' इति पूर्वोत्तराभ्यां सम्बध्यते। 'शिखरोऽस्त्री द्रुमाग्रे चाद्रिशृङ्गपुलकाग्रयोः।' इति—(मे० पृ० १३९ श्लोकः २२६)। 'शिखरं पुलकाग्रयोः। पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च। गिरिवृक्षाग्रकक्षासु' इति च——(अने० सं० पृ० ९९ श्लोकः ६४६)। तथा च प्रयोगः—रोमाञ्चाग्रमात्रयोर्यथा—'रुचिरैः शिखरैः काम्या गृहस्त्री च मृगेक्षणा'। पक्वदाडिमबीजाभमाणिक्यखण्डे यथा——'तन्वी श्यामा शिखरदशना' इत्यनेकार्थकैरवाकरकौमुदी' इति—(अम० सु० व्या० टि० पृ० १२५ स्तं० २ पं० २७-८-९)। कुशः, कुशम्=तृणविशेषः, दर्भविशेषः, बर्हिः। "कुशा" इति

लोके । 'कुशो रामसुते द्वीपे पापिष्ठे योक्त्रमत्तयोः । कुशी फाले, कुशो दर्भे, कुशा वाल्गा, कुशं जले ।' इति--(अने० सं० पृ० ४४ श्लोकः ५५८) । पात्रीवः, पात्रीवम् = यज्ञोपकरण-पात्रभेदः । 'यज्ञद्रव्यं तु पात्रीव(यं)म्' इति--(त्रि० शे० पृ० २९४ श्लोकः ९) । कोशान्तरे तु 'पात्रीरः' इति दृश्यते । शे प्रा० ।

भावं दैवं ताण्डव–मथ–वल्कल–मूल–मुसल–कललानि ।
शील–फल–कमल–मङ्गल–कमण्डलु–बलो–पल–पलालम् ॥

अस्य व्याख्या—

भावमिति । वल्कलादा इतरेतरयोगो द्वन्द्वः । अपरार्द्धे शीलादौ समाहारो द्वन्द्वः । एते भावादयः शब्दाः पुन्नपुंसलिङ्गाः स्युः । शे० प्रा० ।

कुण्डल–तमाल–तैलं शकल–मृणाल–तल–मल–चषालानि ।
शूल—प्रवाल—शम्बल—शाल–निगल–यूष–मेषाणि ॥

अस्य व्याख्या—

कुण्डलेति । कुण्डलादौ समाहारो द्वन्द्वः । शकलादौ इतरेतरयोगो द्वन्द्वः । अपरार्द्धेऽपि शूलादा इतरेतरयोगो द्वन्द्वः । एते कुण्डलादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । मृणालः, मृणालम् = बिसम्, अब्जादीनां मूलम् । 'तदङ्कुर' इत्येके । 'मृणालं नलदे क्लीबं, पुन्नपुंसकयोर्बिसे ।' इति मेदिनी । क्वचिन्मेदिनीपुस्तके तु 'स्त्रीनपुंसकयोः' इत्युपलभ्यते । अपचयविवक्षायां गौरादित्वात् ङीषि 'मृणाली' इत्यपि । तथा च—'सान्द्रं चन्दनमङ्गले वलयिता पाणौ मृणालीलता ।' इति राजशेखरः--इति मुकुटः' इति—(अम० सु० व्या० टि० पृ० १०८ स्तं० २ पं० ३२) । 'अथास्त्रियाम् । मृणालं बिसम्' इति--(अम० ना० लिं० पृ० १०८ श्लोकः ४२) । 'मृणाले तु बिसं बिसम् ।' इति च द्विरूपकोशः' इति--(अम० सु० व्या० पृ० १०८ स्तं० २ पं० ५, ६) । शे० प्रा० ।

कर्ष–करीषा–ऽऽमिष–विष–वर्षा–मर्षं च मास–मांसं च ।
कर्पास–दिवस–चिक्कस–कंसां–ऽस–रस–चमसै–र्जृम्भः ॥

अस्य व्याख्या

कर्षेति । एते माषं मासमांसं जृम्भश्च कर्षादिभिः कर्पासादिभिश्च सह पुन्नपुंसकलिङ्गा भवन्ति । जृम्भः, जृम्भम् = जृम्भणम् । "जँमुआना" इति लोके । 'जृम्भस्तु त्रिषु जृम्भणम्'

इति—(अम० ना० लिं० पृ० ८५ श्लोकः ३५) । 'जृम्भा विकासजृम्भणयोस्त्रिषु' इति च—(मे० पृ० १०६ श्लोकः ४) । अदन्तमोपधत्वात्पुंलिङ्गः । 'जृम्भं नपुंसके च ।' इति नपुंसकलिङ्गोऽपि । शे० प्रा० ।

अवतंस–सानु–निर्यासान्धु–पवासा–ऽपराह्ण–गृह–गेहाः ।
दैवत—कुमुदा—ऽर्धर्चाः शतमानं वारबाणं च ॥

अस्य व्याख्या—

अवतंसेति । अवतंसादौ उपवासादा अपराह्णे तु दैवतादौ चेतरेतरयोगो द्वन्द्वः । अवतंसादीनां व्याख्योदाहरणानि प्रागुक्तानि ।

जलजौ च शंख–पद्मौ भूतः प्रेते च सैन्धवो लवणे ।
उत्कर्षे सारो—ऽयं नै—तत्सारं त्वि–दं न्याय्ये ॥

अस्य व्याख्या—

जलजाविति । जलेऽम्बुनि जातौ उत्पन्नौ, शंखश्च पद्मश्च शंखपद्मौ कम्बुकमला उभयलिङ्गौ स्याताम् । निधिवचनावत्र नृलिङ्गौ एव । शंखः, शंखम् । पद्मः, पद्मम् । भूतशब्दः प्रेते पिशाचे उभयलिङ्गः । भूतः, भूतम् । अन्यत्र क्लीबलिङ्गः । भूतं उपचितं निदग्धम् । भूतानि प्राणिनः । उपमावचनः क्रियावचनश्च अभिधेयलिङ्गः । पितृभूतोऽयं, पितृभूतमिदम् । मातृभूतोऽयं, मामृभूतमिदम् । पितेव मातेव इत्यर्थः । अतीतार्थे तु भूतः भूतं भूता । एवं जातार्थे भूतः भूतं भूता इति । सैन्धवशब्दो लवणे नृक्लीबलिङ्गः । यौगिकस्तु अभिधेयलिङ्गः । सारशब्द उत्कर्षे ना नृलिङ्गः । न्याय्यादनपेते तु क्लीबलिङ्ग एव । इति—(दु० लिं० वृ० पृ० ३६ श्लोकः ७५) ।

धर्मो–ऽय–मित्य–ऽपूर्वे भवति च तत्साधने–ऽपि धर्म्म–मिदम् ।
अर्द्ध–मिदं समभागेऽसमभागे—ऽपि च प्रेम ॥

अस्य व्याख्या—

धर्म इति । अपूर्वे, अनुमेये पुण्ये, धर्मशब्दः पुंलिङ्गः । तस्य साधने दानादौ क्लीबलिङ्ग इत्यर्थः । समभागे तुल्यांशे अर्धशब्दः क्लीबलिङ्गः । यथा—खार्य्यर्धम् । असमभागे विषमांशे नृलिङ्ग एव । यथा—अर्धः पटी, अर्धो नगरम्, ग्रामार्धः, वस्त्रार्धः । इतरत्र तु अभिधेयलिङ्गः । अर्धः पटः, अर्धा नगरी, अर्धं कुलम् । प्रेमशब्दस्य व्याख्या प्रागुक्ता । इति—(दु० लिं० वृ० पृ० ३६ श्लोकः ७६) ।

लोह–पटह–देह–द्वीपिन–दृढ–मातङ्क–कण्टक–विटङ्कम् ।
कान्तार–जठर–कन्दर–शेखर–केदार––वर––पारम् ॥

अस्य व्याख्या––

लोहेति । लोहादौ, आतङ्कादौ अपरार्द्धे तु कान्तरादौ च समाहारो द्वन्द्वः । एते लोहादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । कन्दरः, कन्दरम् = अङ्कुशः, कृत्रिमगृहाकारगिरिविवरम्, गुहा च । 'दरी तु कन्दरो वा स्त्री' इति—(अम० ना० लिं० पृ० १२६ श्लोकः ६) । 'कन्दरस्त्वङ्कुशे पुंसि, गुहायां च नपुंसकम् ।' इति––(मे० पृ० १३२ श्लोकः १३२) । 'कन्दरोऽङ्कुशे ॥ विवरे गुहायां च' इति—(अने० सं० पृ० ९२ श्लोकः ५६२-३) । पारः, पारम् = परतीरम् । 'पारावारे परार्वाची तीरे' इति––(अम० ना० लिं० पृ० ९५ श्लोकः ८) । 'पारं प्रान्ते परतटे' इति—(अने० सं० पृ० ३६ श्लोकः ४४८) । 'पारं परतटे प्रान्ते न स्त्री' इति—(मे० पृ० १२६ श्लोकः ५६) । शे० प्रा० ।

खण्डल–मण्डल–मुकुलाः कपाल–खल–कुलिश–बाल––पूलाश्च ।
स्थान––फलको–त्पल–निदाघ–मेचक–वितान–कुसुमाश्च ॥

अस्य व्याख्या––

खण्डलेति । खण्डलादौ कपालादौ अपरार्द्धे तु स्थानादौ चेतरेतरयोगो द्वन्द्वः । एते खण्डलादयः शब्दाः पुंनपुंसकलिङ्गाः स्युः । खण्डलः, खण्डलम् = छिद्रवस्त्रैश्चीरम्, खण्डवत्, खण्डशब्दवत् । यावन्तः खण्डशब्दार्थास्तावन्तः खण्डलस्यापीत्यर्थः । 'छिद्रवस्त्रैश्चीरं खण्डलमस्त्रियाम् ।' इति—(वै० पृ० १६९ श्लोकः १३०) । मण्डलः, मण्डलम् = भूभागविशेषः, श्वा च । 'मण्डलं परिवेशश्च परिधिश्चोपसूर्यकम् ।' इति भागुरिः' इति–––(अम० सु० व्या० पृ० ४२ स्तं० १ पं० २७-८) । 'स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च । कुष्ठप्रभेदेऽप्युपसूर्यकेऽपि, भुजङ्गभेदे शुनि मण्डलः स्यात् ।' इति—(वि० प्र० पृ० १५५ श्लोकः ८१) । 'मण्डलं परिधौ कोठे देशे द्वादशराजसु । क्लीबेऽथ निवहे बिम्बे त्रिषु, पुंसि तु कुक्कुरे ॥' इति च–––(मे० पृ० १५३ श्लोकः १२१) । पूलः, पूलम् = बद्धतृणसञ्चयविशेषः । 'पूला' 'पूली' वेत्यपि' लोकेऽपि । 'पूलोऽस्त्री तृणपञ्चिका ।' इति––(वै० पृ० १२८ श्लोकः ६५) । शे० प्रा० ।

स्नेह–मुख–मूलक–पटल–वर्चस्क–कुणप–विडङ्ग–नीडाश्च ।
पिष्ट–पलित–कुक्कुट–मरक–मुभयलिङ्गा इति समाप्ताः ॥

अस्य व्याख्या––

स्नेहेति । स्नेहादौ इतरेतरयोगो द्वन्द्वः । अपरार्द्धे पिष्टादौ समाहारो द्वन्द्वः ।

एते स्नेहादयः शब्दाः पुन्नपुंसकलिङ्गाः स्युः । पटलः, पटलम् = गृहोपरिभागः, नेत्ररोगविशेषः । ग्रन्थप्रभेदः–काण्डः, वर्गः, परिच्छेदश्च । 'पटलः काण्डमस्त्रियाम् ।' इति––(त्रि० शे० पृ० ३११ श्लोकः २५) । 'पटलं नेत्ररोगे च परिच्छेदसमूहयोः । तिलके पुन्नपुंसि स्या,––च्छदिः स्त्री पटलीति च ।' इति––(ना० मं० पृ० ८१ पं० १, २) । 'अथ पटलं पिटके च परिच्छदे । छदिर्दृग्रोगतिलके क्लीबं, वृन्दे पुनर्न ना ॥' इति––(मे० पृ० १५२ श्लोकः १०५) । 'पटलं पिटकौघयोः । तिलकच्छदिषोर्नेत्ररोगेऽध्याये परिच्छदे ।' इति च––(अने० ति० पृ० ५५ श्लोकः १८४-५) । विडङ्गः, विडङ्गम् = कृमिहा, कृमिघ्नमौषधम् । 'विडङ्गस्त्रिष्वभिज्ञे स्यात्, कृमिघ्ने पुन्नपुंसकम् ।' इति––(मे० पृ० २५ श्लोकः ४७) । नीडः, नीडम् = पक्षिवासविशेषः, पक्षिनिलयः । "घोंसला" "कोल" इति वा लोके । 'कुलायस्तु पञ्जरं नीडमस्त्रियाम् ।' इति––(वै० पृ० ३० श्लोकः ४९) । 'कुलायो नीडमस्त्रियाम् ॥' इति––(अम० ना० लिं० पृ० २०० श्लोकः ३७) । 'नीडं स्थानकुलाययोः ।' इति च—(मे० पृ० ४१ श्लोकः १७) । शे० प्रा० ।

तथा च पुरुषोत्तमदेवः–(त्रि० शे० पृ० ३८८ तः ३९२ या० श्लोकः ८ तः १४ या०) ।

पुन्नपुंसकयो–र्दारु–जीवातु–स्थाणु–सीधवः ।
स्याद् वास्तु हिङ्गु तितउ सानु कम्बु कमण्डलु ॥

अस्य व्याख्या—

पुन्नपुंसकयोरिति । दार्वादौ इतरेतरयोगो द्वन्द्वः । एते दार्वादयः शब्दाः पुन्नपुंसकयोः पुन्नपुंसकलिङ्गा भवन्ति इत्यर्थः । दार्वादिशब्दानां व्याख्योदाहरणानि प्रागुक्तानि ।

गोमय–कुमुद–बिम्ब–शंखा–ऽऽश्रम–शूल–सुवर्ण–तोरणाः ।
नूपुर–शिखर–तूर्य्य–निर्य्यास–गृहा–ऽङ्कुश–र्बाह–पल्लवाः ॥

अस्य व्याख्या—

गोमयेति । गोमायादौ नूपुरादौ चेतरेतरयोगो द्वन्द्वः । एते गोमयादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति । व्याख्यादयः प्राग्वत् ।

वृत–दिन–मास–वर्ष–दल–वल्कल–कोटर–षण्ड–चामराः ।
चन्दन–पद्म–धर्म–कोलाहल––किसलय—देह—दोहदाः ॥

अस्य व्याख्या—

व्रतेति। व्रतादौ चन्दनादौ चेतरेतरयोगो द्वन्द्वः। एते व्रतादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। चामरः, चामरम् = चमरीपुच्छनिर्मितं वालव्यजनम्, प्रकीर्णकम्। "चौंर" चौंरी" इति च लोके। 'चामरा चामरं वालव्यजनं रोमगुच्छकम्।' इति रभसः' इति—(अम० सु० व्या० पृ० २७५ स्तं० २ पं० १७)। 'चामरं चामराऽपि च। दण्डे च वालव्यजने' इति च—(मे० पृ० १३३ श्लोकः १५४)। 'किसलयः, किसलयम् = नवपत्रम्, पल्लवः। "नया पत्ता" इति लोके। 'किसलयमपि तरुरागं विदुर्मलतायावकं प्रवालं च।' इति—(हा० त्र० पृ० ४०१ श्लोकः ९१)। 'पल्लवो,-ऽस्त्री किसलयम्' इति च—(अम० ना० लिं० पृ० १३२ श्लोकः १४)। तथा च—'किसलयैः सलयैरिव' इति रघुः—इति मुकुटः' इति—(अम० सु० व्या० टि० पृ० १३२ स्तं० २ पं० ४२)। 'किशलयमपि'। शे० प्रा०।

कुलिश–ध्वज–कार्षापण–पिनाक–मुस्ता–ऽन्धकार–शृङ्ग–वलयाः।
पटल––प्रवाल––चषको––पवास––कासार––कटक–सन्तानाः॥

अस्य व्याख्या—

कुलिशेति। कुलिशादौ पटलादौ चेतरेतरयोगो द्वन्द्वः। एते कुलिशादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। सन्तानः, सन्तानम् = वंशः, देववृक्षः, विस्तारश्च। 'सन्तानः सन्ततौ देववृक्षे चापत्यगोत्रयोः।' इति—(त्रि० शे० पृ० ३५३ श्लोकः २६८)। 'क्लीबेऽपि।' 'सन्तानं सन्ततौ गोत्रे स्यादपत्येऽमरद्रुमे।' इति च—(श० र० स० पृ० २०० पं० १८)। शे० प्रा०।

आकाश–कुञ्ज–कुतपौ–दन–वारबाण–
प्रस्था–ऽवतंस–नख–मण्डप–कच्छ–पुच्छा।
कान्तार–कङ्कण–तडाग–किरीट–राष्ट्र—
तीर्थ–व्रण–स्तबक–सङ्क्रम–पीठकानि॥

अस्य व्याख्या

आकाशेति। आकाशादौ कान्तारादौ चेतरेतरयोगो द्वन्द्वः। एते आकाशादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। पीठकः, पीठकम् = आसनविशेषः, व्रतिनामासनम्। 'पीठः' इत्यपि पाठः। 'पीठमासनम्॥' इति—(अम० ना० लिं० पृ० २४९ श्लोकः १३८)। 'विष्टरः पीठमस्त्रियाम्।' इति—(त्रि० शे० पृ० २९३ श्लोकः ४१)। शे० प्रा०।

समर–सरक–रण–विटपा–ऽङ्गार–गैरिक–दैवत–कूटा–ऽऽगाराः।
प्रोथ–मुहूर्त्त–दिवस–फलकानि काश–निदाघ–मुषल–तिलकानि॥

अस्य व्याख्या—

समरेति। समरादौ, अपराद्ध तु प्रोथादौ काशादौ चेतरेतरयोगो द्वन्द्वः। एते समरादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। गैरिकः, गैरिकम्=पर्वतजात उपधातुभेदः। ''गेरु'' इति लोके। स्वर्णं च। 'स्वर्णेऽपि गैरिकम्' इति—(अम० ना० लिं० पृ० ३९९ श्लोकः १२)। 'गैरिकं धातुरुक्मयोः।' इति—(मे० पृ० ७ श्लोकः ८४)। 'गैरिकं धातौ रुक्मे रक्ते च हल्लके।' इति च—(शि० को० पृ० ३ श्लोकः २६)। कूटागारः, कूटागारम्=वलभी, वडभी, चन्द्रशालिका, मृषागारम्, स्त्रीणां क्रीडागृहं च। 'कूटागारं तु वलभी' इति—(वै० पृ० १६१ श्लोकः ३१)। शेषं प्राग्वत्।

वल्मीक–वृषण–द्रोण–गाण्डीव–निगडानि च।
मुकुलादि च विज्ञेयं शिष्टसन्दर्भतोऽपरम्॥

अस्य व्याख्या—

वल्मीकेति। वल्मीकादौ इतरेतरयोगो द्वन्द्वः। एते वल्मीकादयः शब्दाः पुन्नपुंसकलिङ्गा भवन्ति। वल्मीकादीनां व्याख्योदाहरणानि प्रागुक्तानि। अत्रादिपदात् मृणालापणामिषादि। अपरम् अन्यच्च शिष्टसन्दर्भतः शिष्टानां स्थिरबुद्धीनाम्। 'न पाणिपादचपलो न नेत्रचपलो यतिः (मुनिः) न च वाक्चपलश्चैवमिति शिष्टस्य लक्षणम्।' इत्युक्तलक्षणवतां महेश्वरेन्द्रचन्द्रपाणिनिवररुचि-प्रभृतीनां सन्दर्भतः काव्यादिरचनाविशेषतः। 'गूढार्थस्य प्रकाशश्च सारोक्तिः श्रेष्ठता तथा। नानार्थकत्वं वेद्यत्वं सन्दर्भः कथ्यते बुधैः।' इत्युक्तलक्षणात् सन्दर्भविशेषाद् वा। विज्ञेयं बोद्धव्यम्।' इति—(त्रि० शे० टी० पृ० ३९२ श्लोकः १४)।

अथेदानीं संक्षेपतः क्रमरहितान् पुन्नपुंसकलिङ्गवाचकशब्दानाहामरः—(अम० ना० लिं० पृ० ४६०-१ श्लोकः ३२ तः ३६ या०)।

पुन्नपुंसकयोः शेषो–ऽर्धर्च–पिण्याक–कण्टकाः॥
मोदक–स्तण्डक–षृङ्कः शाटकः कर्पटोऽर्बुदः।
पातको–द्योग–चरक–तमाला–ऽऽमलका नडः॥
कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेम—कुट्टिमम्।
सङ्गमं शतमाना–ऽर्म–शम्बला–ऽव्यय–ताण्डवम्॥

कवियं कन्द–कर्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीव–पात्रीवे यूषं चमस–चिक्कसौ ।।

एषां व्याख्या—

पुमिति । 'पुन्नपुंसकयोः' इत्यधिकारः । एतेऽर्धर्चादयश्चिक्कसान्ताः शब्दाः पुंक्लीबलिङ्गा भवन्ति । शेषः प्रागुक्तादन्यः । यथा—निधिवाचकौ यौ शंखपद्मौ तौ पुंलिङ्गौ । कम्बुनलिनवाचिनौ तु पुंक्लीबलिङ्गौ । योऽत्रत्यशब्दः सोऽपि यत्पर्य्याये बाधितस्तत्पर्यायाद्भिन्नो यदि तदा नृक्लीबयोरित्यर्थः । अर्धर्चादौ चेतरेतरयोगो द्वन्द्वः । अर्धर्चादीनां व्याख्यादयः प्राग्वद् बोध्याः । मोदक इति । पातकादौ इतरेतरयोगो द्वन्द्वः । मोदकादीनां व्याख्या प्राग्वत् । कुष्ठमिति । क्षेमादौ शतमानादौ च समाहारो द्वन्द्वः । कुष्ठादीनां व्याख्या प्राग्वत् । कवियमिति । प्रग्रीवादौ चेतरेतरयोगो द्वन्द्वः । यूपः, यूपम् = यज्ञाङ्गभेदः, पशुबन्धनकाष्ठविशेषः, तूदवृक्षश्च । "शहतूत" इति लोके । 'यूपोऽस्त्री संस्कृतस्तम्भः' इति–(वै० पृ० ९१ श्लोकः १०३)। शेषशब्दानां व्याख्या प्राग्वत् ।

अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
त–न्नो–क्त–मिह लोकेऽपि त–च्चैद–स्त्य–स्तु शेषवत् ।।" इति ।।

अस्य व्याख्या—

अर्धचेति । अर्धर्चादौ अस्मिन् वर्गे पुन्नपुंसकाधिकाधिकारे इति यावत् । घृतादीनां घृतप्रभृतिशब्दानां यत्पुंस्त्वाद्यं पुंलिङ्गत्वप्रभृति पाणिन्यादिभिः पाणिनिकात्यायनवररुचिपूर्वैर्महर्षिभिरुक्तं कथितं तत्तु वैदिकम् । श्रुतौ प्रसिद्धमित्यभिप्रायः। अस्मात्कारणात् तत् इहास्मिन् लिङ्गानुशासनवर्गे नोक्तं न कथितम् । चेत्तल्लोकेऽप्यस्ति तर्हि तु शेषवत् उक्तात्कथितादन्यः शेषस्तद्वदस्तु । अर्थाच्छिष्टानां स्थिरमतीनां प्रणीतशास्त्रेषु ये प्रयोगास्तेभ्यो ग्राह्यमित्याशयः ।

एवं वैजयन्त्यां यादवेनापि संक्षेपतः पुन्नपुंसकलिङ्गवाचकशब्दा उक्तास्ते यथा—(वै० पृ० २९१ श्लोकः २८ तः ३१ या०) ।

अर्धर्चादिगणे[1] प्रोक्तं सर्वं नृक्लीबलिङ्गकम् ।
तच्च लिङ्गान्तरे–ऽनुक्तं सर्वमुक्तं घृतादि च ।।

पाणिनीये तु—(१) (अर्धर्चाः पुंसि च ।। २।४।३१) । अर्धर्चादयः शब्दाः पुंसि, क्लीबे च स्युः । अर्धर्च, गोमय, कषाय, कार्षापण, कुतप, कुणप, कपाट, शंख, गूथ, यूथ, ध्वज, कबन्ध, पद्म, गृह, सरक, कंस, दिवस, यूष, अन्धकार, दण्ड, कमण्डलु, मण्ड, भूत, द्वीप, द्यूत, चक्र, धर्म, कलश, कर्म, मोदक, शतमान, यान, नख, नखर, चरण, पुच्छ, दाडिम, हिम, रजत, सक्तु, पिधान, सार, पात्र, घृत, सैन्धव,

तत्र केचिद् घृतादीनां पुंस्त्वाद्यं वैदिकं विदुः ।
अत एकेन लिङ्गेन ते पूर्वमिह वर्णिताः ॥

अनयोर्व्याख्या—

अर्धर्चेति । तत्रेति च । अर्धर्चादिगणो महर्षिपाणिनिना यत्प्रोक्तं कथितं तत्सर्वं समस्तं नृक्लीबलिङ्गकं पुन्नपुंसकलिङ्गकं ज्ञेयम् । यदनुक्तं तत्सर्वं लिङ्गान्तरे अन्यस्मिन् लिङ्गे बोध्यम् । यद् घृतादि आज्यप्रभृति चोक्तं तत्र केचिच्छब्दशास्त्रज्ञा घृतादीनामाज्यप्रभृतीनां पुँस्त्वाद्यं नृलिङ्गत्वाद्यं वदन्ति तद् वैदिकमाम्नायकं विदुर्जानन्ति । अतोऽस्मात्कारणात् पूर्वं प्राक् ये शब्दा एकेन लिङ्गेन वर्णितास्ते इहोक्ताः ।

पिशाचादिषु भूतोऽस्त्री शङ्कुरप्राणिगोचरः ।
विशेषकञ्च तिलकं पुण्ड्रे ब्रह्मा द्विजे–ऽब्जजे ॥
क्ष्वेडा–श्च कन्दलाः कालकूटाद्या–स्तु कमण्डलुः ।
सक्तुः परीत–न्महिमा कर्म पर्व च लोम दोः ॥" इति ।

अनयोर्व्याख्या—

पिशाचेति । पिशाचादिषु प्रेतप्रभृतिषु भूतः भूतशब्दः, अप्राणिगोचरः शङ्कुः, पुण्ड्रे पुण्ड्रे विशेषकं तिलकं च, द्विजे ब्राह्मणे, अब्जजे कमलजातेऽपि ब्रह्मा च पुन्नपुंसकयोः स्युः ।

औषध, आढक, चषक, द्रोण, खलीन, पात्रीव, षष्टिक, वारबाण, प्रोथ, कपित्थ, शुष्क, शाल, शील, शुल्क शीधु, कवच, ऋण, कपट, शीकर, मुसल, सुवर्ण, वर्ण, पूर्ण, चमस, क्षीर, कर्ष, आकाश, अष्टापद, मङ्गल निधन, निर्य्यास, जृम्भ, वृत्त, पुस्त, बुस्त, क्ष्वेडित, शृङ्ग, निगड, खल, मधु, मूल, मूलक, स्थूल, शराव नाल, वप्र, विमान, मुख, प्रग्रीव, शूल, वज्र, पीयूष, कटक, कण्टक, कर्पट, शिखर, कल्क, नाट, मस्तक, वलय कुसुम, तृण, पङ्क, कुण्डल, किरीट, कुमुद, अर्बुद, अङ्कुश, तिमिर, आश्रम, भूषण, इक स, मुकुल, वसन्त तटाक, तडाग, पिटक, विटङ्क, विडङ्ग, पिण्याक, माष, कोश, फलक, दिन, दैवत, पिनाक, समर, स्थाणु अनीक, उपवास, शाक, कर्पास, विशाल, चषाल, खण्ड, दर, विटप, रण, बल, मृणाल, हस्त, आर्द्र, हल, सूत्र, ताण्डव, गाण्डिव, मण्डप, पटह, सौध, यौध, पार्श्व, शरीर, देह, फल, छल, पुर, राष्ट्र, बिम्ब, अम्बर, कुट्टिम मण्डल, कुक्कुट, कुडव, ककुद, खण्डल, तोमर, तोरण, मञ्चक, पञ्चक, पुंख, मध्य, वाल, बाल, वल्मीक वर्ष, वस्त्र, वसु, उद्यान, उद्योग, स्नेह, स्तन, स्तेन, स्वर, सङ्गम, निष्क, क्षेम, शूक, छत्र, क्षत्र, पवित्र, यौवन, मालक, पालक, मूषिक, मण्डल, वल्कल, कुञ्ज, विहार, लोहित, विषाण, भवन, अरण्य, पुलिन, दृढ, आसन, ऐरावत, शूर्प, तीर्थ, लोम, तमाल, लोह, दण्डक, शपथ, प्रतिसर, दारु, धनुष्, मान, वर्चस्क, कूर्च, तण्डक, मठ सहस्र, ओदन, प्रवाल, शकट, अपराह्ण, नीड, शकल, तण्डुल, मुस्तक ॥ इत्यर्धर्चादिः ॥ सि० कौ० पृ० ८१ पं० ३ ।

ब्रह्मा, ब्रह्म = द्विजः ब्राह्मणः, अब्जजः कमलोद्भवः, वेधाश्च। 'ब्रह्म तत्त्वतपोवेदे न द्वयोः, पुंसि वेधसि।' इति--(मे० पृ० ८६ श्लोकः ९६)। एते क्ष्वेडादयो दोःपर्य्यन्ताः शब्दाः पुन्नपुंसकलिङ्गाः स्युः। कन्दलः, कन्दलम् = कलापः, उपरागः, नवाङ्कुरः, कलहः, युद्धम्, भूमिकन्दलीपुष्पं च। 'कन्दलं कलहे शब्दे न्यङ्कुभेदोपरागयोः। कलापेऽपि नवाङ्कुरे' इति—(अने० ति० पृ० ४३ श्लोकः ५४)। परीतत्, परीतत् = आंत्रम्। 'अस्त्री परीतदांत्रं स्यात्' इति-- (वै० पृ० १८२ श्लोकः ११३)। पर्वा, पर्व = दर्शप्रतिपत्सन्धिः, उत्सवम्, ग्रन्थिश्च। 'पर्व क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे। दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि।' इति--(मे० पृ० ८९ श्लोकः ८८)। शेषशब्दानां व्याख्या प्रागुक्ता।

इति पुन्नपुंसकलिङ्गानुशासनम्।

अथ स्त्रीनपुंसकलिङ्गानुशासनम् ।

अथेदानीं नखादीन् मनोज्ञान्तान् स्त्रीनपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ९ श्लोकः १२२ तः १२७ या०) ।

स्त्रीक्लीबयो–र्नखं शुक्तौ विश्वं मधुक–मौषधे ।
माने लक्षं मधौ कल्यं क्रोडा–ऽङ्के तिन्दुकं फले ॥१॥
तरलं यवाग्वां पुष्पे पाटलं पटलं चये ।
वसन्ततिलकं वृत्ते कपालं भिक्षुभाजने ॥२॥
अर्द्धपूर्वपदो नावो ङ्यकर्त्तृल्युटौ क्वचित् ।
चौराद्य—मनोज्ञाद्य—कञ्'······ ॥ इति ॥

एषां व्याख्या—

स्त्रीति । तरलमिति । अर्द्धेति च । शुक्तौ नखम् । औषधे विश्वम्, मधुकं च । माने लक्षम् । मधौ कल्यम् । अङ्के क्रोडा । फले तिन्दुकम् । यवाग्वाम् तरलम् । पुष्पे पाटलम् । चये पटलम् । वृत्ते वसन्ततिलकम् । भिक्षुभाजने कपालम् । अर्द्धपूर्वपदः नावः । क्वचित् ङ्यकर्तृल्युटौ । अकञ् चौराद्यमनोज्ञादि चैते स्त्रीक्लीबयोः स्त्रीक्लीबलिङ्गा भवन्तीत्यर्थः । यथा—इयं नखी, इदं नखम् = शुक्तिः । "सीप" इति लोके । 'नखी स्त्रीक्लीबयोः शुक्तौ, नखरे पुन्नपुंसकम् ।' इति—(मे० पृ० २० श्लोकः २) । इयं विश्वा, इदं विश्वम् = औषधविशेषः, शुण्ठी । "सूँठ" इति लोके । 'विश्वा त्वतिविषायां स्त्री, जगति स्यान्नपुंसकम् । न ना शुण्ठयां, पुंसि देवप्रभेदेष्व,–(त्व) खिले त्रिषु ।' इति—(मे० पृ० १५९ श्लोकः २३) । इयं मधुका, इदं मधुकम् = औषधिविशेषः । 'श्यामकङ्गुस्तु मधुका' इति । 'मधूलं तु मधूर्न स्त्री, मधुकं तत्पुरातनम् ।' इति च यादवः' इति—(वै० पृ० १३४ श्लोकः १३४) । 'मधुकं क्लीतके, कृष्णकङ्गुकाश्मर्ययोः स्त्रियाम् ।' इति च—(शि० को० पृ० ४ श्लोकः ४०) । इयं लक्षा, इदं लक्षम् = मानविशेषः, शतसहस्रम्, सहस्राणां शतम् । "लाख" इति लोके । 'लक्षा न पुंसि संख्यायां, क्लीबं (बे) व्याजशरव्ययोः ।' इति—(मे० पृ० १६७ श्लोकः २३) । इयं कल्या, इदं कल्यम् = मधु, कल्याणवाक् च । 'कल्यं प्रभाते

मधुनि मज्जे दक्षे निरामये । कल्या कल्याणवाचि स्यात्' इति--(अने० सं० पृ० २९ श्लोकः ३५०-१) । इयं क्रोडा, इदं क्रोडम् = अङ्कः, उत्सङ्गः, रक्षश्च । 'क्रोडः शनौ सू(शू)करे ना, न पुमानङ्करक्षसोः ।' इति--(मे० पृ० ४० श्लोकः ३) । इयं तिन्दुकी, इदं तिन्दुकम् = फलम्, तिण्डिशम्, लोमशफलम् । "ढींढस" इति लोके । 'तिन्दुकी स्याद् द्वयोः कालस्कन्धे, क्लीबं तु तिण्डिशे ।' इति--(शि० को० पृ० ३ श्लोकः २९) । 'तिण्डिशं लोमशफलं फलशाकेषु सिद्धकम् ।' इति च कोशान्तरम्' इति-(शि० को० टी० पृ० ६३ पं० १४) । तरला, तरलम् = यवागूः, परिसिक्था, श्राणा, षड्गुणजलपक्वघनद्रवद्रव्यविशेषः । "मांड की काँजी" । इति लोके । 'तरलः पुंसि धत्तूरे, यवागूसुरयोः स्त्रियाम् ।' इति—(शि० को० पृ० ४२ श्लोकः ४५९) । 'तरलं चञ्चले पिङ्गे भास्वरेऽपि नपुंसकम् । हारमध्यमणौ पुंसि, यवागूसुरयोः स्त्रियाम् ।' इति च-(मे० पृ० १५२ श्लोकः ९५-६) । इयं पाटला, इदं पाटलम् = पुष्पम्, पाटलापुष्पम् । 'पाटला पाटलौ स्त्री, स्यादस्य पुष्पे पुनर्न ना । आशुधान्ये पुमान्, श्वेतरक्तवर्णेऽपि वाच्यवत् ।' इति--(मे० पृ० १५३ श्लोकः १०९) । इयं पटली, इदं पटलम् = चयः, समूहः । 'पटल्यपु सुश्लिष्टानां सजातीयगणे कुलम् ।' इति--(वै० पृ० १८६ श्लोकः ६) । 'अथ पटलं पिटके च परिच्छदे । छदिर्दृग्रोगतिलके क्लीबं, वृन्दे पुनर्न ना ।' इति-(मे० पृ० १५२ श्लोकः १०५) । इयं वसन्ततिलका, इदं वसन्ततिलकम् = वृत्तविशेषः, चतुर्दशाक्षरच्छन्दः । तथा च 'कान्ते ! वसन्ततिलकां किल तां वदन्ति ।' इति कालिदासः--(श्रु० बो० पृ० २७ श्लोकः ३७) । इयं कपाली, इदं कपालम् = भिक्षुभाजनम्, यतीनां मृत्मयकर्परादिभिक्षापात्रम् । इयं अर्द्धनावी, इदं अर्द्धनावम् = नावोऽर्द्धम्, नौकाया अर्द्धम् । "आधी नाव" इति लोके । ङ्यकर्त्तृल्युटौ तु यथा—इयं—वैदग्धी, इदं-वैदग्ध्यम् = चातुर्य्यम्[1] । "चतुराई" इति लोके । विदग्धस्य भावः कर्म वा । इयं राजधानी, इदं राजधानम् = कोट्टः, स्कन्धावारः, राजपुरम् । इयं-आस्थानी, इदं-आस्थानम् = सभा । चौराद्यमनोज्ञाद्यकन्-मनोज्ञाद्यन्तर्गणवर्जितेभ्यश्चौरादिभ्यो योऽकञ्प्रत्ययस्तदन्तं तु यथा—इयं चौरिका, इदं चौरकम् = चौर्य्यम्, चोरस्य भावः कर्म वा । इयं मनोज्ञिका, इदं मनोज्ञकम् = मनोज्ञता, मनोज्ञस्य भावः ।

अथेदानीं क्रमसहितान् कान्तादीन् शान्तपर्यन्तान् स्त्रीनपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ९ श्लोकः १२२-३-४) ।

... ... कथानक—कशेरुके ॥३॥

वंशिक-वक्रोष्ठिक-कन्यान्याकुब्ज-पीठानि नक्त-मवहित्थम् ।
रशनं रसना-ऽऽच्छोटन-शुल्बं तुम्बं महोदयं कांस्यम् ॥४॥

---

(१) (स्त्रियां तु चातुरी) ॥ तथा च प्रयोगः—'या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी ।' इति—(श० चिं० पृ० ९१५ स्तं० १ पं० २०) ।

मृगव्य-चव्ये च वणिज्य-वीर्य्य—
नासीर-मात्रा-ऽपर-मन्दिराणि ।
तमिस्र—शस्त्रे नगरं मसूर—
त्वक्क्षीर—कादम्बर-काहलानि ॥५॥
स्थाली-कदल्यौ स्थल-जाल-त्तिला—
गोला—युगल्यौ बडिशं च'···इति ॥

अनयोर्व्याख्या—

कथानकेति । वंशिकेति । मृगव्येति । स्थालीति च । कथानकादौ, वंशिकादौ चेतरेतर-योगो द्वन्द्वः । रसनादौ समाहारो द्वन्द्वः । मृगव्यादौ, वणिज्यादौ, तमिस्रादौ, मसूरादौ, स्थाल्यादौ चेतरेतरयोगो द्वन्द्वः । एते कथानकादयो बडिशान्ताः शब्दाः स्त्रीनपुंसकलिङ्गा भवन्ति । इयं कथानकी, इदं कथानकम्=लघुकथा, स्वल्पकथा । "गल्प" इति । "छोटा किस्सा" इति च लोके । इयं कशेरुका, इदं कशेरुकम्=पृष्ठस्यास्थि । "मेरुदण्ड" इति । "पीठ के पीछे की हड्डी" इति च लोके । 'पृष्ठस्यास्थि, कशेर्वना ।' इति—(वै० पृ० १८२ श्लोकः ११५) । इयं वंशिका, इदं वंशिकम्=वंशी, वेणुः, मुरली, अगुरु च । 'वंशकं वंशिकं शीर्षं प्रकरं मृदुलं लघु ।' इति । 'वंशे तु वंशिका पूरी मुरली वेणुका च सा ।' इति च—(वै० पृ० १४६ श्लोकः १२५) । इयं वक्रोष्ठिका, इदं वक्रोष्ठिकम्=स्मितम्, अदृष्टरदहास्यम्, इषद्धास्यम् । 'स्मितं त्वदृष्टदशने हासो वक्रोष्ठिका न ना ।' इति—(वै० पृ० १४२ श्लोकः ८३) । इयं कन्याकुब्जा, इदं कन्याकुब्जम्=पुरविशेषः, कुशस्थलम्, महोदयम्, गाधिपुरम् । "कन्नौज" इति । "महोबा" इति च लोके । "कान्यकुब्जम्" इत्यपि । 'कुशस्थलं कान्यकुब्जम्' इति—(त्रि० शे० पृ० २७९ श्लोकः १३) । 'कान्यकुब्जम् महोदयम् । कन्याकुब्जं गाधिपुरं कौशं कुशस्थलं च तत् ।' इति—(अभि० सं० अभि० चिं० पृ० ३८ श्लोकः ९७३-४) । कन्याः कुब्जा यत्र, तत्र हि वायुना कन्याशतस्य कुब्जत्वं कृतमिति अथवा महानुदयो वैभवं यस्य, यत्र वा । इयं पीठी, इदं पीठम्=दारुजमासनम् । "काठ की चौकी" इति लोके । 'विष्टरं त्वासनं पीठं दारुजम्' इति—(वै० पृ० १७२ श्लोकः १६४) । पुरुषोत्तमदेवस्त्वस्त्रियामित्याह—'विष्टरः पीठमस्त्रियाम् ।' इति—(त्रि० शे० पृ० २९३ श्लोकः ४१) । इयं नक्ता, इदं नक्तम्=कलिकारी, रात्रिश्च । 'दीप्ता विशल्याऽग्निमुखी हली नक्तेन्दुपुष्पिका ।' इति—(रा० नि० पृ० १३६ श्लोकः ७) । 'नक्तं निशीथिनी दोषा तारा-भूषा विभावरी ।' इति च-(रा० नि० पृ० ४१६ श्लोकः ३३) । इयं-अवहित्था, इदं-अवहित्थम्=आकारगुप्तिः, आकारगोपनम् । 'अवहित्थाकारगुप्तिः' इति—(अम० ना० लिं० पृ० ८४ श्लोकः

३४)। 'आकारगोपनायामपटीकाप्यवकटापि स्त्री। न पुमानवहित्था, स्यादक्ली गृहजालिका-ऽप्यस्याम्।' इति--(वै० पृ० १४३ श्लोक: ८६)। 'अवहित्थमथोग्रता' इति भरतोक्तेः क्लीबमपि-इति च मुकुटपीयूषबुधमनोहरा' इति—(अम० सु० व्या० टि० पृ० ८४ पं० ४०)। इयं रशना, इदं रशनम्। इयं रसना, इदं रसनम्=काञ्ची, जिह्वा च। 'तालव्या अपि दन्त्याश्च शम्बशम्बल-शूकराः। रशनाऽपि च जिह्वायाम्' इति। 'जिह्वायां रशना तथा।' इत्युक्तेर्दन्त्यतालव्यमध्योऽयम्। 'रसनं स्वदने ध्वनौ। जिह्वायां तु न पुंसि स्यात्,' इति--(मे० पृ० ९१ श्लोक: १२)। 'रसनं तु ध्वनौ स्वादे, रसज्ञारास्नयोः स्त्रियाम्।' इति रभसः'—(अम० सु० व्या० पृ० २३४ स्तं० २ पं० १०-१)। 'रसनं निस्वने स्वादे, रसना काञ्चिजिह्वयोः।' इत्यजयधरणी' इति--(अम० सु० व्या० पृ० २४० स्तं० २ पं० १५)। 'रसनं स्वदने ध्वाने, रसना काञ्चिजिह्वयोः। रसनं चापि रास्नायाम्' इति च—(वि० प्र० पृ० ८७ श्लोक: ३०)। इयं-आच्छोटनी, इदं-आच्छोटनम्=अङ्गुलीनां शब्दः। "उँगलियां चटकाना" इति। "चुटकी बजाना" इति च लोके। इयं शुल्बा, इदं शुल्बम्=रज्जुः, वराटः। 'गुणो वराटो रज्जुः स्त्री, न ना शुल्बा, वटी त्रयी।' इति--(वै० पृ० १३८ श्लोक: ३०)। इयं तुम्बा, इदं तुम्बम्=रथनाभिका, तुम्बी, अलाबू च। 'तुम्बा तु नाभिका' इति--(वै० पृ० ११५ श्लोक: १३५)। इयं महोदया, इदं महोदयम्=पुरविशेषः, कान्यकुब्जम्। इयं कांस्या, इदं कांस्यम्=सौराष्ट्रम्, घण्टास्वनम्, प्रभासम्, असुराह्वयम्। "काँसा" इति लोके। 'कास्यं तु कृत्रिमं नाट्यं प्रभासमसुराह्वयम्। घण्टास्वनं भूरिलोहम्' इति--(वै० पृ० ४३ श्लोक: २८)। इयं मृगव्या, इदं मृगव्यम्=आखेटः, मृगया। "शिकार" इति लोके। 'आच्छोदनं मृगव्या स्यादाखेटो मृगया स्त्रियाम्।' इति—(अम० ना० लिं० पृ० ३४५ श्लोक: २३)। 'आच्छोटनं खेटनं च मृगव्यं मृगयाऽपि च।' इति च--(वै० पृ० १३९ श्लोक: ३८)। इयं चव्या, इदं चव्यम्=औषधिविशेषः, चविका। "चाव" इति लोके। 'चव्यं तु चविकम्' इति--(अम० ना० लिं० पृ० १६१ श्लोक: ९८)। 'चव्यं तु चविके क्लीबं, वचायामपि योषिति।' इति—(मे० पृ० ११४ श्लोक: २१)। 'स्त्रियामपि'। 'चव्या कोलाऽथ चविका, चव्यं कुञ्जरपिप्पली।' इति हट्टचन्द्रः। केचित्तु पूर्वान्वयमाहुः। यदाह चन्द्रनन्दनः—'चव्या कोलाऽथ चविका श्रेयसी गजपिप्पली। च्यवना कोलवल्ली तु चव्यं कुञ्जरपिप्पली'। अत्र पक्षे तु स्थाने च पाठ्यः।' इति--(अम० सु० व्या० पृ० १६१ स्तं० २ पं० २२ तः २७ या०)। इयं वणिज्या, इदं वणिज्यम्=वणिग्भावः। "व्यापार" "सौदागरी" "तिजारत" इति च लोके। 'सत्यानृतं तु वाणिज्यं वणिज्या वणिजा स्त्रियौ।' इति—(वै० पृ० १२३ श्लोक: ३)। इयं वीर्या, इदं वीर्यम्=अतिशयशक्तिः। 'वीर्य्यं शुक्रे प्रभावे च तेजः सामर्थ्ययोरपि।' इति—(मे० पृ० ११५ श्लोक: ४१)। इयं

नासीरा, इदं नासीरम् = सेनामुखम्, नायकाग्र्यकम् । 'स्यान्नायकाग्रेसरिकौ नासीरं दर्प ऊष्मणि ।' इति—(त्रि० शे० पृ० ३०० श्लोकः ५०) । यादवस्तु नृक्लीबलिङ्गमाचष्टे । 'नासीरोऽस्त्र्यग्रयानम्' इति--(वै० पृ० १२० श्लोकः २०३) । इयं मात्रा, इदं मात्रम् = स्वल्पम्, कात्स्न्र्यम् अवधारणं च । 'मात्रा परिच्छदेऽर्थेऽशे प्रवृत्तौ कर्णभूषणे । अक्षरावयवे माने, मात्रं कात्स्न्र्येऽवधारणे ।' इति--(वै० पृ० २३५ श्लोकः ६२-३) । इयं-अपरा, इदं-अपरम् = जरायुः, गजपश्चार्द्धं च । 'अपरं गजपश्चार्द्धे स्या,-ज्जरायौ तु योषिति । इतरस्मिन्नपि तथा,-ऽर्वाचीनेऽप्यन्यलिङ्गकम् ।' इति--(मे० पृ० १३० श्लोकः १०४) । इयं मन्दिरा, इदं मन्दिरम् = देवतागृहम्, सदनं च । 'मन्दिरं देहपुर्य्योश्च सम्बन्धे' इति--(वै० पृ० २५२ श्लोकः २७) । 'मन्दिरो मकरावासे, मन्दिरं नगरे गृहे ।' इति च--(अने० सं० पृ० ९७ श्लोकः ६२४) । इयं तमिस्रा, इदं तमिस्रम् = तमस्ततिः, तमसां समूहः, तिमिरम्, अन्धकारम्, अन्धतमसम् । 'तमिस्त्रा स्त्री ध्वान्तनिशि निश्य-न्धतमसे न ना ।' इति—(वै० पृ० २६० श्लोकः ४३) । इयं शस्त्री, इदं शस्त्रम् = छुरिका, अस्त्रम्, लोहं च । 'शस्त्रं लोहास्त्रयोः क्लीबं, छुरिकायां तु योषिति ।' इति--(मे० पृ० १२९ श्लोकः ८७) । इयं नगरी, इदं नगरम् = पुरी, पूः, पत्तनम्, राजस्थितिस्थानम् । 'नगरी नगरे पुर्य्याम्' इति—(श० र० स० पृ० २७३ पं० १५) । इयं मसूरा, इदं मसूरम् = धान्यविशेषः, मङ्गल्यः, त्रिवृत्, सुषेणा । 'मसूरा मसुरा चापि त्रिवृद्धान्यविशेषयोः । मसूरमसुरौ पुंसि द्वावेतावपि चैतयोः ।' इति--(शि० को० पृ० ३७ श्लोकः ४०६-७) । 'वेसवारः परिसरो मसूरः कुसुमासनः ।' इति सभेदान्मध्यदन्त्यः । 'मसूरा चापि मसुरा मङ्गल्यत्रिवृतोर्मता ।' इति लोचनः' इति—(शि० को० टी० पृ० १४३ पं० ८-९) । 'मसूरा त्रिवृतायां च प्रोक्ता धान्यविशेषके ।' इति । 'त्रिवृद्धान्यविशेषयोः । मसूरोऽपि' इति च--(रा० नि० पृ० ४२४ श्लोकः २८)। 'वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियाम् । मसूरमसुरौ पुंसि द्वावेतावऽपि चैतयोः ।' इति च रसभः' इति--(अम० सु० व्या० पृ० ३०७ स्तं० १ पं० १६) । 'रोपधत्वान्नपुंसकेऽपि ।' इयं त्वक्क्षीरी, इदं त्वक्क्षीरम् = वेणुजन्यौषधविशेषः, वंशरोचना । "बंसलोचन" इति लोके । 'स्याद्वंशरोचना वांशी तुकाक्षीरी तुकाशुभा । त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी तु वैणवी ।' इति शाश्वतः ।' इति—(अम० सु० व्या० पृ० ३३८ पं० २४-५) । 'वंशलोचना' इत्यपि । 'त्वक्क्षीरी वंशलोचना ।' इति--(श० र० स० पृ० २८८ पं० ३) । यादवस्त्वावन्तत्वमाचष्टे--'त्वक्क्षीरा वंशरोचना ।' इति--(वै० १३० श्लोकः ९०) । इयं कादम्बरी, इदं कादम्बरम् = मदिरा, मद्यप्रभेदश्च । 'कादम्बरस्तु दध्यग्रे, मद्यभेदे नपुँसकम् । स्त्री वारुणीपरभृताभारतीसारिकासु च ।' इति-(मे० पृ० १४१ श्लोकः २५७) । इयं काहली, इदं काहलम् = वाद्यभाण्डम्, तरुणी, भृशम्, शुष्कं च । 'काहली तु तरुण्यां, स्यात्काहलं भृशशुष्कयोः । वाद्यभाण्डे विशेषे तु, काहला काहले

खले ।' इति—(वि० प्र० पृ० १६० श्लोकः १३५) । 'काहलो दुर्जनेऽपि च । काहली वाद्य-भाण्डे, स्यान्न पुंसि भृशशुष्कयोः ।' इति च—(ना० मं० पृ० ९३ पं० ७) । इयं स्थाली, इदं स्थालम् = पिठरः, उखा । "हांडी" इति लोके । पाटलवृक्षः, स्वर्णादिनिर्मितभोजनपात्रं च । "थाल" इति लोके । 'स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटलोखयोः ।' इति—(मे० पृ० १४९ श्लोकः ५५) । इयं कदली, इदं कदलम् = रम्भा, वारणवुसा, मोचा । "केला" इति लोके । कदलीफलं च । 'कदला कदलौ पृश्न्यां, कदली कदलौ पुनः । रम्भावृक्षेऽथ कदली पताका-मृगभेदयोः । कदला डिम्बिकायां च शाल्मलीभूरुहेऽपि च ।' इति—(मे० पृ० १५० श्लोकः ७०, ७१)। 'कदलश्च कदल्यसौ ।' इति च व्याडिः' इति--(अम० सु० व्या० पृ० १६६ स्तं० २ पं० ३५) । इयं स्थली, इदं स्थलम् = अकृत्रिमस्थानम् । "कड़ी जमीन" इति लोके। 'स्थलं स्थली। समानौ' इति--(अम० ना० लिं० पृ० १११ श्लोकः ५) । 'आसारी तु स्थली स्थलम् ।' इति च–(वै० पृ० ३८ श्लोकः ४२) । इयं जाली, इदं जालम् = पटोलिकौषधिः, गवाक्षश्च । 'जालं गवाक्ष आनाये क्षारके दम्भवृन्दयोः । जालो नीपद्रुमे, जाली पटोलिकौषधौ स्त्रियाम् ।' इति--(वै० पृ० २२४ श्लोकः ९) । इयं पित्तला, इदं पित्तलम् = जलपिप्पली, तैजसद्रव्यं च । 'पित्तला तोयपिप्पल्यां स्त्र्य,–न्यवत्पित्तसंयुते । क्लीबं तु तैजसद्रव्ये' इति--(मे० पृ० १५३ श्लोकः ११४) । 'पित्तलं त्वारमस्त्रियाम् ।' इति च—(वै० पृ० ४३ श्लोकः २६) । इयं गोला, इदं गोलम् = मनःशिला, कुनटी, अवन्तिसोमम्; सन्धानम्, मण्डलं च । 'अथो गोला नैपाली कुनटीति च ।' इति । 'गोलकुल्माषसन्धानानि' इति च—(वै० पृ० १६५ श्लोकः ८२) । 'गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियाम् ॥ प(पा)त्राञ्जने मण्डले चालिञ्जरे बालखेलने ।' इति--(मे० पृ० १४६ श्लोकः १४) । 'गोलः स्यात्सर्ववर्त्तुले । गोला पत्राञ्जने गोदावर्य्यां सख्यामलिञ्जिरे ॥ मण्डले च कुनट्यां च बालक्रीडनकाष्ठके ।' इति--(अने० सं० पृ० ४० श्लोकः ४९६-७) । 'क्लीबेऽपि' । 'मण्डले मणिके गोलं, गोला गोदावरी सखी ।' इति च--(त्रि० शे० पृ० ३७१ श्लोकः ३९१) । इयं युगली, इदं युगलम् = युग्मम् । "जोड़ा" जोड़ी" इति च लोके । 'यमलं युगलं युग्मं युतकं च द्वयोर्गणे ।' इति—(वै० पृ० १८७ श्लोकः १५) । 'यमलं युगले प्राहु,–र्यमली चो(शा)टिकाद्वये ।' इति च—(श० र० स० पृ० ३०९ पं० २) । इयं बडिः(लि)शा, इदं बडि(लि)शम् = मत्स्यबन्धनोपायविशेषः, मत्स्यबन्धनम् । "वंशी" वल्शी" इति च लोके । 'बलिशं मत्स्यवेधनम् ।' इति--(अम० ना० लिं० पृ० ९९ श्लोकः १६) । डलयोरैक्यात् 'बडिशम्' अपि । स्त्रियां बडिशापचये तु बडिशी ।

अथ साम्प्रतमिकारान्तोकारान्तव्यञ्जनान्तान् स्त्रीनपुंसकलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ९ श्लोकः १२७) ।

··· ··· ··· छर्दि च ॥
अलाबु—जम्बु—डु—रुषः सरः सदो
रोदो-र्चिषी दाम गुणे त्वयट्-तयट् ॥६॥ इति ॥

अनयोर्व्याख्या—

छर्दीति । अलाब्वादौ, रोद आदौ चेतरेतरयोगो द्वन्द्वः । त्वयडादौ तु समाहारो द्वन्द्वः । एते छर्द्यादयः शब्दाः स्त्रीनपुंसकलिङ्गा भवन्ति । इयं छर्दिः, इदं छर्दि=वान्तिः, वमनरोगः । "वमन" "कै" इति च लोके । 'छर्दिरुद्वान्तिरेतसोः ।' इति—(वै० पृ० २२१ श्लोकः १३) । इयं-अलाबुः, इदं-अलाबु=तुम्बी । "लौकी" इति लोके । 'अलाबुश्चाप्यलाबूश्चाप्यालाबुस्तुम्बिकौषधौ ।' इति—(श० र० स० पृ० २१६ पं० १४) । इयं जम्बुः, इदं जम्बु=जम्बुफलम् । "जामुन" इति लोके । 'फले जम्ब्वा जम्बूः स्त्री, जम्बु जाम्बवम् ।' इति—(अम० ना० लिं० पृ० १३४ श्लोकः १९) । 'जम्बूः स्यात्पादपान्तरे । तथा सुमेरुसरिति द्वीपभेदेऽपि च स्त्रियाम् ।' इति च—(मे० पृ० १०५ श्लोकः ४) । 'परिणतजम्बुफलोपभोगहृष्टा' इति किराते ह्रस्वान्तप्रयोगः ।' इति—(अम० सु० व्या० टि० पृ० १३४ स्तं० १ पं० ३४) । इयं—उडुः, इदं—उडु=नक्षत्रम् । 'नक्षत्रमृक्षं भं, तारा तारकाऽप्युडु वा स्त्रियाम् ।' इति—(अम० ना० लिं० पृ० ३७ श्लोकः २१) । 'सन्नक्षत्रमुडुर्न ना ।' इति च—(वै० पृ० २० श्लोकः ३८) । इयं रुट्, इदं रुट्=रोषः, क्रोधः । "गुस्सा" इति लोके । 'रुषा रुट्क्रुत्क्रुधाः स्त्रियः ।' इति—(वै० पृ० ९८ श्लोकः १८३) । इयं सरसी, इदं सरः=कासारः, सरोवरः । "तालाब" "तलैया" "झील" इति च लोके । 'कासारः सरसी सरः ।' इति—(वै० पृ० १५४ श्लोकः ६) । इयं सदः, इदं सदः=सभा । 'संसद् घटा स्थानं सदऽप्यना ।' इति—(वै० पृ० १२४ श्लोकः १४) । इयं रोदसी, इदं रोदः=भूद्यावौ, भूद्युलोकौ । 'भूद्यावौ रोदस्यौ रोदसी च ते ॥' इति—(अम० ना० लि० पृ० ४३८ श्लोकः २२९) । 'द्यावापृथिव्यावेकोक्तौ रोदस्यौ रोदसी इति ।' इति—(वै० पृ० ३५ श्लोकः ५) । 'द्यावापृथिव्यौ रोदस्यौ रोदसौ रोदसीति च ।' विगृहीतयोदप्येते नामनी । 'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक् । सह प्रयोगोऽप्यनयो रोदः स्यादपि रोदसी ।' इति च—(वि० प्र० पृ० १७६ श्लोकः २९) । इयं-अर्चिः, इदं-अर्चिः=अग्निशिखा, दीप्तिः, रश्मिश्च । 'शिखा जिह्वार्ऽचिरपुमान् ।' इति । 'अर्चिर्भाज्वालयोर्न ना ।' इति च—(वै० पृ० २३० श्लोकः ६) । गुणे रज्जौ दामशब्दः स्त्रीक्लीबलिङ्गः स्यात् । इयं दामा, इदं दाम=सन्दानम्, दोहनकाले पशुपादबन्धनरज्जुः ।

पाणिनीयेऽपि—(१) (अर्चिः स्त्रियां च) ॥ इसन्तत्वेऽपि अर्चिः—स्त्रियां, नपुंसके च,—स्यात् । इयमिदं वा—अर्चिः=ज्वाला । सि० कौ० पृ० ४०२ सू० १३६ ।

'सन्दानं दामनी दामा न ना, दाम पशोस्तु या । रज्जुः सा बन्धनी' इति—(वै० पृ० १३८ श्लोकः २९, ३०) । दो अवखण्डने । दीङ् क्षये वा । मनिन् । मन इति न ङीप् । दामानौ, दामानः इत्यादि । 'डाबुभाभ्यामन्यतरस्याम्' इति डापि तु । दामा, दामे, दामाः इत्यादि बोध्यम् । 'दामनी' इत्यपि । अयट्-तयट्-प्रत्ययान्तौ शब्दावपि स्त्रीक्लीबलिङ्गौ स्याताम् । यथा—इयं द्वयी, इदं द्वयम् = द्वितयम्, युग्मम् । "जोड़ा" "जुट्ट" इति च लोके । 'मिथुनं द्वितयं द्वैतं द्वयं द्वन्द्वं युगं यमम् ।' इति--(वै० पृ० १८७ श्लोकः १५) । इयं चतुष्टयी, इदं चतुष्टयम् = चतुरवयवसमुदायः । "चार का समूह" इति लोके । चत्वारोऽवयवा यस्य ।

अथाधुना संक्षेपतः क्रमरहितानुड्वादीन् स्त्रीक्लीबलिङ्गवाचकशब्दानाह पुरुषोत्तम देवः-- (त्रि० शे० पृ० ३९४ श्लोकः १९, २०) ।

स्त्रीक्लीबयो-रुडु-र्दामा, छदि-र्ज्योतिः-सदो-ऽर्चिषः ।
सुखं (अथ) लक्षं वणिज्यं च बडिश-क्रोड-पाटलम् ॥
तारकं रसनं नीड—मेते टाबन्तकाः स्त्रियाम् ।
ङ्यन्ता-स्तु नगरा-ऽऽस्थान-स्थलानि पाटलं पुरम् ॥ इति ॥

अनयोर्व्याख्या—

स्त्रीति । तारकमिति च । छदिरादावितरेतरयोगो द्वन्द्वः । बडिशादौ समाहारो द्वन्द्वः । नगरादौ त्वितरेतरयोगो द्वन्द्वः । एते उड्वादयः शब्दाः स्त्रीक्लीबयोर्भवन्ति । इयं छदिः, इदं छदिः = पटलम् । "छान" "छप्पर" इति च लोके । 'चोलोऽस्त्री पटलं छदिः ।' इति—(वै० पृ० १६२ श्लोकः ३७) । इयं ज्योतिषी, इदं ज्योतिः = तारा, नक्षत्रम्, दृष्टिः, नेत्रकनीनिकामध्यम् । 'ज्योतिर्भद्योतदृष्टिषु ।' इति--(अम० ना० लिं० पृ० ४३८ श्लोकः २३०) । 'ज्योतिरग्नौ दिवाकरे । पुमान्, नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः ।' इति च—(मे० पृ० १७१ श्लोकः २२) । इयं सुखा, इदं सुखम् = वरुणपुरी, कल्याणं च । 'सुखं शर्मणि नाके च, सुखा पुर्यां प्रचेतसः ।' इति—(मे० पृ० २० श्लोकः ८) । इयं क्रोडा, इदं क्रोडम् = भुजान्तरम्, रक्षश्च । 'न ना क्रोडं भुजान्तरम् ॥' इति—(अम० ना० लिं० पृ० २२९ श्लोकः ७७) । 'क्रोडः शनौ सूकरे ना, न पुमानङ्करक्षसोः ।' इति च—(मे० पृ० ४१ श्लोकः ७) । इयं पाटला, इदं पाटलम् = पाटलापुष्पम् । 'पाटला पाटली स्त्री स्यादस्य पुष्पे पुनर्न ना ।' इति--(मे० पृ० १५३ श्लोकः १०९) । इयं तारका, इदं तारकम् = नक्षत्रम्, दृष्टिः, नेत्रकनीनिकामध्यम् । 'तारको दैत्यभित्कर्णधारयोर्न द्वयोर्दृशि । कनीनिकायामृक्षे च न पुमां,-स्त्रातरि त्रिषु ।' इति—(मे० पृ० ९ श्लोकः ९९) । इयं नीडा, इदं नीडम् = स्थानम्,

कुलायश्च । 'नीडं स्थानकुलाययोः ।' इति—(मे० पृ० ४१ श्लोकः १७) । यादवामरौ तु न स्त्रियामित्याहतुः—'कुलायस्तु पञ्जरं नीडमस्त्रियाम् ।।' इति—(वै० पृ० ३० श्लोकः ४९) । 'कुलायो नीडमस्त्रियाम् ।।' इति च—(अम० ना० लिं० पृ० २०० श्लोकः ३७) । एते सुखादयः शब्दाः स्त्रियां वनितालिङ्गे टाबन्तकाः टाप्प्रत्ययान्ता भवन्ति, न तु ङचन्ताः । इयं पुरी, इदं पुरम् = नगरम् । "शहर" इति लोके । 'पूः स्त्री, पुरीनगर्य्यौ वा पत्तनं पुटभेदनम् ।' इति—(अम० ना० लिं० पृ० ११६ श्लोकः १) । पक्षे पुरम् । इमे नगरादयः शब्दा अपि स्त्रीलिङ्गे ङचन्ता भवन्ति । न तु टाबन्ताः । शेषशब्दानां व्याख्यादयः पूर्ववद् बोध्याः ।

तथा च दुर्गसिंहोप्याह—(दु० लिं० पृ० ४० श्लोकः ८३) ।

अर्चि-र्नगरं वृत्ताख्या बहुलं भाव-कर्म्मणो-रकणा ।
यण् स्त्रीनपुंसकाख्या, ... ।। इति ।।

अस्य व्याख्या—

अर्चिरिति । वृत्तानामक्षरविन्यासानां आख्या नाम । अर्चिः नगरं वृत्ताख्या पुनर्बहुलमेते स्त्रीलिङ्गाख्या नपुंसकलिङ्गाख्या भवन्ति । यणन्तं च भावकर्मणोर्विहितेन अकणा अकणन्तेन सह बहुलं स्त्रीनपुंसकलिङ्गं भवति । हरीतकादि तु सर्वलिङ्गं भवति । वक्ष्यति—"एते च सर्वलिङ्गा" इति, तेन सहास्य सम्बन्ध इष्यते । इयं—अर्चिः, इदं—अर्चिः = ज्वाला । अर्चिः सान्तः 'ज्वालाभासोर्न पुंस्यर्चिः' इति—(अम० ना० लिं० पृ० ४३८ श्लोकः २३०) । 'अथार्चिर्मयूखशिखयोर्न ना ।' इति च-(मे० पृ० ७१ श्लोकः १५) । इयं नगरी, इदं नगरम् = पुरम् । "शहर" इति लोके । 'पूः स्त्री, पूरीनगर्य्यौ वा' इति—(अम० ना० लिं० पृ० ११६ श्लोकः १) । पक्षे नगरम् । वृत्ताख्या यणन्तं च द्विलिङ्गमुक्तम् । तथापि केचित् स्त्रियां, केचिन्नपुंसके, केचित् पुंसि, केचित् स्त्रीनपुंसकयोः, बहुलग्रहणात्प्रयोगत इति । वृत्तनाम यथा—समानी, प्रमाणी, कलिका इत्येवमादि स्त्रियाम्, वक्त्रं, पथ्यावक्त्रं इत्यादि नपुंसके, पुटः, पणवः, कापीड इत्यादि पुंसि । इति—(दु० लिं० टी० पृ० ४० श्लोकः ८३ पं० ८तः १५या०) ।

अमरसिंहस्त्विह विशेषमाह—(अम० ना० लिं० पृ० ४६२ श्लोकः ३९, ४०, ४१) ।

स्त्रीनपुंसकयो-र्भाव-क्रिययोः ष्यञ् क्वचि-च्च वुञ् ।
औचित्य-मौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः ।।

पाणिनीयेपि—(१) (तत्ष्यञौ तद्धितौ) ।। ष्यञः षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम् । चातुर्य्यम्, चातुरी=चतुरस्य भावः कर्म वा । सामग्र्यम्, सामग्री=समग्रस्य भावः कर्म वा । औचित्यम्, औचिती=उचितस्य भावः कर्म वा । सि० कौ० पृ० ४०१ सू० १२० ।

अस्य व्याख्या—

स्त्रीति । 'स्त्रीनपुंसकयोः' इत्यधिकारः । भावश्च क्रिया च भावक्रिये तयोः भावे कर्मणि च विहितः ष्यञ्, वुञ् च क्वचित् योषित्क्लीबयोः स्याताम् । तत्र ष्यञ्प्रत्ययमुदाहरति । उचितस्य भावः कर्म वा औचित्यम्, औचिती च । मित्रस्य भावः कर्म वा मैत्र्यम्, मैत्री वा । समग्रस्य भावः सामग्र्यं सामग्री वा । यथाकामस्य भावः याथाकाम्यम्, याथाकामी वा । अर्हतो भावः आर्हन्त्यम्, आर्हन्ती वा । वुञ्प्रत्ययस्तु वैरमैथुनिकादिवुन् । इत्थं प्रागुदाहृतः । तथा मिथुनस्य भावः कर्म वा मैथुनकम्, मैथुनिका वा । इत्यादयः स्त्रीनपुंसकाः । शुक्लस्य भावः शौक्ल्यम्, दीर्घस्य भावः दैर्घ्यम्, दृढस्य भावः दार्ढ्यम्, जडस्य भावः कर्म वा जाड्यम् । एवं ब्राह्मण्यं माणव्यं वाडव्यमित्यादयो नपुंसके । मनोज्ञादित्वाद् वुञ् । अहोपुरुषस्य भावः आहोपुरुषिका । शिष्यश्चोपाध्यायश्च शिष्योपाध्यायौ, तयोर्भावः कर्म वा शैष्योपाध्यायिका । एवं कौत्सकुशिकिका । गार्ग्यस्य भावः कर्म वा गार्गिका । एवं काठिका इत्येवमादयः स्त्रियाम् । क्वचिन्न-स्त्रीलिङ्गम् । रमणीयस्य भावः कर्म वा रामणीयकम् । मनोज्ञस्य भावो मानोज्ञकम् । एवं साहाय्यकं इत्यादयो नपुंसके । भावे इति किम् ? चातुर्वर्ण्यम् । इह स्वार्थे ष्यञ् क्लीबे, न तु योषिति ।

षष्ठ्यन्तप्राक्पदाः सेना[१]–छाया–शाला–सुरा–निशाः ।
स्याद्वा नृसेनं श्वनिशं गोशाल–मितरे च दिक् ॥

अस्य व्याख्या—

षष्ठ्यन्तेति । तत्पुरुषे तत्पुरुषसमासे षष्ठ्यन्तं षष्ठीविभक्त्यन्तं प्राक्पदं पूर्वपदं यासां ताः षष्ठ्यन्तप्राक्पदाः सेनादयः शब्दाः । अथवा । षष्ठ्यन्तात्पराः सेनादयस्तत्पुरुषे योषिति

पाणिनीयेऽपि—(१) (सुरासेनाच्छायाशालानिशाः स्त्रियां च) ॥ एताः स्त्रियां चात्क्लीबे स्युः । यवसुरा, यवसुरम् । नृसेना, नृसेनम् । कुड्यच्छाया, कुड्यच्छायम् । गोशाला, गोशालम् । श्वनिशा, श्वनिशम् । सि० कौ० पृ० ४०२ सू० १२९ ।

तत्र विशेषः—(शिष्ट परवत्) । अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् । सि० कौ० पृ० ४०२ सू० १३० । (लक्षा कोटिः स्त्रियाम्) । "वा लक्षा नियुतं च तत्" इत्यमरात् क्लीबेऽपि । इयं लक्षा, इदं लक्षम् = शतसहस्रम् । सि० कौ० पृ० ४०२ सू० १४७ ।

(स्थूणोर्णे नपुंसके च) एते—स्त्रियां, क्लीबे च—स्तः । स्थूणा, स्थूणम् = काष्ठमयी द्विकर्णिका । ऊर्णा, ऊर्णम् = मेषादिलोम । सि० कौ० पृ० ३९७, ८ सू० २१ ।

(द्विगुः स्त्रियां च व्यवस्थया) व्यवस्थया द्विगुः स्त्रियां, क्लीबे च स्यात् । पञ्चमूली = पञ्चानां मूलानां समाहारः । त्रिभुवनम् = त्रयाणां भुवनानां समाहारः । सि० कौ० पृ० ४०२ सू० १३४ ।

नपुंसके च भवन्ति। उक्तशब्दानामुदाहरणं प्रसंगतः प्राक्प्रदर्शितम्। इहानुषङ्गत उदाहरणं प्रदर्श्यते। नृणां सेना = नृसेना। वृक्षस्य च्छाया = वृक्षच्छाया। गवां शाला = गोशाला। यवानां सुरा = यवसुरा। शुनां निशा = श्वनिशा। कुड्यस्य च्छाया = कुड्यच्छाया। वेति। पक्षे— 'विषाभा सेनासुराच्छायाशालानिशानाम्' (२।४।२५) इति नपुंसकता। नृसेनम्। यवसुरम्। कुड्यच्छायम्। गोशालम्। श्वनिशम्। एवमितरेऽपि बोध्याः। दिक् = उदाहरणमिदम्। षष्ठी-बहुवचनान्तप्राक्पदा चेच्छाया नपुंसक एवेति प्राग्दर्शितम्। क्वचिद् व्यभिचारोऽपि दृश्यते— इक्षूणां छाया = इक्षुच्छाया।

आब–न्नन्तो–त्तरपदो द्विगु–श्चा–ऽपुंसि न–श्च लुप्।
त्रिखट्वं च त्रिखट्वी च त्रितक्षं च त्रितक्ष्य–ऽपि ॥इति॥

अस्य व्याख्या—

आबिति। आबन्तोत्तरपदोऽन्नन्तोत्तरपदश्च यो द्विगुः द्विगुसमासः सः पुंसि पुंलिङ्गे न भवति। परन्तु योषित्क्लीबयोः। अन्नन्तोत्तरपदस्य योऽन्त्यनकारस्तस्य लुप् लोपश्च स्यात्। तत्रादावाबन्तान्त्यपदस्योदाहरणं प्रदर्श्यते––त्रिखट्वमिति। तिस्रः खट्वाः समाहृता अथवा तिसृणां खट्वानां समाहारः त्रिखट्वम्। त्रिखट्वी च। अन्नन्तोत्तरपदो यथा––त्रयस्तक्षाणः समाहृता अथवा त्रयाणां तक्ष्णां समाहारः त्रितक्षम्, त्रितक्षी च। 'अनो नलोपश्च' (वा० २।४।३०)। इति तक्षन्-शब्दस्यान्त्यनकारो लुप्तः।

एवमेव यादवोऽप्याह––(वै० पृ० २९२ श्लोकः ३२ तः ३६ यावत्)।

अपुंसि चालनी दाम वणिज्या–ऽश्मन्तिका स्थली।
शरव्या–र्ऽचि–र्गुडा पत्री स्यात् कुथे वर्णतर्णका॥

अस्य व्याख्या—

अपुंसीति। 'अपुंसि' इत्यधिकारः। एते चालन्यादयः पत्र्यन्ताः शब्दाः, कुथे कुथार्थे वर्ण-तर्णका च अपुंसि स्त्रियां क्लीबे च स्युः। इयं चालनी, इदं चालनम् = तितउः। "चलनी" इति लोके। 'चालनी तितउः प्रोक्ता' इति–(श० र० स० पृ० १९३ पं० ११) इयं–अश्मन्तिका, इदं— अश्मन्तकम् = चुल्ली। "चूल्हा" इति लोके। मल्लिकाच्छादनं च। 'स्यादश्मन्तकमुद्धाने मल्लिका-च्छादनेऽपि च।' इति—(त्रि० शे० पृ० ३१३ श्लोकः ४)। इयं शरव्या, इदं शरव्यम् = वेध्यम्, लक्ष्यम्। "निसाना" इति लोके। 'वेध्यं शरव्यं न नरि' इति––(वै० पृ० १२० श्लोकः १९४)। 'लक्षं लक्ष्यं शरव्यं च', इति—(अम० ना० लिं० पृ० २९२ श्लोकः ८६)। इयं––गुडा, इदं— गुडम् = इयं पत्री, इदं पत्रम् = पर्णम्, दलम्। "पत्ता" इति लोके। यानं, पक्षं च।

'पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः ।' इति—(मे० पृ० १२६ श्लोकः ५५) । इयं वर्णतर्णिका, इदं वर्णतर्णकम् = कुथः, गजोपर्य्यास्तरणचित्रकम्बलः । 'वर्णस्तु परिस्तोमः, कुथा त्रयी ।' इति-- (वै० पृ० १७२ श्लोकः १६६) ।

सगरी नटने कृत्या त्व--ऽभिचारजदैवते ।
मद्ये मधूलकं चे-ति क्वा-ऽप्य-ऽथा-ऽकर्मधारये ॥
अनञ्‌ तत्पुरुषे सेनाच्छाया शाला निशा सुरा ।
नृसेनं पादपच्छायं गोशालं श्वनिशं यथा ॥
नृसेने-त्यादयो-ऽप्ये-वं कुत्रचिद् भाव-कर्मणोः ।
साहायकं साहायिका मैत्र्यं मैत्री च वुञ्‌-ष्यञोः ॥
द्विगु-रन्नन्त आबन्तो-ऽप्ये-वं-न-श्चा-ऽत्र लुप्यते ।
यथा त्रितक्षं त्रितक्षी त्रिखट्वं च त्रिखट्व्य-ऽपि ॥ इति ॥

एषां व्याख्या—

सगरीति । नटने नृत्ये सगरी, अभिचारदैवते कृत्या, मद्ये मदिरायां मधूलकं चेति क्वापि कुत्रापि स्त्रीक्लीबयोः स्युः । इयं सगरी, इदं सगरम् = नृत्यम्, नाटचम् । ''नाच'' इति लोके । इयं कृत्या, इदं कृत्यम् = अभिचारजदैवतम्, अभिचारोत्पन्नदेवता, देवतानामसद्दैवतविशेषः । 'कृत्या क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ।' इति--(अम० ना० लिं० पृ० ४२४ श्लोकः १५८) । 'कृत्यो विद्विषि कार्ये च, कृत्या क्रियादिवौकसोः ।' इति च रभसः' इति--(अम० सु० व्या० पृ० ४२४ स्तं० १ पं० ३७-८) । इयं मधूलिका, इदं मधूलकम् = मद्यम्, मदिरा, सुरा । ''शराब'' इति लोके । 'मधूलकोऽजातमद्ये दीर्घपत्रे, मधूलिका । निःशूकदीर्घगोधूमाम्भोजामधुरसासु च ॥' इति--(शि० को० पृ० ७ श्लोकः ६७) । अथेति । अकर्मधारये कर्मधारयसमासवर्जिते, अनञ्‌ तत्पुरुषे नञ्‌ रहिततत्पुरुषसमासे च सेनादयः शब्दाः स्त्रीक्लीबयोः स्युः । यथा नृसेनम् । पादपच्छायम् । गोशालम् । श्वनिशम् । एवं नृसेनेत्यादयोऽपि बोध्याः । कुत्रचित् क्वापि, भावकर्मणोः भावे कर्मणि च वुञ्‌ष्यञोः अर्थाद् वुञ्‌ ष्यञ्‌ प्रत्ययान्ताः शब्दा अपि स्त्रीनपुंसकयोः स्युः । यथा—साहायकं साहायिका, मैत्र्यं मैत्री च । योऽन्नन्तोऽन्प्रत्ययान्तो द्विगुः द्विगुसमासः, एवं आबन्त आप्प्रत्ययान्तश्च स्त्रीनपुंसकयोर्भवतः । अत्र नः लुप्यते । यथा--त्रितक्षम् त्रितक्षी । एवम्--त्रिखट्वम्, त्रिखट्वी इत्यादि ।

इति स्त्रीक्लीबलिङ्गानुशासनम् ।

अथ त्रिलिङ्गानुशासनम् ।

अथाधुना सरकादीनाभरणाभिधान्तान् स्वतस्त्रिलिङ्गवाचकशब्दानाह हेमः—(अभि० सं० लिं० पृ० ९ श्लोकः १२८-९) ।

स्वत–स्त्रिलिङ्गः, सरको––ऽनुतष, शललः शले ।
करको–ऽब्दोपले, कोशः शिम्बाखड्गपिधानयोः ॥१॥
जीवः प्राणेषु, केदारे वलजः, पवने खलः ।
बहुलं वृत्त–नक्षत्र–पुरा–ऽऽद्या–ऽऽभरणा––ऽभिधा ॥२॥

अनयोर्व्याख्या—

स्वत इति । जीव इति च । 'स्वतस्त्रिलिङ्गः' इत्यधिकारः । अनुतर्षे सरकः, शले शललः, अब्दोपले करकः, शिम्बाखड्गपिधानयोः कोशः, प्राणेषु जीवः, केदारे वलजः, पवने खलश्चैते शब्दा उक्तार्थेषु स्वतस्त्रिलिङ्गा भवन्ति । यथा––सरकः, सरका, सरकम् = अनुतर्षः, शीधुपानम् । 'सरको मदिरापात्रे मदिरापानमद्ययोः ।' इति––(अने० सं० पृ० ५७ श्लोकः १०५) । 'सरकं चषकं चास्त्री' इति । 'मणौ शीधौ(थौ) शीधु(थु) पाने सरकं मद्यभाजने ।' इति च– (वै० पृ० २५३ श्लोकः ३८) । 'सरकोऽस्त्री शीधुपाने शीधुपात्रेक्षुशीधुनोः। अच्छिन्नाध्वगपंक्तौ च' इति च––(मे० पृ० १४ श्लोकः १६८) । । शललः, शलली, शललम् = श्वाविल्लोम । ''साही रोम'' ''सेही रोम'' इति च लोके । 'अथ शल्ये शललशल्यकौ । श्वाविच्च तच्छलाकायां शललं शलमित्यपि ।' इति—(अभि० सं० अभि० चिं० पृ० ४९ श्लोकः १२९६) । करकः, करका, करकम् = अब्दोपलः, मेघोपलः । 'करको दाडिमे पक्षिभेदे हस्ते कमण्डलौ । लट्वाकरञ्जयोर्मेघोपले च' इति––(अने० सं० पृ० ५० श्लोकः १४) । 'वर्षोपलस्तु करका' इति––(अम० ना० लि० पृ० ३४ श्लोकः १२) । 'पुंस्यपि ।' 'वर्षोपलस्तु करका करकोऽपि च दृश्यते ।' इति—(अ० व्या० पृ० ३४ श्लोकः १२) । करकस्तु पुमान्पक्षिविशेषे दाडिमेऽपि च । द्वयोर्मेघोपले, न स्त्री करङ्के च कमण्डलौ ।' इति च— (मे० पृ० ५ श्लोकः ५४-५) । कोशः, कोशी, कोशम् = शिम्बा, खड्गपिधानं च । 'कोशः कोप

पाणिनीयेऽपि––(१) (अवशिष्टलिङ्गम्) ॥ सि० कौ० पृ० ४०४ सू० १८४ ।

इवाण्डके । कुड्मले चपके दिव्येऽर्थचये योनिशिम्बयोः । जातीकोशेऽसिपिधाने' इति (अने० सं० पृ० ४४-५ श्लोक. ५५९, ५६०) । जीवः, जीवा, जीवम् = प्राणाः । 'जीवः स्यात्त्रि-दशाचार्य्ये द्रुमभेदे शरीरिणि । जीवितेऽपि च, जीवा तु वचायां धनुषो गुणे । शिञ्जिते क्षितिजीवन्त्योर्वृत्तौ' इति--(अने० सं० पृ० ४३ श्लोकः ५३४) । वलजः, वलजा, वलजम् = केदारः, क्षेत्रम् । "खेत" इति लोके । 'वलजं गोपुरे सस्ये क्षेत्रसङ्गरयोरपि । सदाकारे, वलजा तु पृथिव्यां वरयोषिति ।' इति--(अने० सं० पृ० ६० श्लोकः १४७) । खलः, खला, खलम् = पवनम् । "पछोरना" "फटकना" इति च लोके । 'खलं कल्के भुवि स्थाने क्रूरे कर्णजपेऽधमे ।' इति--(अने० सं० पृ० ४० श्लोकः ४६४) । 'खलं भूस्थान-कल्केषु, नीचक्रूराधमे त्रिषु ।' इति--(० पृ० १४५ श्लोकः ११) । 'अथ खलं सस्यस्थाने, शठे त्रिषु ।' इति च--(त्रि० शे० पृ० ३७१ श्लोकः ३६०) । बहुलः, बहुला, बहुलम् = प्राज्यम्, कृष्णवर्णश्च । 'बहुला नीलिकायां स्यादेलायां गवि योषिति । कृत्तिकासु स्त्रियां भूम्नि, विहायसि नपुंसकम् । पुंस्यग्नौ कृष्णपक्षे, च वाच्यवत्प्राज्यकृष्णयोः ।' इति--(मे० पृ० १५३ श्लोकः ११७) । 'अथवा' बहुलं' लक्ष्यानुसारेण शब्दानां प्रयोगः कार्यः । वृत्तं च नक्षत्रं च पुरं च आद्यं च आभरणं च वृत्तनक्षत्रपुराद्याभरणानि, तेषां अभिधा सञ्ज्ञा त्रिषु स्यात् । वृत्तः, वृत्ता, वृत्तम् = अधीतम्, अतीतं च । 'वृत्तोऽधीतेऽप्यतीतेऽति (पि) वर्त्तुलेऽपि वृते मृते(मृते वृते) । दृढेऽन्यलिङ्ग, वा क्लीबं छन्दश्चारित्रवृत्तिषु ।' इति--(मे० पृ० ५८ श्लोकः ६१) । नक्षत्रः, नक्षत्रा, नक्षत्रम् =

पुरः, पुरी, पुरम् = शरीरम्, गृहम्, पुरं च । 'पुरं नपुंसकं गेहे देहपाटीलपुत्रयोः ॥ पुष्पादीनां दलावृत्तौ, ना गुग्गुलौ, न ना पुरि ।' इति—(मे० पृ० १२७ श्लोकः ५८, ५९) । आद्यः, आद्या, आद्यम् = आदिभवम्, प्रथमम्, अदनीयं च । 'आद्य आदिभवे मुख्ये भक्ष्ये चापि त्रिलिङ्गकः । पूर्वेऽप्या-ऽऽद्या विधात्राद्या, उत्तरे वाच्यलिङ्गकः ।' इति-(ना० र० मा० पृ० ४५ पं० १०-१)। 'पुंस्यादिः पूर्वयौरस्त्यप्रथमाद्याः' इति च-(अम० ना० लिं० पृ० ३७५ श्लोकः ८०) । आभरणः, आभरणाः, आभरणम् = । 'अलङ्कारस्तु भूषणम् । परिष्काराभरणे च' इति--(अभि० सं० अभि० चिं० पृ० २८ श्लोकः ६४९, ६५०) । 'अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ।।' इति च--(अम० ना० लिं० पृ० २३८ श्लोकः १०१) ।

अथ सम्प्रति कान्तादीन् हान्तान्तानिकारान्तमुकारान्तौ च क्रमसहितान् स्वतस्त्रिलिङ्ग-वाचकशब्दानाह हेमः--(अभि० सं० लिं० पृ० ६१ श्लोकः १३०तः १३३ या०) ।

भल्लातक आमलको हरीतक—विभीतकौ ।
तारका-ऽऽढक-पिटक-स्फुलिङ्गा विडङ्ग-तटौ ॥३॥

पटः पुटो वटो वाटः कपाट–शकटौ कटः ।
पेटो मठः कुण्ड–नीड–विषाणा–स्तूण–कङ्कतौ ॥४॥
मुस्त कुथे-ङ्गुद-जृम्भ-दाडिमाः पिठर-प्रतिसर-पात्र-कन्दरा।
नखरो वल्लूरो दरः पुर–श्छत्रः कुवल–मृणाल–मण्डलाः ॥५॥
नाल––प्रणाल––पटला––ऽर्गल––शृङ्खल––कन्दलाः ।
पूला–ऽवहेलौ कलश–कटाहौ षष्ठि रेण्वि–षु ॥६॥ इति॥

एषां व्याख्या—

भल्लातक इति। पट इति। मुस्त इति। नालेति च। हरीतकादौ, तारकादौ, विडङ्गादौ, कपाटादौ, कुण्डादौ, तूणादौ, कुथादौ, पिठरादौ, कुवलादौ, नालादौ, फूलादौ, कलशादौ चेतरेतरयोगो द्वन्द्व। एते भल्लातकादय इष्वन्ता शब्दाः स्वतस्त्रिलिङ्गाः स्युः। भल्लातकः, भल्लातकी, भल्लातकम् = वृक्षविशेषः। "भेलावा" इति लोके। 'वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु ॥' इति––(अम० ना० लिं० पृ० १४३ श्लोकः ४२)। 'भल्लातकस्तरुभिदि' इति च—(श० र० स० पृ० ३९ पं० ३९)। आमलकः, आमलकी, आमलकम् = वृक्षविशेषः। "आंवला" इति लोके। तस्य फलमामलकमित्येके। 'तिष्यफला त्वामलकी त्रिषु॥ अमृता च वयस्था च' इति––(अम० ना० लिं० पृ० १४७ श्लोकः ५७-८)। 'धात्रीफले त्वामलकं धात्र्यामामलकी मता।' इति च––(श० र० स० पृ० ३२ पं० १३)। हरीतकः, हरीतकी, हरीतकम् = वृक्षविशेषः। "हड़" इति लोके। 'हरीतकी हैमवती चेतकी श्रेयसी शिवा ॥' इति––(अम० ना० लिं० पृ० १४८ श्लोकः ५९)। 'अभयायां हरीतकी।' इति च— (श० र० स० पृ० ४५ पं० ५)। विभीतकः, विभीतकी, विभीतकम् = वृक्षविशेषः। "वहेड़ा" इति लोके। 'त्रिलिङ्गस्तु विभीतकः। नाऽक्षस्तुषः कर्षफलो भूतावासः कलिद्रुमः॥' इति––(अम० ना० लिं० पृ० १४७ श्लोकः ५८)। तारकः, तारका, तारकम् = त्राता। "रक्षक" "उद्धारक" इति वा लोके। वृत्तप्रभेदश्च। "तारको दैत्यभित्कर्णधारयो,––र्न द्वयोर्दृशि। कनीनिकायामृक्षे च न पुमां,–स्त्रातरि त्रिषु।' इति––(मे० पृ० ९ श्लोकः ९९)। आढकः, आढकी, आढकम् = परिमाणान्तरम्, मानभेदः, द्रोणचतुर्थांशः। 'आढकी तु तुवर्य्यां स्त्री, परिमाणान्तरे त्रिषु।' इति––(मे० पृ० ५ श्लोकः ४८)। 'आढकः स्यान्मानभेदे, तुवर्य्यामाढकी मता।' इति––(श० र० स० पृ० ७ पं १७)। 'शूर्पार्धकं चतुःप्रस्थं पात्रं स्यात्कंस आढकः।' इति। 'गौणी द्रोणाढकप्रस्थाः' इति च––(प० र० मा० पृ० ७२ पं० ७, १३)। पिटकः, पिटका, पिटकम् = विस्फोटः। "मुहाँसा" "फोड़ा" "फुंसी" इति वा लोके। 'पिटकस्त्रिषु विस्फोटे, मञ्जूषायां पुनः पुमान्।' इति––(मे० पृ० १० श्लोकः १२०)। 'विस्फोटा विटिका स्त्रियाम्।' इति नागरमालायां वकारादिरपि' इति––(अम०

सु० व्या० पृ० २२० स्तं० १ पं० १२) । स्फुलिङ्गः, स्फुलिङ्गा, स्फुलिङ्गम् = अग्निकणः । "अँगारी" "शोला" इति वा लोके । 'त्रिषु स्फुलिङ्गोऽग्निकणः' इति--(अम० ना० लि० पृ० २८ श्लोकः ५७) । विडङ्गः, विडङ्गा, विडङ्गम् = अभिज्ञः । 'विडङ्गस्त्रिष्वभिज्ञे, स्यात्कृमिघ्ने पुन्नपुंसकम् ।' इति--(मे० पृ० २५ श्लोकः ४७) । तटः, तटी, तटम् = कूलं, प्रतीरम्, नद्यादेस्तीरम् । 'तटं नपुंसकं क्षेत्रे, प्रतीरे तु तटी त्रिषु ।' इति—(मे० पृ० ३४ श्लोकः १५) । पटः, पटी, पटम् = तिरस्करिणी, यवनिका, वस्त्रविशेषश्च । 'प्रियालुवसने पटौ ।' इति--(ना० र० मा० पृ० १६ पं० ५) । 'पटः पियालवृक्षे स्यात्पटे चित्रपटेऽपि च ।' इति च—(श० र० स० पृ० ८५ पं० १०) । पुटः, पुटी, पुटम् = करण्डी, पत्रादिनिर्मितपुष्पाद्याधारः "पुड़िया" "पुड़ी" इति च लोके । 'करण्डी तु पुटी त्रयी ।' इति--(वै० पृ० १३८ श्लोकः ३३) । वटः, वटी, वटम् = रज्जुः, गुणः । शणनिर्मिततन्तुश्च । 'न ना शुल्बा, वटी त्रयी ।' इति—(वै० पृ० १३८ श्लोकः ३०) । वाटः, वाटी, वाटम् = आवरणम्, वेष्टितस्थलम् । 'वाटो मार्गे वृतिस्थले । वाटी वनविशेषे स्यात्,' इति--(श० र० स० पृ० ८६ पं० १०) । 'वाटः, पथि वृतौ, वाटं वरण्डेऽङ्गान्तभेदयोः । वाटी वास्तौ गृहोद्यानकट्यौ' इति च--(अने० सं० पृ० १० श्लोकः ९९) । कपाटः, कवाटः, कपाटी, कवाटी; कपाटम्, कवाटम् = द्वारपिधानम्, द्वाररोधकः, काष्ठखण्डः । 'कवाटं द्वारबन्धः' इति--(वै० पृ० १६२ श्लोकः ४३) । 'कवाटं च कुवाटं च कपाटं कथितं बुधैः ।' इति---(श० र० स० पृ० ८८ पं० ६) । 'कवाटश्च कपाटश्च त्रिषु, स्यादररं न ना ।' इति च वाचस्पतिः' इति--(अम० सु० व्या० पृ० १२२ स्तं० १ पं० १९) । कटः, कटी, कटम् = क्रियाकारः । 'कटः श्रोणौ क्रियाकारे कलिञ्जेऽतिशये शवे । समये गजगण्डेऽपि, पिप्पल्यां च कटी मता ।' इति---(वि० प्र० पृ० ३६ श्लोकः १) । 'श्रोण्यां भृशे कलिञ्जे गजगण्डे शवरथे शवे च कटः ।' इति---(वै० पृ० २३१ श्लोकः १८) । 'अथ कटो गजगण्डे कटौ भृशे । शवे शवरथौषध्योः क्रियाकारश्मशानयोः । किलिञ्जे समये चापि' इति च— (अने० सं० पृ० ८, ९ श्लोकः ८२-३) । पेटः, पेटी, पेटम् = संघातकः, कदम्बकः, समूहः । 'पेटी पुटी पटी, वाटी' इति--(वै० पृ० २९२ श्लोकः ३७) । 'पेटकं पुस्तकादीनां मञ्जूषायां कदम्बके ।' इति च--(मे० पृ० ११ श्लोकः १२७) । मठः, मठी, मठम् = आश्रमविशेषः, तपस्विनां स्थानम् । 'मठी स्थाने तपस्विनाम् ।' इति–(वै० पृ० २९२ श्लोकः ३९) । कुण्डः, कुण्डी, कुण्डम् = जारात्पतिवत्नीसुतः, कमण्डलुः, अग्न्यालयः, मानभेदः, देवजलाधारश्च । 'कुण्डी कमण्डलौ जारात्पतिवत्नीसुते पुमान् । पिठरे तु न ना' इति--(मे० पृ० ४० श्लोकः ४) । नीडः, नीडा, नीडम् = खगालयः, स्थानं च । 'नीडं स्थाने खगालये ।' इति---(अने० सं० पृ० १२ श्लोकः १२३) । विषाणः, विषाणी, विषाणम् = पश्वङ्गविशेषः, शृङ्गम् । 'सींग' इति लोके । गजदन्तश्च । "हाथी दाँत" इति लोके । 'विषाणस्त्रिषु लिङ्गेषु पश्वङ्गगजदन्तयोः ।' इति-– (वै० पृ० १६३ श्लोकः ८२) । 'विषाणी क्षीरकाकोल्यामजशृंग्यां

च योषिति। कुष्ठनामौषधे क्लीबं, त्रिषु शृङ्गेभदन्तयोः।' इति च--(मे० पृ० ५० श्लोकः ७७)। तूणः, तूणी, तूणम् = निषङ्गः, तूणीरः, इषुधिः। "तरकस" इति लोके। 'तूणी नीलि-निषङ्गयोः।' इति--(अने० सं० पृ० १३ श्लोकः १४५)। 'तूणी निल्यां निषङ्गे वा' इति च--(मे० पृ० ४६ श्लोकः १६)। कङ्कतः, कङ्कती, कङ्कतम् = प्रसाधनी, कङ्कतिका। "कंघी" इति लोके। 'केशप्रसाधनद्रव्ये कङ्कती समुदाहृता।' इति— (श० र० स० पृ० १४० पं० १०)। मुस्तः, मुस्ता, मुस्तम् = ओषधिविशेषः। "मोथा" इति लोके। 'कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्॥' इति--(अम० ना० लिं० पृ० १८२ श्लोकः १५९)। 'कुथः, कुथा, कुथम् = गजोपर्य्यास्तिरणचित्रकम्बलः। "गलीचा" "दुलीचा" इति च लोके। 'वर्णस्तु परिस्तोमः कुथा त्रयी।' इति--(वै० पृ० १७२ श्लोकः १६६)। 'कुथं त्रिषु।' इति च बोपालितः' इति--(अम० सु० व्या० पृ० २७१ स्तं० २ पं० २४)। इङ्गुदः, इङ्गुदी, इङ्गुदम् = तापसतरुः, मुनि-द्रुमः। "हिङ्गोटा" "इङ्गुआ" इति च लोके। 'अथ द्वयोः॥ इङ्गुदी तापसतरुः' इति—(अम० ना० लिं० पृ० १४४ श्लोकः ४५-६)। जृम्भः, जृम्भा, जृम्भम् = जृम्भणम्। "जँभु आना" इति लोके। 'जृम्भस्तु त्रिषु, जृम्भणम्।' इति—(अम० ना० लिं० पृ० ८५ श्लोकः ३५)। 'जृम्भा विकासजृम्भणयोस्त्रिषु।' इति च-- (मे० पृ० १०६ श्लोकः ४)। दाडिमः, दाडिमी, दाडिमम् = दाडिमवृक्षः। 'दाडिमस्तु त्रिलिङ्गः स्या,-देलायां, करके त्रिषु।' इति—(मे० पृ० १११ श्लोकः ४४)। 'पिठरः स्थाल्यां ना, क्लीबं मुस्तामन्थानदण्डयोः॥' इति--(मे० पृ० १३६ श्लोकः १८४)। प्रतिसरः, प्रतिसरा, प्रतिसरम् = नियोज्यः, प्रेष्य, भृत्यः। "नौकर" इति लोके। 'भवेत्प्रतिसरो मंत्रभेदे माल्ये च कङ्कणे। व्रणशुद्धौ चमूपृष्ठे पुंसि, न स्त्री तु मण्डले। आरक्षे करसूत्रे च, नियोज्ये त्वन्यलिङ्गकः।' इति—(मे० पृ० १४२ श्लोकः २७६)। पात्रः, पात्री, पात्रम् = भाजनम्। "वर्तन" इति लोके। 'पात्रं स्रुवादौ पर्णे च भाजने राज-मंत्रिणि।' इति। 'पात्रं तु भाजने योग्ये स्रुवादौ राजमंत्रिणि।' इति पाठान्तरम्।' इति--(मे० पृ० १२६ श्लोकः ५७)। 'योग्यभाजनयोः पात्रम्' इति च--(अम० ना० लिं० पृ० ४२८ श्लोकः १७९)। कन्दरः, कन्दरा, कन्दरम् = गृहाकारो गिरिनितम्बदेशः, गुहा, आर्द्रकं च। 'कन्दरस्त्वङ्कुशे पुंसि, गुहायां च नपुंसकम्।' इति--(मे० पृ० १३२ श्लोकः १३२)। 'दरी तु कन्दरो वा स्त्री' इति च--(अम० ना० लिं० पृ० १२६ श्लोकः ६)। स्त्रियां टाप्। तथा च प्रयोगः—'कन्दरासु तरुणीरिह नयति रविः' इति माघः' इति—(अम० सु० व्या० टि० पृ० १२६ स्तं० १ पं० ४१)। 'कन्दर्य्यपि'। 'दरी गुहा कन्दरोऽस्त्री' इति। 'कलशी कन्दरी दरी।' इति च--(वै० पृ० ४१ श्लोकः ६)। नखरः, नखरा, नखरम् = नखः। "नाखून" इति लोके। 'नखरं त्रिषु।' इत्यमरमाला' इति--(अम० सु० व्या० पृ० २३१ स्तं० २ पं० २४)। वल्लूरः, वल्लूरा, वल्लूरम् = शुष्कमांसम, सूकरमांसं च।

'वल्लूरं स्याद्वनक्षेत्रे ग(वा)हनोषरयोरपि । वल्लूरा त्रिषु संशुष्कमांससूकरमांसयोः ।' इति--(मे० पृ० १३७-८ श्लोकः २१०-१)। दरः, दरी, दरम् = रन्ध्रविशेषः । 'दरी गुहा. कन्दरोऽक्ली' इति । 'दरोऽस्त्री शंखभोगर्त्तेष्व,--ल्पार्थे त्वव्ययं दरम् ।' इति । 'कलशी कन्दरी दरी ।' इति च—(वै० पृ० २९२ श्लोकः ३७)। पुरः, पुरी, पुरम् = नगरम् । ''शहर'' इति लोके। 'पुरं पाटलिपुत्रेऽङ्गे, गुग्गुलौ तु पुमानयम् ।' इति रभसः' इति-- (अम० सु० व्या० पृ० १४० स्तं० १ पं० १९)। 'पुरं शरीरमित्याहुर्गृहोपरिगृहे पुरम् । पुरो गुग्गुलुराख्यातो, नगरेऽपि पुरं पुरी ।' इति च धरणिः' इति--(अम० सु० व्या० पृ० ४२९ स्तं० १ पं० १५-६)। छत्रः, छत्रा, छत्रम् = धान्याकम् । ''धनियां'' इति लोके। 'भूतृणे धान्यके छत्रम्' इति--(रा० नि० पृ० ४२५ श्लोकः ४७)। 'छत्रा मिसावतिच्छत्रे कुस्तुम्बुरुशिलीन्ध्रयोः ।' इति च--(शि० को० पृ० ३४ श्लोकः ३७८)। पत्रपात्रपवित्रे-त्यादिलिङ्गानुशासनात्पुंस्त्वमपि बोध्यम् । कुवलः, कुवली, कुवलम् = बदरीवृक्षः, बदरीफलं च। 'कर्कन्धूर्बदरी कोली' इति । कुवलीशब्दोऽप्यत्र । 'कोलं कुवलफेनिले ॥ सौवीरं बदरं घोण्टापि' इति च--(अम० ना० लिं० पृ० १४१ श्लोकः ३६-७)। 'कुवलं तूत्पले मुक्ता-फलेऽपि कुवलीफले ।' इति च--(शि० को० पृ० ४१ श्लोकः ४५४)। मृणालः, मृणाली, मृणालम् = पद्मादेर्नालस्थं सूत्रम्, बिसम्, कमलादिमूलम् । ''भँसीड़ा'' इति लोके। वीरणा-दिमूलं च। 'मृणालं नलदे क्लीबं, पुन्नपुंसकयोर्बिसे ।' इति—(शि० को० पृ० ४३ श्लोकः ४७०)। 'मृणाली कन्दली नाली' इति च--(वै० पृ० २९२ श्लोकः ३८)। मण्डलः, मण्डली, मण्डलम् = निवहः, समूहः, बिम्बश्च। 'मण्डलं परिधौ कोठे देशे द्वादशराजसु । क्लीबे,-ऽथ निवहे बिम्बे त्रिषु, पुंसि तु कुक्कुरे ।' इति--(मे० पृ० १५३ श्लोकः १२१)। 'बिम्बोऽस्त्री, मण्डलं त्रिषु ।' इति च--(अम० ना० लिं० पृ० ३५ श्लोकः १५)। नालः, नाला, नालम् = काण्डः, उत्पलादिदण्डः, मृणालश्च । 'नाला(लं) न ना पद्मदण्डे, नाली शाककल(ड)म्बके । इति--(मे० पृ० १४७ श्लोकः २८)। प्रणालः, प्रणाली, प्रणालम् —पयोवहा, पयः पदवी। ''पनारा'' ''पतनाला'' इति च लोके । 'प्रणाल्यक्ली पयोवहा ।' इति—(वै० पृ० १५५ श्लोकः २०)। 'द्वयोः प्रणाली पयसः पदव्याम्' इति च—(अम० ना० लिं० पृ० १०६ श्लोकः ३५)। पटलः, पटली, पटलम् = छदिः, गृहाच्छादनम्। ''छानि'' ''छप्पर'' इति च लोके। 'पटलं दृग्रुक्छदिषोः क्ली, न ना पिटके गणे । इति—(वै० पृ० २६१ श्लोकः ५२)। ग्रन्थसन्धौ तु पुंस्त्वमाह पुरुषोत्तमदेवः--'उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ।' इति च--(त्रि० शे० पृ० ३११ श्लोकः २५)। अर्गलः, अर्गला, अर्गलम् = कपाटमध्यस्थो रोधकः काष्ठादिदण्डः। ''आगरी'' ''शांकल'' ''वेंबड़ा'' इति च लोके । 'कपाट-मररं तुल्ये, तद्विष्कम्भोऽर्गलं न ना ।' इति--(अम० ना० लिं० पृ० १२२ श्लोकः १७)।

'विदण्डस्त्वर्गला त्रयी ।' इति च—(वै० पृ० १६३ श्लोकः ५०)। शृङ्खलः, शृङ्खला, शृङ्खलम् = निगडम् , बन्धनम् । 'शृङ्खला पुंस्कटीवस्त्रबन्धे च, निगडे त्रिषु ।' इति—(मे० पृ० १५५ श्लोकः १४१) । कन्दलः, कन्दली, कन्दलम् = कपालः, उपरागः, नवाङ्कुरः, कलध्वनिश्च । 'कन्दलं त्रिषु कपालेऽप्युपरागे नवांकुरे । कलध्वनौ, कन्दली तु मृगगुल्मप्रभेदयोः ।' इति—(मे० पृ० १५० श्लोकः ६९, ७०) । पूलः, पूली, पूलम् = बद्धतृणसञ्चयविशेषः, तृणपञ्चिका । "गट्ठा" "मुट्ठा" "बण्डल" इति च लोके । 'पूलोऽस्त्री तृणपञ्चिका ।' इति—(वै० पृ० १२८ श्लोकः ६४) । अवहेलः, अवहेला, अवहेलम् = अनादरः । 'रीढावमाननावज्ञाप्यवहेलमसूर्क्षणम् ।' इति—(वै० पृ० ९७ श्लोकः १७२) । कलशः, कलशी, कलशम् = जलाधारविशेषः, घटः । "घड़ा" "कलसा" इति च लोके । 'निपो घटः कुटः कुम्भः करीरः कलशी त्रयी ।' इति—(वै० पृ० १६३ श्लोकः ५८) । 'कलसः' इति दन्त्यसकारान्तोऽपि । 'कलसः कलशोऽपि च ॥' इति—(श० भे० प्र० पृ० ४ श्लोकः १८) । एवं गौडोऽपि । 'कटाहः, कटाही, कटाहम् = कर्परः, महिषी-शिशुः, द्वीपभेदश्च । 'कटाहो दंशलालिकः ।' इति । 'कटाहः कर्परो लट्व' इति च—(वै० पृ० १६३ श्लोकः ५६) । 'सूपे च पाकपात्रे च कटाहो महिषीशिशौ ।' इति—(त्रि० शे० पृ० ३८१ श्लोकः ४५८) । 'जायमानविषाणाग्रे कटाहो महिषीशिशौ ।' इति । 'कटाहो निरयेऽपि च ।' इति च—(हा० व० पृ० ४०८ श्लोकः २६१) । 'कटाहो घृततैलादिपाकपात्रेऽपि कर्परे । स्तूपे कटाहः कूर्मपृष्ठे च महिषीशिशौ ।' इति—(वि० प्र० पृ० १८० श्लोकः १६) । 'कटाहः कूर्मकर्परे । द्वीपस्य प्रभेदे स्यात्तैलादेः पाकभाजने ॥ जायमानविषाणाग्रमहिषीशावकेऽपि च ।' इति च—(मे० पृ० १७६ श्लोकः १५) । अयं षष्ठः, इयं षष्ठी, इदं षष्ठि = षण्णां पूरणी । "छठवाँ" इति लोके । 'षष्ठी कात्यायनीतिथ्यो, स्त्रिषु षण्णां च पूरणे ।' इति—(मे० पृ० ३९ श्लोकः ९) । अयं रेणुः, इयं रेणुः, इदं रेणु = धूलिः । "धूल" इति लोके । 'रेणुः स्त्रीपुंसयोर्धूलौ पुंलिङ्गः पर्पटे पुनः ।' इति—(मे० पृ० ४६ श्लोकः २५) । 'रेणुस्तु पर्पटे । धूलो पुष्परागे च' इति च—(श० र० स० पृ० १०७ पं० ४, ५) । अयं इषुः, इयं इषुः, इदं इषु = बाणः । "तीर" इति लोके । 'पत्री रोप इषुर्द्वयोः ।' इति—(अम० ना० लिं० पृ० २९२ श्लोकः ८७) ।

अथाधुना संक्षेपतः कान्तादीन् क्रमरहितान् स्वतस्त्रिलिङ्गवाचकशब्दानाह दुर्गः—(दु० लिं० पृ० ४०-१-२ श्लोकः ८३-४-५) ।

> … … हरीतक–विभीतक–तट–पुटम् ॥
> पेट–कवाट–वट–मठं दर–भल्लातक–विषाण–वल्लूरम् ।
> शृङ्खल–पुरा–ऽऽमलक–वाट–मण्डल-कलश-कुवल-पात्रम् ॥
> एते च सर्वलिङ्गाः' — — — ॥ इति॥

अस्य व्याख्या—

हरीतकेति। पेटेति । एत इति च। हरीतकादौ, पेटादौ, दरादौ, शृंखलादौ च समाहारो द्वन्द्वः। 'सर्वलिङ्गाः' इत्यधिकारः। एते हरीतकादयः पात्रपर्य्यान्ताः शब्दाः सर्वलिङ्गा त्रिलिङ्गा भवन्ति। एषां व्याख्यादयस्तु प्राग्वद् बोध्या।

अथ सम्प्रति संक्षेपतः क्रमरहितान् प्रतिसरादीन् दाडिमान्तान् स्वतस्त्रिलिङ्गवाचकशब्दानाह पुरुषोत्तमदेवः—(त्रि० शे० पृ० ३९४-५ श्लोकः २१ तः २४ या०)।

त्रिलिङ्ग्यां तु प्रतिसर—स्फुलिङ्ग—नखरा—ऽर्गलाः।
कन्दरं शृङ्खलं नालं वल्लूर—फल—मुस्तकाः॥
जृम्भ—श्च टाम्बन्ता एते स्त्रिया—मथ विभीतकः।
हरीतका—ऽऽढक—तट—कवाटा—श्च गुणो वटः॥
मण्डलं शलभं भल्लातकं कलश—कन्दलौ।
मृणाला—ऽऽमलकौ दाडिम—श्च ङ्यन्ताः स्त्रिया—मिमे॥

एषां व्याख्या—

त्रिलिङ्ग्यामिति। जृम्भ इति। मण्डलमिति च। 'त्रिलिङ्ग्याम्' इत्यधिकारः॥ प्रतिसरादौ, वल्लूरादौ, हरीतकादौ, कलशादौ, मृणालादौ चेतरेतरयोगो द्वन्द्वः। एते प्रतिसरादयो दाडिमान्ताः शब्दाः त्रिलिङ्ग्यां नृस्त्रीक्लीबलिङ्गेषु भवन्ति। फलः, फली, फलम्=अस्थिखण्डः, नागकेसरः, प्रयोजनम्, फलवान्, कुसुमादिसम्भवश्च। "फलवाला" इति लोके। फलान्यस्य सन्ति। 'फलं फले धने बीजे निष्पत्तौ भोगलाभयोः। सस्य' इति केशवः' इति—(श० चिं० पृ० ३३२ स्तं० १ पं० ८, ९)। "लाभनिष्पत्तिभोगेषु बीजे फाले धने फलम्। फली ताम्रादिफलके' इति—(वै० पृ० २३४ श्लोकः ५२)। 'फलं हेतुसमुत्थे स्यात्फलके व्युष्टलाभयो। जातीफले च कङ्कोले सस्यबाणाग्रयोरपि। फलिन्यां तु फली योषा त्रिफलायामपीष्यते।' इति च—(श० र० स० पृ० २९८ पं० १७)। मुस्तकः, मुस्तका, मुस्तकम्=ओषधिविशेषः, मुस्ता। "मोथा" इति लोके। 'मुस्तायां मुस्तकं न स्त्री' इति—(वै० पृ० ६१ श्लोकः २००)। 'कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्।' इति च—(अम० ना० लिं० पृ० १८२ श्लोकः १५९)। एते प्रतिसरादयः शब्दाः स्त्रियां टाप्प्रत्ययान्ता भवन्ति, न तु ङीबन्ता इत्यर्थः। गुणः, गुणी, गुणम्=गुणविशिष्टः, गुणवान्। 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये। त्यागशौर्य्यादिसन्ध्यादिसत्त्वाद्यावृत्तिरज्जुषु। शुक्लादावपि बुद्धयां (वट्यां) च' इति—(मे० पृ० ४५ श्लोकः १०)। 'मौर्वीसूदवृकोदरतन्त्वावृत्तीन्द्रियेषु रूपादौ।

सत्त्वादौ सन्ध्यादौ त्यागादावप्रधानके च गुणः ।' इति च--(ना० र० मा० पृ० २४ पं० ५,६) । शलभः, शलभी, शलभम् = कीटभेदः, पतङ्गश्च । 'पतङ्गः शलभः समौ ।' इति--(वै० पृ० २९ श्लोकः ४३) । शेषशब्दानां व्याख्या प्राक्कथिता । इमे विभीतकादयः शब्दाः स्त्रियां स्त्रीलिङ्गे ङ्यन्ता ङीप्प्रत्ययान्ता भवन्ति ।

करणे ल्युट् त्रिषु, यथा तस्य व्याख्यान इत्य-ऽदः ।
सूत्रकृद् भाष्यकृत् को-ऽसा-वनुमान इती-च्छति ।।" इति ।।

अस्य व्याख्या—

करण इति । करणे करणकारके ल्युट् ल्युट्प्रत्ययान्तं पदं त्रिषु स्त्रीपुन्नपुंसकलिङ्गेषु । स्यादिति शेषः । यथा—तस्य व्याख्यान इति "तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः (४।३।६६)" इति अदः पाणिनीयसूत्रमुदाहरणं भवति । सूत्रकृत् सूत्रकारकः पाणिनिः । भाष्यकृत् भाष्यकारकः पतञ्जलिश्च "कोऽसावनुमानः" "इति" "भूवादयो धातवः । १।३।१" इति सूत्रे भाष्ये अनुमानशब्दं पुंल्लिङ्गं प्रायुङ्क्त' इति—(त्रि० शे० टी० पृ० ३९५ पं० ३२तः ३६या०) ।

तथा च यादवः—(वै० पृ० २९२ श्लोकः ३७-८-९) ।

त्रिलिङ्ग्यां तु क्वचि-च्छुङ्गा कलशी कन्दरी दरी ।
पेटी पुटी पटी वाटी कवाटी पिटका वटी ।।
अर्गला दाडिमी पात्री विडङ्गा कुवली तटी ।
मृणाली कन्दली नाली मुस्ता जृम्भा हरीतकी ।।
त्रिजातकी गन्धिधना मठी स्थाने तपस्विनाम् ।।" इति ।।

एषां व्याख्या—

त्रिलिङ्ग्यामिति । अर्गलेति । त्रिजातकीति च । 'त्रिलिङ्ग्याम्' इत्यधिकारः । एते शुङ्गादयो मठ्यन्ता आबन्ता ङीबन्ताः स्त्रीलिङ्गा शब्दाः क्वचित् त्रिलिङ्ग्यां पुंस्त्रीनपुंसकलिङ्गेषु भवन्ति । यथा—शुङ्गः, शुङ्गा, शुङ्गम् = पत्रकोसिका । "कली का कोष" इति लोके । 'पर्णं बर्हं पतत्रं च, त्रयी शुङ्गाऽस्य (पत्रस्य) कोसिका ।' इति—(वै० पृ० ४६ श्लोकः १७) । त्रिजातकः, त्रिजातकी, त्रिजातकम् = गन्धधना, गन्धसमूहः, त्रिसुगन्धिः, तुल्यानि त्वगेलापत्रकाणि । 'त्रिगन्धमेलात्वक्पत्रैस्त्रिसुगन्धं त्रिजातकम् ।' इति—(वै० पृ० १७१ श्लोकः १५०) । मठः, मठी, मठम् = तपस्विनां स्थानम् । इहान्येषां शब्दानां व्याख्या प्राग्वद् बोध्या ।

अमरोऽपि—(अम० ना० लिं० पृ० ४६२ श्लोकः ४२) ।

'त्रिषु पात्री पुटी वाटी, पेटी कुवल–दाडिमौ ॥' इति ॥

अस्य व्याख्या—

त्रिष्विति । कुवलादौ चेतरेतरयोगो द्वन्द्वः । 'त्रिषु' इत्यधिकारः । एते पात्र्यादयः शब्दाः स्वतस्त्रिलिङ्गा स्युः । एषां शब्दानां व्याख्या तु प्रागवद् बोध्या ।

इति स्वतस्त्रिलिङ्गानुशासनम् ।

अथाभिधेयवल्लिङ्गानुशासनम्

अथाधुनाऽभिधेयवल्लिङ्गज्ञानमाह यादवः—(वै० पृ० २९२-२ श्लोकः ३९तः ४६या०)।

गुण–द्रव्य–क्रिया–युक्तं ब्रुवन्तो वाच्यलिङ्गकाः ॥
येना–ऽर्थः प्रस्तुतो नाम्ना तल्लिङ्गं वाच्यलिङ्गकम् ।

अस्य व्याख्या—

गुणेति । गुणश्च द्रव्यं च क्रिया च गुणद्रव्यक्रियास्ताभिर्यद् युक्तं तद् वाच्यलिङ्गका अभिधेयलिङ्गा ब्रुवन्तः कथयन्तः। येन नाम्ना संज्ञया अर्थः प्रस्तुतो भवति तल्लिङ्गं वाच्यलिङ्गकं अभिधेयलिङ्गं स्यात्। उदाहरणानि तु लिङ्गानुशासनपरिशिष्टेऽमरोक्तौ वक्ष्यति।

न त्रिषु स्यु–र्विशिष्टार्थस्पर्शिनः पङ्कजादयः।
भेद्यनिष्ठत्व–—मेकार्थवृत्तिमात्रैककारणम् ॥

अस्य व्याख्या—

नेति । ये पङ्कजादयः पद्मप्रभृतयो विशिष्टार्थस्पर्शिनः प्रसिद्धार्थवाचिनः, ते त्रिषु नृस्त्रीक्लीबलिङ्गेषु न स्युः। इहैकार्थवृत्तिमात्रैककारणं भेद्यनिष्ठत्वं विशेष्यनिष्ठता स्यात्।

अतंत्रीकृत्य भेदोक्तिः कैश्चि–दाश्रीयते पुनः ।
ते स्यु–रर्थसमा यद्वत् सत्त्वाद्या वाक्यगोचराः।

अस्य व्याख्या—

– अतंत्रीकृत्येति। या भेदोक्तिः विशेषव्याहारः अतंत्रीकृत्य पुनः कैश्चिद् आश्रीयते, यद्वद् वाक्यगोचराः सत्त्वाद्या तद्वत्तेऽर्थसमाः स्युः।

मर्चचिका मतल्लिका प्रकाण्ड–मुद्घ–तल्लजौ ॥
अमीषु ना–ऽर्थलिङ्गता प्रशस्तवाचकेष्व–ऽपि ॥

अस्य व्याख्या—

मर्चचिकेति । मर्चचिका, मतल्लिका, प्रकाण्डम्, उद्घः, तल्लजश्चामीषु पञ्चसु प्रशस्त-वाचकेषु कल्याणवाचकेष्वपि अर्थलिङ्गता न स्यात्, अर्थादेते तु पञ्च नित्यं द्रव्ये एव लिङ्गान्तरेण सामानाधिकरण्येऽपि स्वलिङ्गं न जहति (प्रशंसावचनैश्च ॥ २।१।६६ ॥) इति समासः । कृष्ण-सर्पवाप्यश्वादिवदेते नित्यसमासाः । यथा—प्रशस्तः पुरुषः = पुरुषमतल्लिका । प्रशस्तो ब्राह्मणः = ब्राह्मणमचर्चिका । प्रशस्ता गौः = गोप्रकाण्डम् । प्रशस्तो मनुष्यः = मनुष्योद्घः । प्रशस्ता कुमारी = कुमारीतल्लजः । प्रकाण्डः पुंस्यपि । 'प्रकाण्डो न स्त्री विटपे मूलशाखान्तरे तरोः । शस्त' इति–(मे० पृ० ४२ श्लोकः ३१) । 'अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयोः ।' इति च रसभः' इति—(अम० सु० व्या० पृ० ५३ स्तं० २ पं० २०-१)

योनिसम्बन्धवाचिन्यः पुत्राद्याः पुंगिरो नरि ॥
मात्राद्याः स्त्रीगिरः स्त्रीत्वे विद्यासम्बन्धगोचराः ।
आचार्य्य-त्वि-गुपाध्याय-शिष्या याज्यार्थिका-स्तथा ॥
शास्त्रार्था वैदिकार्था–श्च स्थपति–श्रोत्रियादयः ।
अधिकारकृता मंत्रि–स्थापत्याद्यभिधा–स्तथा ॥
भट्टारको भट्टरकः भट्ट–स्तत्रभवान् भवान् ।
भगवान् पूज्यपाद–श्च देवा–श्चा–ऽर्चार्थिका-स्तथा ॥
शत्रु-मित्र-ज्ञ-शिल्प्यर्थाः प्राय–स्तद्व–न्न तु त्रिषु ।

एषां व्याख्या—

योनीति । या योनिसम्बन्धवाचिन्यः पुंगिरः पुत्राद्याः सुताद्यास्ते नरि पुंसि स्युः । एवं या योनिसम्बन्धवाचिन्यः स्त्रीगिरः मात्राद्या जनन्याद्यास्ताः स्त्रीत्वे स्त्रियां स्युः । ये विद्यासम्बन्धगोचरा आचार्य्याः = मंत्रव्याख्याकृतः । ऋत्विजः = याजकाः, पुरोहिताः । उपा-ध्यायाः = अध्यापकाः । शिष्याः = अन्तेवासिनः, शासनयोग्याः । तथा याज्यार्थिकाः = यजमान-वाचकाः । शास्त्रार्थः = शास्त्रवाचकाः । वैदिकार्थाः = वैदिकवाचकाः । स्थपतयः = बृहस्पतिसव-कर्त्तारः, जीवेष्टियाजकाश्च । श्रोत्रियाः = छान्दसाः, अधीतवेदाः । ये अधिकारकृता मंत्रिणः = धीसचिवाः, अमात्याः । स्थापत्याः = राज्ञां स्त्र्यागारे बहीरक्षाकृताः । भट्टारकः, भट्टरकः, भट्टः, तत्रभवान्, भवान्, भगवान्, पूज्यपादश्चैते मान्यव्यक्तिवाचकाः । देवाः = सुराः । अर्चा-र्थिकाः = पूजावाचकाः । तथा शत्रुवाचकाः, मित्रवाचकाः पण्डितवाचकाः, शिल्पिवाचका-श्चैते त्रिषु त्रिलिङ्गेषु न स्युः । ते तु प्रायो बहुधा तद्वत् प्रागुक्तवद् बोध्याः ।

वाच्यव–त्स्या–द्बहुव्रीहि–र्दिङ्नामसु तु स स्त्रियाम् ॥' इति ॥

अस्य व्याख्या

वाच्यवदिति । बहुव्रीहिर्बहुव्रीहिसमासो वाच्यवदभिधेयवत्स्यात् यथा––वृद्धा भार्या यस्य स वृद्धभार्य्यः। बहुधनं यस्य स बहुधनः । बहुधनं यस्या सा बहुधना । बहुधनं यस्मिँस्तद् बहुधनं गृहम् । स बहुव्रीहिसमासो दिङ्नामसु दिशासंज्ञासु तु स्त्रियां स्यात् । यथा–– उत्तरस्याः पूर्वस्याश्च दिशोरन्तरालं दिक् उत्तरपूर्वा—ईशानी । दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालं दिक् दक्षिणपूर्वा–आग्नेयी । 'दिङ्नामान्यन्तराले' इत्यनेन बहुव्रीहिसमासः ।

अभिधेयलिङ्गमाह तथा चामरः—(अम० ना० लिं० पृ० ४६३ श्लोकः ४४-५-६) ।

बहुव्रीहि–रदिङ्नाम्ना–मुन्नेयं त–दुदाहृतम् ॥' इति ॥

अस्य व्याख्या—

बह्विति । अदिङ्नाम्नां दिग्भिन्नाभिधेयानां, बहुव्रीहिसमासः, अन्यलिङ्गभाक् अर्थाद् वाच्यलिङ्गः स्यात् । तदुदाहृतं तदुदाहरणं तु स्वयं उन्नेयम् । 'अदिङ्नाम्नाम्' इति किम् । दक्षिणपूर्वा ।

स एवेह विशेषमाह––

कृतः कर्त्तर्य्य–ऽसंज्ञायां कृत्याः–कर्त्तरि–कर्म्मणि ।
अणाद्यन्ता–स्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥

अस्य व्याख्या–

कृत इति । असंज्ञायां अनभिधायां, कर्त्तरि कर्त्तृकारके, (कर्त्तरि कृन् ।) (३।४।३७) इत्यादिना विहिता विधेयाः । कृतः कृत्प्रत्ययाः कृत्प्रत्ययान्तशब्दा इत्यर्थः । परोपगाः वाच्यलिङ्गाः स्युः । यथा—करोतीति कर्त्ता पुमान्, कर्त्री स्त्री, कर्त्तृ कलत्रम् । कुम्भकारः पुमान्, कुम्भकारी स्त्री, कुम्भकारं कुलम् । असंज्ञायां किम् । 'संज्ञायां भृत्–' (३।२।४६) इत्यादिना विहिता वाच्यलिङ्गा न स्युः । यथा—प्रजा = जनः, सन्ततिश्च । धनञ्जयः = अग्निः, अर्जुनश्च । हरिः = विष्णुः । विश्वम्भरः—अच्युतः, इन्द्रश्च । विश्वम्भरा = भूमिः । कर्त्तरि किम् कृतिः । कर्त्तरि कर्मणि च कृत्याः कृत्यप्रत्ययाः कृत्यप्रत्ययान्तशब्दा इत्यर्थः । उक्तं च––सुपद्मसम्मतकारिकायाम्—'कृत्याः षट् ते समाख्याताः क्यप्ण्यतौ भावकर्मणोः । तव्यानीयावनन्ताद् यत्केलिमः कर्मकर्त्तरि ।' इति—(श० चिं० पृ० ६६२ स्तं २ पं० १५-६-७) । परगामिनो वाच्यलिङ्गाः स्युः । कर्त्तरि यथा—भव्यस्तरुः, भव्या वराङ्गना, भव्यं कलेवरम् । "भव्यगेय––

(३।४।६८)" इति कर्तरि यत् । वसतीति वास्तव्योऽयम्, वास्तव्या सा, वास्तव्यं तत् । ''वसेस्तव्यत्कर्त्तरि णिच्च" इति । कर्मणि यथा––कर्त्तव्यो धर्मस्त्वया, कर्त्तव्या भक्तिः । कार्यो घटः, कार्या सृष्टिः, कार्य्यं जगत् । 'कर्मणि ण्यत् ।' कर्त्तरि कर्मणीति किम् । भावे तु एधितव्यं त्वया । भवितव्यम् । असंज्ञायामित्येव । भिद्यो नदः । उज्झत्युदकमिति उद्ध्यो नदः । "भिद्योद्ध्यौ नदे" इत्यनेन संज्ञायां क्यप् । अतस्तौ वाच्यलिङ्गौ न स्याताम् । "तेन रक्तं रागात् (४।२।१)" इत्याद्यर्थे विहिता ये अणादितद्धितप्रत्ययास्तदन्ताः शब्दा नानार्थानामनेकार्थानां भेदका विशेषणानि अनेकार्थविशेषणभूताः विशिष्टत्वाद्वाच्यलिङ्गाः । अथ वा । नानार्थभेदका विशेष्या येषां ते वाच्यलिङ्गाः स्युः । यथा—कुङ्कुमेन रक्तः कौङ्कुमः पटः, कौङ्कुमी शाटी, कौङ्कुमं वस्त्रम् । एवं कुसुम्भेन रक्तः कौसुम्भः पटः, कौसुम्भी शाटी, कौसुम्भं वासः । "तेन रक्तं रागादि" इत्यण् । लाक्षया रक्तो लाक्षिकः पटः, लाक्षिकी शाटी, लाक्षिकं वसनम् । ''लाक्षारोचनात् ठक्" इत्यनेन ठक् । कृत्तिकाभिर्युक्ता, कार्त्तिकी = रात्रिः पौर्णमासी वा । "नक्षत्रेण युक्तः कालः" इत्यनेनाण् । "टिड्ढेति" ङीप् । वसिष्ठेन दृष्टं वासिष्ठं साम । "दृष्टं साम" इत्यनेनाण् । वसिष्ठेन दृष्टो मंत्रः वासिष्ठः, वसिष्ठेन दृष्टा ऋक् वासिष्ठी । इति । प्रजापतिना प्रोक्तः प्राजापत्यः । "तेन प्रोक्तम्" इत्यनेन ण्यप्रत्ययः । अणाद्यन्ता इत्यादिशब्दाद् ग्रामे भवो ग्राम्यः पुरुषः, ग्राम्या स्त्री, ग्राम्यं वस्त्रम् । "ग्रामाद्यखञौ" इत्यनेन यत्प्रत्ययः । रक्ताद्यर्थे इत्यादिशब्दान्मथुराया आगतो माथुरोऽयं पुरुषः । ''तत आगतः" इयं माथुरी स्त्री । "टिड्ढेति ङीप्" "यस्येति च" इत्यनेनालोपः । मथ्यन्ते रिपवो यस्यां सा मथुरा । तथा च प्रयोगः—'मथुरा भगवान्यत्र नित्यं संनिहितो हरिः'— इति भागवतम् ।

षट्सञ्ज्ञका–स्त्रिषु समा युष्म–दस्य–त्तिङ्–ऽव्ययम् ।।" इति ।।

अस्य व्याख्या—

षडिति । "ष्णान्ता षट्—(१।१।२४)" डति च (१।१।२५)" इति सूत्राभ्यां कृतषट्सञ्ज्ञाः षान्त—नान्तसंख्या कतिशब्दश्च त्रिषु त्रिलिङ्भ्यां सर्वेषु लिङ्गेषु समाः सरूपाः तुल्यरूपा नित्यं बहुषु वर्त्तमाना अतो बहुवचनान्ताश्चेत्यर्थः । यथा— षडिमे नराः, षडिमाः स्त्रियः, षडिमानि कुलानि । पञ्चैते नराः, पञ्चैताः स्त्रियाः, पञ्चैतानि फलानि । कति पुमांसः, कति पुरुषाः, कति घटाः, कति स्त्रियः, कति घट्यः, कति कुलानि, कति गृहाणि । कतिशब्दः स्वभावाद् बहुवचनवाची । 'पत्न्यः कत्यभवन्प्रभोः' इति भागवतम् । युष्मदस्मच्छब्दौ तिङन्तपदान्यव्ययानि च त्रिषु त्रिलिङ्गेषु समानि लिङ्गकृतविशेषरहितानीत्यर्थः । युष्मच्छब्दो यथा—त्वं पुमान् देवः, त्वं स्त्री देवी, त्वं फलं ब्रह्म । अस्मच्छब्दो यथा—अहं पुमान्, आवां पुमांसौ, वयं पुमांसः, अहं स्त्री, आवां स्त्रियौ,

वयं स्त्रियः, अहं कलत्रं, आवां कलत्रे, वयं कलत्राणि । तिङ् यथा—पुरुषः पचति, स्त्री पचति, कुलं पचति । घटो भवति, स्थाली भवति, पात्रं भवति, एवं दारा भवन्तीत्यादि । अव्ययं यथा--उच्चैः तरुः, उच्चैः दाराः । उच्चैः स्त्री, उच्चैः शाला, उच्चैः कलत्रम्, उच्चैर्गृहम् । तत्र ग्रामे, तत्र शालायाम्, तत्र नगरे ।

अत्र विशेषमाह यादवः--(वै० पृ० २९३ श्लोकः ४८-९) ।

कृतः कर्त्तर्य्य-ऽसंज्ञायां कृत्या[1]द्या ल्युट्[2] च कारके ।
सर्वनामा[3]न्य-ऽणाद्या-श्च तद्धिताः सञ्ज्ञया विना ॥
तद्धिता-श्चतुरर्थ्यां ये सङ्केता-त्कृतकाह्वयाः ।
षट्सञ्ज्ञा युष्म-दस्म-च्च त्रिषु लिङ्गेष्व-ऽभेदवत् '॥ इति ॥

अनयोर्व्याख्या--

कृत इति । तद्धिता इति च । असंज्ञायां अनभिधायां कर्त्तरि कर्त्तृकारके कृतः कृत्प्रत्ययान्तशब्दाः कृत्याद्याः शब्दाः कारके करणकारके ल्युट् ल्युट्प्रत्ययान्तशब्दाश्चैते वाच्यलिङ्गाः स्युः । ल्युट्प्रत्ययान्ता यथा--व्याख्यानः, अनुमानः । सर्वनामानि सर्वादीनि सर्वनामसंज्ञकानि । सञ्ज्ञया विना ये अणाद्या अण्प्रत्ययाद्यास्तद्धिताः, ये चतुरर्थ्यां चतुरर्थिकाः तद्धिताः, ये सङ्केतात्कृतकाह्वयाश्चैते वाच्यलिङ्गाः स्युः । षट्सञ्ज्ञाः षान्तनान्तसंख्या, युष्मदस्मच्चैते त्रिषु लिङ्गेषु पुंस्त्रीनपुंसकलिङ्गेषु अभेदवत् समानरूपवत् भवन्ति ।

दुर्गसिंहोऽपि—(दु० लिं० पृ० ४२ श्लोकः ८५) ।

ष्णान्ता[4] संख्या-ऽलिङ्गा कत्य[5]-ऽव्यय[6]-युष्म-दस्म-च्च ।।' इति ।।

पाणिनीयेऽपि--(१) (कृत्याश्च) ॥ कृत्यप्रत्ययान्तास्त्रिषु स्युः । सि० कौ० पृ० ४०४ सू० १९० ।

(२) (करणाधिकरणयोर्ल्युट् च) ॥ करणाधिकरणयोर्ल्युट्प्रत्ययान्तस्त्रिषु स्यात् । सि० कौ० पृ० ४०४ सू० १९१ ।

(३) (सर्वादीनि सर्वनामानि) एतानि त्रिषु स्युः । सि० कौ० पृ० ४०४ सू० १९२ ।

पाणिनीयेऽपि--(४) (ष्णान्ता संख्या) ॥ षान्ता नान्ता च संख्ये त्रिषु लिङ्गेषु अभेदवत्समानरूपवत्स्तः । सि० कौ० पृ० ४०४ सू० १८७ । (शिष्टा परवत्) ॥ एकः पुरुषः, एका स्त्री, एकं कुलम् । सि० कौ० पृ० ४०४ सू० १८८ ।

(५) (कतियुष्मदस्मदः) एतेऽलिङ्गकाः स्युः, लिङ्गरहिता समानरूपा इत्यर्थः । सि० कौ० पृ० ०४४ सू० १८६ ।

(६) (अव्ययम्) । (स्वरादिनिपातमव्ययम्) ॥ स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः । एतेऽपि

अस्य व्याख्या—

ष्णान्तेति । कति च अव्ययं च युष्मच्च अस्मच्चेति समाहारो द्वन्द्वः । ष्णान्ता षान्त-नकारान्ता संख्या, कति, अव्ययानि युष्मदस्मच्छब्दौ च अलिङ्गाः पुंस्त्रीक्लीबलिङ्गैर्रहिता अर्थात् समानरूपा भवन्ति ।

हेमोऽपि—-(अभि० सं० लिं० पृ० १० श्लोकः १३७) ।

ष्णान्ता संख्या डति युष्म–दस्म–च्च स्यु–रलिङ्गकाः ।
पदं वाक्य–मव्ययं चे–त्य–ऽसंख्यं च तद् बहुलम् ।। १।।' इति ।।

अस्य व्याख्या—

ष्णान्तेति । सुगममिदं पद्यम् ।

इत्यभिधेयवल्लिङ्गानुशासनं समाप्तम् ।

अलिङ्गकाः स्युः । सि० कौ० पृ० ४०४ सू० १८५ । तत्र विशेषः—-(गुणवचनं) । शुक्लः पटः, शुक्ला पटी, शुक्लं वस्त्रम् । (गुणवचनमुकारान्तं नपुंसके च) ।। त्रिलिङ्गमित्यर्थः । पटु, पट्वी, पटुः । सि० कौ० पृ० ४०४ सू० १८९ ।

अथ लिङ्गानुशासनपरिशिष्टम् ।

तत्र विशेषमाह यादवः—(वै० पृ० २९३ श्लोकः ५०) ।

कृ–त्तद्धित–समासाख्या प्रसिद्धाख्ये च लिङ्गिनि ।
तद्यथा चक्रभृद् विष्णु–र्लताभेदा–ऽभिधा यथा ।।" इति ।।

अस्य व्याख्या—

कृदिति । कृदाख्या च तद्धिताख्या च समासाख्या च कृत्तद्धितसमासाख्या । "द्वन्द्वान्ते श्रूयमाणपदं प्रत्येकमभिसम्बध्यते" इति । या कृत्तद्धितसमासाख्या सा प्रसिद्धाख्ये ख्यातसञ्ज्ञके लिङ्गिनि लिङ्गवति भवति । तद्यथा—लतानां वल्लीनां भेदास्तेषामभिधा संज्ञा लताभेदाभिधा । इति ।

अथेदानीमितरेतरयोगद्वन्द्वसमासे तत्पुरुषसमासे च लिङ्गज्ञानमाहामरः—(अम० ना० लिं० पृ० ४६२ श्लोकः ४२) ।

परलिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ।।" इति ।।

अस्य व्याख्या—

परेति । द्वन्द्वैकत्वस्याव्ययीभावस्य च लिङ्गं प्रागुक्तम् । स्वप्रधाने उभयपदप्रधाने इतरेतराख्ये द्वन्द्वसमासे च तत्पुरुषे तत्पुरुषसमासे च यत्परलिङ्गमग्रिमपदस्थं लिङ्गं तदेव लिङ्गं भवति । अथ वा । स्वे समस्यमानाः पदार्थाः प्रधानं यत्र तस्मिन्नितरेतरयोगद्वन्द्वे परपदस्य यल्लिङ्गं तदेव लिङ्गं स्यात् । तत्र "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः (२।४।२६)" इति पाणिनिसूत्रम् । तत्र द्वन्द्वे यथा—कुकुटश्च मयूरी च कुकुटमयूर्याविमे । मयूरी च कुकुटश्च मयूरीकुक्कुटाविमौ । तत्पुरुषे यथा—धान्येनार्थो धान्यार्थः । सर्पाद्भीतिः सर्पभीतिः । सर्पाद्भयं सर्पभयम् । वाप्या अश्वः वाप्यश्वः । कुलस्य ब्राह्मणः कुलब्राह्मणः । ब्राह्मणस्य कुलम् ब्राह्मणकुलम् । राज्ञः पुत्री राजपुत्री । द्वितीयस्य भिक्षा द्वितीयभिक्षा । अर्द्धं पिप्पल्याः अर्द्धपिप्पली । "अर्द्धं नपुंसकम्" इति । क्लीबे किम् । ग्रामस्य अर्द्धः, ग्रामार्द्धः ।

तथा च हेमचन्द्रः—(अभि० सं० लिं० पृ० ९ श्लोकः १३४) ।

परलिङ्गो द्वन्द्वों–ऽशी' इति ।

अस्य व्याख्या—

परेति । द्वन्द्वो द्वन्द्वसमासः, अंशी तत्पुरुषसमासश्च तयोः परलिङ्गः परपदस्थलिङ्गमित्यर्थः । उदाहरणं तु प्रागुक्तम् ।

यादवस्त्विह विशेषमाह—(वै० पृ० २९३ श्लोकः ५१-२) ।

द्वन्द्व–स्तत्पुरुषो–ऽप्य–न्त्यलिङ्गो–ऽश्ववडवौ नरि ।
तथै–वो–क्षवशा–वह्नरात्राहा–श्च टजन्तकाः ॥
क्लीबे संख्यापरं रात्र–मर्धा–न्ना पञ्चखार्य्य–ऽना ॥''इति॥

अस्य व्याख्या—

द्वन्द्व इति । क्लीब इति च । द्वन्द्वो द्वन्द्वसमासः तत्पुरुषः तत्पुरुषसमासोऽपि अन्त्यलिङ्गः परपदस्थलिङ्गः स्यात् । यथा—अश्वश्च बडवा च अश्ववडवौ नरि पुंलिङ्गे स्याताम् । तथैव उक्षावशौ । टजन्तकाः टच्प्रत्ययान्ता अह्नरात्राहाश्च पुंसि स्युः । संख्यापरं रात्रं क्लीबे स्यात् । अर्धात्परं रात्रं ना पुमान् पुंलिङ्गः स्यादित्यर्थः । पञ्चखारी अना अपुमान् स्त्रीक्लीबयोः स्यादित्याशयः । यथा—पञ्चखारी, पञ्चखारि । शेषोदाहरणानि प्रागुक्तानि ।

अथेदानीमिहोक्तस्यापवादमाहामरः—(अम० ना० लिं० पृ० ४६३ श्लोकः ४३) ।

अर्थान्ताः प्राद्यऽलं–प्राप्ता–ऽऽपन्नपूर्वाः परोपगाः ।
तद्धितार्थे द्विगुः संख्या—सर्वनाम—तदन्तकाः ॥

अस्य व्याख्या—

अर्थान्ता इति—अर्थोऽन्ते येषां ते अर्थान्तशब्दाः । प्रादय उपसर्गाः पूर्वे आदौ येषां ते प्रादिपूर्वाश्च अलंपूर्वाश्च प्राप्तपूर्वाश्च आपन्नपूर्वाश्चेति प्राद्यलंप्राप्तापन्नपूर्वाः शब्दाश्च परोपगाः परगामिनः वाच्यलिङ्गा इत्यर्थः । यथा–द्विजाय–अयम्, द्विजार्थः सूपः । द्विजाय–इयम्, द्विजार्था यवागूः । द्विजाय–इदम्, द्विजार्थं पयः एवं विप्राय–अयम्, विप्रार्थो वेदः । विप्राय–इदम्, विप्रार्थं वस्त्रम् ।'' अर्थेन नित्यसमासः सर्व(विशेष्य)लिङ्गता च'' (वा० २।१।३६)' इति । प्रादिपूर्वो यथा—आचार्य्यं प्रगतः = प्राचार्य्यः । वरं प्रगतः = प्रवरः । 'प्रादयो गताद्यर्थे प्रथमया' (वा०) इति समासः । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (वा २।२।१८) इति समासः । अतिक्रान्तो मालामतिमालोऽयं हारः । अतिक्रान्ता मालामतिमालेयम् । अतिक्रान्तं मालामतिमालमिदम् । खट्वामतिक्रान्तोऽतिखट्वः । 'अवादयः क्रुष्टाद्यर्थे तृतीयया' (वा०) इति समासः । अवक्रुष्टः कोकिलया–अवकोकिलः । 'पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा०)

इति समासः। परिग्लानोऽध्ययनाय- पर्य्यध्ययनः। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा० इति समासः। निष्क्रान्तः कौशाम्ब्याः–निष्कौशाम्बिः। अलं पूर्वो यथा—'अलङ्कुमार्य्यै इत्यलङ्कुमारिरयम्। अलङ्कुमारिरियम्। अलङ्कुमारि इदम्। अलंजीविकायै अलंजीविकः। अलंजीविका स्त्री। अलञ्जीविकमिदम्। प्राप्तपूर्वो यथा––प्राप्तो जीविकाम्, प्राप्तजीविको द्विजः। प्राप्तजीविका स्त्री। प्राप्तजीविकमिदम्। आपन्नपूर्वो यथा–– आपन्नो जीविकां आपन्नजीविको विप्रः। आपन्नजीविका विप्रा। आपन्नजीविकं कुलम्। ''द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः।'' इत्यनेन परलिङ्गताप्रतिषेधः समासश्च। तद्धितार्थो यो द्विगुः स वाच्यलिङ्गः। यथा––पञ्चसु कपालेषु संस्कृतः पुरोडाशः (हविर्विशेषः) पञ्चकपालः, पञ्चकपाला, पञ्चकपालं हविः। ''संख्यापूर्वो द्विगुः (२।१।५२)।'' ''संस्कृतं भक्षाः (४।२।१६)'' इत्यण्। ''द्विगोर्लुगनपत्ये (४।१।८८)'' इत्यणो लुक्। संख्या संख्याशब्दाः, सर्वनामानि सर्वनामसंज्ञकाः, तदन्तकाश्च परलिङ्गभाजः वाच्यलिङ्गाः स्युरित्यर्थः। संख्या यथा—एकः पुमान्, एका स्त्री, एकं कुलम्। द्वौ पुमांसौ, द्वे स्त्रियौ, द्वे कुले। त्रयः पुमांसः, तिस्रः स्त्रियः, त्रीणि कुलानि। चत्वारो ब्राह्मणाः, चतस्रो ब्राह्मण्यः, चत्वारि मित्राणि, चत्वारि वस्त्राणि। बहवो जनाः, बह्व्यो रमण्यः, बहूनि धनानि। षट्संज्ञकाः प्रागुक्ताः। विंशत्यादीनां लिङ्गमपि प्रागुक्तम्। शतादिकानां लिङ्गं तु नपुंसकलिङ्गानुशासन एवोक्तम्। सर्वनाम यथा—सर्वो देशः, सर्वा नदी, सर्वं जलम्। सर्वे पुरुषाः, सर्वाः स्त्रियः, सर्वाणि कुलानि। एवं परः पुमान्, परा स्त्री, परं कुलम्। देवदत्तो नाम कश्चित्, देवदत्ता नाम काचित्, देवदत्तं नाम किञ्चित्। एवमन्येऽपि ये यस्मिन्नभिधेयेऽभिधीयन्ते ते तद्वद्वाच्यलिङ्गा एव सिद्धाः। संख्यान्तको यथा––ऊनत्रयः, ऊनतिस्रः, ऊनत्रीणि। सर्वनामान्तको यथा––परमसर्वः परमसर्वाः, परमसर्वम्। इति।

तथा च यादवः—(वै० पृ० २६३-४ श्लोकः ५२-३)।

> त्रिष्व–ऽर्थः प्राक्चतुर्थ्यन्त–स्तद्धितार्थो द्विगु–स्त्रिषु।
> प्रादि–प्राप्ता–ल–मापन्ना–त्परं च प्रवरो यथा॥
> प्राप्तार्थो–ऽलङ्कुमारिश्च' ... ... ॥ इति॥

अस्य व्याख्या—

त्रिष्विति। प्राक्चतुर्थ्यन्तो योऽर्थः अर्थशब्दः स त्रिषु पुंस्त्रीक्लीबलिङ्गेषु स्यात्। तद्धितार्थो यो द्विगुर्द्विगुसमासः सोऽपि त्रिषु पुंस्त्रीक्लीबलिङ्गेषु स्यात्। प्रादयश्च प्राप्तं च अलं च आपन्नं चैषां समाहारः प्रादिप्राप्तालमापन्नं तस्मात्परं विशेष्यमुपगच्छन्ति विशेष्यलिङ्गा इत्यर्थः। यथा—प्रवरः, प्राप्तार्थः, अलङ्कुमारिश्चेति।

हेमचन्द्रोऽपि––(अभि० सं० लिं० पृ० ९ श्लोकः १३४)।

ङे–ऽर्थो वाच्यवत्' ॥ इति ॥

अस्य व्याख्या––

ङ इति। ङेऽर्थश्चतुर्थ्यर्थकोऽर्थशब्दोऽन्ते यस्य स वाच्यवत् वाच्यलिङ्गः स्यादित्यर्थः। ङेग्रहणाद् धान्येनार्थो धान्यार्थ इत्येव। अर्थग्रहणात्कुण्डलहिरण्यमित्येव।

स एवापत्यादीन्नियतलिङ्गवाचकशब्दानाह– (अभि० सं० लिं० पृ० ९ श्लोकः १३८)।

अपत्य–मिति नियताः ॥' इति ॥

अस्य व्याख्या––

अपत्यमिति। अपत्यादयो नियताः निश्चितलिङ्गा अव्युत्पन्नाः स्युरित्यर्थः। यथा–– अपत्यं दुहिता पुत्रश्च। रक्षः पुमान् स्त्री च। वेदाः प्रमाणम्, स्मृतयः प्रमाणम्। विद्या गुणः, शौर्यं गुणः।

अमरोऽपि––(अम० ना० लिं० पृ० ५३ श्लोकः २७)।

मतल्लिका मर्चिका प्रकाण्ड–मुद्घ–तल्लजौ।

प्रशस्तवाचकान्य–ऽमूनि' ... ... ॥ इति ॥

अस्य व्याख्या—

मतल्लिकेति। एते मतल्लिकादयः शब्दा नियतलिङ्गाः, न तु विशेष्यनिघ्नाः। अव्युत्पन्नाश्चेति प्राञ्चः। एषां व्याख्योदाहरणानि प्रागुक्तानि।

स एव गुणादियोगोपाधिवशतः परगामिनो ये शब्दास्तेषां लिङ्गज्ञानमाह—(अम० ना० पृ० ४६३ श्लोकः ४४)।

गुण–द्रव्य–क्रिया–योगो–पाधयः परगामिनः ॥' इति ॥

अस्य व्याख्या

गुणेति। गुणद्रव्यक्रियाणां योग उपाधिर्निमित्तं येषां ते परगामिनः। :अथ वा गुणयोगेन द्रव्ययोगेन क्रियायोगेन च य उपाधिर्विशेषणं तेन धर्मिणिप्रवृत्तास्ते धर्मिलिङ्गभाजः परगामिनः स्युरित्यर्थः। गुणयोगेन (गुणवाची) यथा––गन्धवानश्मा, गन्धवती पृथिवी, गन्धवत्कुसुमम्। शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्। एवं विद्वान्, विदुषी, विद्वत्। द्रव्ययोगेन (द्रव्योपाधिः) यथा––दण्डी पुमान्, दण्डिनी स्त्री, दण्डि गृहम्। क्रियायोगेन (क्रियोपाधिः) यथा–– पाचकः पुमान्, पाचिका स्त्री, पाचकं गृहम्।

तथा च हेमचन्द्रः—(अभि० सं० लिं० पृ० ९ श्लोकः १३४) ।

अस्त्र्या–ऽऽरोपाभावे गुणवृत्ते–राश्रया–द्वचन–लिङ्गाः ॥१॥ इति ।

अस्य व्याख्या

अस्त्रीति । आरोपस्याभावः आरोपाभावः स्त्रिया वर्जितारोपाभावस्तस्मिन्, गुणो विशेषणं प्रवृत्तिनिमित्तं तदाश्रया वृत्तिर्यस्य तस्य विशेषणवशाद्वचनं लिङ्गं च भवतः । प्रवृत्तिनिमित्तस्य गुणद्रव्यक्रियाभेदात् त्रैविध्यम् । गुणवाची, द्रव्यवाची, क्रियावाची चेति । अस्त्रीति किम् । धवनाम्नो योगात्तद्भार्यायामध्यारोपेऽप्याश्रयलिङ्गतैव प्रष्ठस्य भार्या स एवायमित्यभेदोपचारेऽपि प्रष्ठी । एवं वरुणानि इन्द्राणी इत्यादयः ।

दुर्गोऽपि—(दु० लिं० पृ० ४२ श्लोकः ८५) ।

... ... गुणादयो वाच्यलिङ्गकाः शेषाः ॥' इति ॥

अस्य व्याख्या—

गुणेति । गुणादयो गुणवचनप्रभृतयो वाच्यमभिधेयं तस्यैव लिङ्गं येषामिति । शेषाः परिशिष्टा गुणादयो गुणप्रभृतयो वाच्यलिङ्गका अभिधेयलिङ्गकाः स्युः । आदिग्रहणात् संख्या सर्वनामसञ्ज्ञाकृताश्चेत्यर्थः ।

इह प्रसङ्गवशतः क्रियाणां विशेषणान्तराण्याहामरः––(अम० ना० लिं० पृ० ३२२ श्लोकः ५७) ।

कामं प्रकामं पर्य्याप्तं निकामे–ष्टं यथेप्सितम् ॥" इति ॥

अस्य व्याख्या—

काममिति । निकामं च इष्टं चैतयोः समाहारो निकामेष्टम् । कामम्, प्रकामम्, पर्य्याप्तम्, निकामम्, इष्टम्, यथेप्सितं चैतानि षट् क्रियाविशेषणानि स्युः । यथा––'कामं रामो भुङ्क्ते स्म ।'

अथेदानीमिह विशेषमाह हेमचन्द्रः––(अभि० सं० लिं० पृ० १० श्लोकः १३५-६) ।

प्रकृते–र्लिङ्गं–वचने बाधन्ते स्वार्थिकाः क्वचित् ।
प्रकृति––र्हरीतक्यादिर्न लिङ्ग––मतिवर्त्तते ॥ २ ॥

अस्य व्याख्या—

प्रकृतेरिति । लिङ्गं च वचनं च लिङ्गवचने ते प्रकृतेः प्रकृतितः क्वचित्स्वार्थिका बाधन्ते ।

यथा—द्रवा कुटी कुटीरः । हरीतक्याः फलं हरीतकी, हरीतक्यौ, हरीतक्यः । प्रकृतिर्हरीतक्यादिलिङ्गं न अतिवर्तते । तथा चामरः—'द्विहीनं प्रसवे सर्वं, हरीतक्यादयः स्त्रियाम् ।' इति—(अम० ना० लि० पृ० १३४ श्लोकः १८) । आदिना कोशातकी कर्कटी द्राक्षेत्यादि ।

वचनं तु खलतिकादि–र्बह्वर्था ना–त्येति पूर्वपदभूता ।

अस्य व्याख्या—

वचनमिति । खलतिकस्यादूरभवानि वनानि खलितकं वनानि प्रकृतिर्वचनं नात्येति । एवं बह्वर्था पूर्वपदभूता प्रकृतिर्वचनं नात्येति । यथा—पञ्चालाः कुरवः ।

स्त्रीपुन्नपुंसकानां सह वचने स्या–त्परं लिङ्गम् ॥३॥ इति ॥

अस्य व्याख्या–

स्त्रीति । स्त्री च पुमांश्च नपुंसकं चेति स्त्रीपुन्नपुंसकानि तेषां सह वचने सति तदा परं लिङ्गं स्यात् । स्त्रीपुंसयोः पुंलिङ्गम् । यथा—शाटी च स च तौ । स्त्रीनपुंसकयोः नपुंसकम् । यथा—लता च फलं च ते । पुन्नपुंसकयोः नपुंसकम् । यथा—वृक्षश्च फलं च ते । स्त्रीपुन्नपुँसकानां नपुंसकम् । लता च वृक्षश्च फलं च तानि ।

तथा च यादवः—(वै० पृ० २९४ श्लोकः ५३ तः ५८ या०)

... ... पुमान् स्त्रीपुंसयो–र्युतौ ॥
ग्राम्या–ऽनेकशफा–ऽऽबाल–बहुपश्व–ऽन्वये स्त्रियः ।
क्लयक्लीयुतौ षण्णैक्यं वा व्यक्त्यादिलुपि युक्तवत् ॥

अस्य व्याख्या—

पुमानिति । स्त्रीपुंसयोः योषित्पुरुषयोर्युतौ योगे पुमान् पुंलिङ्गः स्यात् । ग्राम्याश्च अनेकशफाश्च आबालाश्च बहुपशवश्चेति ग्राम्यानेकशफाबालबहुपशवस्तेषां अन्वये सन्ततौ स्त्रियः स्त्रीलिङ्गाः स्युः । क्लयक्लीयुतौ नपुंसकस्य अनपुंसकयोः पुंस्त्रियोश्च युतौ योगे अथवा षण्णैक्यं नपुंसकानामैक्यं यदि तदा नपुंसकलिङ्गं स्यात् । उदाहरणं तु प्रागुक्तम् । व्यक्त्यादिलुपि एकशेषसमासे युक्तवल्लिङ्गं बोध्यम् । यथा—माता च पिता च पितरौ इत्यादि ।

परव–द्वा–ऽनुवादेषु तिङ–ऽव्यय–मलिङ्गकम् ।

अस्य व्याख्या—

परेति । वा अथवा अनुवादेषु ज्ञातार्थप्रतिपादनेषु परवत् यत्परपदस्थं लिङ्गं तदेव लिङ्गं

स्यात् । तिङ् तिङ्प्रत्ययः, अव्ययं स्वरादिनिपातश्च अलिङ्गकं निर्लिङ्गकं अर्थात्समानलिङ्गं स्यात् ।

अचः पुंसि, हलो दीर्घाः स्त्रियां, लोपध–न–त्र–साः ।
षण्डे सर्वे, गुण––द्रव्य––क्रियायुक्तार्थका–स्त्रिषु ॥

अस्य व्याख्या

अच इति । अचः अजन्तशब्दाः पुंसि पुंलिङ्गे स्युः । हलः व्यञ्जनान्ताः शब्दाः, दीर्घा दीर्घस्वरान्तशब्दाश्च स्त्रियां स्त्रीलिङ्गे स्युः । लोपधश्च नश्च त्रश्च सश्चेति लोपधनत्रसाः अर्थाल्लिकारोपधो नान्तस्त्रान्तः सान्तश्चैते सर्वे शब्दाः षण्डे नपुंसकलिङ्गे स्युः । गुणश्च द्रव्यं च क्रिया चेति गुणद्रव्यक्रियास्ताभिर्युक्तार्थका ये शब्दास्ते त्रिषु स्त्रीपुंनपुंसकलिङ्गेषु भवन्ति ।

बहुत्व–मेकता च स्या–ज्जात्याख्यायां यथा यवाः ॥
यव–श्च व्रीहयो व्रीहि–रित्य–थ स्या–द्विशाखयोः ।
द्वित्वं बहुवच–श्चै–वं द्वयं प्रोष्ठपदास्व–ऽपि ॥

अस्य व्याख्या––

बहुत्वमिति । यव इति च । जात्याख्यायां जातिसंज्ञायां, बहुत्वं बहुवचनं, एकता एकवचनं च स्यात् । यवाः यवः । व्रीहयः व्रीहिः ।' इति । अथ विशाखयोर्नक्षत्रविशेषयोः, द्वित्वं द्विवचनं, बहुवचः बहुवचनं च स्यात् । यथा––विशाखयोः विशाखासु । एवं प्रोष्ठपदासु पूर्वाभाद्रपदासु अपि द्वयं द्वित्वं बहुत्वं च स्यात् । यथा––प्रोष्ठपदयोः प्रोष्ठपदासु । इति ।

अनेक––मिति शब्दस्य तद्विशेष्यस्य चै––कता ।
संख्यार्थस्या–ऽबहुव्रीहे–र्यथा–ऽनेका वधू–रिति ॥इति॥

अस्य व्याख्या—

अनेकमिति । अबहुव्रीहेर्बहुव्रीहिसमासवर्जितस्य संख्यार्थस्य संख्यावाचकस्य अनेकं इति शब्दस्य तस्य विशेष्यस्य भेद्यस्य च एकता लिङ्गवचनयोरैक्यं स्यात् । यथा––अनेका वधूः । इति ।

अमरस्तु शूद्रवर्गे सर्वलिङ्गासंग्रहादसम्पूर्णतां परिहरति—(अम० ना० पृ० ३५ श्लोकः ४६-७) ।

उक्ता भूरिप्रयोगत्वा–देकस्मि–न्ये–ऽत्र यौगिकाः ॥
ताद्धर्म्या–दन्यतो वृत्ता–वूह्या लिङ्गान्तरे–ऽपि–ते ।

अस्य व्याख्या—

उक्ता इति। अत्र शूद्रवर्गे ये यौगिकाः शब्दाः कुम्भकार–मालाकार–मार्दङ्गिक–वैणविकप्रभृतयः काव्यनाटकपुराणप्रभृतिषु पुंलिङ्ग एव भूरिप्रयोगत्वात्प्रचुरप्रयोगदर्शनादेकस्मिन्नेव लिङ्गे नृलिङ्गे ये यौगिका उक्ता निर्दिष्टास्तेऽन्यतोऽन्यत्र स्त्रीत्वादिविशिष्टे विशिष्यवृत्तौ सत्यां ताद्धर्म्यात् विशिष्टानां विशेष्यधर्मत्वाल्लिङ्गान्तरे योषिति नपुंसके चोह्या ऊहनीयाः। अपिशब्दात् येऽयौगिका रूढा अपि मालिककरणकुलालप्रभृतयो, जातिवचनत्वाच्छूद्रादिवत् 'जातेः' (४।१।६३) ङीषि लिङ्गान्तरे स्त्रीलिङ्गे नपुंसकत्वेऽपि बोद्धव्याः। यस्यावयवशक्य एवार्थो बुध्यते स यौगिकः। यस्यावयवशक्तिमनपेक्ष्य समुदायशक्तिमात्रेणार्थो बुध्यते स रूढः। तत्र यौगिको लिङ्गान्तरे।। यथा—मालाकारी स्त्री, मालाकारं कुलम्। एवं कुम्भकारी स्त्री, कुम्भकारं कुलम्। अणणन्तत्वात्स्त्रियां ङीप्। अयौगिको यथा—करणी, कुलाली। इति—(अम० ना० अम० टी० पृ० २५० श्लोकः ४७ पं० १३तः)।

अथेदानीं लिङ्गविधायकवचनविरोधे सति तदा लिङ्गनिर्णयमाह यादवः—(वै० लिं० पृ० २९४ श्लोकः ५९)।

विरोधे[1] पूर्वदौर्बल्यं लोकतः शेष–मुन्नयेत्॥'इति॥

अस्य व्याख्या—

विरोध इति। विरोधे विप्रतिषेधे सति तदा पूर्वदौर्बल्यं स्यात्। तथा च कातंत्रे—'पूर्वपरयोः परो विधिर्बलीयान्' इति। परस्येष्टवाचित्वात्' इति—(दु० लिं० पृ० १० पं० ८)। इह शेषमनुक्तं लोकतो लोकव्यवहारात् लिङ्गमुन्नयेत् कल्पयेत्।

तथा चामरः—(अम० ना० लिं० पृ० ४६३ श्लोकः ४६)।

परं विरोधे शेषं तु ज्ञेयं शिष्ट–प्रयोगतः॥'इति॥

अस्य व्याख्या—

परमिति। विरोधे (विप्रतिषेधे) लिङ्गविधायकवचनविरोधे सति परं वचनं ग्राह्यम्, परं लिङ्गानुशासनं प्रवर्त्तत इत्यर्थः। यथा—मानुषशब्दस्य कषणभमरोपान्ता इति प्रागुक्तविधिना पुंस्त्वे एव प्राप्ते सति द्विचतुःषट्पदेत्यनेनोत्तरत्रोक्तेन स्त्रीपुंसविधिनिश्चयः। यथा—मानुषोऽयम्। मानुषीयमिति, यद्वा 'स्त्रियामीदूद्विरामैकाच्' इत्यस्यावकाशः—धीः भ्रूः। 'कृतः कर्त्तर्य्यसंज्ञायाम्' इत्यस्यावकाशः—करोतीति कर्त्ता, पचतीति पाचकः। नयतीति

---

[1] पाणिनीयेऽपि—(१) विप्रतिषेधे परं कार्यम्॥ (१।४।२) तुल्यबलविरोधे परं कार्यं स्यात्' इति। सि० कौ० पृ० १५ पं० ५।

नीः, लुनातीति लूः, इत्यादावुभयप्रसङ्गे परत्वात्त्रिलिङ्गता भवति । शेषमिति । शेषमिहानुक्तं अभिधानादिकं शिष्टानां महाकवीनां भाष्यकारादीनां च प्रयोगतो ज्ञेयम् । यद्वा अनुक्तं शब्दलिङ्गं शिष्टप्रयोगतो बोद्धव्यम् । ''लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य'' इति भाष्योक्तेरित्यर्थः । तद्शिष्यं संज्ञाप्रमाणत्वादित्यादिसूत्रप्रत्याख्यानावसरे भाष्यकारेणोक्तम् । यथा--'चलनी तितउः पुमान् ।' इत्युक्तम् । इह तितउ परिपवनं भवति' इति (पस्पशा) भाष्यप्रयोगान्नपुंसकमपि बोध्यम् । 'ताटङ्कस्ते' इत्याचार्य्यप्रयोगात्ताटङ्कशब्दस्य पुंस्त्वम् । यथा वा । 'कलिका कोरकः पुमान्' इतीहोक्तम् । 'कोरकाणि' माघप्रयोगान्नपुंसकत्वमिति । (अम० सु० व्या० पृ० ४६३ स्तं० २तः, अम० अम० वि० व्या० पृ० ३७५-६ तः) ।

अथेदानीं ग्रन्थकारः पद्यद्वयेन ग्रन्थमिममुपसंहरति--

वामे तटे निर्जरनिम्नगायाः खण्डाभिधः संवसथोऽस्ति तत्र ।
श्रीकीर्तिदेव्यास्तनया अभूवँस्त्रयोऽग्रजस्तेषु मुकुन्दनामा ॥१॥
तेनाश्विकुञ्जरभुजङ्गशशाङ्कतुल्ये, वर्षे शके तपसि मासि सितान्यपक्षे ।
भास्वत्तिथौ शशिनि लिङ्गविदां हिताय, लिंगानुशासनमिदं रचितं सुरम्यम् ॥२॥

इति श्रीमद्गढवालदेशान्तर्गतदेवप्रयागसमीपवर्तिखण्डग्रामनिवासिना श्रीमत्पण्डित रघुवरदत्ततनुजनुषा मुकुन्ददैवज्ञेन विरचितं लिङ्गानुशासनं तच्च स्वरचितया विमलाख्यया संस्कृतव्याख्यया संस्कृतटिप्पण्या च समलङ्कृतं समाप्तिमगमत् ।

समुदाहृत ग्रन्थानां सूचिपत्रम्

ग्रन्थनाम	सङ्केतनाम	ग्रन्थकारनाम	सङ्केतनाम	आवृति एवं सन्,सम्वत्	प्रकाशक
वेजयंती	वै०	यादव प्रकाश	या०प्र०	प्रथमावृति, सन् १८९२	मद्रास संस्कृत ऐण्ड वर्नाक्यूलरटेक्स्ट पब्लिकेशन सोसायटी, मद्रास
त्रिकाण्डशेष	त्रि० शे०	पुरुषोत्तम दव	पु० दे०	प्रथमावृति, सन् १९२९	खेमराज श्रीकृष्णदास, श्री वेंक्टेश्वर प्रेस, बम्बई
हारावली	हा० व०	,,	,, ,,	,,	,, ,, ,,
शब्दभेद प्रकाश (द्विरूपकोष)	स० भे० प्र०	,,	,, ,,	,,	,, ,, ,,
अष्टाध्यायी (सिद्धान्त कौमुदी)	(सि० कौ०)	पाणिनि	पा० नि०	प्रथमावृति, सम्वत् १९५७	,, ,, ,,
नामलिङ्गानुशासन् (अमरकोश)	अम०ना०लि०	अमर सिंह	अमर	चतुर्थावृति सम्वत् १९१५	तुकाराम जावजी, निर्णय सागर प्रेस, मुंम्बई
अभिधान संग्रह (अभिधान चिन्तामणि)	अभि०चि०	हेमचन्द्र	हैम	प्रथमावृति सन् १८९६	,, ,, ,,
शब्दभेद प्रकाश (शब्द द्वैध कोश)	स० भे० प्र०	पुरुषोत्तम देव	पु० द०	तृतीयावृति सन् १९२९	,, ,, ,,
एकाक्षर कोष	ए० को०	,,	,, ,,	,,	,, ,, ,,
अभिधान संग्रह (हेमलिङ्गानुशासन)	अभि० स० हे० लि० शा०	हेमचन्द्र	हम	प्रथमावृति सन् १८९६	,, ,, ,,
दुर्गलिङ्गानुशासन	दु० लि०	दुर्गसिंह	दु० सि०	प्रथमावृति सन् १९५२	डा० कतरे, दक्खन कालेज, आर्य संस्कृत प्रेस, पूना
नानार्थ रत्नमाला	ना० र० मा०	इरुगपादंडाधिनाथ	इ० दं०	प्रथमावृति सन् १९५४	,, ,, ,,
शिवकोश	शि० को०	शिवदत्त मिश्र	शि० मि०	प्रथमावृति सन् १९५२	,, ,, ,,
अनेकार्थतिलक	अने० ति०	महीप	म० प०	प्रथमावृति सन् १९४७	,, ,, ,,
नानार्थमञ्जरी	नाना० मं०	राघव	रा० व०	प्रथमावृति सन् १९५४	,, ,, ,,
एकार्थनाममाला	एक०ना०मा०	सौभरि	सौ० रि०	प्रथमावृति सन् १९५५	,, ,, ,,
द्वयक्षरीनाममाला	द्वय०ना०मा०	,,	,,	,,	,, ,, ,,

ग्रन्थ नाम	संकेतनाम	ग्रन्थकारनाम	संकेतनाम	आवृति एवं सन्, सम्वत्	प्रकाशक
शब्दरत्नसमन्वय	श० र० स०	शाहजी महाराज	शा० म०	प्रथमावृति सन् १९३२	डा० कतरे, दक्खन कालेज, आर्य संस्कृत प्रेस, पूना
पर्य्याय-रत्न-माला	प० र० मा०	माधवकर	मा० क०	प्रथमावृति सन् १९४६	पटना
पर्य्यायमुक्तावली	प० मु० व०	हरिचरण सेन	ह०च०से०	प्रथमावृति सन् १९४७	,,
राजनिघण्टु (अभिधान चूड़ामणि)	रा० नि०	नरहरि पण्डित	न०ह०	द्वितीयावृति सन् १९२७	विनायक गणेश आप्टे, आनन्दाश्रम, पूना
अनेकार्थध्वनिमञ्जरी	अने०ध्व०मं०	महा क्षपणक	म०क्ष०ण०	प्रथमावृति ई॰सन् १९३४	जयकृष्णदास हरिदास गुप्त, विद्याविलास प्रेस, बनारस
अनेकार्थसंग्रह	अने० सं०	हेमचन्द्र	हैम:	,, ,, १९२९	,, ,,
मेदिनीकोष	मे० को०	मेदिनीकर:	मे० क०	,, ,, १९४०	,, ,,
विश्वप्रकाशकोष	वि० प्र०	महेश्वर:	म० श्व०	,, ,, ,,	,, ,,
शब्दार्थचिन्तामणि	श० चिं०	सुखानन्दनाथ	सु०नं०ना०	प्रथमखण्ड,प्रथम भा॰द्वितीय खण्ड प्र॰भा॰, ई॰स॰ १८६४	घासीराम कन्हैयालाल, संस्कृत यंत्रालय, आगरा
,,	,,	,,	,,	तृ प्र॰भा॰ ई॰स॰ १८८३ चतु॰,प्र॰भा॰ सन् १८८५	वंशीधर उदयपुर, राजकीय पत्रालय, बड़ोदा
वामनीय लिङ्गानु-शासन	वा० लिं०	वामन	वा० न०	,, ,,	गवर्मेन्ट औफिस हावन्वस् दि महाराजा गायकवाड, (बड़ौदा)
अभिधानरत्नमाला (हलायुध कोष)	ह० यु०	हलायुध	ह० वु०	,, १९५९	भार्गवभूषण प्रेस, बनारस
संस्कृतशब्दार्थ कौस्तुभ	सं० श० कौ०	द्वारिका प्र. शर्मा एम॰आर॰ए॰एस॰	द्वा० प्र०	,, १९३८	रामनारायण बुकसेलर, इलाहाबाद

टीकानाम	संकेतनाम	टीकाकारनाम	संकेतनाम	ई. सन् तथा आवृति	प्रकाशक
अमरस्य व्याख्यासुधा (अमरस्य)	व्या० सु०	भानुजी दीक्षित	भा० दी०	चतुर्थावृति ई॰सन् १९१५	निर्णयसागर प्रेस, बम्बई
अमरविवेकटीका (त्रिकाण्डशेषस्य)	अ० वि०	महेश्वर	म० श्व०	प्रथमावृति सन् १८९०	,, ,,
नाम चन्द्रिका	ना० चं०	विष्णुदत्त	वि० द०	,, १९२९	श्री वेङ्कटेश्वर प्रेस, बम्बई

शब्दानुक्रमणिका

मुकुन्दकोषस्थ लिङ्गानुशासनस्यास्य

॥ सूचना—अनुक्रमणिकायामस्यां शब्दाः पृष्ठपंक्तिक्रमेण संन्यस्ताः ॥

आ

घ

च

छ

ज

फ

ब

श

===

टिप्पणिस्थ-शब्दानुक्रमणिका

मुकुन्दकोशस्थलिङ्गानुशासनवर्गस्यास्य

शुद्धिपत्रम्

मुकुन्दकोषान्तर्गतलिङ्गानुशासनवर्गस्य

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
४	४	गुणादयः	घुणादयः
,,	५	स्वयथु–	श्वयथु–
,,	९	अंङ्कुर––	अङ्कुर–
५	३	(अच्)	(अप्)
,,	२८	सेशेवधिः।	शेवधिः
६	१०	न्यादनम्=	न्यदनम्=
७	१०	न-यौ	न-यौ च
,,	१४	सान्ताः कंस-मास-दास-चास–	सान्ता अनेहो-वेध-श्चन्द्रमः–
८	२३	इदं=	इदं वयः=
१०	२९	गरुत=	गरुत्=
११	२०	त्यादय।	इत्यादयः ।
१२	२८	ऋतु	क्रतु
१३	२२	द्व्य ः ।	द्व्यहः ।
१४	४	ताल	स्ताल
,,	१२	व्रीहग्न्योः	व्रीह्यग्न्यो
,,	,,	अनातोधे आतोध	अनातोद्ये आतोद्य
१५	२८	धर्म्मः।	घर्म्मः ।
१६	१५	गुच्छस्तवके	गुच्छः स्तवके
१७	१९	इद्रिये।	इन्द्रिये ।
१८	६	बुद्वूदः=	बुद्बुदः=
,,	१७	पूर्वाह्व	पूर्वाह्ण
१९	२१	ओसन	आसन
२०	४	माध्ये	माघ्ये
,,	११	ऽमित्रौः––	ऽमित्रौ
,,	१४	व्यज्जनम्।	व्यञ्जनम् ।
,,	२२	पुष्पः=	पुष्यः=
,,	२५	पूर्वाह्वः। अपराह्नः	पूर्वाह्णः। अपराह्णः।
२२	१३	ल्लोलोवैरि	ल्लोलवैरि
२३	२५	योगषु	योगेषु
२४	१३	शाहः प्रभृतयः	शाहप्रभृतयः।
२५	५	काफादि	कफादि
,,	२६	मुज्जा	मुञ्जा
२६	२	योऽङ्ग	योऽङ्गु
,,	२७	वेंदिः । समह	वेंदिः समूह
२९	१८	भूसौ	भूमौ
,,	२१	पुंस्त्वरसूचना	पुंस्त्वसूचना
३०	१२	विटप	विटपे
,,	१८	शराजि	शूराजि

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
३१	२	योषिती	योषिति
,,	१९	वराश्यृ-र्षिः	वराश्यृ-र्षिः
,,	२१	अञ्जलि-घृणिः।	अञ्जलि-घृंणिः ।
,,	२३	जन्तः।	जन्तुः ।
३२	१८	प्रकाराभासु	प्रकारभास्सु
,,	,,	पृ० ३३०	पृ० २३०
३२	२१	वह्निर्वेश्वा	वह्निर्वैश्वा
३३	१९	श्लोष्मो	श्लेष्मो
३५	५	वसन्मञ्चलः	वसनाञ्चलः।
,,	८	वत्त्यौं,=वस्त्रान्ते	वत्त्यौंर्वस्त्रान्ते
३६	४	जीह्वा	जिह्वा
,,	१९	अमरोस्त्वाह––	अमरस्त्वाह–
,,	,,	तिथयोर्द्वयोः"	तिथयो द्वयोः!"
३७	३	स्पृक्वा	स्पृक्का
,,	२०	विद्युतिः	विद्युति
,,	२९	गीवा	ग्रीवा=
३९	१६	सरत्नद्रुमे	सरलद्रुमे
४०	२३	मुष्टितला	मुष्टितता
,,	२९	पुमान्यार्ष्णि	पुमान्पार्ष्णि
४१	८	स्त्र्यस्त्र्यरु–	स्त्र्यस्र्यरु–
,,	९	पृ० १३१	पृ० ४३१
,,	१२	लताग्रेज्स्त्रौ	लताग्रेऽस्त्रौ
,,	१८	ह्री––=	ह्रीः=
,,	२१	स्रुः=	स्रूः=
,,	२४	रूपणि	रूपिणि
४२	३	नी, लुनाति	नीः, लुनाति
,,	२८	एवानस्तु	एवान्यस्तु
४३	९	मेययोः	मेतयोः
,,	१२	काकणि–	काकिणि–
४५	१२	=संग्रणी	=संग्रहणी
,,	१४	परम्परा–	परस्परा–
,,	१५	यात्युक्षी=	व्यात्युक्षी=
,,	२८	पृ० ३५	पृ० ३५७
४७	६	प्रहणं	प्रहरणं
४७	९,१०	प्रहणमस्यां	प्रहरणमस्यां
४८	१५	रक्षाबन्दुषु	रक्षबिन्दुषु
,,	१७	गज्जा	गञ्जा
४९	७	मूर्वाऽऽड्योः	मूर्वाऽऽढ्योः

सूचना––इहास्य ग्रन्थस्याध्ययनात्प्रागभीष्टपाठस्य शुद्धिपत्रतः संशोधनं परमावश्यकमस्ति ।

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः	पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
४९	११	शल्पम्	शल्यम्	९८	५	र-रुं याऽन्तं	र-रु-या-न्तं
	१५	गृद्या=	गृह्या=	१००	२८	अयोधनम्	आयोधनम् ।
५०	२६	सर्वं साधु	सर्वं समं साधु	१०३	४	क्रमो-यज्ञे	क्रमो-यज्ञे
५१	४	ङ्याबूङत	ङ्याबूङन्त	१०४	८	प्रयय:	प्रत्ययः
५६	४	हिक्वा	हिक्का	१०५	३	कालधिकार	कालाधिकार
,,	,,	उर्ध्वे	ऊर्ध्वे	१०६	६	भरणदिग्रहः।	भरणादिग्रहः ।
,,	५	चेटि	चेटी	१०७	२३	पर्याया	पर्य्यायो
,,	,,	हिक्वा	हिक्का	१०९	१२	षष्ठा-श्छाया	षष्ठ्या-श्छाया
,,	९	क्षरिस्वामी—	क्षीरस्वामी——	११०	८	समहेऽर्थे	समूहेऽर्थे
,,	२१	भिरुकेति।	झिरुकेति ।	१११	२	यनां समूहः।	यूनां समूहः ।
६१	१५	नामः,	नाभः,	,,	९	औग्दात्र=उग्दातु भविः	औद्गात्रम् = उद्गातुर्भावः
६२	१६	माडिका	माढिका				
,,	२४	काकिणी	काकिनी	,,	२०	रवेनाह हेमः——	रवेणाह हेमः——
६३	२१	प्रियङ्ग——.	प्रियङ्गु——	११२	९	मार्दीकेति	मार्द्वीकेति
६४	७	किङ्गिण्या	किङ्किण्या	११६	१६	मिथुनस्मशान	मिथुनश्मशान
६७	१४	भत्रा	भस्त्रा	११८	१६	समासाङ्ग,	समासाङ्गं,
६९	१३	काच्यां	काञ्च्यां	११९	५	वृत्तिमन्तीरुजो	वृत्तिमन्नीरुजो
७०	१७	घमनिः	धमनिः	१२०	५	निकुरम्बकम्=	निकुरम्बम्=
७२	२५	त्रिशन्तु ताः	त्रिंशत् ताः	,,	१५	क्षेत्र-सन्त्रम्॥	क्षेत्र–सत्त्रम्॥
,,	,,	काला	कला	,,	२७	वक्त्रम्=	वक्रम्=
७६	२७	मांसो।	मांसी ।	१२२	१४	२२२ पं०५	२२२ पं० ६
७७	२५	दन्त्याञ्च	दन्त्याश्च	१२३	५	प्राह्लापरा	प्राल्लापरा
७८	५	त्रिस्वल्पे	त्रिष्वल्पे	,,	११	नपुँसकलिङ्ग वा	नपुँसकलिङ्गं वा
,,	१०	'वापिः'	वापी'	,,	२०	क्षोणिभाय्ययोः।"	श्रोणिभार्य्ययो ः॥'
७९	२४	६५)।	६५)। आर्द्रा=नक्षत्रम्	,,	२१	युगान्तर	युगानन्तर
८०	१५	श्लेष्मादिस्रवः,	श्लेष्मादिस्रावः,	,,	२६	आर्दकम्	आर्द्रकम्,
८३	६	मालिनाम्बु	मलिनाम्बु	१२४	८	आगारम्=	अगारम्=
८४	६	शाटि-भार्चतिः।	शाटि-भाती(टी) ।	,,	२०	संहनम्,	संहननम्,
,,	१७	विदी विदिः	विटी विटिः=पीतचन्दनम्	१२५	१६	कडुबादिभिः।	कुडुबादिभिः ।
,,	१९	व्राहिर्यवादिः।	व्रीहिर्यवादिः ।	१२६	२४	जातू——	जानू——
८५	९	विंद्रिधि–	विद्रधि–	१२७	२५	पुण्ड्राश्चभूषा	पुण्ड्राश्वभूषा
,,	१०	कीर्ति, इति।	कीर्तिः, इति ।	१२८	१६	मणिक्यम्=	माणिक्यम्=
,,	२२	सम्बन्ध्याः)॥	सम्बर्य्याः)॥	१३०	४	शुभाभुभकर्म	शुभाशुभकर्म
,,	,,	सम्बध्या=सि०	सम्बरी=शतमूली।सि.	,,	२८	शालुक——	शालूक——
८९	१०	तारिर्दशायां	तरिर्दशायां	१३१	११	कीरीटं	किरीटं
९०	२	ह्लदिनी	ह्लादिनी	,,	२०	दारुणी	दारुणि
९२	१७	कच्छुः=	कच्छूः=	१३२	१५	मङ्कुदे-ङ्गद	मङ्गुदे-ङ्गुद
,,	२५	पूर्गीद्वारः)॥	पूर्गीद्वारिः)॥	१३४	२	स्त्रीपंस	स्त्रीपुंस
९३	९	वान्ति	वान्तिः	,,	१२	युद्ध च	युद्धं च
,,	,,	सूचित-स्नाश्च	सूचित-स्ताश्च	,,	१९	स्यातमहा	स्यान्महा
,,	१७	गो-दृषद्	गोर्दृ-षद्	,,	२६	रङ्ग च	रङ्गं च
९४	२७	विप्रट्=	विप्रुट्=	१३५	६	कौशल्यादि	कौशलादि

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
१३६	२	बुक्वो	बुक्को
१३७	१	नान्ततद्धि भेदता	नान्तर्द्धिभेदता
१४२	७	तर्कं ह्यदश्चि	तर्कं ह्युदश्वि
१३८	१४	दश्चिता	दश्विता
१४०	१८	विप––	विय––
१४१	११	रूप्य ।	रूप्यम् ।
१४४	११	जहादि	जाहादि
१४५	६	शाश	शशा
,,	९	विशेषम् ॥	विशेषणम् ॥
१४७	१	आकारः	आकरः
,,	२०	बोलेऽङ्गह्लियोः ।	बोलेऽङ्गसिह्लयोः ।
१४८	१०	अल्पादेव्या	अल्याख्या
१४९	१	हारा ।	हाराः ।
,,	१७	क्षुद्रु	क्षुद्र
१५१	१०	सन्नाह,	सन्नाहः,
१५२	४	मुद्गर	मुद्गरः,
,,	२३	ना समी	ना स्यात्समी
,,	२६	नवोद्विद् ।	नवोद्भिद् ।
१५३	३	शङ्कपु ।	शङ्कुषु ।
,,	१७	तर्को ।	तर्की ।
,,	,,	शास्त्र	शस्त्र
,,	२३	वेलसः	वेतसः
१५४	१३	उर्मिः	ऊर्मिः
,,	२४	पञ्चना	पञ्चता
१५५	२३	मुष्टनो	मुष्टिनो
,,	२६	कफोणावापि	कफोणावपि
१५८	१९	तद्गाद्वान	तद्वानगुणा
१६०	३	आरण्य	अरण्य
,,	,,	मुत्पन्नम्	मुन्यन्नम् ।
,,	५	घनम्	धनम्
१६१	६	वचार	विचार
,,	१२	जागराः,	जागरः,
,,	१८	वीडः,	व्रीडः,
१६४	२५	वितस्ति	वितस्ती
१६५	५	तिलान्ते	तिलान्ने
,,	२६	सि० कौ०	शि० को०
१६६	३	अन्नन्	अन्नम्
,,	४	प्रसृति,	प्रसृती
,,	५	त्रिकाः=	त्रिका=
,,	१६	वाह्व––	वाह्व––
१६७	३	रेणुश्च	रेणुश्च
,,	१४	भ्रमदीनां	भ्रमरादीनां
१६७	१७	कुम्भकारः.....	कुम्भकारः कंसकारः
,,	२९	चर्म्मकरः	चर्म्मकारः
१६८	३	तज्जातिरूया	तज्जातिरल्पा
१६९	५	बर्हि-बालो	बर्हि-,बाली
,,	,,	ह्रीबरार्थे	ह्रीबेरार्थे
१७०	१८	धर्म––	घर्म––
१७१	२	धर्मे	घर्मे
,,	१३	विधुतुन्दे ।	विधुन्तुदे ।
१७२	२	वर्द्धः ।	वर्द्ध्रः ।
,,	२१	न द्वयो	न द्वयोः
१७३	१५	कूलकौ	कूलकौ
१७३	२४	अनार्द	अनार्द्र
,,	२६	पेटकम्=	पिटकम्=
,,	२७	तालुकम्=	तालकम्=
१७४	२	मिष्क––	निष्क––
,,	१३	अस्य व्याख्या	एषां व्याख्या
,,	१६	....	सूतकः सूतकम्=पारदः 'सूतकोऽस्त्री पारदे न द्वयोर्जनौ ॥ इति मेदिनी ।
,,	२१	करकम्=	मरकम्=
,,	२७	निदाघोघम	निदाघोद्यम
१७५	६	तलयोरभेदः ।	रलयोरभेदः ।
१७६	३	स्यादङ्गरीयकम् ।'	स्यादङ्गुरीयकम् ।'
,,	२१	मेंघो (वर्षो) त्पले,	मेंघो (वर्षो) पले,
,,	२६	सैन्य च	सैन्यं च
१७८	१८	कुल्मासः,	कुल्माषः ।
१७९	३	अनुतर्षो ना	अनुतर्षोऽना
,,	९	हिङ्गबाह्लीक	हिङ्गुबाह्लीक
,,	११	स्तं० पं० १०	स्तं० २ पं० १०
,,	१६	नरे पुखन्न	नखरे पुन्न
,,	२०	सारसतम्	सारसनम्
१८०	२४	(टोपः)	(टोपधः)
,,	२६	काशकुकाशङ्कुश	काशकुशकाशाङ्कुश
१८३	२७	उटस्तृण	उटजस्तृण
१८४	२०	वासांसि	वासंसि
,,	२१	ह्माढकः,	आढकः,
,,	२३	ह्माढको	आढको,
१८५	१६	घौताञ्जन्यां	धौताञ्जन्यां
१८५	१८	दिभिदुर्गमं	दिभिर्दुर्गमं
१८७	२०	अपः––	अप––
१८८	११	मित्येतदका	मित्येतदेका
१८९	१	शस्त्राभद्यं	शस्त्राभेद्यं

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
१८९	६	जद्यन्यं	जघन्यं
,,	१०	निपुतं	नियुतं
१९१	५	श्लोकः ११) ।...	श्लोकः११)। वियूथः वियूथम्=पक्षिवृन्दम् ।
१९२	५	पलकेऽपि	फलकेऽपि
१९६	१	ज्ञेययाक्रीड	ज्ञेयमाक्रीड
,,	८	द्विपि,	द्वीपि,
२००	३	चक्र-चेक्र—	चक्र-चुक्र—
,,	१७	कङ्गाल	कङ्काल
,,	२८	सूत्र तु	सूत्रे तु
२०१	१६	आलिञ्जर	अलिञ्जर
,,	२८	पटाहाष्टा	पटाट्टाष्टा
२०३	२१	सङ्गगः,	सङ्गमः,
२०४	१५	ॠतुराजः ।	ऋतुराजः ।
२०५	१३	पारिहार्य्य	पारिहार्य्य
,,	१५	करण्टकः,	करकण्टकः,
२०६	८	सहस्रयुतम्	सहस्त्रायुतम्
,,	१०	शेफकेशो'	शेफकोशौ'
,,	१७	स्यात्काक्षयाढक्यो	स्यान्काक्ष्याढक्यो
२०७	४	मथो गुणो ।'	मथो गुणे ।'
२०९	५	नुपूरः, नुपूरम्=	नूपुरः, नूपुरम्=
,,	६	नूपूरो	नूपुरो
२०९	१६	परिपाटीः,	परिपाटिः,
२११	५	ललाटायोः ।'	ललाटयोः ।'
२१२	१५	कबल कबलो	कबलः कबतो
२१६	३०	जषान्तरे	झषान्तरे
२१९	२९	वनरान्तरे	वानरान्तरे
२२०	१५	बर्ह	बर्हं
२२१	१४	जीवात्वादो दार्वादो	जीवात्वादौ दार्वादौ
२२२	१९	(समस्त्वात्)	(समस्तत्वात्)
२२८	६	नालकाण्डे मृणाल च	नालं काण्डे मृणाले च
,,	१३	बिम्बोऽत्री	बिम्बोऽस्त्री
२२९	१	ऽधये	ऽधमे
२३४	७	विदुर्मलतायावकं	विदुर्लतायावकं

पृष्ठे	पंक्तौ	अशुद्धशब्दाः	शुद्धशब्दाः
२२२	३५	अपराद्ध तु	अपराद्धं तु
२३७	४	अर्धचेति ।	अर्धर्चेति ।
२३७	२६	मण्डल,	मण्डन
,,	२७	कूच,	कूर्च,
२४०	१७	मृत्मय—	मृन्मय—
,,	२७	कन्यान्याकुब्ज	कन्याकुब्ज
२४१	१६	इषद्धास्यम्	ईषद्धास्यम्
२४५	२	अलाबु-जम्बु—	अलाबु-जम्बू-डु
,,	२३	तयोदप्येते	तयोरप्येते
२४८	२९	त्रभुवनम्=	त्रिभुवनम्=
२४९	४	विषाभा	विभाषा
२५१	४	ऽनुतष,	ऽनुतर्षे
२५२	१६	दृढेञ्यलिङ्ग	दृढेञ्यलिङ्गं
,,	२२	पूर्वयौरस्त्य	पूर्वपौरस्त्य
,,	२३	आभरणाः,	आभरणा,
२५३	९	फूलादौ,	पूलादौ,
,,	१०	इष्वन्ता शब्दाः	इष्वन्ताः शब्दाः
,,	२६	'गौणी	'गोणी
२५५	३	तूणी निल्यां	तूणी नील्यां
,,	१६	श्लोकः४४) ।....	पिठरः, पिठरी,पिठरम्= उखा, स्थाली, ओदन-पचनपात्रम् ।
,,	२१	स्रवादौ	स्रुवादौ
२५७	२१	धूलो पुष्परागे	धूलौ पुष्परागे
२५९	१९	गन्धिधना	गन्धिघना
,,	२०	त्रिलिङ्यामिति	त्रिलिङ्ग्यामिति
,,	,,	'त्रिलिङ्याम्'	'त्रिलिङ्ग्याम्'
,,	२४	गन्धवना	गन्धघना
२६२	१२	आचार्य्य-त्वि–	आचार्य्य-र्त्वि–
२६४	९	रागादि " इत्यण्	रागाद् " इत्यण्
,,	१९	दस्य-त्तिङ्	अस्म-त्तिङ्—
,,	,,	कुकुटश्च मयूरी च कुकुटमयूर्यौ	कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ
२७२	४	पूर्वपदभूता ।	पूर्वपदभूताः ।